पूर्णप्रज्ञसंशोधनमन्दिरम्
नवदेहलीस्थकेन्द्रसर्वकारीयशिक्षणमन्त्रालयाधीनकेन्द्रीयसंस्कृतविश्वविद्यालयेन
(राष्ट्रियसंस्कृतसंस्थानेन) 'अदर्शशोधसंस्थानम्' इति सम्मानितम्

ग्रन्थसम्पादनशास्त्रम्

एस्. जगन्नाथः
मैसूरु

प्रकाशनम्
पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्, डा.श्री विश्वेशतीर्थस्वामीजी मुख्यमार्गः, कत्तरिगुप्पे मेन् रोड् , बेङ्गलुरु - ५६००७०

पूर्णप्रज्ञसंशोधनमन्दिरम्
नवदेहलीस्थशिक्षणमन्त्रालयाधीनकेन्द्रीयसंस्कृतविश्वविद्यालयेन
'आदर्शशोधसंस्थानम्' इति सम्मानितम्

ग्रन्थसम्पादनशास्त्रम्

रचयिता

डा. एस्. जगन्नाथः

मैसूरु

प्रकाशनम्

पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु - ७०

२०२५

पूर्णप्रज्ञसंशोधनमन्दिरग्रन्थमाला – ११३

ग्रन्थसम्पादनशास्त्रम्

ISBN : 978-93-81275-39-9

रचयिता

एस्. जगन्नाथः, मैसूरु

प्रकाशनम् -

पूर्णप्रज्ञसंशोधनमन्दिरम्

पूर्णप्रज्ञविद्यापीठम्, कत्तरिगुप्पा मेन् रोड्, बेङ्गलूरु - ७०

पुटानि	: xxvi + 384
प्रथममुद्रणम्	: २०१४
द्वितीयमुद्रणम्	: २०२५
मुद्रितपुस्तकसङ्ख्या	: ५००
मूल्यम्	: ३०० रूप्यकाणि
मुद्रणालयः	: Shankar graphics inc. jayanagar, bengaluru - 560 070 mob.: 9845220049

Poornaprajna Samshodhana Mandiram
Recognised as 'Adarsha Shodha Sansthan'
by Central Sanskrit University, Ministry of Education,
Govt. of India, New Delhi

GRANTHA-SAMPĀDANA-ŚĀSTRAM

Authored by
Dr. S. Jagannatha
Mysuru

Published by
Poornaprajna Samshodhana Mandiram
Poornaprajna Vidyapeetha, Katriguppa Main Road,
Bengaluru-70

2025

Poornaprajna Samshodhana Mandira Granthamālā-113

GRANTHA-SAMPĀDANA-ŚĀSTRAM

ISBN : 978-93-81275-39-9

Authored by **S. Jagannatha,** Mysuru

Published by **Poornaprajna Samshodhana Mandiram**
Poornaprajna Vidyapeetha,
Katriguppa Main Road, Bengaluru-70

First Edition : 2014
Second Edition : 2025

Copies : 300

This publication is brought out by the generous financial help of

Central Sanskrit University, New Delhi

Pages : xxvi +384

Price : Rs. 300/-

Printed by : **SHANKAR GRAPHICS INC.**
Jayanagar, Bengaluru - 560 070
Mob.: 9845220049

अनुग्रहसन्देशः

प्राचीनमातृका अवलम्ब्य शोधकर्मणि प्रवृत्तानां शोधविद्यार्थिनां मार्गदर्शकमिदं 'ग्रन्थसम्पादनशास्त्रम्' इति ग्रन्थं समर्पयितुं सन्तुष्टा वयम् । अप्रकाशितस्य ग्रन्थस्यैकस्य सम्पादने बहुकाठिन्यमनुभवन्ति शोधच्छात्राः । यतो हि नानालिपिबद्धमातृकावगमार्थं प्रथमं नैकलिपिज्ञानं सम्पादनीयम् । मातृकान्तरासु विद्यमानानि पाठान्तराणि सङ्ग्रहणीयानि । मूलमातृकायाम्, आनीतासु मातृकासु वा लेखकप्रमादायत्ता दोषाः यदि भान्ति तदा सम्भावितः शुद्धपाठः प्रदेयः । अपूर्वविषयोपबृंहित उपोद्घातः सज्जीकरणीयः । नैकविधपरिशिष्टनिर्माणं कर्तव्यम् । एतादृशसन्दर्भे विद्यार्थिनां कथं तत्र लिपिज्ञानं सम्पादनीयम्, कथं वा मातृकासु प्रमादा भवन्ति बुद्धिपूर्वका अबुद्धिपूर्वकाश्चेत्येतत् ग्रन्थेऽस्मिन् विस्तरेण निरूपितम् । ग्रन्थस्यास्य परिशिष्टविभागे चतुर्दश सूपयुक्ता विषयाः प्रदत्ताः । नूनमयं ग्रन्थप्रवरः विदुषां विद्यार्थिनां चोपकाराय कल्पत इति विश्वसिमः ।

शोधग्रन्थस्यास्य प्रणेतारं सुधीप्रवरं जगन्नाथनामानं सामोदम् अभिनन्दामः । अनेन च विदुषा संस्कृतवाङ्मये नैके प्रबन्धाः विद्वज्जनोपादेयाः प्रणीता इत्यत्र विद एव प्रमाणम् । अस्मदाराध्यः श्रीमध्ववल्लभः कृष्णोऽस्यायुरारोग्यसमभिवर्धनेन इतोऽपि श्रेयस्करीं सुरसरस्वतीसेवामनेन स्वीकरोत्विति सम्प्रार्थयामहे ।

श्रीश्रीविश्वेशतीर्थश्रीपादाः

श्रीपेजावर-अधोक्षजमठः, उडुपि

श्रीश्रीविश्वप्रसन्नतीर्थश्रीपादानाम्

अनुग्रहसन्देशः

भारतदेशेऽस्मिन् ज्ञानपरम्परा अत्यन्तं पुरातनी तैस्तै ऋषिभिः, आचार्यैः ग्रन्थकारैश्च नूनं संवर्धिता नानाविधतालपत्र-भूर्जपत्रादिष्वाधृता अस्मत्पर्यन्तं प्रवहति । तत्र च कोषा एव एतादृश-ज्ञानपरम्परायाः जीवानुभूताः । बहुविशाले देशेऽस्मिन् कोषा अपि नानाविधलिपिभिर्ग्रथिता विलसन्ति । तस्मात् भारतीयज्ञानपरम्परायाः सम्यगवबोधे ताळपत्रादिकोषाध्ययनं परमं स्थानमाभजति । अतः तादृश-कोषाध्ययनोपयोगी 'ग्रन्थसम्पादनशास्त्रम्' इति नाम्ना ग्रन्थः विद्वद्वर्येण डा. एस्. जगन्नाथमहोदयेन विरचितः प्रकाशित आसीत् पूर्णप्रज्ञ- संशोधनमन्दिरेण । अयं च ग्रन्थोऽत्यन्तं जनप्रिय आसीदिति कारणेन तस्य पुनर्मुद्रणं विधीयत इति प्रमोदस्यावसरः ।

ग्रन्थकर्तारं डा. जगन्नाथवर्यम् अस्मदाराध्यौ श्रीरामविठ्ठलौ समनुगृह्णीतामिति प्रार्थयामहे । पूर्णप्रज्ञसंशोधनमन्दिरम् एतादृशकार्येषु निरन्तरं व्याप्रियाद् इत्याशास्महे ।

श्रीश्रीविश्वप्रसन्नतीर्थश्रीपादाः

श्रीपेजावर–अधोक्षजमठः, उडुपि

DIRECTOR'S NOTE

I have immense pleasure to submit 'Grantha-sampadana-shastram' which is essential for manuscriptology students and scholars. The editing of the manuscript is very difficult task. Only learned scholars and experts in Indian scripts can edit a text and may provide justification to the unpublished manuscript edition. Author of this work, Dr. S. Jagannatha, a well known scholar in the field of Literature, grammar and rich experience in editing of rare and valuable manuscripts. He is serving as Research Assistant in Oriental Research Institute, University of Mysore from 2 decades and published valuable works. His involvement and skill in edition of rare manuscript is known to the learned scholars of India.

The present edition is focussing a new light on manuscripts-oldest work serviving in manuscrpits - some important works preserved in Library- form and size of manuscript- definition or qualities of scribe-famous Shlokas on scribe-writing instruments- history of preparing catalogues and valuable 14 appendixes etc. He typed whole text and read the proof of the text with keen interest.

I prostrate with sincere devotion to Sri Vishveshatirtha Swamiji who has been guiding the activities of the Samshodhana Mandiram for its all-round development.

I sincerely express gratitude to the authorities of Rashtriya Sanskrit Samsthan, New Delhi for their continuous encouragement in our research activities. I also express my gratitude to Dr. Binod Kumar Singh, Registrar of Rashtriya Sanskrit Sansthan and Prof. S.N. Jha, Head of Adarsha Scheme, for continuous encouragement in development of our institution's activities. I express my gratitude to Prof. K. Hayavadana Puranik, Chairman of Poornaprajna Samshodhana Mandiram for his whole hearted support for our academic activities. I also express my gratitude for Prof. D. Prahlada Char for valuable guidance in the development of institution.

I express my gratitude for Dr. S. Jagannatha, who took the pain in present edition.

I thank Aniruddha Creations who have printed this book very nicely, in a short time. I am sure they will extend the same co-operation in future also.

Dr. A.V. Nagasampige
Director

निर्देशकभणितिः

हरे राम हरे राम राम राम हरे हरे ।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण नमोऽस्तु ते ।।

भारतीयज्ञानपरम्पराया आधारभूतानां कोषाणामुपयोगसाधकः कश्चिद् ग्रन्थः 'ग्रन्थसम्पादनशास्त्रम्' इति नाम्ना प्रख्यातः अस्मन्मित्रवर्यैः डा. एस्. जगन्नाथमहोदयै रचितोऽत्यन्तं जनप्रियोऽस्ति । इमे च विद्वद्वर्याः चिरकालं यावत् मैसूरुनगरस्थप्राच्यविद्यासंशोधनालये संशोधनकार्ये नियुक्ताः, सहस्रशः नानाविधतालपत्राणि परिशील्य तादृश-पत्रनिबद्धानां संस्कृतग्रन्थानां नियमपूर्वकं सम्पादनं च व्यदधुः । अत एव ग्रन्थसम्पादनशास्त्रप्रणयने नूनमधिकृताः प्रशस्ताश्च विराजन्ते । पूर्णप्रज्ञसंशोधनमन्दिरस्य निदेशकचरैः डा. ए.वि. नागसम्पिगेमहोदयैः नितरां प्रेरिता एते ग्रन्थसम्पादनशास्त्रप्रविधिनामकं ग्रन्थरत्नं प्रणीय विदुषः विद्यार्थिनश्च नितरामतोषयन् । तस्य ग्रन्थस्य समाप्तप्रतिकृतेः पुनर्मुद्रणस्यायम् अवसरः । ते चैतादृशानन्यानपि ग्रन्थान् रच्यासुरिति आशासानः तेभ्यः प्रणामान् विज्ञापयामि ।

संशोधनमन्दिरस्यास्य कुलपतिभ्यः श्रीविश्वप्रसन्नतीर्थश्रीमच्चरणेभ्यः प्रणामान् समर्पयामि । एवमेव कार्येऽस्मिन् प्रोत्साहयद्भ्यः केन्द्रीय-संस्कृतविश्वविद्यालयस्य कुलपतिभ्यः प्रो. श्रीनिवासवरखेडिमहोदयेभ्यः, अस्मत्संस्थाया अध्यक्षेभ्यः प्रो. सच्चिदानन्द उडुपवर्येभ्यः, कुलसचिवेभ्यः प्रो. मुरळीकृष्णमहोदयेभ्यः तथा आदर्शयोजनापर्यवक्षकेभ्यः प्रो. कुलदीपशर्मभ्यः कार्तज्ञ्यवचांसि व्याहरन् विरमामि ।

आचार्यः वीरनारायणपाण्डुरङ्गी
निर्देशकः

पुरोवाक्

एष ग्रन्थः मदीयस्य Manuscriptology : An Entrance इत्याख्यस्य इङ्ग्लीष्ग्रन्थस्य सर्वानंशानादाय रचिता कृतिः।

नायं ग्रन्थो मूलस्याविकलोऽनुवादः किन्तु भूयस्या मात्रया प्रापितागमादेशः ।विषयानुक्रमणिका चास्य वैसादृश्यवती।मूलग्रन्थे पदसूची न योजिता याऽत्र दत्ताऽस्ति।इङ्ग्लीष् मूले संख्यारत्नकोशो दत्त आसीत्।परन्तु विद्यार्थिनाम् अभीष्टसंख्यासूचकशब्दानां झटित्यवगमने प्रयोजननैयून्यं तत्र पश्यता मया स पर्यहार्यत्र।सप्रयोजनाः संख्यासूचकाः शब्दा अत्र परिशिष्टत्वेन योजिता येन विद्यार्थिजनसौकर्यं भवेत्।

यद्यपि Manuscriptology इति शब्दस्यावयवार्थानुवादकैः संस्कृत भाषायां मातृकासंपादनविज्ञानमिति शब्दः प्रयुज्यते।परन्तु अस्माभिः यद् वस्तु संपाद्यते तद्धि मातृकास्थग्रन्थपाठरूपं न पुनर्मातृकारूपं वस्त्विति कृत्वा ग्रन्थसंपादनशास्त्रमिति नामधेयं मया विहितम्।

मातृकाशब्दः पुत्रिकाशब्दश्च क्वचन किञ्चिद्भिन्नार्थवत्त्वेन क्वचन च समानार्थवत्त्वेन च प्रयुक्तावत्र।अयं महाप्रमाद इति नाहं मन्ये भ्रान्तेरनवकाशात्।

संस्कृतभाषायामद्यत्वे ग्रन्थसंपादनविषयको ग्रन्थ एक एवोपलभ्यते, यश्च तत्रभवता एस्.एम्.कत्रेकेन रचितस्य Introduction to Indian Textual Critisism इति ग्रन्थस्य त्रिभिर्विद्वद्भिर्विहितं सांस्कृतमवतरणम्।तस्याप्युपयोगं कृतवानस्मि मदीयायां कृतौ।

वाक्यार्थसुमनःश्रेणीनाम्नः कृतकस्य ग्रन्थस्य पीठिकायां यदुक्तं विवाहस्योढानां च विषये तद् 'ग्रन्थस्य गुणदोषयोरुभयोरपि परामर्शः संपादकजनेन करणीय एव ' इति ज्ञापनार्थं हास्यार्थं च ; न पुनः कस्यापि मनसि मन्युजननार्थमित्यार्या अवयन्तु।

ग्रन्थसंपादनाभ्यासार्थं कल्पितो वाक्यार्थसुमनःश्रेणीग्रन्थः किञ्चिदिव

क्लिष्टो यत् कृतस्तत् 'संपादनसापेक्षेषु ग्रन्थेष्वेतादृशोऽपि केचन ग्रन्थाः सन्ति' इति ज्ञापनार्थम्। संपादनदृष्ट्या सरलतमानां पद्यानां तु १०९-११२, ३०४-३०६ पुटेषु दत्तत्वात् कृततत्संपादनाभ्यासान् संपादनावबोधकुतूहलिनः शिष्यजनान् एष वाक्यार्थसुमनःश्रेणीग्रन्थो नैव भाययति।

Manuscriptology : An Entrance इत्याख्यं ग्रन्थं पठितवतो बहुधा च कृतचर्चस्य श्रीकार्त्तिक्वर्यस्य विषयसंभृतानि ज्ञानाभिवर्धकानि च संभाषणानि भूयो भूयो ध्यायन् हृष्यामि। तत्पठनेन प्रकटितसंतोषं गुजरात्-विश्वविद्यानिलयीयस्य भाषासाहित्यभवनस्य निर्देशकं डा.श्री.वसन्तकुमारभट्टवर्यं सादरं प्रणमामि। संस्कृतभाषायामप्येतादृशस्य कस्यचन ग्रन्थस्यावश्यकतास्तीति ज्ञापयित्रा, ग्रन्थस्य रचनायै प्रेरणादात्रा च राजस्थानसंस्कृतविश्वविद्यानिलये प्राचार्यपदजुषा विदुषा.डा.वीरनारायणपाण्डुरङ्गिवर्येण संवृत्तोऽस्म्यधमर्णः। ग्रन्थस्य सप्रयोजनतां श्लाघितवते कर्णाटकसंस्कृतविश्वविद्यालयस्य शास्त्रविभागे डीन्पदजुषे प्राचार्याय डा.श्रीनिवासवरखेडिवर्याय समर्प्यन्ते सहस्रं नतयः। तत्रभवता विदुषा डा.B.R.Hnbhat EFEO (Pandicherry) वर्येण ग्रन्थसंपादनविषयको भागः पठितस्तस्मिन् विषये स्वीया सम्मतिश्च दत्ता। तं सकार्तज्ञ्यं वन्देऽहम्। विज्ञप्त्यनुपदं गुरुमण्डलप्रकटितं निरुक्तनिघण्टुग्रन्थं मह्यं ईमेल् द्वारा प्रेषितवते sanskrit e books नामकस्यान्तर्जालस्य स्वामिने मुम्बयीस्थाय श्रीमते शंकाराय नमांसि भूयांसि। सदापि विदुषां प्रात्साहदात्रा विहितैतद्ग्रन्थपरिशीलनेन ग्रन्थस्यास्य प्रकाशनं च कुर्वाणेन पूर्णप्रज्ञसंशोधनमन्दिरे निर्देशकपदजुषा विदुषा डा. आनन्दतीर्थनागसंपिगेवर्येणास्मि धन्यतमः।

अप्राप्तनवीनविज्ञानलेशस्य मादृशस्यापि जनस्य शक्यक्रियं यदभूत् ग्रन्थस्यास्योट्टङ्कनं, पुटविन्यासः, मुखपुटनिर्माणमित्येतत् सर्वं-तत्तु कम्प्यूटर्-साफ्ट्वेर् -निर्मातृणामनुग्रहात्। कलियुगाद्भुतांस्तान् कथं वन्देयेति नाहं जाने।

आशासे यद् भारतीया विद्यार्थिजना अस्य ग्रन्थस्याध्ययनेन यथाग्रन्थ-संपादनशास्त्रविधि ग्रन्थसंपादने बद्धादरा भूयासुः।

मैसूरु

जूनू २०१४

जगन्नाथस्य

वक्तव्यं किञ्चित्

नरा नादीपयिष्यंश्चेल्
लिपिदीपमनुत्तमम् ।
अभविष्यंस्तमोरुद्धा
व्यवहाराः किलैहिकाः ॥

वाणीवरविलासाढ्या
वर्णनि यस्य नेशते।
तं त्वां लिपिकर! स्तोतुं
शक्ता मितगिरः कथम् ॥

ग्रन्थकर्तृकृतं पाठं
गृहृण्द्भ्यः साक्ष्यपूर्वकम्।
संपादकजनेभ्योऽयं
ग्रन्थः सादरमर्प्यते ॥

जगन्नाथस्य

विषयानुक्रमणिका

रोमन्लिप्या संस्कृतादिभारतीयभाषाणां लेखने समुपयोक्तव्यानां
ध्वनिचिह्नानां तालिका--------------------------------
रोमन्लिप्या संस्कृतलेखनं-कतिचन उदाहरणानि----------------
१.ग्रन्थसंपादनशास्त्रं तथा मातृकाः--------------------------- १
२.लिपिर्भाषा च-- ७
३.वेदकाले लिपिरासीत्------------------------------------ १०
४.कासाञ्चन भारतीयानां लिपीनां संक्षिप्तः परामर्शः-------------- १२
वट्टेळुत्तु--------------------------------------- १४
तमिळु-- १५
ग्रन्थलिपिः-------------------------------------- १६
शारदा-- १९
कन्नडम्-- २०
नन्दिनागरी-------------------------------------- २१
तिगळारी--------------------------------------- २३
देवनागरी--------------------------------------- २५
५.विविधानां लिपीनाम् अभ्यासः---------------------------- २७
रोमन् लिपिः----------------------------------- ३०
६.लेखनार्थं मातृकाणां सज्जीकरणम्-------------------------- ३२
७.मातृकाः-- ३६
८.संस्कृतभाषायां लेखनसंबद्धाः शब्दाः----------------------- ४२
९.मातृकासम्बद्धाः प्राचीनाः परामर्शाः------------------------ ४३
१०.लिपिकराणां प्रमादाः पाठान्तराणि च-लोपागमादेशाः------------ ४६
१.लोपः--४९
१.अबुद्धिपूर्वकः-------------------------------४९
इदंवर्गीयाः साधाराणाः लिपिकरकृताः प्रमादाः-------५१
अ.अक्षरलोपः----------------------------------५१
आ.अनुस्वारविसर्गयोर्लोपः----------------------५२
इ.द्वितीयसमानाक्षरलोपः------------------------५२

ई.प्रायिकाः प्रमादा ये लिपिकरलेखनशैलीगताः-------५२
उ.अशुद्धेन श्रवणेन लेखने संभवन्तो लोपाः---------५२
ऊ.बुद्धिपूर्वकाः लोपाः------------------------५३
ऋ.अनिवार्यः------------------------------५३
ॠ.ग्रन्थकर्तृकृतः----------------------------५४
२.आगमः/प्रक्षेपः---------------------------------------५५
अ.अबुद्धिपूर्वकः----------------------------५५
आ.अशुद्धेन श्रवणेन लेखने संभवन्तो वर्णागमाः :-----५६
इ.पुनरुक्ति ः--------------------------------५६
ई.ग्रन्थकर्तृकृतः-----------------------------५७
उ.संगीते-----------------------------------५८
ऊ.बुद्धिपूर्वकः------------------------------५८
ऋ.वैदिकः---------------------------------५९
जागरणम्--------------------------------६०
३.आदेशाः---६१
अ.अबुद्धिपूर्वकः----------------------------६१
आ.एतद्वर्गीयाः सामान्याः प्रमादाः----------------६३
इ.अशुद्धेन श्रवणेन लेखने संभवन्त आदेशाः---------६३
ई.अनवधानजन्या आदेशाः---------------------६३
उ.अज्ञानजन्यं शब्दस्थलपरिवर्तनम्----------------६४
ऊ.अक्षराध्यासः-----------------------------६५
ऋ.संस्कृतेतरभाषोच्चारणप्रभावजन्यः----------------६६
ॠ.बुद्धिपूर्वकः------------------------------६८
ए.व्याख्यानरूपं पाठान्तरम्----------------------७०
ऐ.ग्रन्थकर्तृकृतः----------------------------७०
ओ.वैदिकः--------------------------------७१
११.लिपिकरप्रमादानां त्रिविधमन्यद् वर्गीकरणम्------------------७४
अ.विशिष्टो दोषः---------------------------------------७४
आ.भेदको दोषः--७५
इ.ऊहजन्यो दोषः---------------------------------------७६

१२.ग्रन्थसंपादनक्रमः-------------------------------------७७
१.ग्रन्थवरणम्-------------------------------------७७
२.सामग्रीसंकलनम्-------------------------------------७८
(प्रत्य)अन्तःसाक्ष्यसामग्री-१.एकला मातृका----------७८
(प्रत्य)अन्तःसाक्ष्यसामग्री-२.द्वे मातृके /द्व्यधिका मातृकाः९३
(प्रत्य)अन्तःसाक्ष्यसामग्री-३.मुद्रितं संस्करणम्---------८०
(प्रत्य)बाह्यसाक्ष्यसामग्री-१.उद्धृतयः---------------८१
(प्रत्य)बाह्यसाक्ष्यसामग्री-२.संग्राहाः----------------८३
(प्रत्य)बाह्यसाक्ष्यसामग्री-३.पादग्रहीतृ साहित्यम् / सांशग्रहणाः कृतयः ---------------------------८३
(परो)बाह्यसाक्ष्यसामग्री-१.अन्याः कृतयः-----------८६
(परो)बाह्यसाक्ष्यसामग्री-२.व्याख्यानानि-------------८६
(परो)बाह्यसाक्ष्यसामग्री-३.भाषान्तरेऽनुवादाः---------९३
(परो)बाह्यसाक्ष्यसामग्री-४.तात्पर्य-सार-ग्रन्थाः-------९७
(परो)बाह्यसाक्ष्यसामग्री-५.शिलाशासनानि-----------९८
(परो)बाह्यसाक्ष्यसामग्री-६.संशोधनलेखाः------------९८
(परो)बाह्यसाक्ष्यसामग्री-७.संशोधनग्रन्थाः-----------१०२
३.मातृकाणां (मुद्रितानां संस्करणानां च) संज्ञाकरणम्---------१०३
४.प्रतिलेखनम्-------------------------------------१०५
५.पाठान्तरसंकलनम्--------------------------------१०६
६.मातृकाणां(पुत्रिकाणां)वंशक्रमनिर्धारणा-----------------१०७
७.अधिकाः केचन विचाराः----------------------------११३
१३.पीठिका---११९
१.एकं वाक्यं सग्रन्थपरिचयं सदार्ढ्यं सनिर्णयं च (प्रतिज्ञावाक्यम्)-१२२
२.ग्रन्थकर्तृनाम-------------------------------------१२२
३.एतेनैव ग्रन्थकर्त्रा प्रणीता अपरे ग्रन्थाः(यदि सन्ति)---------१२२
४. जीवितकालः(यदि ज्ञातः)----------------------------१२३
५.ग्रन्थकर्तुः देशः(यदि ज्ञातः)----------------------------१२४
६.विषयानुक्रमणिका (सत्यावश्यकत्वे ससंक्षिप्तविश्लेषणा)--------१२४
७.ग्रन्थविमर्शः / ग्रन्थस्तरनिर्णयः(Higher Criticism)-------१२६

८.मातृकाविमर्शः (मातृकास्वरूपं, पाठसंवादविचारः, पाठनिर्णयार्थम् अवलम्बिता अंशाः, मातृकावंशः)(Lower Criticism)१३०
९. प्रकृतं संस्करणम्----------------------------------१३७
१०.वैयक्तिका विषयाः/ कृतज्ञतासमर्पणं च-----------------१३७
वाक्यार्थसुमनःश्रेणी (कल्पिता कृतिः)------------------१४२, १४३
१४.भाषा का भवतु पीठिकायाः ?---------------------------------१४४
१५.ग्रन्थसंपादने केचन प्राचीनाः परामर्शाः-------------------------१४५
१६.यूरोप्खण्डे ग्रन्थसंपादनम्---------------------------------१५०
१७.मातृकासूची-पूर्वपीठिका-----------------------------------१५२
१८.सूचीगतं ग्रन्थविषयवर्गीकरणम्-----------------------------१७०
ग्रन्थविषयवर्गीकरणक्रमः-----------------------------------१७३
१९.मातृकासूची-उत्तरपीठिका-----------------------------------१९१
२०.संदेग्धव्यकर्तृका रचनाः-----------------------------------१९३
२१.किमर्थं ग्रन्थसंपादनशास्त्रम् ?------------------------------२००
२२.संपादकभिन्नेन जनेन लियन्तरकरणम्-----------------------२०१
२३.संपादकेभ्यः सूचनाः--------------------------------------२०८
२४.संस्कृतेतरभाषाणामपि अध्ययनस्यावश्यक्ता--------------------२१४
२५.संस्कृतेतरग्रन्थसंपादकानां संस्कृताध्ययनस्यावश्यकता------------२१८
२६.केचन सत्यप्रसंगाः---------------------------------------२१९
२७.ग्रन्थसंपादनानन्तरं किम् ?-----------------------------------२२३
२८.वैदेशिकाः किं मातृकाचोराः ?-------------------------------२२६
२९.मातृकाणां नवीनं संग्रहणम्----------------------------------२२९
३०.ग्रन्थसंपादनं नाम न केवलं प्रतिलिपिकरणम्-------------------२३१
३१.मातृकालयेषु मातृकाणां पठनं, प्रतिलेखनं, भाचित्रप्राप्तिश्च--------२३२
३२.ग्रन्थसंपादनक्षेत्रम्--२३५
ग्रन्थसंपादनक्षेत्रं प्रविविक्षूणामपेक्षिता निमित्तरूपा अर्हताः------२३५
ग्रन्थसंपादनक्षेत्रे प्रविविक्षूणां सहकारिकारणभूता अर्हताः-------२३६
ग्रन्थसंपादनशास्त्रीयाः काश्चन नीतयः----------------------२३६
३३. ग्रन्थसंपादनशिक्षणम्-------------------------------------२३७
३४.काचिद् विज्ञप्तिः : आर्येषु ब्रह्मणि च-------------------------२४०

३५.ग्रन्थसंपादनदर्शनम् [ग्रन्थकर्त्रा रचितस्य मूलस्य सुसदृशं रचनम्।]--२४१
३६.अध्येतव्याः केचन ग्रन्थाः--------------------------------२४२
३७.किमपि पुच्छम्------------------------------------२४३
उपसंहारः---२४५
परिशिष्टम् १.-गङ्गानवरत्नमालास्तोत्रम्-----------------------२४७
परिशिष्टम् २.-दानलक्षणं श्रीवासुपूज्यर्षिविरचितम्---------------२५०
परिशिष्टम् ३.-संख्यासूचनार्थाः पद्धतयः-----------------------२५५
(१) कटपयादिसूत्रम्----------------------------------२५५
(२) संख्यासूचकानि पदानि-पीठिका-----------------------२५९
0बिन्द्वभिधायकानि पदानि---------------------२६१
१.एकसंख्याभिधायकानि पदानि------------------२६१
२.द्विसंख्याभिधायकानि पदानि------------------२६१
३.त्रिसंख्याभिधायकानि पदानि------------------२६१
४.चतुःसंख्याभिधायकानि पदानि-----------------२६१
५.पञ्चसंख्याभिधायकानि पदानि-----------------२६२
६.षट्संख्याभिधायकानि पदानि------------------२६२
७.सप्तसंख्याभिधायकानि पदानि------------------२६२
८.अष्टसंख्याभिधायकानि पदानि------------------२६३
९.नवसंख्याभिधायकानि पदानि-------------------२६३
१०.दशसंख्याभिधायकानि पदानि-----------------२६४
११.एकादशसंख्याभिधायकानि पदानि--------------२६४
१२.द्वादशसंख्याभिधायकानि पदानि---------------२६४
१३.त्रयोदशसंख्याभिधायकं पदम्------------------२६४
१४.चतुर्दशसंख्याभिधायकानि पदानि--------------२६५
१५.पञ्चदशसंख्याभिधायकानि पदानि-------------२६५
१६.षोडशसंख्याभिधायकानि पदानि---------------२६५
१७.सप्तदशसंख्याभिधायकं पदम्------------------२६५
१८.अष्टादशसंख्याभिधायकानि पदानि-------------२६५
२०.विंशतिसंख्याभिधायकानि पदानि--------------२६६
२२.द्वाविंशतिसंख्याभिधायकं पदम्----------------२६६

२५.पञ्चविंशतिसंख्याभिधायकं पदम्--------------२६६
२७.सप्तविंशतिसंख्याभिधायकं पदम्---------------२६६
३३.त्रयस्त्रिंशत्संख्याभिधायके पदे----------------२६६
१००.शतसंख्याभिधायकानि पदानि---------------२६७
१०००.सहस्रसंख्याभिधायकपदानि---------------२६७
साहित्यशासनेभ्यः समुद्धृतः संख्याभिधायकपदानां क्रमः-२६७
संख्याभिधायकपदानां कल्पितः क्रमः (विद्यार्थिजनानाम् अभ्यासार्थम्)----------------------२६९
वास्तविक्याः संख्यायाः संख्याभिधायकपदैः योगः------२७१
संख्याद्वयस्य योगेनाभीष्टसंख्यानिर्देशः--------------२७१
विविधैर्वर्षैः संवदमानः क्रिस्तशकः-----------------२७२
संख्याभिधायकानां पदानाम् अकारादिसूचनी----------२७३
(३) पत्राङ्कलेखनस्थाने न-न्न-न्या-दिसूत्रम्-----------------२७५
(४) न-न्न-न्या-दिसूत्रस्य प्रकारभेदः(सदोषं लेखनं ?)--------२७६
(५) पत्राङ्कलेखनार्थम् अक्षरपल्ली अङ्कपल्ली च---------------२७८
परिशिष्टम् ४.-लिपीनां कलहः(लघु नाटकम्)--------------------२७९
परिशिष्टम् ५.-अस्मत्पूर्वजानां मुद्रणकलाज्ञानं किमासीत् ?----------२८६
पंरिशिष्टम् ६.-लिपिकराणां वेदना निवेदना च-------------------२८७
१.पाठकेषु क्षमां याचमानानि पद्यानि---------------------२८८
अ. "करकृतमपराधं क्षन्तुमर्हन्ति सन्त" इति चतुर्थपादं पूरयितुं प्रवृत्तानि पद्यानि--------------२८८
आ.तादृशपादपूरणानुद्देश्यकानि स्वतन्त्राणि पद्यानि-----२९१
इ.मातृकासु वर्तमानानां दोषाणां लिपिकरा न प्रतिभुवः, मूलादर्शं यथावत् प्रतिकृतवतां तेषामनपराद्धत्वादिति निर्णयस्य घोषयितृणि पद्यानि।-----------२९४
२.मातृकाणां रक्षणम् उपदिशन्ति पद्यानि।------------------२९४
३.मातृकाचोरेभ्यः क्रुध्यन्ति पद्यानि----------------------२९६
४.अपरिस्फुटार्थं पद्यद्वयम्-----------------------------२९६
५.मातृकाप्रदानार्थं प्रचोदनां कुर्वत् किमपि पद्यम्-------------२९६
६.पाठस्य समीचीने शोधने विदुषोऽसमर्थतां व्यञ्जयत्किमपि गद्यम्-२९७

७.एतदर्थकानि कतिचन कन्नड-तेलुगु-मलयाळं-गद्यपद्यानि-----२९७
अ.कन्नडपद्यानि---------------------------२९७
आ.अन्यत् कन्नडपद्यम्------------------------२९९
इ.एकं कन्नडगद्यम्---------------------------२९९
ई.एतदर्थकं किमपि तेलुगुपद्यम्-------------------३००
उ.एतदर्थकं किमपि मलयाळंपद्यम्-----------------३००
८.कृतिचौर्ये खण्डनोक्तिः-----------------------------३००
९.ग्रन्थकर्त्रा निःसृष्टः शापः----------------------------३००
परिशिष्टम् ७. १४९पुटे दत्तेन विषयेण योजनीयं किञ्चित्-----------३०१
परिशिष्टम् ८. New Catalogus Catalogorum(N C C)(मातृका-सूचीनां नवीना सूची)------------------------------३०२
परिशिष्टम् ९. ग्रन्थसंपादनाभ्यासार्थं पद्यषट्कम्--------------------३०४
परिशिष्टम् १०. कटपयादिसूत्रेऽवशिष्टं किञ्चित्-------------------३०८
परिशिष्टम् ११. संख्यानामभिरेव संख्यानां परामर्शः----------------३१०
परिशिष्टम् १२. वर्णानां पदानां पद्यानां गद्यानां च सूची------------३११
परिशिष्टम् १३. कन्नडपदानां सूची--------------------------३७७
परिशिष्टम् १४. केवलं केषाञ्चनावधेयानां इङ्ग्लीष्पदानां तथा रोमन्लिपिलिखितानां संस्कृतपदानां सूची -----------------३७७
अतीव मुख्या काचिद् विज्ञापना--------------------------------३७८
इत ऊर्ध्वं किं करणीयम्-----------------------------------३७८
आधाराः---३७९

~✠✠✠~

रोमन्लिप्या संस्कृतादिभारतीयभाषाणां लेखने समुपयोक्तव्यानां ध्वनिचिह्नानां तालिका

अ *a*	आ *ā*	इ *i*	ई *ī*	उ *u*	
ऊ *ū*	ऋ *ṛ*	ॠ *ṝ*	लृ *lṛ*	ए॒ *ĕ*(short)	
ए *e*	ऐ *ai*	ओ॒ *ŏ*(short)		ओ *o*	
औ *au*	–ं *ṁ*	–ः *ḥ*	ऽ ’		
क् *k*	ख् *kh*	ग् *g*	घ् *gh*	ङ् *ṅ*	
च् *c*	छ् *ch*	ज् *j*	झ् *jh*	ञ् *ñ*	
ट् *ṭ*	ठ् *ṭh*	ड् *ḍ*	ढ् *ḍh*	ण् *ṇ*	
त् *t*	थ् *th*	द् *d*	ध् *dh*	न् *n*	
प् *p*	फ् *ph*	ब् *b*	भ् *bh*	म् *m*	
य् *y*	र् *r*	ल् *l*	व् *v*	श्(श्) *ś*	
ष् *ṣ*	स् *s*	ह् *h*	ळ् *ḷ*	ಱ **r̤**	ೞ **l̤**

एतेंऽशा अवधेयाः

१.अस्यां पद्धतौ एतानि पञ्च अक्षराणि नैव प्रयुज्यन्ते- ***f,q,w,x*** तथा ***z***

२.अनुस्वारस्य सूचनार्थं (–ं) , *ṁ* इति(*m* अक्षरम् ऊर्ध्व-बिन्दुयुक्तम्) अथवा *ṃ* (*m* अक्षरम् अधोबिन्दुयुक्तम्) प्रयुज्यते। अत्र दत्तायां वर्णमालायां पूर्वतरं प्रयुक्तम्।

३.ऋ इत्यक्षरस्य सूचनाय *r̥* एवं लेखनं (*r* इत्यक्षरस्याधः सूक्ष्मवर्तुलम्)अथवा *ṛ* एवं लेखनं (*r* इत्यक्षरस्याधः बिन्दुः) क्रियते। ॠ इत्यक्षरस्य सूचनाय *r̥̄* एवं लेखनं (*r* इत्यक्षरस्याधः सूक्ष्मवृत्तं तथा ऊर्ध्वं तिर्यग् रेखा) or *ṝ* एवं लेखनं (*r* इत्यक्षरस्याधः बिन्दुस्तथा ऊर्ध्वं तिर्यग् रेखा) प्रयुज्यते। अत्र दत्तायां वर्णमालायां पूर्वतरं प्रयुक्तम्।

४. अधोबिन्दुः सर्वेषां मूर्धन्यवर्णानां सूचनार्थं किल लिख्यते[१]। तस्मादेव केचन विद्वांसः अनुस्वारसूचनार्थं *ṃ* (*m* अक्षरस्याधो बिन्दुः) एवम् अलिखन्तः *ṁ* (*m* अक्षरस्योर्ध्वं बिन्दुः) एवं लिखन्ति। ऋकारस्य सूचनार्थं च ते *ṛ* (*r* अक्षरस्याधो बिन्दुः) एवम् अलिखन्तः *r̥* (*r* अक्षरस्याधः सूक्ष्मं वर्तुलम्) एवं लिखन्ति।

अपरे विद्वांसस्तु *ṃ* तथा *ṛ* एवमेव लिखन्ति।

५. एकार ओकारश्च संस्कृते दीर्घौ। तयोर्ह्रस्वत्वं नास्ति। तस्मात् तयोरूर्ध्वं तिर्यग्रेखान्यासस्यावश्यकता नास्ति। परन्तु संस्कृतेतरासु कासुचन भाषासु, विशिष्य दाक्षिणात्यासु भाषासु ह्रस्वभेदो वर्तत एवैतयोः। कन्नडे कदाचित् एतद्व्रतौ ह्रस्वप्रभेदौ एवं दर्श्येते ***ĕ*, *ŏ***. (***e*** तथा ***o*** अक्षरयोरूर्ध्वं उत्तानार्धचन्द्रचिह्नम्) । परन्तु शासनशास्त्रविषयकेषु ग्रन्थेषु लेखेषु च ***e*** तथा ***o*** एतौ ह्रस्वभेदौ, ***ē*** तथा ***ō*** एतौ च दीर्घभेदौ च सूचयतः। अत्र दत्तायां देवनागरीवर्णमालायां पूर्वतरं प्रयुक्तम्। अर्थात्, ह्रस्वभेद-सूचनार्थम् अधोरेखा दत्ता।

६. अत्र पद्धत्यां संस्कृतलेखने '*sh*' एतदक्षरयुग्मं कदाऽपि न प्राप्नोति। श(श)कारसूचनाय *ś* (*s* अक्षरोर्ध्वं ऊर्ध्वं पुरोवक्रपिञ्छम् अथवा पुरोवक्ररेखा) लिख्यते। मूर्धन्यस्य षकारस्य सूचनाय *ṣ* (*s* अक्षरस्याधो बिन्दुः) लिख्यते।

---

१. ऋ *ṛ*, ट् *ṭ*, ठ् *ṭh*, ड् *ḍ*, ढ् *ḍh*, ण् *ṇ*, ष् *ṣ* -एतेषां वर्णानाम्।

७. *'ch'* इति लेखनं महाप्राणं छकारं ज्ञापयति न पुनरल्पप्राणं चकारम्। चकारज्ञापनार्थं केवलं *c* इति लिख्यते।

८. प्राचीनकन्नडे ಱ-ೞ वर्णावास्तां यौ क्रमशः *r̤* (रेफस्याधो बिन्दुद्वयं) तथा *l̤* (लकारस्याधो बिन्दुद्वयं) एवं सूच्येते संशोधनकृतिषु विद्वद्भिः।(एतौ वर्णावधुनापि तमिळु-मलयाळंभाषयोर्वर्तेते।)

९. लृळवर्णयोर्द्वयोरपि केषुचन ग्रन्थेषु *ḷ* इत्थमेकमेव यल्लेखनं, तन्न समीचीनं लृळवर्णयोर्भेदकस्य विन्यासस्याभावेन भ्रान्तिजननसंभवात्। *kḷpta* इति लिखितस्य 'क्ळ्प्त' इति, *īḷe* इति लिखितस्य च 'ईलृए' इति ('ईल्रे' इति वा) दुष्टपठनं संभवमत्र ! तस्मात् केवलं ळवर्णसूचनार्थं *ḷ* इत्थं लेखनं करणीयम् इति, लृवर्णसूचनार्थं च *lṛ* इत्थं लेखनं करणीयमिति प्रकृतग्रन्थकर्त्रीयं मतम्। अर्थात्, अग्निमीळे इति लेखनं रोमन्लिप्या *agnimīḷe* एवं करणीयम्। क्लृप्त इति लेखनं तु *klṛpta* एवं करणीयम्।

१०. आधुनिका विद्वांसो व्याकरणे अनुबन्धानां लेखनं रोमन्लिप्या कुर्वाणाः प्रायो बृहदक्षरैः (caps) लिखन्ति तान्। यथा- *ṭhaK, taṄ, GHaÑ, tayaP, pUK* -इत्यादीत्यादि। केचित्त्वनुबन्धानां लेखनम् अग्रोर्ध्वं लिखन्ति। यथा ṭha^{k}, ta^{ṅ}, ^{gh}a^{ñ}, taya^{p}, p^{uk} । एषा द्वितीया पद्धतिरुट्टङ्कने क्लेशकरी दर्शनारमणीया च। तस्मादेतस्याः प्रचारो विरलः।

११. एकस्मिन्नेव पदे स्वराव्यवहितः सन्धिहीनश्चोत्तरस्वरः ऊर्ध्वं लिखितेन बिन्दुद्वयेन सूच्यते। यथा-*titaüḥ* (तितउः) , *praügaḥ* (प्रउगः).

रोमन्लिप्या संस्कृतलेखनस्योदाहरणान्यग्रिमे पुटे दत्तानि→

रोमन्लिप्या संस्कृतलेखनम् : कतिचन उदाहरणानि

tapaḥsvādhyāyaniratam̐ tapasvī vāgvidām̐ varam /
nāradam̐ paripapraccha vālmīkirmunipuṅgavam //

nārāyaṇam̐ namaskṛtya naram̐ caiva narottamam /
devīm̐ sarasvatīm̐ vyāsam̐ tato jayamudīrayet //

uddharedātmanā '' tmānam̐ nātmānamavasādayet /
ātmaiva hyātmano bandhurātmaiva ripurātmanaḥ //

apūrvaḥ ko'pi kośo'yam̐ vidyate tava bhārati /
vyayato vṛddhimāyāti kṣayamāyāti sañcayāt //

vidyā śastrañca śāstrañca dve vidye pratipattaye /
ādyā hāsyāya vṛddhatve dvitīyā '' driyate sadā //

śriyaḥ kurūṇām adhipasya pālanīm̐
prajāsu vṛttim̐ yamayuṅkta veditum /
sa varṇaliṅgī viditaḥ samāyayau
yudhiṣṭhiram̐ dvaitavane vanecaraḥ //

akhileṣu vihaṅgeṣu hanta svacchandacāriṣu /
śuka ! pañjarabandhaste madhurāṇām̐ girām̐ phalam //

udyamaḥ sāhasam̐ dhairyam̐
buddhiḥ śaktiḥ parākramaḥ /
ṣaḍete yatra vartante
tatra daivam̐ prasīdati (*sahāyakṛt*-iti pāṭhāntaram) //

yasya jñānadayāsindhor agādhasyānaghā guṇāḥ /
sevyatām akṣayo dhīrāḥ sa śriye cāmṛtāya ca //

sarvajñam̐ tadaham̐ vande parañjyotistamo'paham /
pravṛttā yanmukhād devī sarvabhāṣāsarasvatī // – – –

ग्रन्थसंपादनशास्त्रम्

ग्रन्थसंपादनशास्त्रम्

अस्य ग्रन्थसंपादनशास्त्रविषयकस्य विचारसंग्रहस्य-मातृकाणां परिचायनं, तासु समुपलभ्यानां ग्रन्थपाठनां च पठनयोग्येन शुद्धेन क्रमेण स्थापनाय ज्ञापनं च-प्रयोजनम्। नायं ग्रन्थसंपादनविषयकः समग्रः शास्त्रग्रन्थः किन्तु ग्रन्थसंपादनशास्त्रप्रस्थानमात्रमिति ज्ञातव्यम्।

१.ग्रन्थसंपादनशास्त्रं तथा मातृकाः

ग्रन्थसंपादनशास्त्रं नाम- मातृकासु लभ्यमानानां ग्रन्थपाठानाम् शास्त्रशुद्धे संपादने प्राधान्यं वहमानं पाठपरिष्कारविषयकं शास्त्रम्।

पाठस्य शास्त्रशुद्धं संपादनं नाम- १.मातृकालभ्यमानपाठानाम्, उद्धृतीनां, सङ्ग्रहग्रन्थानां तथा २.भाषान्तरेषु कृतानामनुवादानां, सार-सङ्ग्रहाणां, प्रभावितानां कृतीनां, संशोधनकृतीनां च- अवलम्बनपूर्वकं ग्रन्थकर्तृरचितमूलपाठेन सौसादृश्यं वहमानस्य पाठस्य रचनार्थं प्रयत्नः।

मातृका नाम- हस्तेन लिखितः कोऽपि ग्रन्थो यत्र साहित्यं वा शास्त्रं वा विषयः।

यद्यपि देयकानि(bills), स्वीकृतिपत्राणि, गणनालेख्यानि, अधिकृतानि पत्राणि च हस्तेनैव लिखितानि समुपलभ्यन्ते तथापि तेषां मातृकात्वरूपो धर्मो नास्ति। हस्तेन लिखितानां साहित्यानां शास्त्राणां वाऽध्ययनं ग्रन्थसंपादनशास्त्रस्य विषयः। प्राचीनान्यधिकृतानि पत्राणि नात्रान्तर्भवन्ति तेषां पत्रागार(Archives)विभागेऽन्तर्भूतत्वात्।

अधिकृतानां व्यावहारिकाणां वा विषयाणां पञ्जीकृतिः कार्पासेन

शणेन निर्मिते दीर्घे पटे समुपलभ्यते यस्याः पटः, कार्पासिकपटः, पटी, पटिका इति चत्वारि नामधेयानि। शणेनापि पटोऽयं वैरल्येन निर्मीयते। कन्नडभाषायां 'कडित' अथवा 'कडत' इति संज्ञाऽस्य पटस्य। अतिदीर्घस्यास्य पटस्य बहुवारं पुटनं क्रियते, प्रतिपुटम् अपि लिख्यते च[१]। साहित्यकृतेरत्र समुपलब्धिरतीव विरलतमा। तस्मात्, कडतस्य मातृकात्वं नास्त्येव[२]।

शिलायन्त्रेण कागदेषु मुद्रितानां तथा दारुफलकेषु मुद्रितानां मातृकात्वमस्तीति केचन आकारसादृश्येन भ्राम्यन्ति। वस्तुतस्तु तेषामपि नास्ति मातृकात्वम्। शिलासु स्तम्भेषु प्राचीनवास्तुगतकुड्येषु भाजनेषु, अस्थिषु लोहशरावेषु च टङ्कितानि शासनानि शासनशास्त्रस्य विषयः। स्तोत्राणि प्रशस्तयश्च कदाचिदल्पया मात्रया शिलाशासनेषु ताम्रपत्रेषु चोपलभ्येरन्[३]। अत्यन्तमवधेयाः साहित्यरचनाः कदाचिदासु सामग्रीषु दृश्येरन्[४]।

१. कटं विस्तारयितुं पुटयितुं (folding)च शक्यते। कडतस्यापि पुटनं क्रियते। अपि च ट-डयोः परस्परेण स्थानपरिवर्तनं, त-टयोः अन्यतरत्र अन्यतरस्यादेश इत्यादिकं भाषासु सहजम्। तस्मात् कडतमिति शब्दः कट इति शब्दस्य तद्भवः प्रतिभाति।

२. द्वित्राः कृतयः कडतेषु लिखिता अतीवविरलं दृष्टा यथा केळदिविजयाख्यं लिङ्गण्णकविरचितं कन्नडकाव्यं कडते लिखितमस्ति। (एतद् ज्ञापितवतोः श्री.वि.सण्णय्य-श्री.केळदी-वेङ्कटेशजोयिसोर्विषये प्रकृतो ग्रन्थकर्ता कृतज्ञोऽस्ति।)

३. कन्नडभाषायां गोम्मटस्तुतिर्बोप्पण्णपण्डितरचिता श्रवणबेळगोळस्थे शिलाफलके उत्कीर्णा दृश्यते।

४. शिलायाम् उत्कीर्णानां कासाञ्चन कृतीनां नामानि डा.वि.राघवन्केन दर्शितानि यथा-: प्राकृतनिबिद्धं कूर्मशतकं भोजप्रणीतत्वेनोल्लिखितम्; परमारार्जुनवर्मप्रणीता पारिजातहरणनाटिका; चित्तपरचिता सूर्यस्तुतिः; उदयपुरीय-राजसमुद्रस्थिते शिलाफलके समुत्कीर्णा राजप्रशस्तिः; अज्मेरस्थ-

प्राचार्यो डि.बि.दीसकलकरः शासनैर्ज्ञायमानानां संस्कृत-प्राकृतकविनाम्नां काञ्चित् पट्टिकां दत्तवानस्ति यत्रोपपञ्चशतनाम्नाम् उल्लेखोऽस्ति[१]। कविनामवतामपि शासनानां मातृकात्वं प्रायो नास्ति, साहित्यशास्त्रग्रन्थाभ्यां भिन्नस्य वस्तुनः प्रतिपादकत्वात्तेषाम्।

एतदपवादत्वेन समग्राः कृतयो याः कदाचिदुपलभ्यन्ते शिला-शासनेषु, तास्तु 'एकला मातृका[२]' इति विभागस्य विषयीभूताः स्युः। मातृकासु तथा शासनेषु एवमुभयत्र साहित्यकृत्या उपलभ्यमानत्वे तु शासनलब्धं पाठं सहकारिसामग्रीत्वेन परिगणयितुं शक्यते यथा भगव-दज्जुकीयं नाटकम्।

शासनमातृकयोर्भूयान् भेदः। भूयःसु प्रसंगेषु ग्रन्थकर्त्रा रचितस्य ग्रन्थकर्त्रैव च लिखितो/ निर्धारितः पाठो मातृकासु नोपलभ्यते। परन्तु मूलकर्त्रा रचितस्तज्जीवितकाल एव टङ्कितः, तत्परिशीलितस्तत्सम्मतश्च शासनपाठो ग्रन्थपाठो वा तद्धस्ताक्षरत्वधर्मवान् उपलभ्यतेऽस्माभिः।

शिलाफलके उत्कीर्णे ललितविग्रहराज-हरकेलिनाटके; तेलङ्गाणशिलाशासने लब्धानि चित्रकाव्यानि, निरोष्ठ्यानि च; महेन्द्रविक्रमपल्लवेन रचिते मत्तविलास-प्रहसनभगवदज्जुकीये, आन्ध्रप्रदेशीय-हनुमकोण्डशिलाशासने समुत्कीर्णौ काकतीयचरितस्य द्वौ सर्गौ तथा सिद्धचरितस्य षष्टिपद्यानि; तञ्जावूरुबृहदीश्वर-देवालयस्य भित्तिषु उत्कीर्णं शिवभारतम्; कुडुमियामलैप्रदेशे तथा तिरुमैय्यं-प्रदेशे शिलायामुत्कीर्णा संगीतस्वरलिपिः(Epigraphia Indica XII. पु. २२६-इत्यत्र प्रकाशिता)तथा, काम्भोजदेशीयशिलाशासनेषु बह्व्यः साहित्यरचनाः ("Sanskrit and Epigraphy". *The Mysore Orientalist*.IV.१ मार्च् १९७१.पु.१-७)

१.JORI, वटोदरम् संपुटः-VII. अङ्काः१-२ सेप्टेम्बर्-डिसेम्बर्. १९५७ पु.७८-८५

२.द्र.पु.७८

अत्रेदमवधेयं यत्प्राचीनलिपीनां विषयो भिन्नकोटिको यत्र लिखिताक्षरचिह्नानां समग्रं विश्लेषणम्(वर्णान्तरचिह्नविन्यासानां, लिप्यन्तरगतवर्णचिह्नीयविन्यासस्थयोः सादृश्यवैसादृश्ययोः, लिपिचिह्न विन्यासपरिवर्तनानां चाध्ययनं) अन्तर्भवति ; यच्च लिपिशास्त्रेण साक्षात् संबद्धम्। तस्य ग्रन्थसंपादनशास्त्रस्य च संबन्धो दवीयान्।

लेखनमिति शब्दो तालपत्रादिषु लेख्यसामग्रीषु लेखनमित्यर्थेन सार्धं, शिलासु उट्टङ्कनं, भूमौ लिखितकमित्यन्यस्मिन्नर्थद्वयेऽपि प्रयुज्यते[1]।

सरस्वतीमुखमिति श्रीमुखमिति च शब्दो लेखनं सूचयतीति संप्रदायः। ग्रन्थकर्तृश्लाघायाम् आशीर्वचने च पीठिकालेखने द्वितीयः शब्दो मठाधिपतिभिरधुनापि प्रयुज्यते।

मातृका नाम वर्णमालिका[2]। मातृकेति शब्दस्य 'हस्तलेखनयुक्ता पत्रिका' इत्यर्थः कस्मिन्नपि कोशग्रन्थे न दृश्यत इत्येतदाश्चर्याय नः।

---

१. "लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो निराहाराः सख्यः सतत-रुदितोच्छूनहृदयाः। परित्यक्तं सर्वं हसितपठितं पञ्जरशुकैस्तवावस्था चेयं विसृज कठिने मानमधुना॥" अमरुशतके(पद्यं ७)

"मूर्ध्ना दिवमिवालेखीत्" (भट्टिकाव्ये १५.२२)

लेखनमित्यस्य प्रसिद्धेऽर्थे यः प्रयोगस्तत्र कर्मपदमधिकरणं चेत्युभयं क्वचिदेकतरमिति व्यवस्था। यथा-

"त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायां"..(मेघदूतं उ.मे. ४२); "अरसिकेषु कवित्वनिवेदनं शिरसि मा लिख मा लिख मा लिख" (उद्भट-काव्यम्); "ताराक्षरैर्यामसिते कठिन्या निशालिखद् व्योम्नि तमःप्रशस्तिम्।" (नैषधीयचरितम् २२.५४)

अत्र सर्वत्र कर्माधिकरणयोरुभयोरपि प्रयोगः। परन्तु "मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती"; (मेघदूतम् उ.मे.२७)"मृगमदतिलकं लिखति सपुलकं" (गीतगोविन्दम्-७).[आप्टे कोशे] तस्मात् "चित्रे (अथवा फलके) वृक्षं लिखति" इति,"चित्रं लिखति"- इत्युभयं शुद्धम्।

२. (वर्ण)मातृकास्तोत्रेषु मातृकाशब्दस्यायमेवार्थः। धर्मशास्त्रग्रन्थेषु दृश्यमानः 'व्यवहारमातृके'ति शब्दः 'व्यवहारविषयकोऽध्याय' इत्यर्थक इति प्रतिभाति।

मातृका(वर्णाः) यस्यां लेख्यसामग्र्यां लिख्यन्ते साऽपि मातृकेति उपादानलक्षणया ज्ञेयमिति प्रतिभाति। पूर्वस्मिन् काले मातृकेति शब्दः मूलप्रतिरथवा आदर्शप्रतिरित्यर्थे प्रयुज्यते स्मेत्यत्र वेदान्तदेशिकेन रचितं किमपि पद्यं[१] तथाऽज्ञातकर्तृकः कोऽपि श्लोक[२]श्च प्रमाणम्।इदमर्थे दक्षिणभारते प्रायिकोऽस्य प्रयोगः।आदर्श इति शब्दोऽप्यत्रार्थेऽस्ति[३]। कदाचिन्मातृकादर्शशब्दौ द्वावपि समस्येते ('आदर्शमातृका')। अस्मिन्नर्थे समुद्धृतं प्रयोगद्वयं विनान्यः कोऽपि प्रयोगो नावधारितः प्रकृतग्रन्थकर्त्रा।

'पुस्तकम्'इति शब्दः प्राचीने काले प्रतिकृतिरित्यर्थे प्रयुज्यते स्म।"दोर्भिर्युक्ता चतुर्भिः[४]"इत्यादिपद्ये तथा"पुस्तकस्था तु या विद्या[५]" इत्यादिश्लोके पुस्तकशब्दस्य प्रतिकृतिरित्येवार्थो न पुनर्मूलग्रन्थ इति।मूलग्रन्थ इत्यर्थेऽस्य प्रयोगो कल्याणचालुक्यवंश्येन तृतीयसोमेश्वरेण राजमानसोल्लासे 'जगदाचार्यपुस्तकम्[६]' इत्यत्र गोचरो योऽत्यन्तं विरल

१. "लिलेख विश्वानि जगन्त्यभिज्ञा लीलाहृते चित्रपटे यथार्हम्। प्रायः प्रजानां पतयः प्रतीता यन्मातृकाः स्वेषु विधिष्वभूवन्"।।(यादवाभ्युदयम् २.१५) [देवकी गर्भिणी बभूव।भगवतः श्रीकृष्णस्य तस्या उदरे विद्यमानत्वात् सा सर्वज्ञा बभूव । सा सर्वाणि विश्वानि च चित्रयितुमारेभे।तस्याश्चित्रं तथा मूलभूतमासीद् यथा तत् विश्वसृष्टिकर्मणि प्रजापतीनाम् आदर्शमातृकायते स्म।]अत्राप्पयदीक्षितीया व्याख्या-"यन्मातृकाः यो देवकीलिखितचित्रपटो मातृका येषां तथाभूताः सन्तः.. प्रजापतीनामपि जगत्सृष्टावनया लिखितचित्रपटः प्रायो मातृकाभूदित्युत्प्रेक्षा"।

२. मातृकासु (पुस्तकेषु इति पा.) यथा दृष्टं तथा तल्लिखितं मया।(द्र.पु.२९४)

३. आदर्शदोषान्मतिविभ्रमाद्वा ....(द्र.पु.२९२)

४."दोर्भिर्युक्ता चतुर्भिः स्फटिकमणिमयीमक्षमालां दधाना हस्तेनैकेन पद्मं सितमपि च शुकं **पुस्तकं** चापरेण।भासा कुन्देन्दुशङ्खस्फटिकमणिनिभा भासमाना- ऽसमाना सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना"।।

५."पुस्तकस्था तु या विद्या परहस्तगतं धनम्।कार्यकाले समुत्पन्ने न सा विद्या न तद् धनम्"।।

६.मानसोल्लासः-१.१.११

आसीत् प्राचीनकाले। परन्त्वद्यत्वे पुस्तकमिति शब्दस्य मूलग्रन्थ इत्यर्थो यत् सार्वत्रिकस्तत् प्रायः संस्कृतेतरभाषाप्रयोगस्य प्रभावेण।

'कोश' इति 'कोष' इति वा शब्दः सूत्रबद्धपत्रः कोश इत्यर्थे प्रयुज्यते। 'हस्तप्रति'रिति शब्दस्त्वाधुनिकः। प्रायशः 'प्रतिकृति'रिति शब्दस्याहोस्वित् 'प्रतिनिधि'रिति शब्दस्याथवा 'प्रतिमे'ति शब्दस्यैक-देशः प्रतिः। 'नामैकदेशग्रहणेन नामग्रहणम्' इति न्यायोऽत्रान्वेति। अथवा वर्णविपर्ययेण पत्री(=पत्रिका)इति शब्दस्यैव प्रतिरित्यन्यदुच्चारणम्। यद्यपि द्वितीयस्यार्थस्य कोटौ भूर्जत्वक्षु कागदेषु च लिखिता हस्त'प्रतयो' नान्तर्भवन्ति तथापि 'योगाद् रूढिर्बलीयसी'। हस्ताक्षरमित्यस्यैकदेशश्च हस्तः यथा "स्वहस्तोऽयं महाराजाधिराजस्य श्रीहर्षस्य"इत्यादिषु हर्षवर्धनादिशासनान्तिमवाक्येषु दृष्टचरः। 'पुत्रिका'[१] इति शब्दोऽपि हस्तप्रतिरिति शब्दस्य स्थाने कदाचिद् दृश्यते।

औत्तराहैस्तत्तत्प्रान्तभाषासु व्याहरद्भिः पाण्डुलिपिरिति शब्दो यत् प्रयुज्यते तस्य मातृका इत्यर्थो न पुनः पाण्डुलिप्याख्यो लिपिविशेष इति। तालपत्राणां भूर्जत्वचां च पाण्डुवर्णत्वात् तत्र लिख्यमाना लिपि-रित्यर्थे तस्य प्रयोगः। कदाचित् 'नामैकदेशग्रहणेन नामग्रहणम्' इति न्यायेन केवलं 'लिपिः' इति शब्दमात्रं पाण्डुलिपिरित्यर्थे प्रयुज्यते।

आप्टेकोशो ग्रन्थालयार्थकं ग्रन्थकुटीति शब्दं ददाति। अत्रार्थे सरस्वतीभण्डार इति शब्दः संस्कृतभाषायां प्रसिद्ध्यति। सरस्वतीभण्डारी ग्रन्थपालो भवति। कन्नडवीरशैववचनानां पालकः कश्चन 'वचनभण्डारी शान्तरस'नामाऽऽसीत्। भोजराजस्य ग्रन्थालयः'सरस्वतीकण्ठाभरणम्'।

१. वेङ्कटरङ्गस्वामिसंपादिताया आख्यातचन्द्रिकाया भूमिकायां पुत्रिकेति शब्दः 'संपादिता कृति'रित्यर्थे प्रयुक्ता। "एतन्मातृकात्रयाधारेण एकां पुत्रिकां निष्पाद्य"(चौखम्बा प्रकाशनम् काशी १९०४)। मातृका मूलं, पुत्रिका च फलम्।

तालपत्रलिखितकोशानां 'रूपावळी'ति संज्ञा कर्णाटकराज्ये चामराजनगरतालूकसन्तेमरहळ्ळिमण्डलान्तर्गते देशवळ्ळीग्रामे वर्तत इति तन्निवासिना केनचन सज्जनेन प्रकृतो ग्रन्थकर्ता ज्ञापितोऽस्ति।

'एष ग्रन्थः', 'काव्यग्रन्थः' 'शास्त्रग्रन्थ' इत्यादिषु प्रयोगेषु ग्रन्थशब्दः प्रायेण वाङ्मयसमूहार्थकः। कदाचिद् वाङ्मयैकदेशार्थकः[१]।

मातृकाः अस्माकम् इतिहासमध्येतुं सप्रयोजनानाम् आकर-सामग्रीणाम् अन्यतमाः। अन्याः सामग्र्यः- शासनानि, प्राचीनानि देवालयादिवास्तूनि, राजसौधाः, दुर्गाणि,नाणकानि, प्राचीनानि पञ्जीकृतानि साक्ष्याणि,निखननेन संशोध्यानि पुराणकालिकानि भूस्थलानि, प्राचीनानि चित्राणि, शिल्पानि, गुहाचित्राणि इत्यादयः।

ग्रन्थसंपादनशास्त्रस्य विषयस्तु मातृकासु लभ्यमानानां ग्रन्थानां पाठनिर्धारणपूर्वकं मौल्यमापनपर्यन्तं सक्रमम् अध्ययनम्।

२.लिपिर्भाषा च

लिपिर्नाम कामपि भाषां प्रतिनिदधतां, लिपित्वेन जनतासम्मतानां च वर्णविन्यासचिह्नानां श्रेणिः। जनतासम्मतेरभावे लिपित्वाभावः।

कासांचन भाषाणां लिपिर्वर्तते कासांचन च नास्ति। तस्मात् लिपिरहितां भाषां प्रयुञ्जानैर्जनैः सत्यावश्यकत्वे प्रतिवेशिदेशीया लिपिरादीयते , अन्यलिपिसृष्ट्यायासं परिजिहीर्षद्भिः। स्वीकृतायां लिप्यां भाषागतानां सर्वेषां वर्णानां समुचित-ध्वनि-चिह्नानां दौर्लभ्ये एकस्यैव

१. 'तृतीयाकारकग्रन्थः','सन्निपातपरिभाषाव्याख्यापरेण ग्रन्थेन', 'तस्मादेव भाष्येऽवान्तरप्रयोजनपरो ग्रन्थः संगच्छते' इत्यादिषु प्रयोगेषु। अत्र कदाचित् 'संदर्भ'शब्दो योज्यते यथा-'इत्येतेन महता ग्रन्थसंदर्भेण'।

चिह्नस्य द्वित्राण्युच्चारणमौल्यानि ते कुर्वते। सत्यावश्यकत्वे तूपलब्धे एव चिह्ने किमपि योजयित्वा अन्यूनानतिरिक्तं स्वभाषागतं ध्वनिं सूचयितुं प्रयतन्ते। विरलेषु च प्रसंगेषु सृजेयुर्द्वित्राणि नूतनानि चिह्नानि।

भाषालिप्योरविनाभावरूपः संबन्धो नास्तीति प्रथमम् अवगन्तव्यम्। अर्थात्, एकयैव लिप्या बह्वीर्भाषा लिखितुं वयं प्रभवामस्तथा एकां भाषां लिखितुं बह्वीर्लिपीरपि वयं उपयुञ्ज्महे।

अत्र प्रसिद्धमुदाहरणं रोमन्लिपिः। लिपिरेषा प्रायः सर्वा अपि यूरोपीया भाषा लिखितुमुपयुज्यते।

अस्माकं राष्ट्रेऽपि तादृशान्युदाहरणानि वर्तन्ते। देवनागरीलिपिर्न केवलं संस्कृतभाषाया लेखने परन्तु मराठी, कोङ्कणी, राजस्थानी, नेवारी तथा हिन्दी इत्येतासामपि भाषाणां लेखनार्थमुपयुज्यते।

कन्नडलिपिः प्राधान्येन कन्नडसंस्कृतभाषयोर्लेखने पूर्वमुपयुज्यते स्म। अधुना कोङ्कणी, कोडव,तुळु, जेनुकुरुब तथा च चित्पावनी एता अपि भाषाः कन्नडसंस्कृताभ्यां मिलिताः सन्ति। कोङ्कणीभाषालेखने त्विदं वक्तव्यम्:-कोङ्कणी भाषा तिसृषु लिपिषु लिख्यते- रोमन्लिप्यां (स-प्राचीनकालिकध्वनिसंकेतायां),देवनागर्यां, कन्नडलिप्यां च। (कर्णाट-प्रदेशीयैः कैश्चन कोङ्कणीलेखनार्थं कन्नडलिपिरुपयुज्यते।)

संस्कृतभाषाया लेखनं विंशत्यधिकाभिर्लिपिभिः क्रियते। कश्चित् कन्नडलिप्या लेखनमस्याः कर्तुं शक्नोति। अपरो मलयाळंलिप्या लेखनमस्याः कर्तुं शक्नोति इत्यादीत्यादि। अर्थात्, वङ्गलिप्या यदि कोऽपि संस्कृतं लिखितुं वाञ्छति, करोतु नाम स तथैव। न तत्र कोऽपि दोषः।

कैश्चिन्मुग्धैर्देवनागरीलिप्याः 'संस्कृतलिपि'रिति संज्ञा दीयते देवनागर्या एव अद्यत्वे तदितरलिप्यपेक्षया सांस्कृते जगति बहुतरमुपलब्धेः। संस्कृतस्य कापि लिपिर्नास्तीति वक्तुमपि न शक्यते। एकामेव

कामपि लिपिं 'संस्कृतलिपिम्'अभिधातुं न शक्यते। वस्तुतस्तु **याभिर्याभि-र्लिपिभिः संस्कृतभाषाया लेखनं शक्यक्रियं तास्ताः सर्वा अपि लिपयः संस्कृतलिपयः।** चामुण्डेश्वर्या दश बाहवो वर्तन्त इति प्रसिद्धम्। किं चामुण्डेश्वर्याः कोऽपि स्वकीयो बाहुर्नास्तीति वक्तुं शक्यते ? मनुष्याणां विंशतिरङ्गुलयः। किं तेषां स्वीया काऽप्यङ्गुलिर्नास्ति ?

देवनागरीतरासु लिपिषु संस्कृतलेखनं दोषायेति केषाञ्चन मुग्धानां मतम्। इदं न सम्यक्। देवनागरीतरलिप्यां संस्कृतलेखनं नापराधाय कल्पते। प्रकृतो ग्रन्थकर्ता यदा किमपि संस्कृतपरामर्शमश्रुतपूर्वं बोध-वृद्धयेऽत्यावश्यकं च पद्यं गद्यं वा शृणोति स तल्लेखनं कन्नडलिप्या कुरुते, न पुनर्देवनागर्या लिप्या।

अधुनापि जीविताः केचन वयोवृद्धा विद्वांसो बाल्ये संस्कृत-भाषाया अध्ययनं स्वराज्येषु प्रसिद्धाभिर्लिपिभिरारभन्त न पुनर्देव-नागर्या लिप्या। बेङ्गलूरुनगरे कश्चन विद्यातरङ्गिण्याख्यो मुद्रणालयो-ऽवर्तत यत्र संस्कृतकृतयः कन्नडलिप्या मुद्रिताः। वाविळ्ळरामस्वामुलु एण्ड् सन्स्नामा चेन्नैस्थो ग्रन्थप्रकाशनालयः संस्कृतकृतीः तेलुगुलिप्या मुद्रापयति स्म। कुम्भकोणे काञ्च्यां च बहवो ग्रन्था ग्रन्थलिप्या मुद्रापिता मुद्राप्यन्ते च। आधुनिकेऽपि काले संस्कृतभाषाया ग्रन्थानां नैकासु लिपिषु मुद्र्यमाणत्वं प्रसिद्धम्। भगवद्गीता न केवलं देवनागरीलिप्या परन्तु विविधाभिर्लिपिभिरधुनाप्युपलभ्यत इति सार्वजनीनो विषयः। कन्नड-लिप्याम् अपि शङ्कराचार्यप्रणीताः कृतय उपलभ्यन्ते। एवं विविधासु लिपिषु संस्कृतभाषाया लेखनमद्भुतम्। विश्वकीर्तिमानमर्हन्नेष विषयो "गिन्नीस् बुक् आफ् वर्ल्ड् रेकार्ड्स् "इत्यत्र च प्रविष्टिमर्हति।

अद्यत्वेऽधिकतरा विद्यार्थिनः सर्वकारीयासर्वकारीयसंस्थाभिः प्रचाल्यमानेषु ग्रन्थसंपादनशास्त्र-लिपिशास्त्र-विषयकेषु कार्यागारेषु भागभाजः सन्तो विविध-संस्कृत-लिपिज्ञाः भवन्तोऽक्षिलक्ष्यीभवन्तीति

यत् तन्नूनं संतोषाय। नवदिल्लीस्था राष्ट्रिय-पाण्डुलिपिमिषन्-संस्था विषयेऽस्मिन् नूनं प्रशंसापात्रं या पौनःपुन्येन लिपिबोधकानि कार्यागाराणि प्रचालयति। संस्कृतभाषाया विविधासु लिपिषु लेखनसंप्रदायं ज्ञापयन्तः, शिष्यानाकर्षन्तश्च सकौतुका आचार्या अत्रास्माकं कृतज्ञतापात्रम्।

३.वेदकाले लिपिरासीत्

वेदकाले लिपिरासीदेवेत्यत्र प्रबलानि साक्ष्याणि वर्तन्ते। वेदकालिका जना नगराणां प्रजा आसीदिति, तासां राजानोऽपि आसन्निति ज्ञायते। विना लेखनं राजाज्ञाप्रचालनं, नगराणां प्रशाननं चाप्यशक्यक्रिये। वैदिके समये अङ्कगणनाऽवर्ततैव। ऋते लेखनात् कथं नामाङ्कगणना क्रियेत? विशिष्य शुल्बसूत्रादिषु या गणनायाः संकीर्णता वर्तते सा विना लेखनं कथमपि कर्तुं न शक्यते। इन्द्रविजयाख्यायां कृतौ[१] मधुसूदन ओझा विद्यावाचस्पतिना कस्मिंश्चन वेदमन्त्रे[२] सुस्फुटमेव लेखनं सूच्यमानं दर्शितम्। 'कश्चन पश्यन्नपि न पश्यति(अवधानराहित्यात् कारणात्।) कश्चन शृण्वन्नपि न शृणोति। पतिव्रता स्त्री यथा स्वपतये स्वात्मानं दर्शयते नेतरेभ्यस्तथा वागपि स्वस्या रूपं केवलं केभ्यश्चन प्रदर्शयते।' ओझा किं चिन्तितवानिति न स्पष्टम्। स प्राय इत्थं तर्कितवान्- **अत्र वाक्श्रवणस्य ध्वनिश्रवणार्थकता, वाग्दर्शनस्य च लिपिदर्शनार्थकता च निरावाधा। न चात्र वाक्छब्दस्य ज्ञानपरत्वादुक्तार्थोऽसमञ्जस इति वाच्यं, पश्यतेरपि ज्ञानार्थकत्वसंभवेन पुनरुक्तिप्रसंगात्, "देवीं वाच-**

१. इन्द्रविजयः-सं.आद्यादत्तठाकुरः। गङ्गा फैन्आर्ट् प्रेस्, लखनौ 1930 पु 75-82.

२. "उत त्वः पश्यन् न ददर्श वाचम् उत त्वः शृण्वन् न शृणोत्येनाम्। उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः"॥ (ऋग्वेदः १०.७१.४)

मजनयन्त देवा(ऋ.८.१००.११)"इत्यत्र वाक्शब्दस्य वाग्भिन्नार्थकत्व-प्रतिपादनाशक्यत्वाच्च। न चेष्टापत्तिर्मूलोच्छेदप्रसंगात्।

मधुसूदनओझाकेन दर्शितानां युक्तीनामपरे द्वे युक्ती :-

१.क्षुरोभ्राजश्छन्दः-इति यजुर्वेदसंहितायाम्(१५.४) उक्तम्। क्षुर-विलिखने इति धातुः[१]। २.पूर्वं वेद एक एवासीदिति, चतुर्धा तस्य विभाजनं व्यासेन कृतमिति च संप्रदायः। लेखनं विना वेदविभाजनं न शक्यते कर्तुम्।

"- 'आसीदेव लेखनं वेदकाले' इत्यस्तु नाम। लेखनं तद्वेदेतर-विषयम्। वेदस्य तु लेखनं न वेदकाले न संभाव्यते। यतः वाक् पवित्रा दैवी चेत्यमन्यत[२], यस्या लेखनं पाठान्तरदोषादिसंभवभीतै ऋषिभिः पर्यहारि" इति मनीषा स्यात् केषाञ्चन विदुषाम्। वस्तुतस्तु-

पदपाठस्य वाऽष्टविकृतीनां वा रचना(न तु श्रवणमुच्चारणं वा) लिखितस्य वेदवाङ्मयस्य दर्शनं विना न संभवति।

लिखितवेदमन्त्राणां पुस्तकानां परिशीलनं निरुक्तरचयितु-र्यास्कस्य, वेदभाष्यकाराणां सायणादीनां च आवश्यकमभवदिति तु विषयान्तरम्।

ब्लूम्फील्ड्केन कश्चन कुतूहलप्रदोऽथर्ववेदीयो मन्त्र उद्धृतो यत्र स्पष्टं वेदस्यैव लेखनं सूचितम् ![४]

---

१. क्षुरशब्दस्य लोहनिर्मिता लेखनीत्यप्यर्थं मधुसूदन ओझा ददाति। केवलमूहस्यैव साम्राज्यमत्रेति प्रतिभाति।

२. दैवीं वाचमजनयन्त देवाः।

३. वेदोच्चारणमिव वेदस्य लेखनमपि संप्रदायानुगमित्यस्तु, को दोषः ?

४.यस्मात् कोशाद् उदभराम वेदं तस्मिन् अन्तरवदध्म एनम्। [=यस्याः

वेदमन्त्रेषु व्यत्ययचिन्तनमात्रस्यापि पापकृत्त्वप्रसिद्धिः। वैदिकै-रूहपादे ऊहगाने च क्रियमाणं प्रासंगिकं परिवर्तनं तु नैव पाठान्तरम्[१]।

४.कासाञ्चन भारतीयानां लिपीनां संक्षिप्तः परामर्शः

खरोष्ठी ब्राह्मी च भारतस्य प्राचीनतमे लिप्यौ। एतयोः ब्राह्मी-लिपिः सर्वासामपि भारतीयानां लिपीनां मूलम्। कैश्चन प्रतिपादितेऽपि तमिळुलिप्या एव प्राचीनतमलिपित्वे, तन्न सर्वसम्मतम्। ब्राह्मीलिप्याः द्वे सृती वर्तेते। दाक्षिणात्या औत्तराहा च । यद्यपि ब्राह्मी सर्वासां भारतीयानां लिपीनां न साक्षाज्जननी तथापि परम्परया तस्या भारतीय-लिपिवृक्षमूलस्थानीयत्वमविवादम्।

ब्राह्मीलिपिर्न केवलं भारतीयानामेव लिपीनां परन्तु श्रीलङ्का-माल्डीव्स्-मयन्मार्-काम्बोडिया-मलयेषिया-सयाम्-इण्डोनेषिया-राष्ट्रेष्वपि समुपयुज्यमानानां लिपीनां मूलम्। पल्लववंशीया राजानो ब्राह्मीलिप्या दाक्षिणात्यमवतारमुपयुक्तवत्सु प्रधानाः। तावता त एव दाक्षिणात्यब्राह्मीलिपेर्जनका इति वक्तुं न युज्यत इति संशोधकः सर्कार् वदति। आदिमं ब्राह्मीलिपिदाक्षिणात्यरूपं निट्टूर्, उदेगोलो, पाल्किगुण्डु, गवीमठः, मास्ती,सिद्दापुर्, ब्रह्मगिरि(कर्णाटके), यर्रगुडि तथा राजुल

पेटिकाया वयं वेदमुद्धृतवन्तस्तस्यामेव पेटिकायां पुनरेनं स्थापितवन्तः।] (अ.वे.१९.७२)

१.मूलस्य पूर्ववदवशेषणात्। वेदप्रक्षेपे पाठभेदे च द्र.पु.५९,७१। शाखाभेदात् पाठभेदे द्र.पु. ७२,७३। वेदेषु यद् दृश्यते पाठान्तराणामल्पतमत्वं तत्रानूचानोच्चारण संप्रदायः,पाठान्तरसंभवनिवारणार्थाः पदपाठस्तथाऽष्टौ विकृतिपाठाश्च कारणम्। अन्ये विकृतिपाठाः-"जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः। इत्यष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः"इति श्लोकेनोक्ताः।

मन्दगिरि(आन्ध्रप्रदेशे)-एतेषु प्रदेशेषु समुपलभ्यते। इयं दाक्षिणात्यब्राह्मीं द्विधा विभाजयितुं शक्यते :- १.कोङ्कण्-डेक्कन्-आन्ध्रप्रदेशेषु दृष्टा ; २. द्राविडी (कलिङ्गरूपा) चेति।

१.कोङ्कण-डेक्कन्-आन्ध्रप्रदेशेषु दृष्टा दाक्षिणात्या ब्राह्मी क्रिस्त-जननात् प्राग् द्वितीयशकादारभ्य क्रैस्तवीयप्रथमशक-शतक-पर्यन्त-मुपयुज्यते स्म। एषा कोङ्कणे, पश्चिमडेक्कन्प्रदेशे, आन्ध्रप्रदेशस्य केषुचन भागेषु,गुर्जरदेशे,पश्चिममहाराष्ट्रे , दक्षिणमध्यप्रदेशे च शासनेषु दृश्यते। महाराष्ट्रस्य नानाघाटे क्रि.पू. १५० तमे वर्षे उट्टङ्कितं शासनं किमप्युप - लभ्यते। नासिकस्य, पिटल्खोराकस्य, अजन्तायाः, मालवदेशीयस्य खरटराजवंशस्य, क्रैस्तवीयद्वितीयशकशतके गुर्जरदेशस्य, कार्लीप्रान्तस्य, कुदा-जूनार्प्रदेशयोः, क्रि.श.प्रथमद्वितीयशकशतककाले अमरावात्याः, आन्ध्रप्रदेशस्थयवेङ्गिप्रान्तीयबौद्धराजवंशस्य च शासनानि दाक्षिणात्य-ब्राह्म्यैव उट्टङ्कितानि। कोङ्कणान्ध्रपश्चिमडेक्कन्-शासनेषु केचन तत्तद्देश-विशिष्टा आकृतिभेदा अक्षरविन्यासेषु दृश्यन्ते। दाक्षिणात्यब्राह्म्या सार्धम् औत्तराहापि ब्राह्मी काथेवाड-गुर्जर-कोङ्कणादिषु प्रदेशेषु चतुर्थक्रिस्त-शकशतकादारभ्य नवमक्रिस्तशकशतकपर्यन्तमासीदिति विस्मयायायं विषयः। कालक्रमेण औत्तराहाया ब्राह्म्या उपयोगोऽधिकतरः संजातः।

२.द्राविडी (दाक्षिणात्या ब्राह्मी)तु कलिङ्गप्रान्ते(यस्योत्तरस्यां दिशि महानदी, दक्षिणस्यां दिशि गोदावरी च पूर्वघट्टाश्च सीमाभागाः), तमिळुनाडुनि, केरले दक्षिणकर्णाटके च प्रयुज्यते स्म। विद्वद्भिरस्यां दाक्षिणात्यायां सृतौ कलिङ्गीया ब्राह्मी, तमिळु-(गुहा)ब्राह्मी चेति प्रभेदद्वयं प्रत्यभिज्ञातम्। द्राविडी ब्राह्मी पञ्चमक्रिस्तशकशतक एव औतराहाया ब्राह्म्या भिन्नतरामाकृतिं प्राप्नोदिति सुसाधं, विपुलानामव-तारभेदानाम् औत्तराह-ब्राह्म्यनुपलब्धानां तत्रोपलब्धेरिति एन्.पि.-चक्रवर्ति-बूह्लर्-प्रभृति-कतिपयविदुषां मतम्।

मधुरै तिरुनेल्वेली च लिप्यानया उट्टङ्कितैः शासनैः भरिते। आन्ध्रप्रदेशीय-भट्टिप्रोलुशासनं(द्वितीयक्रिस्तशकशतकम्), सातवाहन-वंशीयानाम् आदिमानि शासनानि च द्राविड्या लिप्या उट्टङ्कितानि। क्रिस्तपूर्वतृतीय शकशतकादारभ्य क्रिस्तशकद्वितीयशतक-पर्यन्त-मुत्कीर्णानि तमिळुनाडुप्रदेशीयानि गुहाशासनानि, पुदुच्चेरीसमीपस्थे अरिकमेडुप्रदेशे प्रथम-द्वितीयान्यतर -क्रिस्तशकशतके समुत्कीर्णानि शासनानि,केरलीय-वयिनाडुप्रदेशीयानि च शासनानि लिपिप्रभेदेना-नेनैव उत्कीर्णानि।

वट्टेळुत्तु

वट्टशब्दस्य वृत्तमित्यर्थः, एळुत्तु इति शब्दस्य च लेखनमिति। वृत्ताकारचिह्नाधिक्यादस्या लिप्याः वट्टेळुत्तु इत्यन्वर्था संज्ञा।तमिळु-ग्रन्थलिप्यपेक्षया पुरातनतरैषा लिपिः।पण्णावनसुत्तं (क्रि.पू.३६८) समवायाङ्गसुत्तं (प्रायः क्रि.श.तृतीयशतकम्) भगवतीसुत्तं (क्रिस्तात् पञ्चमशतकीयं) च काञ्चिद् दामिलीलिपिं स्मरन्ति।दामिलीशब्देन द्राविडीशब्दस्य उच्चारणनैकट्यं सुस्फुटम्। चतुःषष्टिलिपीनां पट्टिका ललितविस्तराख्ये बौद्धपुराणग्रन्थे लभ्यते यासां द्राविडीलिपिरन्यतमा। प्रायशो लिपिरेषैव वट्टेळुत्तुलिपिः। बर्नेल्केन सत्यमेवोक्तवता भाव्यं यः शिलप्पधिकारादयः प्राचीनाः तमिळुकृतयोऽनयैव लिप्या प्रथमं लिखिताः स्युरित्यभिप्रैति स्म।समग्रे भारते ब्राह्मीलिप्या बहूनां रूपान्तराणां गोचरीभूतत्वेऽपि सर्वाधिकानि चिह्नान्तराणि वट्टेळुत्तु-लिप्यामेव दृग्गोचरः।

वट्टेळुत्तुलिपिस्तमिळुभाषायाः प्राचीनतमा लिपिर्या तमिळ-कम्-प्रदेशे समुपयुज्यते स्म।तमिळकम् नाम चेर-पाण्ड्याधिपत्यधीनः प्रदेशस्तमिळुनाडुनश्च भूयान् भागः।चेरपाण्ड्यलिपिरिति संज्ञा लिपेरस्या दत्ता शासनज्ञैः।केषुचन कर्णाटकीये कोलारप्रदेशे समुपलब्धेषु

शासनेषु तथा तमिळुनाडुनः चेङ्गल्पेटेप्रदेशेऽपि वर्तमानेषु शासनेषु लिपिरियं दृश्यते।

क्रि.श.एकादशे शतके मलयाळंभाषाया लेखनमप्यनया लिप्याऽऽरब्धम्।केरलराज्ये कदाचिल्लिपिरियं "नानं-मोनं लिपि" रिति संज्ञया व्यवह्रियते या "ओं नमो नारायणाय" इत्यस्यापभ्रंशो यश्च ग्रन्थलेखनादौ क्रियमाणस्य "ओं नमो नारायणाय "इति लेखनस्य सूचकः।

पाण्ड्यराजाश्चोलवंशीयै राजभिः क्रि.श.एकादशशतके पराजिताः। चोलास्तमिळुलिपिमुपयुञ्जते स्म।क्रमेण तमिळुलिपिः सर्वत्र तमिळुनाडुप्रदेशे प्रससार,वट्टेळुत्तुलिपिश्च ह्रासं गता।पञ्चादशशतके तमिळुनाडुनि वट्टेळुत्तुलिप्या उपयोगः स्थगितः।किन्तु मलयाळंलेखनाय लिपेरस्या उपयोगः अष्टादशशतकपर्यन्तमनुवृत्तः।वट्टेळुत्तुलिप्या द्वौ प्रभेदौ मलयाण्मा(मलयाळ्मा)-कोलेळुत्तुनामानौ तत्र जातौ सन्तावन्ववर्तताम्।वस्तुतस्तु मलयाळंलिपिविकासानन्तरं मलयाळंलिपितो वट्टेळुत्तिलिप्या भेदमवगमयितुं वट्टेळुत्तुलिप्या एव मलयाण्मा(मलयाळ्मा) इति संज्ञा दत्ता।लिपिरियं प्रायेण मातृकासु उपयुज्यते स्म, न पुनः शासनेषु।अत्र केवलमेक एवापवादः-मुञ्चिर्-मठोपलब्धशासनपत्रे वट्टेळुत्तुलिप्या लेखनं दृश्यते।महाराजस्वाति-तिरुनाळ्शासनसमये लिपेरस्या उपयोगः स्थगितो विनष्टश्च।

तमिळु

लिपिरियं दाक्षिणात्यब्राह्म्या निकटो बन्धुः।वट्टेळुत्तु-तमिळु-ग्रन्थलिपयः दाक्षिणात्याया ब्राह्म्या एव संतानरूपा इति बूह्लर्कस्य मतम्।वट्टेळुत्तु-ग्रन्थलिप्योः सुस्फुटं प्रभावं दर्शयते तमिळुलिपिः। द्राविडीनां भाषाणां विशिष्टा ध्वनयः वट्टेळुत्तु-ग्रन्थलिपिभ्यां सूचिताश्च

तमिळुलिप्यापि सूच्यन्ते। अङ्कानां चिह्नेऽपि तमिळु-ग्रन्थलिप्योः सौसादृश्यमस्ति। तमिळुलिपिः प्रायः चतुर्थेऽथवा पञ्चमे शतके प्राप्ताकृतिर्भवेत्। चोलानामधीनेषु प्रदेशेषु उपयोगोऽस्यासीत्। क्रि.श. द्वादशशतकानन्तरं पाण्ड्यानां प्रदेशेष्वपि लिपिरियं प्रससार।

अनया लिप्योत्कीर्णानि शासनानि क्रि.श.सप्तमशतकानन्तरं उत्कीर्णानि दृश्यन्ते। द्वितीयस्य नन्दिवर्मपल्लवमल्लस्य(७३०-७९६) काशक्कुडिताम्रपत्राणि, प्रथमस्य परमेश्वरस्य कुरम्-शासनपत्राणि, नृपतुङ्गवर्मणः(क्रि.श. नवमशतके) शासनानि च तमिळुलिप्यां ग्रन्थलिप्यां च लिखितानि येषां भाषे तमिळुसंस्कृते। केषाञ्चनापरेषामपि शासनानि तमिळुग्रन्थलिपिबद्धानि, तमिळु-संस्कृतभाषामयानि च यथा राजराजचोलस्य(क्रि.श.९८५-१०१६)। क्रि.श.एकादशशतकानन्तरं चोलानां शासनेषु केवलं तमिळुभाषा प्रोयोजि। तमिळुलिपिः पाण्ड्यानां शासनावधौ दृढमूला बभूव।

ग्रन्थलिपिः

भारतीयासु सर्वासु लिपिषु प्रायशः संस्कृतलेखनं शक्यते इत्यत्र एकैव लिपिरपवादः, या तमिळुलिपिः। तमिळुलिप्यां घोषाघोषाणाम् अल्पप्राणमहाप्राणानां, तालव्यमूर्धन्यानां च भेदमवगमयितुं न शक्यते। दीधितिशब्दस्तीतितितिरिति, गान्धिशब्दो कान्तीति च लिख्यते तमिळुलिप्याम्। समस्यामिमां परिहर्तुकामाः तमिळुनाडुप्रदेशीयाः संस्कृतविद्वांसः पार्थक्येन विशिष्टां लिपिम् असृजन्। सा च लिपिः ग्रन्थलिपिः। अत्र ग्रन्थशब्दस्य संस्कृतग्रन्थ इत्यर्थः। अर्थात् संस्कृतैकलेखनार्था ग्रन्थलिपिर्नेतरभाषालेखनार्था।

तमिळु-गुहा-ब्राह्मीलिपितो ग्रन्थलिप्याः क्रमिको विकासोऽभूदिति विदुषां मतम्। ए.एच्.दानिनो मतेन आन्ध्रप्रदेशस्थगुण्टूरु-

प्रान्तीयशासनेषु दृश्यायाश्चतुष्कोनशीर्षाकृतिरूपाया लिप्या जातेयं ग्रन्थ-लिपिः। काञ्चीमामल्लपुरतिरुच्चिरापल्लिलब्धेषु शासनेषु वर्तमाना लिप्या-कृतयो लिपेरस्या विकासे महत्त्वपूर्णमेव स्थानं नूनं दत्तवत्य इव प्रतिभाति। अत्र पल्लवानामपि ताम्रफलकेषु वर्तमाना लिप्याकृतिर्नावगणनामर्हति।

कन्नड-तेलुगुलिप्योः प्राचीनकालिक्योः ग्रन्थलिप्या केषुचन चिह्नेषु सादृश्यं गोचरीभवति। अत्र का माता का च पुत्रीति सुस्फुटं वक्तुं न शक्यते। पल्लवमहेन्द्रवर्मणः (क्रि.श.६००-६३०) समये कन्नड-तेलुगुलिपी ग्रन्थलिप्याः कतिचन चिह्नानि स्वीचक्रतुरिति श्रीमन्नारायण-मूर्तेर्मतम्। नेदं मतं सम्यक्, तस्मिन् काले कर्णाटक-तमिळुनाडु-केरलराज्येषु सर्वत्र ग्रन्थलिप्याः प्रसृतत्वस्य अभ्यूहितुमशक्यत्वादिति डा.विशालाक्षी। तमिळु-गुहा-ब्राह्मीलिपिरेव ग्रन्थस्य मातृस्थाने वर्तत इति तर्कसम्मतमिति सा सुदृढमभिप्रैति। ग्रन्थलिपि-तमिळुलिप्योः परस्परेण जननीतनयात्व-रूप-संबन्धहीनयोः पार्थक्येनैवोद्गम इत्यपि केषाञ्चन धारणा।

ग्रन्थलिप्या उद्गमकालः पञ्चमं षष्ठं वा क्रैस्तवीयं शकशतकम्। तमिळुमिश्रणरहिताया शुद्धग्रन्थलिप्याः शासनानि यानि समुपलभ्यन्ते तेषु प्राचीनतमानि सप्तमक्रि.श.कालानन्तरं रचितानि। अधुना समुप-लभ्यमानासु ग्रन्थलिपिलिखितासु मातृकासु प्राचीनतमा मातृकाः याः सन्ति, ताः क्रि.श.१५१५ समये लिखितायाः केशवमिश्रप्रणीताया-स्तर्कभाषाया इति डा.विशालाक्षी ज्ञापयति।

ग्रन्थलिप्याश्चिह्नविकासेषु चतस्रोऽवस्था वर्तन्ते :-१. पुरातनी, २. मध्या, ३. सपरिवर्तना ४. नवीना चेति।

१. पुरातनी पालक्कड-दशनपुर(क्रि.श.५-६ शतकयोः), बादा-मिशासने (षष्ठं शतकम्)वेङ्गीशासनेषु, तिरुच्चिरापल्लिलेबल्स् (महालिङ्गम्-

वर्येण नामग्राहमुल्लिखितेषु), महाबलिपुर- काञ्चीपुरीयेषु पल्लवशासनेषु च दृश्यते।

२. मध्याऽऽकृतिरस्याः (७००-९५०) चोलशासनेषु, प्रथमपरमेश्वरस्य कुरम्-ताम्रफलकेषु (क्रि.श.सप्तमशतकस्य तृतीयपादे), प्रथम-नन्दिवर्मपल्लवमल्लस्य काशक्कुडिताम्रफलकेषु तथा पल्लवशासनेषु (अष्टमे क्रि.श.शतके) गोचरीभवति।

३. सपरिवर्तना आदिमानां पाण्ड्यराजानां शासनेषु, उत्तम-चोलस्य ताम्रफलकेषु(मद्रास्-वस्तुसंग्रहालये स्थापितेषु), राजेन्द्रचोलस्य तिरुविलङ्गाडुफलकेषु अक्षिलक्ष्यीक्रियते।स्थूलया गणनया सपरिवर्तनाया ग्रन्थलिप्याः अस्तित्वव्याप्तिः दशमशतकादारभ्य त्रयोदशशतकपर्यन्ता। महालिङ्गम्-मतानुसारं विजयनगरीयाणि ग्रन्थलिप्युत्कीर्णानि शासनानि ग्रन्थलिप्याश्चरमामवस्थां सूचयन्ति।

संस्कृतलेखनैकप्रयोजनो ग्रन्थलिप्युद्गम इति प्रोक्तपूर्वम्।यत् तमिळु-वट्टेळुत्तु-लिप्युत्कीर्णेषु शासनेषु ग्रन्थलिपिदर्शनं तत्तु संस्कृतशब्द-लेखनार्थम्[1]।तमिळु-ग्रन्थलिप्योर्मिश्रणं द्राविडविशिष्टाद्वैतमतीयेषु ग्रन्थेषु भूयस्या मात्रया गोचरः।

४. नवीनाऽऽकृतिर्ग्रन्थलिप्या यद् दृश्यते तत्तु मातृकासु ।आधुनिके काले मुद्रिता ग्रन्थाः अतीवसुन्दरं लिपिचिह्नं दर्शयन्ति।मातृकास्वनुप-लभ्यमानानां केषाञ्चन वर्णसौन्दर्याणां सृष्टिराधुनिकैः यन्त्रतन्त्रज्ञैः रुचिरत्ववर्धनेच्छुभिः कृता।सर्वास्वपि जीवन्तीषु लिपिष्वेतत् सहजं यत्र ग्रन्थलिपेर्नापवादत्वम्।

कुम्भकोणे बहव आगमाः(विशिष्य शैवागमाः) मुद्रिता लिप्या

१.तत्रभवत्या डा.पि.विशालाक्ष्या रचितं GRANTHA SCRIPT इति ग्रन्थं प्रकृतो ग्रन्थकर्ता सबहुमानं स्मरति यन्मूलकोऽत्र दत्तः तमिळु-ग्रन्थ-वट्टेळुत्तु-लिपिविषयकाणां विचाराणां सारः।

अनया। प्रकृतो ग्रन्थकर्ता कञ्चन संस्कृतविद्वन्मणिं परिचिनोति यः स्वकीयं दैनन्दिनं व्यवहारं टिप्पणीपुस्तके ग्रन्थलिप्यां रचितवानस्ति।

अद्यापि लिपिरियं मुद्र्यमाणा उपलभ्यते। मातृकासु समुपलभ्य-मानानां दक्षिणभारतीयानां लिपीनां सुन्दरतमे लिपी तु , ग्रन्थलिपि-र्मलयाळंलिपिश्चेति प्रकृतस्य ग्रन्थकर्तुर्दर्शनम्।

संस्कृतग्रन्थानां तमिळुलिप्या लेखनं कैश्चन समारब्धं यत् पठने जनयति शिरोवेदनाम्। प्रकृतेन ग्रन्थकारेण तमिळुलिप्यां मुद्रितं याज्ञ-वल्क्यसहस्रनामस्तोत्रं दृष्टम्। भगवद्गीतासंस्कृतस्तोत्रादीनां तमिळुलिप्या लेखनमारब्धप्रायम् ! इदं सौभाग्यं यद् ग्रन्थलिप्याः प्रचुरमात्रया उपयोगार्थमधुना कैश्चित् कम्प्यूटर्यन्त्रोपयोगेन नूतनास्तन्त्रांशाः कृताः, वर्णविन्यासा अपि सृष्टाः।

शारदा

शारदालिपिः काश्मीरेषु लब्धप्रचारा। औत्तराहाणां लिपीनामेषा मुख्यतमा लिपिः। प्रायशः सर्वा अपि प्रत्यभिज्ञाकृतयः अस्यामथवा नेवारीलिप्यामुपलभ्यन्ते। ऋते द्वैतविशिष्टाद्वैताभ्यां सर्वेऽपीतरज्ञानशाखाः लिप्यानया लिखितेषु मातृकासु गोचरीभवन्ति। म्याक्स्मुल्लर्केन ऋग्वेद-संपादनार्थमुपयुक्तानामन्यतमा मातृका शारदालिपिमयी, याऽधुना पुणेस्थे भण्डार्कर्प्राच्यविद्यासंशोधनालये सुरक्षिता।

नमस्ते शारदे देवि काश्मीरपुरवासिनि।
त्वामहं प्रार्थये नित्यं विद्यादानं च देहि मे।।

इत्यस्य श्लोकस्यासंदिग्धेऽपि शारदादेव्याः स्तुतिपरत्वे, शारदाया ज्ञान-रूपायाः सर्वेषु विद्यावृद्धेषु वर्तमानायाः केवलं काश्मीरपुरवासिनीत्व-कथनं चिन्त्यम्। अस्माकमित्थं प्रतिभाति-'देवि' इत्यत्र 'तुभ्यम्' इति सांप्रदायिकं पाठान्तरम्। तुभ्यमिति पाठेऽङ्गीकृते शारदालिपिलिखितानां

मातृकाणां बाहुल्येन काश्मीरदेश एवोपलभ्यमानत्वात् काश्मीरपुरवासिनी शारदालिपिः (न तु सरस्वतीदेवी) इत्यर्थकल्पनं संगच्छते।

कन्नडम्

कर्णाटकं कन्नडलिपिलिखिताभिः मातृकाभिः पूर्णा। इतरलिपिवत् कन्नडलिप्या अपि मातृस्थानीया लिपिर्ब्राह्मी। प्रायशः क्रि.श. तृतीयशकशतके ब्राह्मीलिप्या वर्णविन्यासेषु परिवर्तितानि रूपाणि धृत्वा विकासं प्राप्ता लिपिरियम्।

कदम्बानां काले (४-५ क्रि.श.शतके) कन्नडलिपिः पेटिकाशिर आकृतिं दधार। न केवलं संस्कृतगतानां विसर्गजिह्वामूलीयोपध्मानीयानाम् अपि तु प्राचीनकन्नडस्थयोः 'शकटरेफ'(ೞ)'रळ'(ಱ) योरपि चिह्नानि समयेऽस्मिन्नेव सृष्टानि। बादामिचालुक्यानां काले (६-८ शतकेषु)लघ्वी ऋज्वी च ऊर्ध्वरेखा सर्वाणां वर्णानां दत्ता। कल्याणचालुक्यकाले वर्णविन्यासा अधिकतरं परिवर्तितामाकृतिमधारयन्। 'क' 'र' 'य' प्रभृत्यक्षराणां विन्यासाः आधुनिककालिकैस्तल्लेखने वर्तमानैर्विन्यासैः संवदन्ति। वर्णविन्यसनकला होय्सळराजानां काले(१२-१३ शतकयोः)ऽभिवृद्धिं प्राप। शासनेषु सुन्दरतमानि शासनानि ऐदंयुगीनान्येव। विजयनगरकालिकानि (१४-१६शतकेषु)शासनानि न हृद्यानि परन्तु वर्णविन्यासेषु कांश्चन व्यत्ययान् दर्शयन्ति। १८ शतकीया कन्नडलिपिः कतिचन प्राचीनानि चिह्नानि अवाशेषयत्, सत्यपि तस्या आधुनिक्या कन्नडलिप्या सादृश्याधिक्ये। पूर्वं कन्नडलिप्यां ह्रस्वस्य ए॒कारस्य दीर्घस्य एकारस्य च, तथा ह्रस्वस्य ओ॒कारस्य तथा दीर्घस्य ओकारस्य च लेखने नासीद् भेदः। अष्टादशशतके ह्रस्वस्य ए॒कारस्य ह्रस्वस्य ओ॒कारस्य चोर्ध्वभागे ' ' एतच्चिह्नं योजितं ह्रस्वभेदप्रदर्शनाय।

---

१. 'कन्नडलिपि' : कन्नडविश्वकोशः।

प्रकृतः प्रबन्द्धा कन्नडलिप्यास्त्रीन् भेदान् मातृकासु दृष्टवान्। १.तेलुगुलिप्या सादृश्यम् अदर्शयन्ती कन्नडलिपिः। २.तेलुगुलिप्या सादृश्यं दर्शयन्ती कन्नडलिपिः। ३.जैनैर्लिखिता कन्नडलिपिः। तृतीयः प्रभेदः श्रवणबेलुगोळ-होमुचप्रदेशयोः प्रायेण गोचरीभवति, भूयसां कर्णाटकीय-जैनानां तत्रैवाधिक्येन वासात्।

विद्वांसो लेखकाश्च कन्नडलिपिं प्रायो द्विसहस्रवर्षेभ्य उपयुञ्जानाः सन्ति। तस्मादियम् अतीवमुख्या लिपिः।

नन्दिनागरी

देवनागरीव दृश्यमानापि,केषुचन वर्णचिह्नेषु व्यत्यस्तरूपं स्फुटमेव दर्शयन्ती लिपिर्नन्दिनागरी। दक्षिणकन्नडप्रान्तेऽधिकतरा मातृकाः समुपलभ्यन्ते लिप्यानया लिखिताः। कन्नडं तथा संस्कृतम् एवं भाषाद्वयमपि लिप्यानया लिखितं समुपलभ्यते। प्रायः माध्ववेदान्तग्रन्थाः सर्वेऽपि नन्दिनागर्याम् अथवा तिगळारिलिप्यामुपलभ्यन्ते। किमर्थं नन्दिनागरीत्येषा लिपिः संज्ञितेति विषये बहवो वादा विवादाश्च वर्तन्ते। डा.प्रीति नयन् पञ्चोली महाराष्ट्रस्य नन्दिनगरे (आधुनिके नाण्डियानगरे) जातेति प्रकृतं ग्रन्थकर्तारमुक्तवती। नन्दीति शब्दो देवशब्दपर्याय इति, नन्दिशब्दस्य देव इत्येवार्थ इति डा. पि. विशालाक्षी। नन्दिनागरीमातृकासु पत्राङ्काः कन्नडे यद् गोचरीभवन्ति, तत्कारणं नैताभ्यामभिप्रायाभ्यां स्फुटीभवति। 'अनेक<u>नन्दि</u>विग्रहाढ्यं हम्पिनगरं येषां विजयनगरराजानां राजधानी, तैः प्रचारिता नागरी नन्दिनागरी' इति प्रायो नाम्नोऽस्य व्युत्पत्तिः।

'देवनागर्यां शिरोरेखाया लेखने कण्टस्य तीक्ष्णाग्रत्वात् तालपत्राणि भज्येरन्। तस्माद् विनैव शिरोरेखां लेखनाभ्यासः प्रारब्धो यत्फलतया सृष्टैश्चिह्नैर्बोधजनकत्वं नन्दिनागरीलिप्या वैशिष्ट्यम्' इति केषाञ्चिन्मतम्। यद्यपि मतस्यैतस्य झटिति दूरोत्सारणं न शक्यक्रियम्। तथापीमे विषया अवधातव्याः:-शिलालेखेषु तथा ताम्रफलकेषु शिरोरेखा-

लेखने इत्थंभूतलक्षणा समस्या किल न संभवति। तत्र केन कारणेन नन्दिनागर्या उपयोगः क्रियते ? अनेकासु मातृकासु 'ई'मात्राया लेखने वर्णोर्ध्वभागे दीर्घा रेखा लिखिता दृश्यते। अन्यच्च, देवनागर्यामपि ऊर्ध्वशिरोरेखालेखनं समग्रस्य पदस्य लेखनानन्तरमेव करणीयमिति नियमो नास्ति। वर्णस्य लेखनानन्तरं पार्थक्येन एकैकशः तल्लेखनं कर्तुं शक्यते। (प्रकृतो ग्रन्थकर्ता एवमेव करोति।) किञ्च, ऋते केभ्यश्चनापवादेभ्यः, नन्दिनागर्यां सर्वे वर्णाः लघ्वीं रेखां बिभ्रत्येव। परन्त्वियान् विशेषः- एकस्मिन् वर्णे लिख्यमाना शिरोरेखा अग्रिमवर्णस्य शिरोरेखां न स्पृशति। देवनागर्यापि वर्णानां परस्परेण योगं विनैव लिखितुं शक्यते। यथा "दे व द त्तो ग्रा मं ग च्छ ति"। केचन उपयुज्यमानदेवनागरीलिपयः शिरोरेखां नैव लिखन्ति यथा-**देवदत्तो ग्रामं गच्छति**

देवनागरीस्थशिरोरेखाया अभाव एव नन्दिनागरीसृष्टौ हेतुरिति चेत्, किमर्थं जकारथकारयोः देवनागरीनन्दिनागरीगतयोर्वैसादृश्यम् ? मात्रालेखनेऽपि उभययोर्भेदः स्फुट एव। पदगतानामक्षराणां पार्थक्येन लेखनं न नन्दिनागरीगतो विशेषः। तदनेकासु लिपिषु प्रकामं गोचरः। तालपत्रेषु मन्त्रयन्त्राणां लेखने ऊर्ध्वरेखास्तिर्यग्रेखाश्चाकृष्यन्ते याः यन्त्रेषु चतुष्कोणाकारकाणि रेखगृहाणि निर्मातुमावश्यक्यः। तालपत्रेषु जन्मपत्रिकालेखनं संप्रत्यपि न स्थगितमस्माकं राष्ट्रे। जन्मपत्रिकालेखने तिर्यगूर्ध्वरेखानां लेखनमनिवार्यमिति सर्वविदितम्। तस्माद्, 'वर्णानामूर्ध्वभागे शिरोरेखा यत् क्रियते देवनागर्यां, सैव तालपत्रेषु लेखने तद्विरहितस्य लिप्यन्तरस्य जन्मनि निमित्तम्'इति वादः परिष्कारसापेक्षः। वस्तुतस्तु ग्रन्थ-तिगळारि-मलयाळं-कन्नड-तेलुगुलिपीनां लेखने यत् पार्थक्येन लिख्यन्ते वर्णाः,तस्यैव प्रभावेण नन्दिनागर्यामपि पार्थक्येन लेखनमारब्धम्।

नन्दिनागरीलिपिर्भूयस्या मात्रया संस्कृतलेखनायोपयुज्यते, अल्पीयस्या च मात्रया कन्नडलेखनाय। पुरन्दरदासरचिताः काश्चन

कन्नड-गेय-रचना लिप्यामस्यामुपलभ्यन्ते। माध्ववेदान्तिभिः कन्नडस्यापि लेखनावसरे लिपिरेषा कदाचित् समुपयुज्यते स्म। कन्नड-लेखनावसरे ए(ह्रस्वः)-ए वर्णयोस्तथा ओ(ह्रस्व)-ओ वर्णयोस्तन्मात्राचिह्नानां च भेदलेशोऽपि नास्ति। अर्थानुसारेण पाठकाः भेदमवगच्छन्ति। यथा- एले(ह्रस्वः-पत्रम्) एनु(दीर्घः-किम्), ओले (ह्रस्वः-चुल्ली) ओदु(दीर्घः-पठनम्), बेरळु(ह्रस्वः-अङ्गुली) बेरु(दीर्घः-मूलम्) कोरळु(ह्रस्वः-कण्ठः) कोलु (दीर्घः-दण्डः)। कन्नडलिप्यामपि क्रि.श. सप्तदशशतकात् पूर्वं वर्णानाममीषां लेखनभेदो नासीदिति प्रोक्तपूर्वम्। नन्दिनागर्यां कन्नडाङ्का एव दृश्यन्ते न पुनर्नन्दिनागरीविशिष्टा अङ्का इति च स्मराम।

नन्दिनागरी प्रायः क्रि.श.सप्तमे शतके जनिमाप। लिप्या अस्याः संपूर्णो विकासः क्रि.श.दशमे शतके संबभूव। शलुवन्कुप्पं-समीपस्थे अतिरणचण्डेश्वरदेवालये वर्तमानेषु सप्तस्तरेषु वर्तमानं शासनमनयैव लिप्या लिखितं यस्य लेखनकालः क्रि.श.सप्तमं शतकम्। गञ्जाम् मण्डलान्तर्गतजयपुरसमीपे समुपलब्धानि शासनानि लिप्या अनयैव लिखितानीति ए.डि.बर्नेल्कस्य मतम्। नन्दिनागर्या राजोचितं स्थानं विजयनगरीयै राजभिर्दत्तं यत्कारणात् कर्णाटकेषु सर्वत्र नन्दिनागरी समुपलब्धप्रचुरप्रचारा जाता[१]।

तिगळारी

तिगळारी आलङ्कारिकविन्यासहीना मलयाळंलिपिरिति कथयितुं शक्यते यत्र मलयाळंलिपिगोचराः सुन्दरा विन्यासा न सन्ति। अत्रत्यानि त्रिचतुराणि वर्णचिह्नानि मलयाळं-गतेभ्यो वर्णचिह्नेभ्यो वैसादृश्यमपि दर्शयन्ति। दक्षिणकर्णाटके भूयानस्य प्रचारः। केषुचन प्रदेशेषु लिपिरेषा बाल(ळ)बन्धुरित्यपि अभिधीयते स्म। अस्य हेतुर्न स्पष्टः।

१. अस्मिन् प्रघट्टके दत्तो विषयो डा.पि.विशालाक्ष्या विरचितस्य NANDI-NĀGARĪ SCRIPT ग्रन्थस्य पीठिकातो गृहीतः।

ग्रन्थ-मलयाळं-लिप्योर्मध्यमामवस्थां सूचयत्येषा लिपिः। अस्यां लिप्यां भूयस्या मात्रया उपलभ्यमाना ग्रन्थाः सांस्कृताः। कन्नडलिप्या ग्रन्था अप्यत्र गोचरः। नन्दिनागरीलिपिवल्लिप्यामस्यामपि कन्नड-लेखनावसरे ए(ह्रस्वः)-एवर्णयोस्तथा ओ(ह्रस्व)-ओवर्णयोस्तथा तन्मात्राचिह्नानां च नास्ति लेशतोऽपि भेदः। अर्थानुसारेण पाठकैर्भेदो ज्ञातव्यः। तुळुग्रन्थास्तुळुभागवत-तुळुयक्षगानादयो लिप्यानया लिखिता उपलब्धा यत्, तदतीवाल्पया मात्रया। तस्मात् तुळुलिपिरिति लिप्या अस्या नामधेयमिति केषाञ्चिदाधुनिकानां वादो न सम्यक्। तिगळारीनाम्न्या लिप्या संस्कृतकन्नडतुळुनाम्न्यो भाषा लिख्यन्त इति स्पष्टमवगन्तव्यम्।

तुळुभाषालिखितानां न्यूनसंख्याकानां ग्रन्थानामस्यां लिप्यामुपलब्ध्या तुळुलिपिरित्यस्या नामकरणे औचित्यमस्तीति चेत्, 'तुळुग्रन्थसंख्यापेक्षया अधिकतरं संस्कृतग्रन्थानां लिप्यामस्यामुपलब्ध्या संस्कृतलिपिरिति च नामधेयं किमर्थं न क्रियते ? ' इति पर्यनुयोगस्य प्रसंगः। वस्तुतस्तु तिगळारीति लिप्या अस्या वास्तविकी संज्ञेत्यत्र शासनप्रमाणमपि वर्तते। तादृशं किमपि प्रमाणमस्यास्तुळुसंज्ञावत्त्वे नास्ति[१]।

नन्दिनागरीलिपिवत् तिगळारीलिप्यामपि माध्वग्रन्था उपलभ्यन्ते। होन्नावरप्रदेशे सामवेदशाखाग्रन्था अनया लिप्या लिखिताः प्रकृतेन ग्रन्थकर्त्रा दृष्टाः। कारणैरेतैर्लिपिरियम् अतीव मुख्या लिपिः। विशिष्य कासरगोडुप्रान्ते लिप्याऽनया लिखिता ग्रन्था बहुधा समुपलभ्यन्ते। प्रायः तिगळारीलिपिलिखितासु मातृकासु अङ्कलेखनं कन्नडेनैव क्रियते। अतिविरलेषु प्रसंगेषु मलयाळंलिप्या विशिष्टा अङ्का लिख्यन्ते। प्रायस्तगळारीलिपिलिखिताः मातृका विशदाक्षराः।

१. एतद् दृढीकृतवते डा.केळदी गुण्डाजोयिस्वर्यस्य अधमर्णोऽस्ति प्रकृतो ग्रन्थकर्ता।

देवनागरी

देवनागरीलिपिरद्यत्वे संस्कृतसाम्राज्यं शासती महाराज्ञी इव भाति। तत्र कारणं स्पष्टम्। उत्तरभारतीया मुद्रणालयाः दक्षिण-भारतीयमुद्रणालयापेक्षया अधिकतरं प्रभावं प्रादर्शयन्। अनेके सुन्दरा वर्णविन्यासा देवनागर्यां सप्रभेदाः(गुरु-लघु-स्थूल-सूक्ष्म-वक्राः) इतर-लिप्यगोचराः पूर्वमेव सृष्टा अस्याम्। मुद्रितग्रन्थेषु प्रयुक्तास्वितरासु लिपिषु पूर्वं तादृशो भेद एव नासीत्। ग्रन्थसंपादनशास्त्रानुसारेण योक्तव्याऽपि सामग्री(सप्रयोजनपीठिका-पाठान्तरसूचन-परिशिष्टादिका) देवनागरी-लिपिमुद्रितासु कृतिषु योजिताऽऽसीत्। अन्यच्च। संस्कृतस्य समग्रमपि वाङ्मयं यथा देवनागर्यां मुद्रितं तथा नैवेतरासु लिपिषु। क्रमेण संस्कृतभाषाप्रपञ्चे देवनागर्या एवाधिपत्यमजायत। अस्माभिरिदानीं दृश्यमाणः शब्दकल्पद्रुमः प्रथमं वङ्गलिप्या मुद्रित इति ज्ञायते। यदधुना देवनागरीसंस्करणं वयं पश्यामस्तत् द्वितीयं संस्करणम् ! संस्कृतग्रन्थेषु देवनागरीलिप्या इतर-लिप्यपेक्षयाऽधिकतरोपयोगपरिपाटीसृष्टौ निर्णयसागर-चौखम्भा-मोतीलाल्बनारसीदास्प्रभृति संस्कृतग्रन्थप्रकाशकानां प्रधानं पात्र-मस्ति। विशिष्यात्र निर्णयसागरस्य महत्तममस्ति पात्रम्। क्रि.श.१९-२०शतकयोर्ये विद्वांस आसन् ते सर्वेऽपि प्रायो निर्णयसागरमुद्रितग्रन्थानेव अपेक्षन्ते स्म। तत्र मुद्रितेषु लघुसिद्धान्तकौमुद्यादिषु ग्रन्थेषु वर्तमाना वर्णविन्यासाः परमसुन्दराः। अन्यच्च, तत्र मुद्रितेषु ग्रन्थेषु मुद्रणदोषा इतरमुद्रणालयमुद्रितानां ग्रन्थानामपेक्षया न्यूनतराः। गुजरातीप्रिण्टिङ्ग्-प्रेस् इत्यत्र मुद्रितेषु ग्रन्थेषु सुदर्शनशास्त्रिप्रणीतव्याख्यासमेतन्यायभाष्ये, वादार्थसंग्रहे, श्रीनिवासशास्त्रिसंपादितस्य व्याख्यात्रयसमुपेतरामायण-संस्करणस्य पीठिकायां च समुपलभ्यमानं वर्णविन्याससौन्दर्यं तु निर्णयसागरमुद्रितग्रन्थवर्णविन्याससौन्दर्यादधिकतरम्।

देवनागरीलिपिः सर्वग्रन्थेषु रुचिरैवेति न भ्रमितव्यम्। शब्द-

कल्पद्रुमवाचस्पत्योःकोशयोः, सारदारञ्जनरे-कुमुदरञ्जनरे-प्रणीत-व्याख्यासमेतसिद्धान्तकौमुद्यां च समुपलभ्यमाना मुद्रणविन्यासाः सर्वथाऽप्यहृद्याः।

संप्रति देवनागरीं लिपिमजानानः संस्कृतविद्वान् कोऽपि नास्त्येव। किन्तु एकोनविंशशतकस्यादिभागेऽष्टादशशतकान्तिमभागे तत्पूर्वं च तादृशा आसन्! देवनागरीतरलिपिभिः प्रारब्धसंस्कृताध्ययना विद्वांसः कालक्रमेण देवनागरीलिप्या ज्ञानमवश्यलब्धव्यं मेनिरे, तैर्ज्ञातपूर्वासु लिपिषु तदभीष्टग्रन्थानां कदाचिन्मुद्रितत्वेऽपि तत्रावश्यकपीठिकाविषयानुक्रमणिका-पाठान्तरसूचनपरिशिष्टादिसामग्रीणामभावात्। अधुना भारते सर्वत्र संस्कृताध्ययनं देवनागरीलिपिपरिचयपूर्वकमेवारभ्यते।

देवनागरीति नामकरणं किंनिमित्तमिति न स्पष्टम्। यद् देवानां नगरे जातत्वाद्देवनागरीसंज्ञावत्त्वमस्या लिप्येति प्रायोवादस्तन्न सम्यक् केवलं संस्कृतभाषायास्तथात्वे प्रसिद्धेः, लिप्या अस्या देवनगरे संजातत्वस्य प्रसिद्धिवैधुर्याच्च। लेखनं ब्रह्मणा सृष्टमिति नारदस्मृतिः[1]। किन्तु नारदस्मृत्या निःसृतोऽभिप्रायो सर्वलिपिगामिनं विशिष्य तु ब्राह्मीलिपिगामिनं भावं प्रदर्शयति। देवनागर्या नास्य विशिष्टः संबन्धः।

नगरमिति शब्दस्य पुरपरत्वान्नगरे जाता नागरीति सार्वजनीनोऽभिप्रायः। नागरब्राह्मणानां लिपित्वादियं नागरीति संज्ञितेति मतं चिन्त्यम्। नागरीति शब्दस्य औत्तराहेषु प्रान्तेषु देवनागरीत्यर्थत्वेऽपि, नन्दिनागरीत्यर्थो कर्णाटके मातृकासूचिषु वर्तत इत्यवधेयम्।

"नामैकदेशग्रहणेन नामग्रहणम्" इति न्यायेन देवशब्दस्य महादेवे तात्पर्यकल्पनया महादेवशब्दस्य प्रायशः शिवपर्यायत्वात्, शिवः

---

१. नाकरिष्यद् यदि **ब्रह्मा** लिखितं चक्षुरुत्तमम्। तत्रेयमस्य लोकस्य नाभविष्यच्छुभा गतिः।।(४.७०)

काश्यां निवसतीति प्रसिद्ध्या च देवनगरमिति शब्दस्य काशीत्यर्थे गृहीते देवनागरी इत्यस्य काश्यां, काशीं परितश्च प्रयुक्ता लिपिरित्यर्थः कल्पनीय इति प्रतिभाति। उत्तरप्रदेशे देवनगरमिति नगरविशेष एवासीदिति केनचित् साधिते तु विवादोऽयं समाप्यत एव। देवनगरमिति समस्तस्य पदस्य तद्धिते आदिवृद्धेरनिवार्यत्वाद् दैवनगरीति रूपस्य साधनीयत्वेऽपि "स्थितस्य गतिश्चिन्तनीया" इति न्याये शरणीभवनेन देवनागरीति रूपं समाधातव्यम्।

गुप्तवंशीयेन देवेतिबिरुदभाजा स्कन्दगुप्तेन गुर्जरराज्यीयस्य नागरखण्डस्य शासितत्वान्नागरखण्डे देवशासिते लब्धप्रचारा लिपिर्देवनागरीति डा. आर्. शेषशास्त्रिणो मतम्[१]। मतस्यास्य प्रमाणं मृग्यम्।

५.विविधानां लिपीनाम् अभ्यासः

कथमेतावतीषु लिपिषु प्राज्ञत्वमासादनीयम् इति कोऽपि सकुतूहलं पृच्छेत्। तिगळारीलिप्या अभ्यसनीयत्वे तिगळारीलिप्या मातृकापट्टिका प्रथमं प्राप्तव्या। तिगळारीलिप्यभ्यासस्यादिमे स्तरे तिगळारीज्ञानां साहाय्यमपेक्ष्यत इति सुप्रसिद्धम्। भगवद्गीतायाः सुलभत्वात् अस्मद्ज्ञातायां लिप्यां मुद्रितायाः भगवद्गीतायास्तथा तिगळारीलिपिलिखिताया भगवद्गीतामातृकाया अस्मदग्रे स्थापनेन उभययोश्च क्रमेण पठनेन प्राप्तपरिचयया तिगळारीलिप्या कस्याञ्चन टिप्पणीपुस्तिकायां त्रिचतुरपुटपर्यन्तं भगवद्गीतालेखनाभ्यासः करणीयः। एतेन तिगळारीलिपिज्ञानं जायते। तदनन्तरम् अन्येषां श्लोकानां ग्रन्थभागानां गद्यवाक्यानां वा लेखनाभ्यासे कृते तिगळारीलिप्या विषये सुस्फुटं चित्रणमस्माकं मनोमन्दिरे

१. "संस्कृतहस्तप्रतिगळु"-मणिह। बि. एम्. श्री स्मारक-प्रतिष्ठानम्-बेङ्गलूरु 1982 पु. २२७

स्थानं प्राप्नोति। केवलम् एकस्याक्षरस्याथवा द्वयोरक्षरयोः पौनःपुन्येन लेखनात्, समग्राणां वाक्यानां श्लोकानां वा लेखनं वरम्। वस्तुतस्त्वत्र कस्यापि व्याकरणग्रन्थस्य अवलम्बनमादिमे स्तरे महत्साहाय्यमाचरति, व्याकरणग्रन्थेषु भूयस्या मात्रया संयुक्ताक्षराणां सत्त्वात्। ञ-झ-ङानां शुद्धानाम् (=अतदितरव्यञ्जनमिश्रणानां) स्वरूपं स्पष्टं ज्ञातुं कस्यापि व्याकरणग्रन्थस्य कतिचन पत्राणि परिशीलनीयानि। ञ-झ-ङः वर्णाः व्यञ्जनान्तरासंकीर्णा व्याकरणभिन्नेषु ग्रन्थेषु विरलाः।

परन्वस्मदभीष्टाः मातृकाः सदापि लभ्यन्त एवेति न निश्चयः। तस्मादभ्यासार्थं को ग्रन्थ आदातव्य इति निर्धारणाकरणात् प्राग् मातृकाभण्डारगतानां हस्तप्रतीनां सूची बाढं द्रष्टव्यैव। ततो मातृकागतेषु ग्रन्थेषु ये मुद्रिता उपलभ्यन्ते तद्ग्रन्थयुक्ता मातृका अभ्यासार्थमादातव्या।

अनेन क्रमेण दाक्षिणात्यानां लिपीनामभ्यासार्थं प्रयत्नेषु कृतेषु ग्रन्थ-कन्नड-नन्दिनागरी-लिपयोऽनेन क्रमेणाभ्यसनीयाः। ततः मलयाळंलिपिस्तथा तिगळारीलिपिः क्रमेण सुलभा भवन्ति। तत्र कारणं लिपिवर्णविन्यासेषु आकारसादृश्यम्।

अयं क्रम औत्तराहाणामपि लिपीनामभ्यासायादर्तव्य इत्यर्थापत्त्या प्राप्तो विषयः। ओड्र-शारदा-वङ्ग-मैथिली-लिपयः अनेन क्रमेणाभ्यसनीयाः। क्रमेण संबन्धज्ञानलाभात् भोटरञ्जनादिलिपीनां ज्ञानं सुलभं भवति।

अभ्यासार्थमादातव्या मातृका विशदाक्षरा सुन्दरं च लिखिता भवेदिति गदनं नावश्यकं, सर्वविदितत्वात्तस्य।

कासाञ्चन मुद्रणक्षेत्रमप्रविष्टवतीनां नन्दिनागरीप्रभृतीनां लिपीनाम् अभ्यासार्थं केवलं मातृकाणामादानम् अनिवार्यम्। मुद्रित-

ग्रन्थोपलब्धानामपि ग्रन्थलिप्यादीनामभ्यासः पार्थक्येन करणीयैव मुद्रितमातृकायोरक्षरविन्यासभेदज्ञानस्यावश्यकत्वात्।

मातृकागतानां लिपीनाम् अक्षरप्रत्यभिज्ञानं ग्रन्थसंपादनशास्त्रस्य न स्वस्तिलेखः(=प्रारम्भः)। रोमन्लिप्या अक्षराणां ज्ञानं न किल भौतशास्त्रस्य रसायनशास्त्रस्य वा उपक्रमस्तरः ! किन्तु भौतशास्त्ररसायनशास्त्रयोर्ज्ञाता जनो मातृकास्थ-तद्विषयक-ग्रन्थगत-पदानां पठनेऽधिकतरं समर्थो ननु भवति ! अर्थाद् यस्मिन् विषये पठितृजनस्याधिकारः, तद्विषयवन्मातृकास्थग्रन्थपठने तस्याधिकतरं सामर्थ्यम्। केवलं सामान्येन इङ्ग्लिष्भाषाज्ञानेन यथा इङ्ग्लिष्भाषारचितान् एकनामिक्स्युक्तान् ग्रन्थान् झटिति पठितुमवगन्तुं च यथा वयं न प्रभवामः, यथा च तत्र तद्विषयकं गम्भीरमध्ययनमपेक्ष्यते, तद्वत् मीमांसाशास्त्र-नव्यन्यायशास्त्रपरिचयं विना केवलं सामान्यतो ज्ञातया तिगळारीलिप्या, प्राप्तेन च सामान्य-(साहित्यस्थ) संस्कृतज्ञानेन च तिगळारीलिपिलिखितां कामपि मीमांसाशास्त्रकृतिं नव्यन्यायकृतिं वा सम्यक् पठितुं वयं न प्रभवामः। मुद्रितानपि ग्रन्थान् वयं शीघ्रं पठितुमवगन्तुं च न प्रभवामो, मुद्रितकृतिगतविषयेऽस्मदपरिचिते - इति स्वप्नेऽपि न विस्मरणीयम्।

अस्माभिरत्रादत्तो विषयो मातृका यत्र लिपिलेखने नैकरूप्यम्। एकस्यामेव मातृकायाम् एकस्यैव वर्णस्य लेखने केचन सूक्ष्माः प्रकारभेदाः स्युः। तस्माल्लिपिपरिचयानन्तरमपि मुद्रितग्रन्थपठनवन्निरर्गलं मातृकास्थग्रन्थपठनं सर्वथाऽप्यसंभवम्। अपिच अस्पष्टे,व्यामिश्रित इव च वर्तमाने लेखने, मातृकापठनमतीव क्लिष्टम्। संस्कृतस्य प्रौढं ज्ञानं, तथा मातृकास्थ-ग्रन्थगते विषये च सम्यक् परिचय एवं द्वयोरवलम्बनेन मातृकालिपिगताक्षराणां प्रत्यभिज्ञानं कर्तव्यम्। अद्यापि लिखितलेखस्थवर्णानाम् अभिज्ञाने वयमस्मदीयं भाषाज्ञानमवलम्बामहे, नावलम्बामहे केवलं लिपिज्ञानम्। वस्तुतस्तु लिपिज्ञानं नाम लिपिचिह्नद्वारा भाषागतवर्णप्रत्यभिज्ञानम्।

रोमन् लिपिः[1]

संस्कृतार्थमद्यत्वे कैश्चिद् वैदेशिकैर्भारतीयैश्च उपयुज्यमानां रोमन्लिपिमधिकृत्य त्रिचतुराणां विषयाणामत्र निर्देशनमत्यावश्यकं प्रतिभाति। अस्या लिप्या मातृकास्वनुपलभ्यत्वेऽपि प्राच्यशास्त्रज्ञा अधिकतरमिमामुपयुञ्जते। इयं लिपिरितरलिप्यपेक्षयाऽऽनुकूल्यातिशयं ददात्यभ्यासि जनानाम्। अक्षराकारसादृश्यनिमित्तकभ्रान्त्यभावः प्रथमम् आनुकूल्यम्। लिप्यामस्यां मात्राक्षराणां लेखनम् एकं क्रममनुसरति यत्र नापवादलेशः। एकस्य वर्णचिह्नस्य केवलमेकमेवोच्चारणमौल्यं लिप्या मस्याम्। तस्मात् संयुक्ताक्षराणां लेखनमतीव सुस्पष्टमत्र। कात्स्र्न्यमिति लेखनमतीव सुलभमत्र यथा *kārtsnya* ।यदि लिप्या अस्याः प्रचारः सम्यग् भवेदस्मदीया जनाः 'ज्ञानं', 'ज्ञापकम्' इति च शब्दद्वयस्य अस्तव्यस्तोच्चारणं[2] त्यजेयुः शुद्धोच्चारणे च प्रभवेयुः।

लिप्यामस्यामपवादचिह्नानामभावाद्भारतीयानां लिपीनामवलम्बनेन सन्धीनां शिक्षणापेक्षया, लिप्या अस्या अवलम्बनेन सन्धीनां ज्ञापनं सुलभतरम्। अस्यां लिप्याम् इङ्ग्लीष्भाषया लेखनावसरे पदम् अजन्तं वाऽस्तु हलन्तं वा , तस्य शुद्धं प्रातिपदिकं लिख्यते। *Rāma* इति लिख्यते न पुनः *Rāmaḥ* इति। तद्वत्, *Upaniṣad* इति लिख्यते न पुनः *Upaniṣat* इति। अत्र केवलमेक एवापवादः। *Brahmā* इति पुंल्लिङ्गे प्रथमैकवचनरूपं तथा *Brahman* इति प्रातिपदिकम् उभययोर्लेखनम् अनुमन्यते लिप्याऽनया लेखनकाले। प्रथमस्य चतुर्मुखो ब्रह्मेत्यर्थः। द्वितीयस्य च परमम् आत्मवस्त्वित्यर्थः।

अन्यच्च। लिप्यानया इङ्ग्लीष्भाषया च लेखनावसरे ग्रन्थानां नामानि, पारिभाषिकाः शब्दाः, उद्धृतयः, संस्कृतस्य च सुदीर्घानि

१. लिप्या अस्या तालिका ग्रन्थारम्भाद् प्राग् दत्ता।

२. द्र.पृ. ६७

प्रघट्टकानि-एतत् सर्वं वक्राकरम्(*italics*)। संस्कृतग्रन्थानां गद्यानां वा पद्यानां वा लेखनावसरे सर्वाण्याप्यक्षरचिह्नानि लघूनि। इङ्ग्लीष्केन रोमन्लिप्या च लेखनावसरे संज्ञावाचकशब्दानाम् आद्याक्षराणि बृहन्ति (caps)। अनया पद्धत्या 'अमुकः शब्दः संज्ञावाचक'इति स्पष्टं ज्ञायते।

अद्यत्वे प्राच्यशास्त्रज्ञाः व्याकरणस्थानां प्रत्ययागमधातु-प्रत्याहारलकारगतानां चानुबन्धानां लेखने कञ्चन विधिमनुतिष्ठन्ति तदनुसारेण सर्वत्रापि अनुबन्धस्य ज्ञापनं बृहदक्षरेण करणीयम्। तदनुसारेण अष्टाध्याय्याः सूत्राणि एवं लिख्यन्ते- *hanaḥ siC* (अष्टाध्यायी १.२.१४), *lAṬ sme* (अष्टाध्यायी ३.२.११८), *rājāhaḥsakhibhyaṣ ṬaC* (अष्टाध्यायी ५.४.९१), *pūṄaśca* (अष्टाध्यायी ७.२.५१), *śaRpūrvāḥ khaYaḥ* (अष्टाध्यायी ७.४.६१), ।

प्रायः सर्वेऽपि वैदेशिका न केवलं संशोधनलेखेषु परन्तु ग्रन्थशरीरेऽपि लिपिमेतामेवोपयुञ्जते।

प्रश्नः:भारतीयासु लिपिषु कृतपरिचया विद्वांसो रोमन्लिपिं न पठन्ति नापि लिखितुं शक्नुवन्ति,'च'इत्यक्षरस्य सूचनार्थं '*ca*' इति लेखनं तथा *sha* इत्यस्य सर्वथाऽभावस्तेषां मस्तिष्के न जीर्यति। कः परिहारोऽस्याः समस्यायाः ?

उत्तरम्: अपरिचितायाः यस्याः कस्या अपि लिप्याः प्राथमिके परिचायने सर्वेऽपि स्खलन्ति। रोमन्लिप्याः परिचये विद्वद्भिरपि कदाचित् क्रियमाणः प्रमादः सहज एव। यदि रोमन्लिप्यां लिखिताया अस्मद्भाषा-व्याप्त्यनन्तर्गताया इङ्ग्लीष्भाषायाः परिचयो भारतीयानां तथा सुलभ-मभूद् यथा, ते तयैव भाषया ग्रन्थानपि रचयितुं प्राभवन्, बाढं ते कृताभ्यासास्तल्लिपिप्रकटितान् संस्कृतग्रन्थान् पठितुं ज्ञातुं च प्रभवन्त्येव।

६.लेखनार्थं मातृकाणां सज्जीकरणम्

अस्मद्राष्ट्रोपलभ्यमाना मातृकाः प्रायश्चतुर्विधाः। तालमातृकाः, भूर्जत्वङ्मातृकाः, कागदमातृकाः साञ्चीपटमातृकाश्चेति। तालमातृकाः अत्र परिचायिताः।

सत्यपि तालस्य वृक्षत्वेन व्यवहारे नायं वृक्षो वस्तुतस्तस्य तृणेन संबद्धत्वात्। तस्मादेव 'तृणराज'इति नामान्तरमस्य। तालो द्विविधः श्रीतालस्तालश्चेति। तालस्य खरतालेत्यन्यन्नाम। श्रीतालः खरताला-पेक्षया सूक्ष्मः। श्रीतालस्य वर्णः श्याममिश्रः पीतः। तालस्य तु उज्ज्वलोऽथवा साधारणः पीतः। प्रायः श्रीतालो दीर्घतरः। कदाचित् सार्धद्विवितस्तिदीर्घं श्रीतालपत्रं पश्यामः। तालः कदापि तावद्दैर्घ्यवान् न भवति।

तालपत्राणि पिञ्छानीव दृश्यन्ते। तस्मात् कन्नडादिद्राविड-भाषासु "गरि"(=पिञ्छम्)इत्युच्यते कदाचित्तालः[१]। पत्राणि परस्परेण संयुक्तानि सन्ति चामराकारं सृजन्ति[२]।

तालमातृकानिर्माणार्थमादावपेक्षिते प्रमाणे पत्राणि कर्तनी-यानि। ततः त्रिंशन्निमेषपर्यन्तं (केषाञ्चिन्मतानुसारम् एकदिनपर्यन्तं) तस्य उष्णे जले निमज्जने कारिते[३] मृदूभवन्ति पत्राणि। अन्यथा तालपत्राणि लेखनानर्हाणि सन्ति शीघ्रं भज्येरन्। तस्मादिदमनिवार्यम्। ततो वाश्या

१. पत्री इति शब्दस्य पक्षी इत्यर्थः संस्कृते। आण्डपिळ्ळैनामकस्य आपस्तम्बा-श्वलायनश्रौतसूत्रयोर्व्याख्यातु'स्तालवृन्तनिवासी' इत्यपरा संज्ञा आसीत्। तालवृन्तशब्दस्य व्यजनमित्यर्थः प्रसिद्धो यथा 'सीताकरावर्तिततालवृन्ता' इति मल्लकविरचित उदारराघवे (५.८)। महाराष्ट्रप्रदेशे ताडपत्रीकर इति संज्ञा जनानामधुनापि वर्तते।

२. नारिकेलपत्राणि मध्यदण्डे पार्थक्येन लग्नानि परस्परेण त्वलग्नानि।

३. किन्तु विवादास्पदमिदम्। "तैलाद् रक्षेज्जलाद् रक्षेत् "(द्र.पु.२९५)

दारुतक्षण्या वा (carpenter's plane)घर्षणेन पत्राणां चतुरश्रेष्वपि समानि करणीयानि। ततो दारुफलकद्वयं रक्षणार्थं निर्माय, सदारुफलकद्वयेषु तालपत्रेषु सूत्रस्यान्तः प्रवेशनार्थं रन्ध्रद्वयं कार्यम्। दक्षिणभारते समुपलभ्यमानासु तालमातृकासु रन्ध्रद्वयमतीव साधारणम्। एकरन्ध्रयुक्ता अपि मातृका गोचरीभवन्ति, किन्तु विरलास्ताः। रन्ध्रद्वय करणं तु मङ्गलार्थम्। समसंख्या मङ्गलेति विषमसंख्या चामङ्गलेति भारतीयानां परंपरानुगता श्रद्धा। सूत्रस्य रन्ध्रे प्रवेशो मातृकायाः पत्राणां बन्धनाय। रन्ध्रद्वययुक्तासु मातृकासु वामे रन्ध्रे सूत्रप्रवेशः कार्यते। इयं लेख्यसामग्री।

लेखनसामग्री तु कण्टोऽथवा बाणः। काष्ठाकारकोऽयं कण्टः। कण्टेन किमपि तालपत्रेषु लिखितुं शक्यते। अयसाऽथवा ताम्रेण निर्मीयते कण्टः। तीक्ष्णाग्रोऽयं कण्टः। अस्य पश्चाद् भागः कदाचिद् विस्तृतः। सोऽपि कदाचित् तीक्ष्णः। तस्य प्रयोजनं तु पत्राणां कर्तनम्।

लेखने पङ्क्तीनाम् उच्चावचत्वहीनतानिर्वाहो नातीव कष्टाय। वस्तुतस्तु सुलभमिदम्। पत्राणामूर्ध्वान्तिभागे रेखात्वेन गृहीते तस्य साक्षादधोभागे कृते प्रथमपङ्क्तिलेखने प्रथमपङ्क्तिनिर्वाहः स्वयमेव सिद्ध्यति। प्रथमाया लेखनपङ्क्तेरधोभागे द्वितीयपङ्क्तिलेखनं, ततस्तृतीय-पङ्क्तिलेखनमित्यनेन क्रमेण सर्वा अपि पङ्क्तय ऋज्व्यो भवन्ति। यदि तालपत्रमतीवदीर्घं, पङ्क्तीनाम् ऋजुत्वनिर्वाहाय ससूत्रं दारुफलकमुप-युज्यते। फलकमेतत् पत्रापेक्षया दीर्घतरम्। ह्रस्वाः शङ्कवः समान्तरयो-रुभयोरन्तयोः घट्यन्ते। सूत्राणि तेषु दृढं बध्यन्ते। पत्राणि प्रवेशयन्ति लेखकाः शङ्कुबद्धानां सूत्राणामन्तः , लिखन्ति च सूत्रपङ्क्तीरनुसृत्य।

इत्यादिना जलसंस्पर्शस्य तालपत्रेषु निषिद्धत्वात्। केषाञ्चन मतेन भूमौ मृत्तिकायां तालपत्राणि कतिपयदिनपर्यन्तं स्थापनीयानि।

मशी ततो योज्यते। मशीनिर्माणाय बहवो विधय आसन्। तासु दक्षिणभारतस्य केषुचन प्रदेशेषु विशिष्य कर्णाटकेऽयं विधिः- "रागी" नामकस्य धान्यस्य सक्तु क्वथयितव्यं जले। संभवति चिक्कणत्वे (यवागू-वत्) तद् वस्त्रेणादाय लिखिततालपत्रोपरि प्रोञ्छयितव्यं येन रागी-चिक्कणस्य स्तरः कश्चन संभवति। दशनिमेषानन्तरं पुनः शुद्धेनान्येन वस्त्रेण तत्र प्रोञ्छने कृते, अक्षरस्थले कृतेषु निम्नेषु 'रागी' अवशिष्यते, अन्यत्र अलिखितेषु भागेषु वर्तमाना राग्यवशेषा अपगच्छन्ति। अक्षराणि स्पष्टीभवन्ति। रागीधान्यस्य कृष्णत्वादक्षराणि कृष्णीभवन्ति। रागीधान्य-सक्तु अतीव दढं भवति। दग्धकदलीफलशल्कजस्येङ्गालस्य चूर्णमपि मशीत्वेनोपयोक्तुं शक्यते। हालुवाणनामकस्य क्षुपस्य पत्राणां रसमपि मशीत्वेनोपयोक्तुं शक्यत इति प्रकृतं ग्रन्थकर्तारं बेङ्गलूरु-समीपस्थे आनेकल्लुप्रदेशे कश्चन सज्जन उक्तवान्। कदलीफलशल्केङ्गालस्याथवा हालुवाणक्षुपपत्ररसस्योपयोगानन्तरं पत्राणि शोषणीयानि। अद्यत्वे एतदर्थं सिट्रस्तैलं बहुतरमुपयुज्यते। एतत्तैलं शीघ्रं शुष्यतीति विशेषः। कदाचित् लिखितानि पत्राणि अलिप्तमशीकानि दृश्यन्ते। तान्यद्यत्वे सिट्रस्तैल - मिश्रितेन कृष्णचूर्णेन (Black powder) कार्पासपिण्ड्या घर्ष्यन्ते। तेन अक्षराण्युज्ज्वलानि भवन्ति। शोषितेषु पत्रेषु मातृका पठनार्हा भवति। केषुचन औत्तराहेषु प्रान्तेषु कण्टकानामनुपयोगेन केवलं मष्या उपयोगेन लेखन्या लिख्यते तालपत्रेषु। कोषग्रन्थेषु लेखनसामग्रीणां प्रस्तावप्रसंगे कण्टकस्यानुल्लेखो लेखनीमात्रस्योल्लेखश्चात्र विशेषतोऽवधानमर्हति।

"संगीतविदुषा त्यागराजेन मङ्गलत्वेन निर्धारितेषु दिवसेषु विशिष्य एकादशीदिवसेषु संगीतकृतयो रच्यते स्म।

"विद्यार्थिभिर्झटिति ता आम्रदारुफलकेषु steatite pencils लेखनसाग्र्या अलिख्यन्त। तेषामाम्रदारुफलकानां दैर्घ्यं १८ अङ्गुलानि, परिणाहो नवाङ्गुलानि, स्थौल्यं च १/२ अङ्गुलम्। तानि फलकानि दग्धानां

Bryonia grandis वृक्षपत्राणामिङ्गालचूर्णेनालिप्यन्त। एको विद्वान् पल्लव्यां (गेयकृत्यारम्भभागे) रचितावधानः सन् ससंगीतस्वरं त्यागराजेन कृतमलिखत्,अनतिदूरे कावेरीतीरे प्रतीक्षमाणान् विदुष उपसृत्य तेषामग्रेऽगायच्च। विद्वांसोऽपरे तमन्वगायन्। अनुपल्लव्याः (द्वितीयस्य खण्डस्य) रचनां स न प्रत्यैक्षत, यामन्यो विद्वान् प्रत्यैक्षत, यस्त्यागराजेन कृतायां तद्रचनायाम्, तामभ्यस्य लिखित्वा चान्यत्र तां प्रतीक्षमाणैर्विद्वद्भिरभ्यासयत्। तृतीयो विद्वान् चरणम् (कृतेरनुवर्तमानं खण्डं) एवमेवाभ्यस्य लिखित्वा अपरत्र गत्वा तत्र प्रतीक्षमाणैर्विद्वद्भिरगापयत्। अयोजिते वाग्गेयकारस्य[1] (त्यागराजस्य)अङ्किते, स विद्वान् वाग्गेयकार-मुद्रानामयोजनपर्यन्तं तितिक्षया प्रत्यैक्षत। प्रथमचरणगतानां स्वराणां लेखनपङ्क्तेः साक्षादधोभागे अन्यचरणस्य/ चरणयोः/चरणानां वाग्भागास्तेनालिख्यन्त। सति चरणानां गेयभागेषु वैविध्ये, तस्यापि सावधानं लेखनम् अक्रियत। यथा हरिकाम्भोजीरागीयायाम् "एन्दुकु निर्दय" इति कृतौ। तेलुगुसंस्कृतोभयभाषावेत्ताऽन्यो विद्वांस्तु समग्रं गेयभागमेकत्र प्रत्यलिखत्। एवमेव अन्यस्यां रचनायां कृतायां त्यागराजेन, पूर्वोक्तमेव क्रममनुसरद्भिः विद्वच्छिष्यैस्तस्यापि प्रतिलेखनमक्रियत। तदनन्तरं तैः सर्वैः परस्परेण प्रतिलिखिताः कृतयः पर्यशील्यन्त। परेद्यवि कण्ठेकृत-त्यागराजीयकृतिभिस्तैस्त्यागराजस्याग्रे कृतयोऽगीयन्त। त्यागराज आनन्दतुन्दिलोऽजायत[2]।"

व्रीहिजेन तुषेण वृक्षच्छेदनजानि दारुचूर्णानि मिश्रयित्वा जले क्वथयित्वा तत्पिण्डिकां संपाद्य तस्या'श्चपाते'रिव मर्दनेन कागदं निर्मीयते स्मेति कोऽपि सज्जनः बेङ्गलूरुनगरे प्रकृतं ग्रन्थकर्तारम् अज्ञापयत्।

१. वाङ्मातुरुच्यते गेयं धातुरित्यभिधीयते। वाचं गेयं च कुर्वन् वाग्गेयकार इति स्मृतः। इति प्रसिद्धः श्लोकः।

२.Great ComposersII.Tyāgarāja.प्राचार्यः पि.साम्बमूर्तिः। वृत्तान्तेऽस्मिन्
प्र.इण्डियन् म्यूसिक् पब्लिषिङ्ग् हौस्, मदरास् १९७०.पु.२६-२७.
आम्रदारुफलकेषु लेखनं यदुक्तं तदनितरलब्ध्यो विषयः।

७.मातृकाः

प्रायो मातृकासु लेखनं विशदम्।लेखनं सर्वदा पदच्छेदहीनं पादविभागरहितं दण्डाकारवत् क्रियते।प्रान्तभागाः ग्रन्थपाठहीना वर्तन्ते।तत्र पत्रसंख्या लिख्यते न पुनः पुटसंख्या।दक्षिणभारते पत्राणा-मग्रपार्श्वे एव अङ्कसंख्या क्रियते न तु पश्चात्पार्श्वे। उत्तरभारते तु पश्चात्पार्श्वे पत्राङ्कसंख्या दीयत इति विशेषः।दक्षिणभारते समुप-लभ्यमानेषु पत्रेषु वामपार्श्वस्य प्रान्तभागे पत्राङ्काः सूच्यन्ते। दक्षिण-पार्श्वीयप्रान्तभागे लिखिता अङ्काः प्रकृतेन ग्रन्थकर्त्रा कासुचन मातृकासु दृष्टाः।इत्थंभूतलक्षणा मातृका अङ्गुलीगणनीयाः।पत्राङ्करहिता अपि मातृका यदा कदा गोचरीभवन्ति।तत्रैवमभ्यूहनं कर्तुं सुलभम्- लेखकेन कदाचिद् ग्रन्थलेखनानन्तरम् अङ्कान् लिखितुं मनः कृतवता भाव्यं किन्तु केनापि कारणेन (तस्य विस्मृत्या, रोगादिसमस्याकारणात्, निधनेन वा)तस्येच्छा न पूर्णा।

मनोविनोदाय कदाचित् संख्यामुज्झित्वा लेखकैः अ आ इ ई उ ऊ , ऋ ॠ ए ऐ ओ औ अं अः, क ख ग घ ङ इत्यादयो वर्णा लिख्यन्ते।विचित्राः क्रमाः क्वाचित्का दृश्यन्ते पत्रानुक्रमसंख्यासूचने। एकस्यां लब्ध्यां मातृकायां पत्रेषु क्रमशः "ओं न मः शि वा य" इति लिखितं प्रकृतेन ग्रन्थकर्त्रा दृष्टम्।एते वर्णा यथासंख्यं १ २ ३ ४ ५ ६ इत्यङ्कानां सूचका इति स्पष्टम्।परमविचित्रः क्रमस्तु कस्याञ्चन मातृकायां (P.१३७२६ प्रा.वि.सं., मैसूरु) दृष्टो यत्र "मा त्वा रुद्र चक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती(ऋग्वेदे २.३३.४)" इति मन्त्र-पूर्वार्धस्याक्षराणि १,२,३,४ इत्यादिपत्राङ्कलेखनस्थले द्वाविंशतिपत्रेषु यथासंख्यं लिखितानि ! अङ्का अपि सहैव लिखितानीत्यन्योऽत्र विशेषः। अत्र किं संभूतमिति केनाप्यभ्यूहितुं शक्यते।लेखकेन मनोविनोदार्थम्

अङ्कलेखनस्थले मन्त्राक्षराणां लेखनमारब्धवता भाव्यम्। केषुचन पत्रेषु केषाञ्चिदक्षराणां लेखनानन्तरं झटित्यभीष्टाङ्कयुक्तपत्राणामुद्धाटने क्लेशमनुभूतवता भाव्यं, तेन मन्त्राक्षराणां निष्प्रमादे संख्यानुक्रमस्थान-स्मरणेऽसमर्थेन सता। तस्मात् सः मन्त्राक्षराणां लेखनं स्थगितवान्। आदिमपत्रतोऽङ्कलेखनमप्यारब्धवान्। द्वाविंशपत्रानन्तरं केवलमङ्कलेखन-मनुवर्तयामास।

केरले समुपलभ्यमानासु बह्वीषु मातृकासु विचत्रतमोऽन्यः क्रमो दृश्यते मातृकापत्राङ्कने[१]।

अतीव विरलतमामन्यामपि पद्धतिं प्रकृतो ग्रन्थकर्ता दृष्टवान्। मुम्मडिश्रीकृष्णराजरचितस्य चामुण्डालघुनिघण्टोः कस्यांचिन्मातृकायाम्[२] अङ्कानां स्थले अग्रिमपत्रलिखितस्य पाठस्य प्रथमं पदं लिखितम्।

कासुचन मातृकासु लिखितस्य भागस्योभयोः पार्श्वयोः पङ्क्तिसंख्या पङ्क्त्यारम्भे पङ्क्त्यन्ते च लिखिता दृश्यते, एतच्च दृष्टिभ्रमनि-वारणार्थमिति स्पष्टम्। +चिह्नं (हंसपादः) त्यक्ताक्षरयोजने समुपयुज्यते। 'त्याज्यो भागोऽयम्'इति सूचनाय वर्णोर्ध्वभागेषु बिन्दवः स्थाप्यन्ते।

प्रान्तभागे आवश्यक्यष्टिप्पण्यः, लुप्तान्यक्षराणि पदानि वा, भिन्नाध्यायसंख्या, भिन्नग्रन्थारम्भसूचना(सत्येकस्मिन् मातृकाकोशे एकाधिकग्रन्थवत्त्वे)भिन्नाध्यायगतविषयः, क्लिष्टशब्दानामर्थाश्च लिखिता दृश्येरन्। विविधवृक्षक्षुपलताफलशाकादीनां संस्कृते पर्यायास्तथा संस्कृते-तरासु भाषास्वर्थाश्च आयुर्वेदमातृकासु विशेषतो दृश्यन्ते। कासुचन मातृकासु आदिमेषु पत्रेषु ग्रन्थगतानां विषयाणां सूचिका दृश्येरन्। अतीवलघुस्तोत्राणां संग्रहेषु अथवा तन्त्रमन्त्रसंग्रहेषु स्तोत्राणां तथा मन्त्राणां सूची च दृश्यते।

---

१. द्र.पु.२७५-२७६

२. कुवेम्पु कन्नड अध्ययनसंस्था मानसगङ्गोत्री मैसूरु मातृकाङ्कः K.A.26/2

परसवर्णलेखने प्रायोऽनुस्वार एव कन्नड-नन्दिनागरी-ग्रन्थ-तेलुगु-मातृकासु दृश्यते। शारदा-मलयाळं-तिगळारि-मातृकासु तु परसवर्णः प्रायेण शुद्धं लिख्यते।

लिपिकरैः प्रघट्टका न कल्प्यन्ते। पाठ्यं सर्वम् एकदण्डश्रेण्याकारं भवतीत्युक्तपूर्वम्। कदाचित् प्रघट्टकाः अध्यायान्तेऽपि न क्रियन्ते। मुद्रिता अपि ग्रन्थाः पूर्वमित्थंभूतलक्षणा एवमेवासन्। पूर्वस्मिन् काले कागदानां सर्वथा दौर्लभ्यम्। कदाचिदेकस्मिन् मातृकाकोशे भिन्नग्रन्थस्तस्यामेव पङ्क्तौ प्रघट्टकं विनैवारभ्यते यस्यामेव पङ्क्तौ कस्यचन ग्रन्थस्य समाप्तिः।

बह्वीषु मातृकास्वध्याय-ग्रन्थ-समाप्तिसूचकवाक्यानाम् "इति रघुवंशे तृतीयः सर्गः, इति न्यायसूत्रम्" इत्यादीनां लेखनपङ्क्तौ प्रान्तभागे पुष्पाकारं चिह्नं दीयतेऽग्रिमाध्यायारम्भस्थलेऽथवा अग्रिम-ग्रन्थारम्भस्थले निष्क्लेशं दृष्टिनापातार्थम् ।पुष्पचिह्नसूचितत्वादेतानि वाक्यानि पुष्पिकावाक्यान्युमुच्यन्ते। प्रायः पुष्पाण्येतानि वामप्रान्तभागे, वैरल्येन च दक्षिणप्रान्तभागे वर्तमानान्यधोनिर्दिष्टचित्राणामन्यतमदनुकुर्वन्ति :-



केवलमेतादृशसामान्यचिह्नैरेव अभीष्टार्थसिद्धिर्भवति। कासुचन मातृकासु परमसुन्दराणि पुष्पाणि लिखितानि दृश्यन्ते। एतेन लेखकाः कदाचिच्चित्रकलाविदोऽप्यासन्नित्यभ्यूहः सुगम एव कर्तुम्। अत्रान्योऽपि प्रसंगः संभाव्यते। लेखकोऽन्यः, पुष्पाणामासेचनकानां च चित्रयिताऽन्य इति। तादृशे च प्रसंगे, लेखकेन प्रथमतो मातृकायां लिखितवता भाव्यम्। तदनन्तरमेव तेन दर्शिते स्थले चित्रकलाविदा पुष्पाणां चित्रणं विहितम्। प्रकृतग्रन्थकर्तृदृष्टिपतितानां सुन्दराणां पुष्पाणां प्रतिकृतय इमाः :-



उपरि दर्शितं 'श्री' इति लेखन-युक्तं पुष्पं कदाचिदादिमे पत्र एव गोचरीभवति।।

उपरि दर्शिते शङ्खचक्ररूपे पुष्पे कदाचिद् विशिष्टाद्वैतिनां मातृकासु गोचरीभवतः।

कदाचिदेतेभ्योऽपि सुन्तरतमानि पुष्पाणि प्रान्तभागेषु गोचरीभवन्ति। मातृकासौन्दर्यवर्धनानि चित्राण्येतादृंशि रचितवन्तो लिपिकराश्चित्रकलायामपि कृताभिरुचय इत्यत्र नान्यस्य प्रमाणस्यावश्यकता।

पुष्पाणामभावः शिरोवेदनां जनयित्री समस्या। मातृकाकोशस्य अलब्धयोरादिमान्तिमयोः पत्रयोः, पुष्पाणामभावो महते क्लेशाय पुष्पिकावाक्यग्रहणे[१]।

आदिमपत्र एव ग्रन्थारम्भे, तत्प्रान्तभागे फलकेषु वा ग्रन्थनामलेखनं विरलम्। ग्रन्थ-ग्रन्थकर्त्रोर्नाम्नोर्ग्रन्थपाठ्यभाग एव लिखितयोः सतोस्तयोश्च सुलभमुपलब्धयोस्तु न कापि समस्या। तदभावे, ग्रन्थस्यापूर्वपरिचितत्वे च पाठकैः पुष्पिकावाक्यस्यावलम्बनमनिवार्यम्।

१. कदाचित् कोऽपि सज्जनो मातृकां काञ्चन समर्पितवान् प्राच्यविद्यासंशोधनालयाय। तत्र लिखितो ग्रन्थः किमपि नाटकमिति ज्ञातम्। परन्त्वतीवधूलिधूसरितत्वात् पुष्पिकाया सर्वथाऽप्यभावान्नाटकनाम किमिति ज्ञानप्राप्तिरतीव कष्टेन बभूव। 'पुष्पकारोहण'नामकं नाटकं तदित्यन्ते ज्ञानं तु महते प्रमोदाय अकल्पत।

अधुना "लिखितं", "रचितं", "कृतं", "प्रणीतम्" "अनुगृहीतम्" इति पञ्चपदानां वास्तविकोऽर्थः सम्यग् ज्ञातव्यः।

लिखितमिति शब्दस्य (द्वित्रानपवादान् मुक्त्वा)ग्रन्थस्य प्रतिलिपिकरणमित्यर्थो न स्वयं रचना[1]। 'एष मातृकाकोशः प्रतिकृतोऽनन्तेन' इत्यस्मिन्नर्थे "इदं पुस्तकम् अनन्तेन लिखितम्" इति वाक्यं वर्तते। अन्तिमपुष्पिकानन्तरं केषुचन मातृकाकोशेषु वर्तमाने "शुभमस्तु लेखकपाठकयोः" इत्यस्मिन् वाक्ये लेखकशब्दस्य प्रतिलिपिकर्तेत्यर्थो न पुनर्ग्रन्थरचयितेति। रचित-कृत-प्रणीतेति शब्दाः ग्रन्थकर्तृ रचनेत्यर्थं ज्ञापयन्ति। विशिष्य, प्रणीतेति शब्द आचार्याणां ग्रन्थरचनेत्यर्थबोधने प्रयुज्यते। कदाचिदादरार्थे "अनुगृहीतम्" इति शब्दोऽपि प्रयुक्तो दृष्टः। क्रमेण यथा "कालिदास(वि)रचितम् अभिज्ञानशाकुन्तलं समाप्तं", "विशाखदत्तकृतं मुद्राराक्षसं समाप्तं", "शङ्करभगवत्पादाचार्यप्रणीतं ब्रह्मसूत्रभाष्यं समाप्तं", "वेदान्तदेशिकानुगृहीता यतिराजसप्ततिः समाप्ता"।

वेदपाठयुक्तेषु मातृकाकोशेषु एतादृंशि पुष्पिकावाक्यानि केवलम् अध्यायस्यैवान्तसूचकानि न पुनर्वेदसमाप्तिसूचकानि "अनन्ता वै वेदाः" इति प्रसिद्धेः। तस्मादेव वयं केवलं "द्वितीयेऽष्टके प्रथमोऽध्यायः", इत्यादीनि पुष्पिकावाक्यानि पश्यामो न पुन "ऋग्वेदः समाप्तः", "यजुर्वेदः समाप्तः" इत्यादीनि[2]। केषुचन वेदमातृकाकोशेषु पुष्पिकावाक्यं (मण्डलसूक्तादिसूचकमपि) कुत्रापि नैव लिख्यते। परम्परीणाध्ययनमत्र प्रवलमवलम्बनम्। सौभाग्याद् ब्लूम्फील्ड्कस्य **Vedic Concordance** ग्रन्थे सर्वेषां वेदमन्त्राणां सर्वे पादाः संशुद्धतमम् अकारादिक्रमं अनुसृत्य दत्ताः साध्यायमण्डलाध्यायमन्त्रसंख्यादिसूचनाः। अस्य ग्रन्थस्य

१. "नामूलं लिख्यते किञ्चित्......" (मल्लिनाथविरचितकाव्यव्याख्यागतेषूपक्रमपद्येषु)इत्यत्र लिखतिरुद्धरणार्थकः, "नामानि तु 'नानपेक्षितमुच्यते' इति प्रतिज्ञाभङ्गभयान्न लिख्यन्ते। (शिशुपालवधे मल्लिनाथीया व्याख्या १.१०)" इत्यत्र तस्य तदर्थकत्वस्य स्फुटत्वात्।

२. तिरुवाय्मोऴि-नामकस्य 'द्राविडवेद'स्यापि मातृकासु पुष्पिकाया अलेखनं क्वाचित्कम्।

परामर्शेन मातृकाकोशगता वैदिका मन्त्राः कुत्रत्या इति सुस्फुटं ज्ञातुं शक्यते।

सत्स्वपि ग्रन्थस्थितेषु पुष्पिकावाक्येषु, असत्सु तु प्रान्तभागे पुष्पचिह्नेषु, अध्याय-समाप्ति-स्थले दृष्टिनिपातः कष्टाय। लेखनस्य सूक्ष्मत्वे तु कष्टं वर्धते। इत्थंभूतलक्षणासु मातृकासु लिखितानां ग्रन्थानां नामादिकमवगन्तुम् अतीवतितिक्षा आवश्यिका।

कासाञ्चन मातृकाणामन्ते ४५० ग्रन्थाः, ८३४ ग्रन्था इत्यादि लिखितं वर्तते। कोऽस्याभिप्रायः? 'ग्रन्थ' इति शब्दो द्वात्रिंशदक्षरपरिमाणं वक्ति। ग्रन्थशब्दस्य अनुष्टुप्छन्द इत्यर्थः कैश्चन प्रमादात्कल्प्यते। अनुष्टुप् त्वष्टसंख्याबोधिका तस्याः प्रतिपादम् अष्टाक्षरयुक्तत्वात्। न हि सा द्वात्रिंशत्संख्याबोधिका। 'ग्रन्थशब्दस्यात्र श्लोक इत्यर्थ' इत्यपरेषां मतमपि न सम्यक्, गद्यकाव्य-शास्त्र-विविधच्छन्दोबद्ध-महाकाव्यपाठ-युक्तानामपि मातृकाणामन्ते ग्रन्थपरिमाणोल्लेखदर्शनात्। परन्तु ग्रन्थपरिणामनिर्धारणे श्लोकस्य प्रभावं कोऽपि निराकर्तुं शक्नुयात्, सर्वेषु चतुर्षु श्लोकपादेषु वर्तमानानाम् अक्षराणामाहत्य संख्यायाः द्वात्रिंशत्त्वात्।

मातृकान्ते ग्रन्थपरिणामस्य सूचनं द्विप्रयोजनकम्। लेखकः ग्रन्थाक्षरपरिणामसदृशीं भृतिं प्राप्नोति। मातृकाकोशानां परिणामः, पङ्क्तीनामाहत्यसंख्या च नात्र स्पष्टां कल्पनां जनयतो मातृकाणां परिणामस्य पङ्क्तीनामाहत्यसंख्यायाश्च प्रतिमातृकाकोशं भिन्नत्वात्। प्रक्षेपस्यावसरो मा भूदित्याशीर्ग्रन्थपरिणामोल्लेखेऽन्यत् कारणम्। अनयाऽऽशिषा प्रक्षेपणं न स्थगितमित्यन्यदेतत्। समग्रायाः कृतेरक्षरसंख्यासूचनं त्वतीव विरलम्।

मुद्रणकलाया आदिमे युगे निर्णयसागरमुद्रणालयादिषु मुद्रिता ग्रन्थाः प्रायशस्तालग्रन्थाकृतिप्रभावात् तिर्यङ्मुद्रिता न चोर्ध्वम्। तेषु तालमातृकास्विव पदच्छेदप्रघट्टकादीनां सर्वथाऽभावेऽपि पुष्पचिह्नं नैवासीत्।

तालपत्रेषु लेखनस्य विचित्रः प्रभावो जैनकागदमातृकासु दृश्यते। कागदमातृकासु मध्यभागे रन्ध्रकरणमनावश्यकम्। रन्ध्रस्थलं तालमातृकावत्परिकल्प्य तस्मिन् स्थले कदाचिदतीव सुन्दराणि चित्राणि लिख्यन्ते। तानि स्थलानि मध्यफुल्लिकेत्युच्यन्ते[१]।

८.संस्कृतभाषायां लेखनसंबद्धाः शब्दाः

कोषकल्पतरौ (धीवर्गे १२५)विश्वनाथेन वर्णांकाः, पुस्तिका, पुस्तकं पुस्तं तथा उत्थानम्(?)इति शब्दा ग्रन्थसंबद्धाः सन्ति। प्रतिपुस्तक-शब्दः प्रतिकृतिरित्यर्थे दत्तः। यत्तु आदर्शशब्दोऽपि प्रतिकृतिरित्यर्थे दत्तस्तच्चिन्त्यम्[२]। आप्टे कोशे प्रतिपुस्तकमिति शब्दो यद्यपि गोचरीभवति, तत्र प्रतिकृतिरित्यर्थेन साकं व्याख्या इत्यपि अर्थो दत्तो यः प्रामादिकः।

अभिधानचिन्तामणौ (मर्त्यकाण्डे ४८३) हेमचन्द्रः प्रतिलिपि-कर्तुः पर्यायत्वेन शब्दानेतान् ददाति- लेखकः, अक्षरचणः, अक्षराजीवः, अक्षरचञ्चुः, वार्णिकः लिपिकरश्च। अस्यां पट्टिकायां कोषकल्पतरुः गान्धिकः, लिपिशिल्पी, लिपिवृत्तिरित्येतान् शब्दान् योजयति । लेखीलक इति विचित्रः शब्दः कोशस्यास्यैव नानार्थस्कन्धे (४०)समुपलभ्यते। अन्येन यो लेखयति स लेखीलक इत्यर्थोऽत्र दत्तः। आप्टे कोशे लेखनिक इति शब्दो विद्यते यत्र *proxy* (मिथ्या) इति शब्दो योजितः। मण्डलक इति शब्दो विश्वनाथेन लेखहार इत्यर्थपूर्वकं दत्तः। मषीत्यर्थे अभिधानचिन्तामणिस्त्रीन् शब्दान् ददाति-(मर्त्यकाण्डे ४८४) मलिनाम्बु, मषी, मसी च। कोषकल्पतरुः एतैः शब्दैः मेला, काञ्चनिका, धातुपलं (मलम्?) पत्राञ्जनमित्यन्यान् चतुरः शब्दान् योजयति। मषीकूपी, मषीधानमिति द्वौ शब्दौ अभिधानचिन्तामणिस्थौ मषीस्थापनार्थायां

१. तत्रभवता डा. वसन्तकुमारभट्टवर्येण ज्ञापितमेतत्।

कूपिकायां वर्तते। हारावलीकोषगतौ द्वावपरौ शब्दौ व्याख्यात्रा देवसागरगणिना योजितौ-मेलानन्दः, मसीमणिः। कल्पतरुरत्र मेलान्धुः वार्गणमिति शब्दद्वयं योजयति।

पुष्पदन्तविरचितस्य शिवमहिम्नःस्तोत्रस्य कस्मिंश्चन पद्ये[1] 'कज्जलं', 'पात्रे' 'लेखनी', 'पत्रं' 'लिखति' इति पञ्च पदान्यवधेयानि। पत्रमिति शब्दस्तालपत्रं सूचयतीत्यत्र न संशयः। भूर्जस्य तु त्वक् उपयुज्यते न पुनः पत्रम्। अत्र कण्टशब्दो नास्तीति द्रष्टव्यम्। 'कज्जलं', 'पात्रे' तथा 'लेखनी' इति शब्दास्तालपत्रे मष्या लेखनं सूचयतः। उत्तरभारते वङ्गादिषु प्रदेशेषु तालपत्रेषु मष्या लेखनं प्रसिद्धम्। भूर्जपत्रे तु लेखनं कूर्चिकया न पुनर्लेखन्या। 'लिखति' इति क्रियापदस्यात्र 'स्वयं रचयति' इत्यर्थो न पुनर्मातृका-प्रतिलिपिं करोतीति।

नैषधीयचरिते द्वयोः पद्ययोः केचन लेखनसंबद्धाः शब्दा विद्यन्ते।

दमयन्त्याः कर्णकुण्डलयुगलम् अन्तिमसमाप्तिसूचकशून्यद्वयस्य सारेण , कराङ्गुली काञ्चनलेखन्याः सारेण, केशसमूहो मषीणां सारेण तथा स्मितस्य कान्तिः कठिन्याः सारेण निर्मितम्[2]। कृते क्षीरवटानां परिवेषणे, ते क्षीरवटाः सूक्ष्ममध्यभागाः सन्तः, समाप्तिसूचकशून्यानां लेखनं सूचयन्तो भोजनस्यापि समाप्तिं सूचयामासुरिव[3]।

१.असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश ! पारं न याति॥ (शि. म. स्तो. ३२)

२.द्विकुण्डली वृत्तसमाप्तिलिप्याः कराङ्गुली काञ्चनलेखनीनाम् । कैश्यं मषीणां स्मितभा कठिन्याः काये यदीये निरमायि सारैः॥ (नै. १०.८७)

३.समाप्तिलिप्येव भुजिक्रियाविधेर्दरोदरं वर्तुलयाऽऽलयीकृतम्।
अलङ्कृतं क्षीरवटैस्तदश्नतां रराज पाकार्पितगैरिकक्रिया ॥ (नै.१६.९९)

एतेन इदं स्पष्टं यच्छ्रीहर्षस्य काले ग्रन्थसमाप्तौ शून्यलेखनं प्रचलितमासीन्मातृकासु। अत्र वृत्तसमाप्तिलिपिः, काञ्चनलेखनी, मषी, कठिनी, गैरिकम्- एते शब्दा मुख्याः। वृत्तसमाप्तिलिपिशब्देन शून्यं, वर्तुलचिह्नप्रधानं 'छ' इति लेखनमथवा पुष्पिकालेखनपङ्क्तौ प्रान्त-भागलिखितं पुष्पचिह्नं ग्राह्यम्। 'कठिनी'पर्यायत्वेन 'कठिकां' ददाति व्याख्याता नारायणोऽत्र। अत्रार्थे 'सुधाखण्ड'शब्दस्त्वतीव नूतनः।

आप्टेकोशे 'कचेल' इति शब्दः मातृकाच्छादनवस्त्रमित्यर्थे दत्तः। चिन्त्याऽस्य व्युत्पत्तिः।

'सरस्वतीभण्डार' इति सामान्यं नाम ग्रन्थालयस्य। 'ग्रन्थकुटी' इति शब्द आप्टेकोषे दृश्यते। श्रीरामचन्द्रपुरीये श्रीमठे ग्रन्थालयस्य 'भारतीपत्रधामे'ति संज्ञा। राज्ञा भोजेन निर्मितस्य ग्रन्थालयस्य 'सरस्वती-कण्ठाभरण'मिति नामधेयमासीदिति ज्ञायते। 'सरस्वतीभण्डारी' तु ग्रन्थपालको भवति।

पठनाय मातृकास्थापनार्हा दारुनिर्मिता सामग्री 'व्यासपीठम्' इत्यभिधीयते यस्याकृतिरित्थंभूता : 

९.मातृकासम्बद्धाः प्राचीनाः परामर्शाः[१]

भविष्यपुराणे,(मध्यमपर्वणि-५, उत्तरपर्वणि-१३), अग्नि-पुराणे, देवीपुराणे,रसरत्नाकरे, पौष्करसंहितायां च मातृकासंबद्धा अवधेयाः केचन विषया वर्तन्ते।

---

१. अयमध्यायोऽधोनिर्दिष्टस्य प्रबन्धद्वयस्य सारः :-

१. पुराणेषु ग्रन्थलेखनविधिः-डा. निर्मला कुलकर्णी। सागरिका संपुटः ३७-१पुटानि ४७-५३

२.पुराणगळल्लि ग्रन्थलेखनविचार(कन्नडप्रबन्धः)-श्रीयदुगिरि यति-

महाविष्णुसंज्ञितस्य तालमातृकाकोशस्य दैर्घ्यं द्वात्रिंशदङ्गुल्यः। महेश्वरसंज्ञितस्य तालमातृकाकोशस्य दैर्घ्यं चत्वारिंशदङ्गुल्यः। ब्रह्मसंज्ञिताया तालमातृकाकोशस्य दैघ्यम् अष्टाङ्गुल्यः। भूर्जत्वङ्मातृका-कोशस्य दैर्घ्यं (परिणाहश्च?) द्वादशाङ्गुलयः।

मातृकाकोशे रन्ध्रद्वयं करणीयम्। मध्ये कृतम् एकरन्ध्रम् आयु-र्ह्रासाय। एकरन्ध्रम् अप्रतीक्षिताम् आपदं जनयति। रन्ध्रद्वयं विजयाय। प्रान्तभागे कृतं रन्ध्रं सौख्यनाशाय। लिङ्गं(=मातृकाकोशकवचम्) ताम्र-निर्मितं वा कांस्यनिर्मितं वा प्रशस्तम्।

दरिद्रैः मातृकाकोशकवचं बिल्वदारुणा दृढदारु-दारुणा वा निर्मातव्यम्। वृक्षनिर्यासेन सह इङ्गालचूर्णं मिश्रयित्वा अक्षराणां कृष्णीभवनं कार्यम्। दीपज्वालाजन्यं कज्जलं वा प्रयोक्तव्यम्। बोलरसे त्रिफला-भृङ्ग-कोरण्ट-बीजाभ्र-भल्लातकानां ताम्रभाजने मिश्रणेन मषी निष्पाद्येति रसरत्नाकरो ब्रवीति।

लेखनस्थलं चित्वा, तद् गोमयेन शुद्धीकृत्य, रङ्गवल्लीविन्यासै-स्तत्स्थलमलङ्कर्तव्यम्।

प्रशस्तो लेखकः साधुः, सदाऽवहितमनाश्च। समपरिणामेन लेखनं कर्तुं विदुषा लेखकः प्रेरयितव्यः। लेखकः मात्राक्षराणि, अनुस्वारांश्च सुस्फुटान् पठनार्हांश्च कुर्यात्। तस्याक्षराण्यनतिह्रस्वानि, अनतीवस्थूलानि स्युः। तल्लेखने अक्षराणि समपरिणामानि, समपरिमाणयुक्तशीर्षरेखाणि दृढानि,वर्तुलाकृतीनि च स्युः[1]। पदच्छेदं स सुविशदं प्रदर्शयेत्। आशुलेखनम्

राज संम्पत्कुमार जीयर्। **मणिह**, फ.गु.हळकट्टिस्मारकसंपुटः। बि.एम्.स्मारक प्रतिष्ठानम्, बेङ्गलूरु। पुटानि १७२-१७८

१. ''समानि समशीर्षाणि वर्तुलानि घनानि च। लेखयेदक्षराणीह तद्गतेना-न्तरात्मना।।''अत्र लेखयेदिति णिजन्तः शब्दो विशेषतोऽवधातव्यः। न केवलं लेखकेनापितु पाठकेनाप्यवहितमनस्केनाप्रमादिना च भाव्यं यो लेखयति।

अपेक्षिता अर्हता। लिपिव्याकरणच्छन्दस्सु लेखकस्य सम्पूर्णं प्रभुत्वं स्यात्। सः नन्दिनागर्या, शुद्धनागर्या, कामरूपलिप्या(अस्साम्-देशोद्भवया लिप्या?) वा लिखेत्। यावत्पर्यन्तं तेन लिखितो मातृकाकोशो भूतलेऽस्मिन् वर्तते तावदेष स्वर्गे महीयते। केवलमुदरपूरणार्थं धनादिसंपादनार्थं वा लिखंस्तु शीघ्रं नश्यति।

मातृकाकोशस्त्रिमूर्तिरूपः। सूत्रं वासुकिः। पत्राणि ब्रह्मा। अक्षराणि महाविष्णुः। मात्राक्षराणि मूलप्रकृतिः। अक्षरविन्यासाः शिवः।

अपठ्यमाने सति पुस्तके तद् गृहे न स्थापयितव्यम्। तत् पूजयित्वा झटिति तत् पठते विदुषेऽथवा मठाय दातव्यम्।

पुस्तकपूजा शुष्कैः पत्रैः करणीया। पुस्तककवचरक्षणाय चन्दन-लेपः करणीयः। अग्निपुराणानुसारेण वास्तविकी मातृका नैव पूजनीया। परन्तु मातृकायाः प्रतिबिम्बं पूजनीयम्[१]।

ग्रन्थालयस्य वास्तु दृढं स्यात्। तत्र जनसम्मर्दो नैव स्यात्। सर्वदा विद्वांसस्तत्र वर्तेरन्। ग्रन्थधान्यस्तत्र स्युर्यत्र तालकं बलवद् बद्धव्यम्।

१०.लिपिकराणां प्रमादाः पाठान्तराणि च-लोपागमादेशाः

'पुरातनकालिकाः सर्वेऽपि ग्रन्थकर्तारोऽप्रतिममेधाशालिनः सन्तो झटिति प्रतिलेखनकर्तॄणां पार्श्वे समुपविश्य, विना कमपि पूर्वाभ्यासं

१."अधुना यानि हस्तलिखितानि वयं पश्यामः तेषु बहूनि हरिद्राकुङ्कुमरक्तानि जलैस्तथा पुष्पैर्मलिनानि विदीर्णानि च। ...पुराणग्रन्थेषु यो विधिर्निर्दिष्टः स तावत् संपूर्णतो भिन्नः। ...अयं च पूजाविधिः पुस्तकं संपूर्णतया रक्षति"। "पुराणेषु ग्रन्थलेखनविधिः"-डा. निर्मला कुलकर्णी। सागरिका संपुटः ३७-१पु.४८.

स्वग्रन्थं वाचा उदचारयन् ' इति सार्वजनीनोऽभिप्रायः। वस्तुतस्त्वेतन्न सत्यम्। केवलं केचन इत्थंभूतलक्षणाः स्युर्न पुनः सर्वे। तत्र संदेहातीतं प्रमाणमस्ति। कर्णाटभारतकथामञ्जर्याः(गदुगिन भारतस्य) रचयितुः कुमारव्यासस्य विषये "कठिन्या लेखनमकुर्वन् प्रथमवारमेव मातृकायां यद्रचयामि तन्ममोत्कर्षसूचकम् [१]"इत्यर्थकं तत्स्तुतिपद्यं केनापि कृत्वा ग्रन्थशरीरे योजितम्। संस्कृतभाषायामपि एवमेव कश्चन परामर्श उपलभ्यते। "राघवेन्द्राचार्यः 'उक्तं नो वक्ति भूयः क्वचिदपि लिखितं नैव निर्मार्ष्टि[२]' (= केवलं राघवेन्द्राचार्यो लिखितं नैव प्रमार्ष्टि)" इति वादीन्द्रतीर्थोक्त्या ज्ञायते यदन्ये विद्वांसस्तु प्रायः प्रथमवारं फलके लिखितस्य पाठस्य संस्कारम् अर्थादावश्यकान् लोपागमादेशान् कृत्वा तदनन्तरमेव तस्य ताले प्रतिलेखनमकुर्वन्नथवा अकारयन्।

प्रायो ग्रन्थकर्ता स्वविरचितस्य ग्रन्थस्य बह्वीः प्रतीः स्वयं न करोति। स कस्मैचिल्लिपिकराय किञ्चिद् धनं दत्त्वा तेन प्रतीः कारयितुमिच्छति। लिपिकर आरभते प्रतिलेखनम्। पण्डितैः प्रतिलेखनं न करणीयमिति नियमस्तु नास्ति। प्रकृतेन ग्रन्थकर्त्रा दृष्टायां कस्याञ्चित् मातृकायां वेदान्तदेशिकप्रणीता निक्षेपरक्षा लिखिता। तत्र "अ(निर्)-विघ्नमस्तु"इति प्रायिकस्य लेखनस्य स्थले "प्रत्यूहावच्छिन्नप्रतियोगिता-काभावोऽस्तु" इति लिखितम्। अर्थान्मातृकायां निक्षेपरक्षाग्रन्थस्य लेखकः कोऽपि पण्डित एव, न साधारणो लिपिकरः।

कदाचित् लिपिकराः सुन्दरवर्णलेखकत्वेन स्वयं स्वभुजास्फालनं कुर्वते। कस्याञ्चिन्मातृकायां लिखितायाः सोमदेवसूरि-विरचित-यशस्तिलकचम्वा अन्ते तल्लेखको रच्छुकः 'स्वस्य सुन्दरलेखनेनाकृष्टैर्युवतिभिर्मदनलेखलेखनार्थं निरन्तरं प्रार्थ्यते , तस्मादेव स्वस्य **लेखकशिखामणि-**

१.पलगे बळपव पिडियदोन्दग्गळिके-(१.१.१५)कुमारव्यासभारतम्।
२.वादीन्द्रतीर्थविरचितं गुरुगुणस्तवनम् (१५)।

रिति बिरुदस्य प्राप्त्यै अपेक्षिताऽर्हताऽस्ति 'इति सगर्वं कत्थते [१] !

ग्रन्थकर्तॄणां मनसि स्वस्य ग्रन्थस्य कालक्रमिकः पाठविपर्यासो मा भूदित्याशा आसीदेव। अतिप्रौढान् ग्रन्थांस्ते साधारणेभ्यो लेखकेभ्यो न प्रादुः। नव्यन्यायग्रन्था मातृकागता ये समुपलभ्यन्ते ते प्रायो विद्वद्भि-रधीतिभिर्वा लिखिता न पुनः साधारणैर्लेखकैः। ऋग्वेदसंहितायाः संपादनाय स्वेनोपयोजिताः सर्वा अपि मातृका दोषलेशदूरा इति सातवले-करेण ज्ञापितम्। अस्मत्पूर्वजैः अस्मत्संस्कृतिमूलभूतानां वेदादिरूपसाक्ष्य-सामग्रीणां प्रतिलेखने यस्मै कस्मै यदनुमतिर्न दत्ता, तत् तेषामस्मिन् विषये परमां जागरूकतां दर्शयति। हस्तोपयोगपूर्वकं प्रतिलेखनेन मातृकासु ग्रन्थानां रक्षणं पूर्वजैः कृतम्।

लिपिकरणोद्योगरहितैरपि कुतूहलाद् भक्त्या वा यदा कदा ग्रन्थस्य प्रतिलिपिकरणं विधीयते स्म। 'केनचिन्मन्त्रिसुतेन, धनिकेनापि सता, स्वयमेव क्षीरतरङ्गिण्याः प्रतिकृती रचिता। [२]'अस्यायमभिप्रायः :- तस्य मन्त्रिसुतस्य धनिकत्वात् सः कस्मैचिल्लिपिकराय धनं दत्त्वा क्षीरतरङ्गिण्याः प्रतिलिपिं तेन कारयितुम् अशक्ष्यत्। परन्तु भक्तिकारणात् स तथा नाकरोत्, स्वयमेवालिखत् क्षीरतरङ्गिणीम्।

१.विद्याविनोदवनवासितहृच्छुकेन पुस्तं व्यलेखि विलसल्लिपि रच्छुकेन। श्रीसोमदेवरचितस्य यशोधरस्य सल्लोकमान्यगुणरत्नमहीधरस्य ॥ यस्याक्षरावलिरधीरविलोचनाभिराकाङ्क्ष्यते मदनशासनलेखनेषु। तस्मै विवेकिषु न यच्छति रच्छुकाय को नाम लेखकशिखामणिनामधेयम् ॥ *Yaśastilaka and Indian Culture* के.के.हेण्डिकी। जैनसंस्कृतिसंरक्षकसंघः। पोलापूर्। 1949 पुटं १

२.काश्मीरमण्डलभुवं जयसिंहनाम्नि विश्वम्भरापरिवृढे दृढदीर्घदोष्णि। शामत्यमात्यवरसूनुरिमं लिलेख भक्त्या स्वयं द्रविणवानपि धातुपाठम्। (क्षीर-तरङ्गिणी सं.युधिष्ठिरमीमांसकः। प्र.बाबू हंसराजकपूर् रामलाल् कपूरट्रस्ट् अमृतसर् संवत् 2014 पु.324)

प्रायः मातृकाणां जीवितावधिः ५०० वर्षाणि। तदनन्तरं ता नश्यन्ति। तस्मादेव कारणात् तासां प्रतिलेखनमावश्यकम्। अधुना ऽस्माभिर्दृश्यमाना रामायणमातृकाः किं ५० वंशीया वा ७० वंशीया वा न वयं जानीमः। कालक्रमेण प्रतिलेखनप्रसंगे कतिपये व्यत्ययाः संभवन्ति ग्रन्थपाठेषु।

भूयस्सु प्रसंगेषु पाठ्यभागस्य व्यत्ययं लिपिकराः कुर्वन्ति, विरलेषु च प्रसंगेषु विद्वांसः। ग्रन्थानां प्रतिलेखने विद्वद्भिः कदाऽपि दोषो न क्रियत इति वादो हास्यास्पदम्। तदास्तां नाम। कदाचित् स्वयं ग्रन्थकर्त्राऽपि प्रमादिना सता केचन दोषाः क्रियेरन्! "गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।" इति वाक्यमस्माभिः स्वप्नेऽपि न विस्मर्तव्यम्। यत्पाठशुद्धिं कदाचिद्विद्वांसो लिपिकाराः कुर्वन्ति[१],तद् भाग्याय पाठकानाम्।

लिपिकरो मातृकायाः पुत्रिकाम् आदर्शमातृका-लिखित-ग्रन्थपाठ-वैसादृश्य-लेशेनापि रहिताम् तत्सुसदृशीमेव च कर्तुमनाः सन्नपि कांश्चन व्यत्यासान् करोत्येव पुत्रिकानिर्माणसमये।

ते च व्यत्ययाः 'लोपः', 'आगमः' तथा 'आदेशः' इति त्रिषु विभागेषु वर्गीकरणमर्हन्ति। अबुद्धिपूर्वका, बुद्धिपूर्वका इति सर्वेऽपि व्यत्यया एते द्विविधाः। अबुद्धिपूर्वकेषु व्यत्ययेषु श्रवणजन्याः, दर्शनजन्या इति पुनर्द्वैविध्यं कल्पयितुं शक्यते परन्तु तस्य विस्तरो नास्मिन् ग्रन्थे कृतो, दुष्टदर्शनजा दुष्टश्रवणजाश्च प्रमादा इति विभागस्य स्ववगमत्वात्।

१.लोपः

१.**अबुद्धिपूर्वकः**- लोपस्य बहूनि कारणानि वर्तन्ते। कोऽपि लिपिकरः कस्यापि ग्रन्थस्य प्रतिलिपिं करोति। मातृकायाः कस्मिंश्चन पत्रे प्रथमायां पङ्क्तौ ग्रन्थपाठे "राम" इति पदं लिखितमस्तीति,

१.द्र.पुटौ १४७-१४८

द्वितीयायामपि पङ्क्तौ ग्रन्थपाठे "राम" इति पदं पुनर्लिखितमस्तीति च भावयामः। लिपिकरः प्रथमतो राम इति पदंलिखति स्वनिर्मीयमाणायां पुत्रिकायाम्। पुनश्च यदा स मातृकां पश्यति, तदा तस्य दृष्टिर्द्वितीय-पङ्क्तिगते द्वितीये रामपदे सज्जते। स राम इति लिखित्वा द्वितीयपङ्क्तिगतं पाठमनुवर्तयति। अर्थात् प्रथमरामपदादिर्द्वितीयरामपदावधिकः पाठ-स्तस्य पुत्रिकायां लुप्यते। एष लोपः कदाचिदन्यैर्लेखितेऽपि संभवति।

लेखनकाले कण्टस्य कम्पः कदाचिदेकाक्षरस्य द्वित्राक्षरणां वा लोपस्य कारणं भवति।

राजचूडामणिदीक्षितविरचितस्य रुक्मिणीकल्याणमहाकाव्यस्य व्याख्याता बालयज्ञेश्वर एवं वक्ति-

"अहं विज्ञापये विदुषो यथा-कण्टकारणाल्लुप्तवर्णस्थानेषु मया कृतं वर्णयोजनं कनकभूषणेषु क्वचिल्लोहविशेषयोजनमिव क्षाम्यन्तु[१]।" अनेन, व्याख्याता लुप्तान् वर्णान् स्वाभ्यूहेन पूरयामासेति स्पष्टम्। परन्तु स कान्यक्षराण्येवं योजयामासेति न ज्ञापितवान्। यदि स एवमज्ञा-पयिष्यत्, वयं मूलग्रन्थकर्तुः साहित्यस्तरम् अधिकतरम् अज्ञास्याम। (अधुना तु को भागो राजचूडामणिदीक्षितेन कृतः, कश्च बालयज्ञेश्वरेण योजित इति स्पष्टं विवेकाभावात् अस्मदीयस्य विमर्शस्य कियत्या मात्रया ग्रन्थकारो लक्ष्यं, कियत्या मात्रया च व्याख्याता लक्ष्यमिति न ज्ञायते।)

अनवधानता वर्णलोपकारणं भवतीति तु सिद्धानुवाद एव। भाषाधिकारराहित्यं वर्णलोपे प्रधानतमं कारणम्।

कस्याश्चिन्मातृकायाः कृमिदष्टे/त्रुटिते/भग्ने/सदुष्टलेखने च स्थले किं वस्तुतो भवेदिति निर्णेतुमशक्नुवानो लेखकः स्वपुत्रिकायां तानि स्थलानि रिक्तानि करोति। तां पुत्रिकां मातृकात्वेन स्वीकृत्यान्यो लेखको-

---

१.पद्यानि बाणवशतः पतिताक्षराणि यानीह मामकपदैर्घटितानि सन्तः।...

ऽपरां पुत्रिकां निर्माति। सः रिक्तस्थलानि पश्यन्नपि स्वपुत्रिकायां कुत्रापि लेखनस्थलम् अरिक्तीकुर्वन् मातृकागतं पाठं प्रतिकरोति। अर्थात् कुत्रापि किमपि स्थलावकाशमविहाय स द्वितीयो लेखको लेखनं करोति। एतेन कदाचित् मूले वर्तमानस्य पाठस्य सम्यगभ्यूहनमपि महाकष्टाय भवति। प्रथमो लेखको यदि कमपि विद्वांसमुपासर्पिष्यत्, लुप्तभागेषु किं स्यादित्यूहं कारयित्वा चालिखिष्यत्, समस्या किञ्चिदिव न्यूनाऽभविष्यत्।

इदंवर्गीयाः साधारणाः लिपिकरकृताः प्रमादाः

१.अनवधानजास्त्वरितलेखननिमित्ताः प्रमादा अत्र वर्गेऽन्तर्भवन्ति। अनारोग्यं, वैयक्तिक्यः समस्या अथवा अजागरूकता अनवधानस्य निमित्तानि भवितुमर्हन्ति। कदाचित् प्रायिकी लिपिकराणां लेखनशैल्येव प्रमादपुरःसरा या सर्वत्र मातृकालेखने गोचरः। संपादितग्रन्थानां पीठिकासु तादृश्या लेखनशैल्याः प्रस्तावोऽनावश्यकः। लेखने कार्यमाणे पाठकेनोच्चरितं सम्यगश्रुत्वा लेखनं यत् क्रियते तेनापि दोषाः संभवन्ति परन्तु एतद्वर्गीया दोषा अल्पतमाः।

अ.अक्षरलोपः

एवं स्यात्	एवं लिखितम्
अथ भीमरथशान्तिः	अभीमरथशान्तिः
अनन्तभट्टविरचितं	अन्तभट्टविरचितम्
चम्पूभारतम्	चम्पूभारम्।
पृथग्विधां पूजां	पृग्विधां पूजां
यक्षिणीमन्त्रः	यक्षिमन्त्रः
शुभमस्तु	शुभस्तु

भूषान्तरे क्वचन भर्मणि वर्णहीनधात्वन्तरेण घटनामिव मर्षयन्तु।।

आ.अनुस्वारविसर्गयोर्लोपः

एवं स्यात्	एवं लिखितम्
तस्यां मृतायां	तस्या मृतायाम्
दुःस्वप्ने दुर्निमित्तके	दुस्वप्ने दुर्निमित्तके
यः स्मरेत् केशवं	य स्मरेत् केशवं

इ.द्वितीयसमानाक्षरलोपः

एवं स्यात्	एवं लिखितम्
चतुर्थे श्वशुरं हन्ति	चतुर्थेश्वरं हन्ति
जगत्त्रयम्	जगत्रयम्
पुनर्जनननाशाय	पुनर्जननाशाय
भावविवेकः	भाविवेकः
वर्धते तेन सौभाग्यं	वर्धते न सौभाग्यम्
वाक् कृता	वा कृता
वीरराज	वीराज
सूक्ष्मत्वाद्दुरवबोधतया	सूक्ष्मत्वादुरवबोधतया
हरिमेव स्मरेन्नित्यम्	हरिमेव स्मरेनित्यम्

ई.प्रायिकाः प्रमादा ये लिपिकरलेखनशैलीगताः

एवं स्यात्	एवं लिखितम्
तत्त्वं	तत्वं
दत्त्वा	दत्वा
संन्यासः/सी	सन्यासः/सी

उ.अशुद्धेन श्रवणेन लेखने संभवन्तो लोपाः

एवं स्यात्	एवं लिखितम्
दर्शनकौमुदी	दशनकौमुदी

बुद्धिसागरः	बुद्धिसारः
सिद्धान्तसंग्रहः	सिद्धसंग्रहः

ऊ.बुद्धिपूर्वकाः लोपाः

गुरवश्छात्रा वा कदाचिन्मूलग्रन्थस्य प्रथमाध्येयान् परमावश्यकान् भागानवशेषय्य तदनन्तरमध्येयान् भागान् परित्यज्य साररूपाः प्रतिकृतीर्निर्मान्ति। यथा काशिकाया अतिह्रस्वतमा मातृका मैसूरवीये प्राच्यविद्यासंशोधनालयेऽस्ति। (पि.५१३०)अत्र प्रतिसूत्रं यावदावश्यकी वृत्तिर्लिखिता। उदाहरणानि न लिखितानि। केनचिदाचार्येण छात्रेण वा झटित्यावश्यकविषयोपस्थितये बुद्धिपूर्वकं कृतैषेत्यत्र न संशयलेशः[१]।

स्वमताभिमानः कदाचित् स्वानभीष्टदेवतास्तुतिभागानाम् अलेखने कारणं भवेत्। वैष्णवो लिपिकरः शिवस्तुतिपराणां पद्यानां न्यूनीकरणे, शैवश्च लिपिकरो विष्णुस्तुतिपराणां पद्यानां केषाञ्चित् त्यागे कारणीभूता भवितुमर्हन्ति।

ऋ.अनिवार्यः

एकस्यैव ग्रन्थस्य मातृकाद्वये लेखनमस्तीति भावयामः। एकस्यां मातृकायां १२० पद्यानि, अपरस्यां मातृकायां च १०० पद्यानि वर्तन्ते। प्रथमायां मातृकायामुपलभ्यमानानि अधिकानि विंशतिपद्यानि प्रक्षिप्तानीत्यतीव त्वरया निर्धारणा नोचिता। एवमपि संभाव्यते यत्

१.परन्तु डा.मल्हारिकुलकर्णीमहोदयस्तु स्वेन परिशीलिता काचिल्लघुतमा काशिकामातृका उदाहरणाधिक्यरहिता सती काशिकारचनाया आरम्भिकावस्थां सूचयतीत्यभिप्रैति। तदभिप्रायानुसारेण काशिकायां भाष्यादिवाक्योद्धृतयस्तदनन्तरं कृताः। (*The shortest manuscript of Kāśikāvṛtti. Tattvadīpa*, Academy of Sanskrit Research, Melukote, Vol: III. No.1-2)

प्रथममातृकायाम्(अस्मदुपलब्धायां) वर्तमानानि सर्वाणि १२० पद्यानि द्वितीयमातृकाया लिपिकरस्य नोपलब्धानि। तेन लब्धा आदर्शमातृका अस्मदुपलब्धमातृकातो भिन्ना। तत्र १००तमस्य पद्यस्य लेखनं यस्मिन् पत्रे कृतमासीत्, तस्य पत्रस्यानन्तरं पत्राणि नष्टानि/भग्नानि/ लेखनमतीवास्फुटम्। अथवा वैयक्तिकं किमपि समस्यादिकं तस्य लेखनानुवर्तने बाधकमुपस्थितम्। तस्मात् स लेखनं स्थगितवान्। तस्या असमग्रायाः कृतेराधारेण अस्मदुपलब्धा द्वितीया मातृका रचिता। अस्माभिस्तु १०० पद्यात्मिकया द्वितीयया मातृकया सह १२० पद्यात्मिका प्रथमापि मातृकोपलब्धा। द्वितीयमातृकायां यदि प्रकरणवशादर्थवशाच्च पद्येष्वनुस्यूतताऽनुभूयेत, मातृकाद्वयेऽपि पद्येषु नास्तव्यस्तता, अभिप्रायोऽयं दृढायते। यदि द्वितीयमातृकानुपलब्धानि केवलं प्रथममातृकागतानि विंशतिपद्यानि प्रथममातृकायाम् अस्तव्यस्ततया व्यामिश्रितानि सन्ति अर्थानुस्यूतयेऽनावश्यकानि च प्रतिभान्ति, निःसन्दिग्धमेव तेषां प्रक्षिप्तत्वम्।

ॠ.ग्रन्थकर्तृकृतः

ग्रन्थरचनानन्तरं ग्रन्थकर्ता स्वयमेव कांश्चन व्यत्यासान् कुर्याद् यत्र लोपोऽन्यतमः। प्राचीनकालिकेषु अस्मदुपलब्धेषु ग्रन्थेषु बाढं केचन लोपा ग्रन्थकर्तृकृताः स्युरेव। परन्तु परिनिष्ठितप्रमाणाभावात् कस्मिन् ग्रन्थे तथा कृतमिति निश्चयेन वक्तुं वयं न प्रभवामः।

अत्रैतदवधेयम्। ग्रन्थानाम् अकार्त्स्न्योपलब्धिरस्मिन् वर्गे नैवान्तर्भवति। मातृकायां कस्याञ्चित् लक्ष्मणविरचितस्य शारदातिलकस्य केवलं दशमपटलानन्तरभवानां पटलानामुपलब्धिः, अन्यस्यां च मातृकायां महाभारतस्य केवलं सभावनपर्वणोरुपलब्धिश्च केवलं ग्रन्थस्याकार्त्स्न्योपलब्धिं सूचयतो न तु ग्रन्थलोपम्।

भगवद्गीताभाष्यपीठिकारचनानन्तरं शङ्कररामानुजमध्वाचार्यै-र्भगवद्गीताया द्वितीयाध्यायस्यैकादशपद्यानन्तरं भाष्यरचनमनुवर्तितम्। प्रथमाध्यायप्रथमपद्यत आरभ्य द्वितीयाध्यायदशमपद्यपर्यन्तं तात्त्विकं व्याख्येयं किमपि तैर्न दृष्टम्। तस्मादस्मिन् स्थले यद् भाष्याभावस्त-ल्लोपस्योदाहरणतां नैव भजते। भरतनाट्यशास्त्रस्य व्याख्या अभिनव-भारत्यत्रापवादः। दौर्भाग्यादधुना उपलब्धासु मातृकासु कस्यामपि अभि-नवभारती न समग्रश उपलभ्यते।

पञ्चपादिकाग्रन्थोऽसमग्र इव दृश्यते यावदुपलब्धा। ग्रन्थकर्ता तावत्पर्यन्तमेव ग्रन्थममुं रचितवान् वा न वेति तु विवादास्पदम्। नैषधीयचरितं समग्रं वा न वेत्यत्रापि आबहोः कालाद् विवादः प्रचलति स्म। समग्रमेवेदमिति प्रमाणानि आधुनिकैर्विद्वद्भिर्दर्शितानि। परन्तु एते प्रसंगा ग्रन्थलोपस्य सर्वथाऽप्यनुदाहरणानीति द्रष्टव्यम्।

२.आगमः/प्रक्षेपः

अ.अबुद्धिपूर्वकः

कश्चन विद्यार्थी कस्मिंश्चन ग्रन्थे वर्तमानं 'ब्रध्न' इति शब्दस्यार्थं स्वाचार्ये विचार्य 'सूर्य' इति तदर्थं विदित्वा यस्यां पङ्क्तौ 'ब्रध्न' इति शब्दो लिखितस्तस्यामेव पङ्क्तौ मातृकायाः प्रान्तभागे स्वोपयोगार्थं 'सूर्य' इति लिखति। ततोऽन्येन विद्यार्थिना सा मातृका प्रार्थ्यते, प्रथमविद्यार्थिना दीयते च। स द्वितीयो विद्यार्थी केनचिल्लिपिकरेण कारयति पुत्रिकाम्। स लिपिकरो ब्रध्नशब्दं प्रान्तभागलिखितं दृष्ट्वा वास्तविकं तल्लेखनप्रयोजनम् अजानानस्तं ग्रन्थस्याविनाभूतमवयवं मन्वानः, 'प्रमादात् पतितस्य भागस्य पूर्वलिपिकरेण संयोजनं प्रान्तभागे सूचितम्' इति भ्राम्यन् पुत्रिकायां ग्रन्थपाठमध्ये ब्रध्नशब्दं ग्रन्थशरीरावयवत्वेन योजयति।

स्वमातृभाषोच्चारणप्रभाववतोऽशिक्षितस्य च जनस्य पठनं श्रुत्वा लेखनावसरे साधारणेन लिपिकरेण अनावश्यकस्य विसर्गस्य योजनं, अनवधानेन त्वरया लेखनं, अर्थमबुद्ध्वा लेखनं चाधोनिर्दिष्टेषूदाहरणेषु दृश्यन्ते-

एवं स्यात्	**एवं लिखितम्**
दर्शजन्मफलं शृणु	ददर्श जन्मफलं शृणु
पापं नश्यति तत्क्षणात्	पापं नश्यति तद्धक्षणात्
यद्यप्युपहतः पापैः	यद्यःप्युपहतः पापैः
वर्षाम्बु विमलं पात्वा	ववर्षाम्बु विमलं पात्वा

आ.अशुद्धेन श्रवणेन लेखने संभवन्तो वर्णागमाः :-

एवं स्यात्	**एवं लिखितम्**
जनस्थानं	जननस्थानं
वाममार्गः	वामनमार्गः
शरासनम्	शरणासनम्

इ.पुनरुक्ति ः

विस्मरणं साधारणं कारणं भवितुमर्हति कदाचिल्लिखितस्यैव पुनर्लेखने ।सुन्दरबाहुविरचितस्य सुदर्शनचक्रविजयाख्यस्य महाकाव्यस्य कस्यांचन मातृकायां पद्यमेकं द्विर्लिखितम्[1]।इयम् अनावश्यकी पुनरुक्तिः इङ्ग्लिष्भाषायां 'Dittography' इत्युच्यते।कदाचिद् द्वितीयवारं लिखिते भागेऽतीवाल्पमात्रया पाठान्तरं दृश्येत।

१.महामुने ! मत्कुलसंभवानां साधारणः सन्नपि देशिक त्वम्।यथा सुधांशुः कुमुदे नितान्तं मयि प्रसादं कुरुषे महान्तम्।(८a, ८b) (प्रा.वि.सं. मैसूरु pl १५९८) (द्वितीयवारं लिखिते पद्ये 'देशिक त्वम्'इत्यत्र 'देशिकस्त्वम्' इति पाठः, स एव समीचीनोऽर्थसामञ्जस्यहेतोः।)

ई.ग्रन्थकर्तृकृतः

ग्रन्थकर्ता स्वयं स्वस्य ग्रन्थस्य आदिमो लेखकः! तस्य बुद्धिर्लेखकवदेव प्रवर्तते। अनवधानात् सोऽपि अनावश्यक्याः पुनरुक्तेः कारणं कदाचिद् भवेत्। आदर्शमातृकाधारेण लिखितायामथवा लेखितायां पुत्रिकायां बुद्धिपूर्वकमेव कांश्चन व्यत्यासान् स कुर्यादथवा कारयेत्। तस्माद् ग्रन्थकर्तृकृता व्यत्यया नैव अनैसर्गिकाः[१]। तेषु व्यत्यासेषु आगमोऽपि किल वर्तते।

अमरचन्द्रयतिः(क्रि.श.१२)स्वविरचितायाः काव्यकल्पलतावृत्तेर्व्याख्यां स्वयमेव प्रणिनाय। "वृत्तिविरचनानन्तरम् अमरचन्द्रः स्वग्रन्थस्योत्कर्षाधिक्यं संपादयितुमैच्छत्।[२]" ग्रन्थसमाप्त्यनन्तरमपि ग्रन्थे विषयोत्कर्षाधानाय ग्रन्थकर्तारः सांप्रतिके काल इव प्राचीनेऽपि काले प्रयत्नपरा आसन्निति वस्त्वत्र मुख्यम्। वृत्तावेव लोपागमादेशानमरचन्द्रश्चकार वा न वेति तु विषयान्तरम्।

अप्पय्यशिवाचार्याख्यः कश्चन विद्वान् अनुभवाद्वैतविषयकाननेकान् ग्रन्थान् जग्रन्थ ये मैसूरवीयप्राच्यविद्यासंशोधनालये तथा अड्यार्ग्रन्थालये च वर्तन्ते। मैसूरुप्राच्यविद्यासंशोधनालये तदीयम् अनुभूतिमीमांसासूत्रं

---

१. "ग्रन्थकर्तैव यदि प्रसंगवशात् स्वकृतस्य पुनःसंस्करणे प्रवर्तते तदा बुद्धेर्नवनवोन्मेषशालितया पूर्वकृतशब्दयोजनायां शब्दविनिमयोऽधिकशब्दप्रवेशो वा कार्य इति तस्य स्यान्मतिः। तदनुसारेण चापरा योजना तेन संपादिता चेत् तादृशे लिखिते पुस्तके पाठान्तरं जायते। पाठान्तरं चेदं शुद्धमेव पूर्वपाठापेक्षया प्रायः समीचीनतरं च भवेत्। पूर्वपाठापेक्षयाऽधिकसमीचीनोऽयं पाठ इति मत्वैव ग्रन्थकृता संपादितत्वात्।" सर्वदर्शनसंग्रहः-सं.वासुदेवशास्त्री अभ्यङ्करः. प्र.भण्डारकरप्राच्यविद्यासंशोधनालयः1951प्रस्तावना पु.2

२.काव्यकल्पलतावृत्तिः सं.बेटाई। एल्.डी.इन्स्टिट्यूट् आफ् इण्डालजी, अमदाबाद् जुलै 1997 .पीठिका पु.४

मूलमात्रं भाष्यरहितं B ३३३ तथा B ३३१ इत्यङ्कितयोर्द्वयोर्मातृकयोर्वर्तते। B ३३१ मातृकायां काचित् पीठिका योजिता या B ३३३ मातृकायां नास्ति। पीठिका ग्रन्थकर्त्रैव रचिता, तत्र "तेनैवान्यत्र चैवमुक्तम्"इति स्पष्टमुक्तत्वात्[1]।

नैषधीयचरिते पद्यमेकं[2]तदग्रेतनेन पद्येन समग्रं संवदति। काव्यकर्त्रैव परिवर्तितपाठेन भाव्यमन्यस्यां मातृकायां तल्लेखनावसरे। तदनन्तरं तत्प्रतिलेखकेन साधारणेन केनचन लिपिकरेण, एकस्यैव पद्यस्य पाठद्वयं दृष्ट्वा उभयस्यापि लेखनं कृतवता भाव्यम्।

उ.संगीते

कर्णाटकसंगीते प्रसिद्धाया मुत्तुस्वामिदीक्षितरचितायाः 'वातापिगणपतिं भजे' इत्यादेः कृतेस्तथा 'महागणपतिम्' इत्यादेरपि कृतेरन्ते 'चिट्टेस्वराः' कैश्चनाद्यत्वे गीयन्ते ये वर्तमानकाले योजिताः। ('वातापिगणपतिं भजे' इत्यादेः कृतेः चिट्टेस्वरा डा.बालमुरळीकृष्णेन योजिता इति श्रूयते।) एते नासन् मुत्तुस्वामिदीक्षित-मूल-रचनायाम्।

ऊ.बुद्धिपूर्वकः

बहुपु प्रसंगेषु सुशिक्षिता लिपिकारा एव पाठयोजनस्य मूलहेतवः।इत्थंभूतलक्षणः पाठप्रक्षेपः इतिहासवाङ्मये भूयान्।केचन

१.अनुभूतिमीमांसासूत्रम्-सं.एस्.जगन्नाथः-The Mysore Orientalist, Mysore.Vol.XVIII P.199-222. पीठिका पु.२०३

२."विलोमिताङ्कोत्किरणाद्रुरूहदृगादिना दृश्यविलोचनादि।विधिर्विधत्ते विधिना वधूनां किमाननं काञ्चनसञ्चकेन(२२.४६)॥" पद्यमेतदर्थेन संवदमानं पद्यम्: "अनेन वेधा विपरीतरूपविनिर्मिताङ्कोत्किरणाङ्ककेन।त्वदाननं दृश्यदृगाद्यलक्ष्यदृगादिनैवाकृत सञ्चकेन॥" (सं.नारायण आचार्य काव्यतीर्थः. निर्णयसागरप्रकाशनं नवमं संस्करणं १९५२ पु.९६१)

श्लोकाः कथा वा इतिहासग्रन्थस्य भागत्वेन महाजनैर्विश्वस्ताः सन्तो वस्तुतः प्रक्षिप्ता भवन्ति न वा वर्तन्ते। यथा व्यासमहाभारतस्थत्वेन लोकप्रसिद्धा गणेशसंबद्धा कथा (गणेशेन महाभारतस्य लेखनं कृतमिति रूपा)केवलं द्वित्रासु मातृकासु समुपलभ्यते ।अथ च सत्यनारायण-व्रतकथा स्कान्दपुराणे नास्ति, सत्यामपि तथा घोषयित्र्यां पुष्पिकायाम्।

तद्वदेव कुवलयानन्दे समुद्धृतं मुरारिकविप्रशंसापरं किमपि पद्यं[१] नास्ति मुरारिकवेरनर्घराघवे, सत्यामपि तथाविधायां प्रतीतौ।प्रायः पद्यमिदं कस्मिंश्चन सुभाषितसंग्रहेऽस्ति।

ऋ.वैदिकः

वेदः सदाऽपि श्रुतिः।(आचार्यीयोच्चारणस्य श्रद्धापूर्वकेन श्रवणेन शिष्यैर्गृह्यमाणा परमशुद्धा दैवी वाक्)।तत्र 'व्यत्यास' इति कल्पना वैदिकानां स्वप्नेऽप्यनूह्या।अल्पतमयापि मात्रया तत्र प्रक्षेपस्य संभावना तेषां हृदयकम्पाय[२]।

वेदे कनिष्ठतमोऽपि प्रक्षेपप्रयत्नः श्येनचक्षुष्काणां स्पशवच्च वर्तमानानां तीक्ष्णमतीनां ग्रन्थसम्पादनज्ञानां दृष्टिं वञ्चयितुं न समर्थः।

मैत्रायणीसंहितायां केषुचन संस्करणेषूपलभ्यमाना गणेशगायत्री[३]

१.देवीं वाचमुपासते हि बहवः सारं तु सारस्वतं जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः।अब्धिर्लङ्घित एव वानरभटैः किन्त्वस्य गम्भीरताम् आपाताल-निमग्नपीवरतनुर्जानाति मन्थाचलः॥

२.पाठभेदाः श्रुतौ न संभवन्ति, तस्याः अपौरुषेयत्वात् ।(स्वसंपादितस्य सर्वदर्शनसंग्रहस्य प्रस्तावनायां व्याख्याता वासुदेवशास्त्री अभ्यङ्करः। पृ.३.)BORI 1951

३.तत् करटाय विद्महे हस्तिमुखाय धीमहि।तन्नो दन्ती प्रचोदयात्॥ (मैत्रायणीसंहिता २.९.१.६)

प्रक्षिप्तेति तत्रभवान् वै.कृष्णन् प्रदर्शितवानस्ति[१]। तेन स्वमतसमर्थनार्थं दर्शितेषु कारणेषु कतिचन कारणानीमानिः-

१.केवलं मैत्रायणीशाखामातृकासु गणेशगायत्र्या उपलब्धिर्न पुनरन्यासु शुक्लयजुर्वेदीयासु / कृष्णयजुर्वेदीयासु मातृकासु।

२.गणेशगायत्र्यां सायणभाष्यस्य सर्वथाऽभावः।

३.मङ्गलार्थं स्तोतव्येषु देवेषु मन्त्रप्रसिद्धेषु गणेशस्य अनस्तित्वम्[२]।

४.वैश्वदेवानुष्ठाने गणेशाभावः।

५.वैदिकशान्त्यनुष्ठाने एकादशदेवतानां मध्ये गणेशाभावः।

जागरणम्

प्रक्षिप्तत्वनिर्धारणायामत्यन्तं जागरूकैर्भाव्यं ग्रन्थसंपादनज्ञैः। संकुचितया बुद्ध्या सत्वरं कृतया च निर्धारणया कदाचिदनभीष्टान् सर्वानपि पाठान् प्रक्षिप्तान् निर्णेतुं प्रयत्नाः क्रियन्ते। कस्यापि भागस्य प्रक्षिप्तत्वनिर्णयनात् पूर्वं ग्रन्थसंपादकेन जनेनोपलब्धा संशोधनसामग्री सर्वाऽपि सावधानं परिशीलनीया[३]। कदाचित् त्वरया ''इदं प्रक्षिप्तम्'' इति घोषणा जनानाम् अवधानमाकर्षितुं क्रियमाणो व्यायामो भवति।

के.वि.सुब्रह्मण्य अय्यर्प्रणीतस्य 'Three lectures' इति ग्रन्थस्य विमर्शावसरे के.एस्.वरदाचारी इत्थमभिप्रैति-''स्वसिद्धान्ताननुगुणः पाठः प्रक्षिप्तो, वञ्चनाजन्यः कृतको वेति धूननं केषाञ्चना-

१. '*Is Gaṇeśa a Vedic God?* 'ABORI 1990 Vol.LXXI PartsI-IV Pp.70-61

२.अथर्ववेदः १९.९.६-११.एते केचन देवा येषां स्तुतिः शान्तिमङ्गलप्रयोजना-मित्रः, विष्णुः, प्रजापतिः, इन्द्रः,बृहस्पतिः, अर्यमा, वरुणो, विवस्वान्, उत्पाताः, उल्काः, राहुः, धूमकेतवः, रुद्राः, वसवः, आदित्याः इत्यादयः। अस्यां पट्टिकायां गणेशदेवताया उल्लेखो नास्ति।

३.द्र.पुटौ ५३-५४

धुनिकानां विमर्शकानां परमप्रियं कृत्यम्।[१]"

३.आदेशः

अ.अबुद्धिपूर्वकः

लिपिकरेण मातृकागतस्य पाठस्यार्थेऽनवबुद्धे स कदाचिन्मूलं प्रामादिकमिति मत्वा स्वबुद्धिस्तरस्यानुगुण्येन तत्र परिवर्तनं कुर्यात्।

प्रकृतो ग्रन्थकर्ता कञ्चित् समयं यावत् कस्मिंश्चन मुद्रणालये प्राग्रूपशोधक आसीत्। कदाचिन्मुद्रिते भागे सः 'वासुदेव' इति शब्दं दृष्टवान् यः प्रकृतासंबद्ध आसीत्। ततो मूले दृष्टे 'वामदेव' इति प्रबन्धरचयित्रा रचितः पाठो दृष्टः। 'वामदेव'इति शब्दं मूलस्थितं दृष्ट्वा तस्य शब्दस्य स्वापरिचितत्वादक्षरयोजकः 'प्रायः शब्दोऽयं वासुदेव इति भवेत्' इति चिन्तयित्वा तत्र 'वासुदेव' इति स्वपरिचितं शब्दमादिश्य स्थापितवानिति स्पष्टम्। साधारणाक्षरयोजकानाम् अथवा भाषाप्रभुत्वरहितानाम् आधुनिकानाम् उट्टङ्कनकाराणां स्थाने प्राचीना लिपिकरा आसन्। साधारणेन लिपिकरेण 'वृषाकपिः' इत्यत्र 'वृक्षकपिः' इति पाठपरिवर्तने कृते तत्र न किमप्याश्चर्यम्।

एकं पाठान्तरमन्यस्य पाठान्तरस्य जन्मन्यपि कदाचित् भवति हेतुः। 'बधान' (बध् धातोर्लोटि मध्यमैकवचनम्) इत्यत्र 'विधान' इति पाठान्तरे जाते तदनु तदवलम्बनेन लिपकरो 'विद्यादान' इति द्वितीयं पाठान्तरं सृजेत्। 'बधान' इति स्थले 'बन्धन' इति कृते परिवर्तने विस्मयलेशोऽपि नास्ति।

---

१. Journal of Sri Venkateshvara Oriental Research Institute, Tirupati Vol.III. 1942 , page 291

ग्रन्थसंपादनशास्त्रे प्रमादानामेतादृशां कारणं 'सरलीकरणम्'इति संज्ञया प्रथितम्।

अतिसाधारणैर्लिपिकरैर्लिखितासु शास्त्रमातृकासु केचन **सरलीकरण**जन्या अपपाठा अत्र निर्दिष्टाः:-

शुद्धं पदं	सरलीकरणात् संभवनीयः अपपाठः	शास्त्रम्
अच्छावाकशस्त्रं	अच्छवाक्शास्त्रम्	श्रौतप्रयोगः
अनिट्कारिका	अनिष्टकारिका	व्याकरणम्
अन्त्रवृद्धिः	अन्तर्वृद्धिः	आयुर्वेदः
अभङ्गश्लेषः	अङ्गभङ्गश्लेषः	अलङ्कारशास्त्रम्
अध्यासः	अभ्यासः	अद्वैतम्
असुदेवं नमाम्यहम्।	वसुदेवं नमाम्यहम्	द्वैतम्
कूरेशः(कश्चन कविः)	क्रूरेशः	विशिष्टाद्वैतम्
प्रतीत्यसमुत्पादः	प्रतीतिसमुत्पातः	बौद्धम्
बुद्धिसरः (विदान्तदेशिकप्रणीते तत्त्वमुक्ताकलापे कश्चनाध्यायः)	बुद्धिसारः	विशिष्टाद्वैतम्
भुक्तिमुक्तिदायक	भक्तिमुक्तिदायक	स्तोत्रम्
मधुसूदनमेघोत्था कृपावृष्टिः करोत्यलम्। संसारघर्मतप्तानां शीतं संसारिणां सुखम्[१]॥	मधुसूदनमेघोत्था कृपावृष्टिः करोत्यलम्। संसारधर्मतप्तानां शीतं संसारिणां सुखम्[१]॥	स्तोत्रम्
लेश्या	वेश्या अथवा लेह्यम्	जैनम्
विपमाशनम्	विषमासनम्।	आयुर्वेदः
शवासनं श्रान्तिहरं	शवासनं शान्तिहरं	हठयोगप्रदीपिका
सन्यासोऽयं रागः	संन्यासोऽयं रागः	संगीतम्

१.एतत् प्रकृतग्रन्थकर्त्रीयं पद्यम्।

आ.एतद्वर्गीयाः सामान्याः प्रमादाः

हकारस्थाने विसर्गः, एतद्विपरीततया विसर्गस्थाने हकारः, स्वरस्थाने व्यञ्जनं व्यञ्जनस्थाने च स्वर इत्यादिकं कुलिपिकराणां कृत्यम्।

सत्वरं निरवधानं च लेखनेन प्रमादा एतादृशा बहवो जायन्ते।

शुद्धः पाठः	अशुद्धः पाठः
उत्सवः	उस्तवः
एवं कृते न संदेहः	येवं कृते न संदेहः
गणेशाय नमः	गणेषाय नमः
गदाधरः	गान्धारः
त्रिकाण्डशेषः(कोशविशेषः)	त्रिकाण्डशोषः
नमः	नमह / नमहा
नारदः परिपृच्छति	नारकः परिपृच्छति।
पौराणिकमतं	प्राणिकमतम्
भोजयित्वा	भोजइत्वा
वनजनयने	व्यञ्जने
वाचयित्वादौ	वाचइत्वादौ
विचक्षणः	विचक्षणह / विचक्षणहा
वित्तशाठ्यम्	इत्तशाठ्यम्

इ.अशुद्धेन श्रवणेन लेखने संभवन्त आदेशाः

एवं स्यात्	एवं लिखितम्
अंशगणना	वंशगणना
गोरोचना	गौरो जनः
चाणक्यनीतिसूत्रम्	जानक्या नीतिसूत्रम्

ई.अनवधानजन्या आदेशाः

मूलपाठगतशब्द-परिवर्तितपाठगतशब्दयोरुभयोरपि प्रसिद्धत्वे

तु पाठपरिवर्तनकारणमनवधानमेवेत्यत्र न कोऽपि संशयः। 'उत्पाटनम्' इत्यत्र 'उच्चाटनम्' इति पाठान्तरं प्रकृतेन ग्रन्थकर्त्रा कुत्रचिद् दृष्टं यदनवधानजम्। एतद् दुष्टश्रवणजं प्रतिभाति।

उ.अज्ञानजन्यं शब्दस्थलपरिवर्तनम्

लिपिकरस्य (कदाचिद् ग्रन्थकर्तुरपि !)अज्ञानेन कृतशब्दस्थल-परिवर्तनाद् वाक्याद् वस्तुतत्त्वविप्रतीपार्थं जायते। एतद्विचित्रतमं यन्न केवलं मातृकासु परन्तु मुद्रितेष्वपि संस्करणेषु प्रामादिकार्थस्य वाक्यस्या-वशेषणम्।

कोऽपि लिपिकरः अन्नम्भट्टप्रणीतायास्तर्कसंग्रहदीपिकाया मङ्गल-भागे वाक्यं किमप्येवमलिखत्:-

मङ्गले कृतेऽपि किरणावल्यादौ समाप्त्यदर्शनात् मङ्गलाभावेऽपि कादम्बर्यादौ समाप्तिदर्शनाच्च अन्वयव्यतिरेकाभ्यां व्यभिचारादिति चेन्न।

वस्तुतस्त्वत्र 'किरणावल्यादौ' इत्यत्र 'कादम्बर्यादौ' इति, 'काद-म्बर्यादौ' इत्यत्र च 'किरणावल्यादौ' इति भाव्यं, कादम्बर्यां मङ्गले कृतेऽपि समाप्त्यदर्शनात्, किरणावल्यां मङ्गलाभावेऽपि समाप्तिदर्शनाच्च।

एष लिपिकरमहानुभावः अग्रेऽपि तमेवार्थं समर्थयमानोऽतितमां हास्यास्पदत्वं लम्भयामास वाक्यस्यास्य यथा-

किरणावल्यादौ विघ्नबाहुल्यात् समाप्त्यभावः,कादम्बर्यादौ ग्रन्था-द्बहिरेव मङ्गलं कृतमतो न व्यभिचारः !

तर्कसंग्रहस्य बहुषु मुद्रितेषु संस्करणेषु भागस्यास्यैवंप्रकारेणैवा-वशेषणम् अन्धपरम्परान्यायं स्मारयति[१]।

१.उद्धृतस्य वाक्यद्वयस्य स्वयमन्नम्भट्टेनैव प्रणीतत्वे, स एव प्रमादी सिद्ध्यति।

ऊ.अक्षराध्यासः

एकस्मिन्नक्षरे सादृश्यहेतोरन्याक्षरत्वेन भ्रान्त्या ग्रहणम् अति-सहजम्। अक्षराध्यास इति भ्रान्तेरस्याः संज्ञा। ग्रन्थलिप्यां प-व-च-वर्णा सदृशविन्यासाद् भ्रमं जनयन्ति। तस्मात् 'वपनं', 'वचनं', 'पवनम्' इत्येते शब्दाः भ्रान्तेः कारणं भवन्ति अन्यतमस्मिन्नन्यतमस्य प्रतीतिं कुर्वाणाः। देवनागर्यां नकारतकारयोरस्ति सादृश्यम्। तलशब्दो नलशब्द-भ्रान्तिं जनयेत्। यकारपकारयोर्विन्याससादृश्याद् भ्रमावसरः। यक्षपक्ष-शब्दयोरन्यस्मिन् अन्यवर्णाध्यासकारणात् पक्षशब्दं दृष्ट्वा यक्ष इति को-ऽप्युच्चारयेत्। कन्नडलिप्यां नकारसकारयोः सादृश्यकारणात् 'आननम्' इति शब्दं दृष्ट्वा 'आसनम्' इति कोऽपि पठेल्लिखेल्लेखयेद्वा।

विभिन्नासु लिपिषु वर्तमानमक्षरसादृश्यं भ्रान्तिमधिकतरां सृजति। शारदालिप्यां तकारस्थकारश्च क्रमेण देवनागरीलिप्या उकारेण षकारेण च सादृश्यं प्रदर्शयतः। अ-सुविज्ञातशारदालिपिर्लिपिकरः शारदालिपिलिखितां मातृकां दृष्ट्वा देवनागरीलिप्यां पुत्रिकां कुर्वन् मातृकायां 'तथा' इति लिखितं दृष्ट्वा 'उषा' इति पुत्रिकायां लिखेत्। श्रूयते यदेतद् वस्तुतः संजातमेव देवनागरीलिपिलिखितासु महाभारतस्य पुत्रिकासु, याः शारदालिपिलिखितानां महाभारतमातृकाणां दर्शनेन रचिताः। पुणेनगरे महाभारतस्य (ग्रन्थसंपादन)शास्त्रीयसंस्करणकार्ये संपाद्यमाने संपादकैर्दृष्टमेतत्[१]।

कदाचिदतीव स्वल्पतमोऽप्याकृतिव्यत्ययोऽक्षराध्यासं जनयेत्। कासुचन तिगळारीपिमातृकासु डकारः सकारभ्रमं कदाचित् करोति । 'मण्डलम्' इति शब्दं मातृकायां दृष्ट्वा कोऽपि कुलिपिकरो 'मंसलम्' इति पुत्रिकायां लिखेत्। 'मंसलम् 'इति शब्द एव नास्तीत्यतो लिपिकरोऽन्यः पौत्रिकायां 'मांसलम्' इति तं शब्दं परिवर्तयेत् !

१. एतच्च तत्रभवता डा. आर्.एस्.शिवगणेशमूर्तिना ज्ञापितम्।

"आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुम् " इति मेघदूतीये पद्ये(पूर्वमेघे १.२)"आषाढस्य प्रशमदिवसे मेघमाश्लिष्टसानुम् " इति पाठान्तरम्। 'प्रथम'शब्दस्य आदिम इत्यर्थ इति, 'प्रशम' शब्दस्य चान्तिम इत्यर्थ इति सुप्रसिद्धमेतत्। अधीदंविषयं सघर्मो महावाक्कलहो जातो व्याख्यातृषु। मल्लिनाथः प्रथमशब्दस्यैव प्राड्विवाकः सन् प्रशमशब्दं तिरस्करोति। व्याख्यातुर्वल्लभस्यानुसारेण 'प्रशम इति पाठो ग्राह्यः। प्रथमेति पाठान्तरमक्षराध्यासेन संजातम्[१] '। वस्तुत इदानीमप्यप्रति-समाहितः प्रश्नोऽयं विद्वन्मण्डलीषु चर्चां यदा कदोत्थापयत्येव। अत्र कतरः शब्द अर्थौचित्यमधिकतरमावहतीति प्रश्नापेक्षया ग्रन्थसंपादन-शास्त्रज्ञानां तु समाधेयतरः प्रश्नोऽयम्:-कालिदासेन प्रथममित्येव रचितं सत् प्रशममिति पाठान्तरम् अन्यैः कृतं वा ? आहोस्वित् कालिदासेन प्रशममित्येव रचितं सत् प्रथममिति पाठान्तरम् अन्यैः कृतं वा ?

ऋ.संस्कृतेतरभाषोच्चाराणप्रभावजन्यः।

केरलीयैः कदाचित् तकारयुक्ते संयुक्ताक्षरे तकारस्थले लकार आदिश्यते। तकारस्य वर्णान्तिमावयवत्वेऽपि कदाचिदेवं क्रियते। तस्मात् 'उत्पल'स्थाने 'उल्पल' इति,'चिकित्सा' इत्यत्र 'चिकिल्सा' इति, 'प्रचोदयात्' (गायत्रीमन्त्रे)इत्यत्र 'प्रचोदयाल्' इति च तैः कदाचिदु-च्चार्यते लिख्यते च।

वकारो बकारत्वं याति वङ्गीयानामुच्चारणे। अरबिन्दरबीन्द्रौ सुप्रसिद्धौ। तद्वदेव बकारस्थाने वकारादेशः क्वचिद् यथा 'बलराम' इत्यत्र 'वलराम' इत्युच्चारणम्। अकारस्य ओकारच्छाया श्रूयते वङ्गानाम्

१. "केचित्तु शकारथकारयोर्लिपिसादृश्यमोहात् प्रथम इत्यूचुः, कथं कथमपि चैतमेवार्थं प्रतिपन्नाः। वर्षाकालस्य प्रस्तुतत्वादादिदिनमित्येतत् त्वतीव विरुद्धम्।" वल्लभदेवव्याख्या(कस्यां लिप्यां शकारथकारयोः परस्परेणाध्यासः संभवतीति परिशीलनीयमत्र।)

उच्चारणे। 'चक्रवर्ती' इत्युच्चारणस्थले 'चोक्रबोर्ती' इति, 'अरविन्द' इत्युच्चारणस्थले 'आरोबिन्दो' इति च प्रसिद्धे। केचनौत्तराहाः कदाचित् सकारस्थाने शकारमुच्चारयन्ति। यथा 'वसन्ते वासन्ती कुसुमसुकुमारै रवयवै' रित्यादिगीतगोविन्दीये पद्ये सकारस्थाने शकारमादिश्य कदाचित्तैः ससकाराणि पदानि सशकाराणीवोच्चार्यन्ते यथा 'वशन्ते' (<वसन्ते) 'वाशन्ती'(<वासन्ती) 'कुशुम'(<कुसुम) 'शुकुमारैः' (<सुकुमारैः)'अनुशरणाम्'(<अनुसरणाम्) 'शरशम्'(<सरसम्) 'शह-चरी'(<सहचरी)[1]। कदाचिद् ग्रन्थकारैः शकारस्थाने सकारोऽनुमोद्यते यथा-भानुजिना अमरकोशे 'शातम्(१.४.२५.)' इत्यत्र 'सातम् ' इत्यनुमोद्यते। कदाचिच्च शकारस्थाने सकारः, बकारस्थाने वकार इत्यादिकं केषाञ्चन ग्रन्थकाराणामपि सम्मतमिति ज्ञायते। अमरकोशे 'बिसम् (१.१०.४२)' इत्यत्र 'विशम्' इति रूपं भानुजिना प्रदर्शितं द्विरूपकोशम् उद्धरता। तत्रैव पादटिप्पण्यां 'विसम्' इत्यन्यद् रूपं संपादकेन पण्डित-शिवदत्तशर्मदाधिमथेन प्रदर्शितं 'हंसपङ्क्तिरिव विसंवादिनी' इति वासवदत्तावाक्यावलम्बकं मुकुटमुद्धरता[2]।

'ज्ञ'कारस्य शुद्धमुच्चारणं ['ज'काराव्यवहितो 'ञ'कार इतिरूपं] भारते कुत्रापि न क्रियते। ज्न(ानं), ज्न्य(ानं), गिय(ानं),ग्न(ानं), ग्न्य(ानं), ग्य(ानम्)इत्येतानि षड् दुष्टानि रूपाणि संस्कृतेतरभाषाप्रभावतो जातानि। यकारस्थाने जकारोच्चारणं बहुत्र क्रियते। 'यदा यदा हि धर्मस्य' इत्यत्र 'जदा जदा हि धर्मस्य' इत्युच्चारणम् औत्तराहाणां (केषाञ्चित्)

१.गदसिंहाख्येन विरचितः ऊष्मविवेकः शषसहवर्णैर्युतानां कतिपयेषां पदानाम् शुद्धं रूपं प्रदर्शयति। तद्वदेव अज्ञातकर्तृकः त्रिशकारभेदः।

२.अमरकोशः-सं.वासुदेवशर्मा पणशीकरः।(पूर्वतनसंस्करणसंपादकष्टिप्पणी-कारश्च-शिवदत्तशर्मा दाधिमथः) पञ्चमं संस्करणम्। निर्णयसागरप्रेस्, मुम्बयी-1929

प्रथितम्। 'यमुना' इत्युच्चारयितव्ये 'जमुना' इत्युच्चारणं भारते प्रायशः सर्वत्राप्यस्ति। लकारस्थाने ळकारोच्चारणम् अतीवसाधारणं यत् पण्डितानामपि मुखान्निःसरति। तस्मादेव कारणात् काळिदासः, काळिका, मङ्गळमित्यादीन्युच्चारणानि अस्माकं कर्णपथमायान्ति। एतानि कदाचिल्लेखनेऽपि स्वास्तित्वं प्रदर्शयन्ति।

ॠ.बुद्धिपूर्वकः

स्वमताभिमानो लोपस्य कारणं भवतीत्युक्तपूर्वम् (पु.५३)। स आदेशस्यापि कारणं भवति। सांप्रदायिके "अनायासेन मरणं विना दैन्येन जीवनम्। देहि मे कृपया विष्णो शरणागतवत्सल।" इत्यस्मिन् पद्ये 'विष्णो' इति स्थले 'शम्भो' इति क्वाचित्कः पाठः। अत्र 'विष्णो' इति मूलं 'शम्भो' इति पाठान्तरं वा, 'शम्भो' इति मूलं 'विष्णो' इति पाठान्तरं वेति वक्तुं न शक्यते।

तत्रभवतो वेदान्तदेशिकस्य जीवने प्रसिद्धमिदम्-तत्कीर्तिमसहमानैरसूयालुभिः कैश्चित्तस्यापमाननां कर्तुकामैः कस्मिंश्चिद्दिने तन्निवासगृहस्य तोरणद्वारे पादरक्षाणां मालिका स्थापितेति, प्रातःकाले वेदान्तदेशिको यदा बहिरागतस्तदा तस्य कण्ठे पादरक्षामालिका पतितेति, तद् दृष्ट्वा तेऽसूयालवो जहसुरिति, झटिति वेदान्तदेशिकः प्रत्युत्पन्नमतित्वं दर्शयन् "ज्ञानावलम्बकाः केचित् केचित् कर्मावलम्बकाः। वयं तु <u>हरिदासानां</u> पादरक्षावलम्बकाः" इत्युवाचेति च। पद्यमिदं बसवण्णस्य कन्नडवचनानामन्यतमे "कागे विष्टिसुव होन्न कळसवहुददरिन्द <u>ओडे</u>यरु जोगैसुव चिम्मावु<u>गे</u>य माडय्या" इति वचने सकिञ्चित्पाठान्तरम् उद्धृतम्। तत्रत्योऽयं पाठः-"कर्मावलम्बिनः केचित् केचिद् ज्ञानावलम्बिनः। वयं तु <u>शिवभक्तानां</u> पादरक्षावलम्बिनः।" अत्र 'हरिदासानाम्' इति मूलं 'शिवभक्तानाम्' इति पाठान्तरं वा, आहोस्वित्

'शिवभक्तानाम्' इति मूलं, 'हरिदासानाम्'इति पाठान्तरं वेति प्रश्नः समुदेति। उत्तरमत्र संशोधनापेक्षि[१]।

यदा सुशिक्षितः पाठकः मूले केषाञ्चन पाठानां प्रशस्ततरत्वं करणीयं काङ्क्षते, स बुद्धिपूर्वकमेव पाठं व्यत्यासयति। अर्थात् सोऽपेक्षितान् शब्दान् इष्टानि वाक्यानि वा मूले आदेशयति।

जी.बूह्लर् वदतिः

"(शारदालिपिबद्धमातृकाणाम् आधारेण) देवनागरीलिप्यन्तराणि विपणौ विक्रयार्थमेव सज्जीक्रियन्ते। तस्मात् तेषां 'पक्वता' अभीष्टा। अर्थात् मूले लुप्ताः भागाः, दोषा इत्यादिकं विक्रेतुः पण्डितस्य इच्छानुसारं क्रमशः पूर्यन्ते, दूरीक्रियन्ते च। अयं महादुरभ्यासः काश्मीरेऽधिकतमः। प्राचीनपाठविषये तत्रत्यानां पण्डितानाम् आदरोऽत्यल्पः। समग्रे भारते विना कामपि विकाङ्क्षां क्रियमाणं मातृकाणां 'पाक' दुरभ्यासं तथाऽन्यत्र नाहं दृष्टवान् यथा काश्मीरे। मया संभाषणावसरे मया पद्धतेरस्याः दुष्टतां सम्यग् ज्ञापितः कश्चन काश्मीरपण्डितो विष्णुधर्मोत्तरपुराणस्य भूयान् भागः परिवर्तित इति स्वापराधं स्वयम् अङ्गीकृतवान्। परन्तु काश्मीरप्रदेशे लभ्यमानाः सर्वा अपि मातृका एवमेवाविश्वास्या इति नाहं प्रतिपादयामि।[२]."

आगमेऽपि केचन व्यत्ययाः संभवन्ति। वङ्गीयासु तथा मिथिलीयासु अभिज्ञानशाकुन्तलमातृकासु प्रथमाङ्के "न खलु न खलु बाणः सन्निपात्योऽयमस्मिन् मृदुनि मृगशरीरे पुष्पराशाविवाग्निः"। इति पद्यं वर्तते। व्याख्याता श्रीनिवासाचार्योऽस्मिन् पद्ये पुष्पमित्यत्र 'तूल' इति

१.वेदान्तदेशिककथायाः प्रसिद्धत्वात् हरिदासशब्दस्यैव मूलत्वं प्रतिभाति।

२.*Detailed report of a tour in search of Sanskrit Mss. made in Kashmir, Rajputana and Central India* (पु. ३३)

पाठान्तरं दर्शयति। 'कालिदासेन तूलमिति प्रथमतो लिखितं, ततः स्वयमेव कोमलत्वाधिक्यं सजीवत्वं च चिन्तयता पुष्पमिति पाठान्तरं कल्पितम्' इति केचन मन्यन्ते। किन्तु राघवभट्टस्य व्याख्यायां वा शारदा-मातृकासु वा नैतदस्ति पद्यम्। कालिदासीयमेवैतत् पद्यमिति वक्तुं न वयं शक्नुमः बह्वीष्वभिज्ञानशाकुन्तलमातृकासु पद्यस्यास्याभावात्[१]।

ए.व्याख्यानरूपं पाठान्तरम्

कदाचित् सुशिक्षितो लेखको मूलपाठमवगमयितुं स्पष्टतरार्थं पर्यायशब्दं प्रयुङ्क्ते। यथा-एकस्यां मातृकायां "त्रायस्व त्रिदशेश्वर "इति पाठः, अपरस्यां च "पाहि पाहि सुरेश्वर "इति वर्तत इत्यभ्यूहामहे। इत्थंभूते प्रसंगे द्वितीयपाठः प्रथमपाठस्य व्याख्यारूपः। तस्मादत्र मूलं प्रथमः पाठ एव।

कदाचित् सुशिक्षितो लेखकः व्याख्यानरूपं पाठान्तरं कल्पयन् पदानां स्थाने परिवर्तनं करोति सरलस्य मूलस्य स्थानेऽसरलं पाठान्तरं कल्पयति ! रामायणस्य (ग्रन्थसंपादन)शास्त्रीयसंस्करणे बालकाण्डे (२९.२०)"खनतः समुपक्रान्ता दिशं सोमवतीं तदा। "अत्र पाठान्तरम्- "ततो हैमवतीमाशां खनन्तस्तेऽभिचक्रमुः।" दिशमिति सरलः पाठः किन्त्वाशामित्यसरलः! यदि स साधारणो लिपिकरोऽभविष्यत्, स केवलं 'सोमवतीम्' इत्यत्र 'हैमवतीम्' इति व्यत्यासमकरिष्यत्।

सरलीकरण-व्याख्यानार्थपाठान्तरयोरयमेव भेदो यत् सरली-करणे मूलमेव शुद्धं, पाठान्तरं चाशुद्धम्। व्याख्यानार्थे तु पाठान्तरे

१.*Some problems concerning a critical edition of the Abhijñāna-śākuntala* by V.M.Bhat. (Journal of the Oriental Research Institute, Ahmadabad) Vol.50 Nos.1-4 Sept. June 2000-2001

मूलपाठान्तरे द्वे अपि शब्दागमशुद्धे, मूलात् पाठान्तरं सुलभतरम्।

ऐ.ग्रन्थकर्तृकृतः

आदेशाः स्वयं ग्रन्थकर्त्रैव क्रियमाणा अतीव साहजिकाः प्रसिद्धाश्चाधुनिकेषु ग्रन्थेषु। प्राचीनेषु ग्रन्थेषु विषयेऽस्मिन् स्पष्टमुदाहरणं न लभ्यते। परन्तु एतद्वर्ग्यं पाठपरिवर्तनम् अभूदेव[1]।

ओ.वैदिकः

श्रीपाददामोदरसातवलेकरेण समग्रे ऋग्वेदे केवलं द्वयोः स्थलयोः पाठभेदो निरदेशि। म्याक्स्म्यूलर्कस्य ऋग्वेदसंस्करणं यत्र 'प्रस्पन्द्रा ' (१.१८०.९)इति पाठं दर्शयति, तत्र सर्वा मातृकाः 'प्रस्यन्द्रा' इत्येव पाठं दर्शयन्ति। अत्र म्याक्स्म्यूलर्कस्य संस्करणे मुद्रणदोष इव प्रतीयते, भारतीयैर्वैदिकैः सर्वैरपि 'प्रस्यन्द्रा' इत्येवोच्चार्यमाणत्वात्। एतादृशेषु प्रसंगेषु सांप्रदायिकस्य पाठस्यैव दार्ढ्यं वर्तते। म्याक्स्म्यूलर्केन संपादनार्थमादत्तासु शारदालिपिमातृकासु यकारः किं पकारभ्रान्तिं जनयतीति परिशीलनीयम्[2]। 'मांश्चतो' (७.४४.३)इत्यपरः सातवलेकरेण दर्शितः पाठभेदः। सर्वासु मातृकास्वत्र 'मंश्चतो ' इत्येव पाठः। वस्तुतस्तु नायं पाठभेद इति सातवलेकरस्य मतं "कम्पस्यैव सानुनासिकस्य अकारस्य विवृतसंवृतोच्चारणरूपवैचित्र्यमात्रमेतत्" इति प्रतिपादयतः। "कासुचन शारदालिपिलिखितासु ऋग्वेदमातृकासु 'ळ'कार-'ळ्ह'कारयोः स्थाने मूल'ड'कार'ढ'कारयोरेव लेखनम् 'अग्निमीडे', 'मीढुषे' इत्यादिरीत्या वर्तते " इति केनचित् काश्मीरपण्डितेन ज्ञापितोऽस्ति प्रकृतो ग्रन्थकर्ता[3]।

वेदे पाठभेदो नैवास्तीति सांप्रदायिकानां श्रद्धा[4]। आधुनिकास्तु

१.५७ तमे पुटे प्रथमा पादटिप्पणी द्रष्टव्या ।

२.देवनागरीलिप्यां तु यकारलेखनविन्यासस्य पकारभ्रान्तिजनकत्वं प्रसिद्धम्।

३.परन्त्विदं न सम्यक्। डकारस्य स्वरे परे ळकारादेशो बाह्वृचसंप्रदायानुगुणः।

४.५९ तमे पुटे तृतीया पादटिप्पणी द्रष्टव्या ।

'वेदेऽपि लौकिकसंस्कृतवाङ्मय इव केचन पाठभेदा वर्तन्त एव। परन्तु स पाठभेदोऽत्यल्पया मात्रयाऽस्ति' इति वदन्ति।

ब्लूम्फील्ड् एवमभिप्रैति-वेदे पदानां क्रमेषु व्यत्ययो दृश्यते क्वाचित्कः। परिचिततरस्य पदस्य स्थापनं, संदेग्धव्यरूपस्य पदस्य स्थले व्याकरणशुद्धरूपस्य पदस्य स्थापनं, अननुकूलस्य प्राचीनतमस्य वापि पदस्य स्थले सुगमार्थस्य पदस्य स्थापनमित्यादिकं क्रियते। अत्रेदमपि वक्तव्यं यद् यो मन्त्रः कमप्यनुष्ठानविशेषं प्रसंगविशेषं वोद्दिश्य रचितः स एव भिन्नमनुष्ठानविशेषं प्रसंगविशेषं वोद्दिश्य किञ्चित् परिवर्तितरूपः प्रयुक्तः। ब्लूम्फील्ड्कस्येदं मतं न केवलं समानशाखासूपलभ्यमानपाठान्तरविषयकम् अपि तु विभिन्नवेदशाखासूपलभ्यमानपाठान्तरविषयकं चेति तदीयं मतमस्तीति तदीयस्य 'वेदिक् कान्कोरेण्डेन्स्' ग्रन्थास्यावलोकनेन स्पष्टीभवति।

अस्फुटा वेदमन्त्रपाठाः शाखान्तरीयवेदमन्त्रपाठैः संवादेन सुग्रहा भवन्तीति भाष्यकारस्य वेङ्कटमाधवस्य मतम्[१]। दयानन्दसरस्वती तु वेदशाखाः केवलं व्याख्यानानीति प्रोवाच। स्वेन व्याख्याताः वेदसंहिता एव मूलमिति स स्पष्टमाचष्ट[२]।

प्रसिद्धे काशीवाक्यार्थे दयानन्देन साकं वाक्यार्थं कृतवान् सत्यव्रतसामश्रमी तु नात्र मतेऽनुकूलः। शाखाभेदः संप्रदायभेद इति तदीयं दर्शनम्।

---

१. अध्यवस्यन्ति मन्त्रार्थान् एवं मन्त्रान्तरैरपि। शाखास्वन्यासु पठितैर्विस्पष्टार्थैर्मनीषिणः। (ऋग्वेदानुक्रमणिका ८.३.३)

२. तथैवेकादशशतानि सप्तविंशतिश्च वेदशाखा वेदार्थव्याख्याना अपि वेदानुकूलतयैव प्रामाण्यमर्हन्ति। (ऋग्वेदभाष्यभूमिका दयानन्दप्रणीता)

प्राचार्यः सुधीरकुमारगुप्तः 'काश्चन शाखाः शाखान्तरगतानां पाठानां सरलीकरणेन[1] कृतान् पाठान् क्वचिद् बिभ्रति' इति प्रतिपादयति[2]यः स्वाभिप्रायमुदाहरणैः समर्थयते। तदीयात् प्रबन्धात् कतिचनोदा-हरणान्यत्रोद्ध्रियन्ते-

माध्यन्दिनपाठः	काण्वपाठः	वक्तव्यविशेषः
आतनच्मि १.४	आतनक्मि १.७	सुसाधनीयं रूपम्।
प्रियं सद आसीद २.६	प्रिये सदसि सीद २.८	विभक्तिविपरिणमनम्।
भुवपतये २.२	भूपतये २.२	परिचिततरं रूपम्।
शक्वने ५.५	शक्मन् ५.५	मतुप्प्रत्ययः प्रदर्शितः।
संघातं संघातं १.१६	संघाते संघाते १.१६	सप्तमीविभक्तिः स्पष्टतरा।

शौनकपाठः	पैप्पलादपाठः	वक्तव्यविशेषः
अभिदासति १.१९.३	जिघांसति १.२०.३	व्याख्यानरूपो व्यत्ययः।
अरणः १.१९.३	असमानः १.२०.३	व्याख्यानरूपो व्यत्ययः।

वेदे पाठभेदमनङ्गीकुर्वद्भिरपि कैश्चित् सांप्रदायिकैरुपनिषत्सु पाठान्तरसद्भावोऽङ्गीक्रियत एव। वासुदेवशास्त्री अभ्यङ्करः 'उपनिषदाम् अर्थक्लेशः पाठभ्रंशादिजन्य' इत्यभिप्रैति[3]। यत् स पाठान्तरमिति शब्दं न प्रयुङ्क्त तदत्र विशेषतोऽवधेयम्।

१. 'सरलीकरण'वादं वैदिका न सहन्ते शाखाभेदमनादिकालिकं प्रतिपादयन्तः।

२. *"Wherever a variation occurs in the reading, there appears to be a clear attempt at explaining the particular word, phrase or sentence. "Nature of Vedic Śākhās"*.The Poona Orientalist.XVI. No.1 to 4.

३. उपनिषदां तात्पर्यं साधारणमतिभिः सहसा ज्ञातुं न शक्यते। यतः श्रुतिः क्वचिदतिदुर्बोधा। क्वचिच्च पूर्वापरसंबन्धरहितेव प्रतिभाति। अनारभ्याधीतानि च वाक्यानि बहून्युपलभ्यन्ते। क्वचिद् वाक्यविपर्यय आलक्ष्यते। क्वचिदर्थस्य

३३. लिपिकरप्रमादानां त्रिविधमन्यद् वर्गीकरणम्

केषाञ्चन ग्रन्थसंपादनज्ञानां मतेन लिपिकरकृता दोषास्त्रिविधाः- विशिष्टो दोषः, भेदको दोषः, ऊहजन्यो दोषश्चेति।

अ.विशिष्टो दोषः

लिपिकरः प्रतिकायां मातृकागतान् सर्वान् दोषान् कृत्वा स्वकीयं विशिष्टं दोषं कुरुते। यथा-महाभारतमिति लिखितव्ये माहाभारतमिति लेखनम्। अर्थात्, ह्रस्वमकारस्थले स प्रायः(अथवा पुनः पुनः)दीर्घमाकारं लिखति। अर्थात् 'मया रचिता' इति लेखयितव्ये सः 'माया रचिता' इति लिखति। एष दोषो विशिष्टः।

अस्माभिः स्पष्टं विज्ञातव्यं यत् को दोषोऽस्मिन् वर्गे नान्तर्भवति। एतच्चाधोदृश्यमाणेषु (अभ्यूहेन रचितेषु) उदाहरणेषु स्पष्टीभवति।

मातृका$_{1}$--- मृधुसूदन उवाच।
मातृका$_{2}$--- मृदुसूदन उवाच।
मातृका$_{3}$--- मधुसदन उवाच।
मातृका$_{4}$--- मधुसाधन उवाच।
मातृका$_{5}$--- मधुशोधन रवाच।
मातृका$_{6}$--- मृधुशूदन उचाच।

नित्यसाकाङ्क्षत्वेऽप्याकाङ्क्षापरिपूरकं वाक्यं न दृश्यते। क्वचिदावश्यकोऽपि हेतुर्न निर्दिश्यते। एते दोषाः सांप्रतमस्मादृशां भासमाना अपि कदाचिच्छ्रुतिकालीनवाचकानां बुद्धिमत्तातिशयेन संस्कारविशेषान्न स्युः। अथवा विच्छिन्ना वेदा इति प्रवादानुसारेण सांप्रतमुपलभ्यमानपाठापेक्षयान्यैव श्रुत्यनुपूर्वी दोषांसस्पृष्टा पूर्वं स्यात्। स च पाठः कदा **परिभ्रष्ट** इति कल्पयितुं न शक्यते। सांप्रतमुपलभ्ये पाठेऽध्याहारादिना वाक्यार्थपरिपूर्तिं संपाद्य दोषा निर्हरणीया भवन्ति। (सर्वदर्शनसंग्रहः उपोद्घातः पु.९९)

मातृका$_{७}$--- मृधुशूदन उचाच।

मातृका$_{६}$ तथा मातृका$_{७}$ अनयोः दोषः समानः। अनयोः, षष्ठी मातृका सप्तम्याः मातृकाया आदर्शमातृका, अथवा, एतद्विपरीततया सप्तमी मातृका षष्ठ्याः मातृकायाः आदर्शमातृका। अथवा उभे अपि मातृके समानाया अन्यस्या मातृकायाः पुत्रिकारूपे। तस्मादेतयोर्वर्तमानो दोषो न विशिष्टो दोषः।

आ.भेदको दोषः

अयं दोषो मातृकाणां भिन्नवंशागतात्वं व्यनक्ति। आपाततः शुद्ध इव प्रतिभासतेऽयं भ्रामको दोष, एतस्याप्राकरणिकत्वेऽपि कमप्यर्थं निःसारयन्। दोषस्यास्य शुद्धत्वेनैव प्रतीयमानत्वादेतं शोधयितुं कोऽपि लिपिकरो न प्रयतते। पूर्वं दर्शितायाम् अभ्यूहपट्टिकायां पञ्चमो दोषो (मधुशोधन उवाच)भेदको दोषः।

एवमभ्यूहामहे-नारदस्मृत्याः अष्टौ मातृकाः सन्ति। मातृका$_{१}$, मातृका$_{३}$, मातृका$_{५}$, मातृका$_{७}$ एतासु मातृकासु कस्यचन पद्यस्य पाठ इत्थंभूतः-

"रक्तैर्गन्धैश्च माल्यैश्च दध्यपूपाक्षतादिभिः। अर्चयेत्तु धटं पूर्वं ततः शिष्टांस्तु पूजयेत्।"(निबन्धग्रन्थेषु प्राय उद्ध्रियतेऽयं श्लोकः।)

मातृका$_{२}$, मातृका$_{४}$, मातृका$_{६}$, मातृका$_{८}$ एवं चतसृषु मातृकासु 'धटम्' इत्यत्र 'घटम्' इति पाठान्तरमित्यभ्यूहामहे।

अयं श्लोकः दिव्यपरीक्षाप्रकरणस्थः। परीक्षकेण आरोपितस्य परीक्षार्थं तुलागतस्य भारस्य धटाख्यस्य पूजा करणीयेति पद्यार्थः। अर्थात् धट इत्येव शुद्धः पाठो न पुनर्घट इति। तस्माद् 'घट' इति दुष्टपाठं धरन्त्यः द्वितीयवर्गीयमातृकाः सर्वा अपि प्रथमवर्गीयमातृकाभ्यो

भिद्यन्ते। तस्मादासु द्वितीयवर्गीयासु मातृकासु वर्तमानो दोषो भेदकः।

प्रश्नः-धट इति पाठस्य स्थले घट इति पाठान्तरसत्त्वे किं कारणं स्यात् ?

उत्तरम्-सरलीकरणम् ।

प्रश्नः-न केवलमेकस्यां मातृकायां किन्तु चतसृष्वपि मातृकासु घट इति प्रामादिकस्यैव पाठस्यावशेषणे को हेतुः ?

उत्तरम्-यस्यां मातृकायां सरलीकरणेन जातं घटशब्दं ये लिपिकरा अपश्यन्, तस्या मातृकाया आधारेण पुत्रिकारचने तेषां धर्मशास्त्रज्ञानहीनानां 'तत्र शोधनमवश्यकम्' इति न प्रत्यभात्, घट इति शब्दस्य संस्कृतभाषायां सत्त्वात्।

इ.ऊहजन्यो दोषः

एकं दुष्टं पाठं पठितवता लिपिकरेण स्वाभ्यूहबलात् क्रियमाणोऽपरो दोष ऊहजन्यो दोषः। अस्मिन् ऊहजन्ये दोषे (विहितकिञ्चित्परिवर्तनेऽपि क्वाचित्के) मूलदोषस्य सादृश्यं स्फुटं भासते। ६१ तमे पुटे दर्शितो दोष ऊहजन्यः। तद्वत्-

मूलम् (शुद्धम्)	**सरलीकरणजो दोषः**	**ऊहजन्यो दोषः**
उरभ्रः	अशुभ्रः	अतिशुभ्रः
पीनस	पनस	मनसा
प्रभुसंमितं	प्रभुसंहितं	प्रभुसंहिता

प्रश्नः: एवंरीतिकः पाठविपर्यासः केन कारणेन जातः ?

उत्तरम्: अतीव स्पष्टमत्रास्ति कारणम्। प्रथमो लिपिकरो मातृकास्थस्य पाठस्यार्थमजानानः सरलीकरणेन दुष्टं पाठं निर्ममे। तद्दुष्टपाठदर्शिनो द्वितीयस्य लिपिकरस्य मनसि 'प्रस्तुतासंबद्ध एष पाठ'इति

ज्ञातम्। तस्मादूहेन तच्छोधनं कर्तव्यं स मेने। तदीयेनोहेन रचितः पाठोऽशुद्ध आसीत् तस्याज्ञत्वान्मातृकान्तरगतस्य पाठस्य तेनासंवादितत्वाच्च।

विशिष्टभेदकोहजन्या दोषा मातृकावंश[1] रचने प्रधानमवलम्बनम्।

१२. ग्रन्थसंपादनक्रमः

१. ग्रन्थवरणम्

संपादनार्थं ग्रन्थस्य वरणं प्रस्थानस्थलमत्र। वरणावसरे कश्चन पूर्वाभ्यासः करणीयः। मातृकासूचीनां विविधसंशोधनालयेषु प्रकटितानां परिशीलनं, मुद्रितासु कृतिषु पीठिकासु वा ग्रन्थशरीरे वा परामृष्टानाम् अप्रकटितानां ग्रन्थानां परामर्शेषु दृष्टिः, मातृकासु लिखितेषु ग्रन्थेषु नाम्ना संकीर्तितस्यापरग्रन्थस्य आदानम् (प्रायः प्रौढैरेतत् क्रियते न प्राधीतैः), विद्वद्भिः सह चर्चासु कस्या अपि अप्रकटितायाः कृतेर्विषयकं श्रवणं, ग्रन्थसंपादनज्ञैः साकं जिज्ञासा-इत्यादिकोऽत्र पूर्वाभ्यासः। **पूर्वाभ्यासेषु प्रधानतमस्तु एन्.सि.सि.सूच्याः[2] सम्यगालोडनम्।**

मुद्रितानामपि ग्रन्थानां पुनःसंस्करणापेक्षा कदाचिदुद्भवेत्।

पूर्वमुद्रितं संस्करणम्-१.अनङ्गीकार्यपाठं, विभिन्नपाठसंप्रदायानुगतं, पुनःसंस्करणोपयुज्यमानमातृकावलम्बनहीनं, पुनःसंस्करणसमयोपलब्धव्याख्यारहितं, २.पीठिकादिवर्जितं, ह्रस्वपीठिकायुक्तं ३.मुद्रणाशुद्धिभूयिष्ठम्, अहृद्यसीसकाक्षरम् अविस्पष्टमुद्राक्षरविन्यासम् इत्यादिकं मुद्रितपूर्वाणां संस्कृतपूर्वाणां च ग्रन्थानां पुनः संस्करणे कारणं भवितुमर्हति।

प्रकटितपूर्वाणां ग्रन्थानां पुनःसंपादने प्रवर्तमानेन संपादकेन तत्र कारणं स्पष्टमभिधातव्यं पीठिकायाम्। केवलं कुतूहलावेशादिकं तत्र कारणं भवितुं नैवार्हति।

१.द्र.पु. १०८-११३, ११६ २.द्र.पु. ३०२

२.सामग्रीसंकलनम्

सामग्री द्विविधा -प्रत्यक्षसामग्री परोक्षसामग्री चेति।

प्रत्यक्षसामग्री द्विविधा-१.अन्तःसाक्ष्यरूपा २.बाह्यसाक्ष्यरूपा चेति।

अन्तःसाक्ष्यरूपा सामग्री त्रिविधा-१.एकला मातृका २.द्वे मातृके/द्व्यधिका मातृकाः। ३.मुद्रितं संस्करणं चेति।

बाह्यसाक्ष्यरूपा सामग्री त्रिविधा-१.उद्धृतयः २.संकलनग्रन्थाः ३.पादग्रहीतृ साहित्यं/ सांशग्रहणाः कृतयः।

परोक्षसामग्री सप्तविधा-१.समानविषयिकाः कृतयः।२. व्याख्यानानि ३.भाषान्तरानुवादाः ४.सारांशः ५.शासनानि ६.संशोधन-लेखाः ७.संशोधनग्रन्थाश्चेति।एताः सर्वा अपि सामग्र्यो बाह्यसाक्ष्यरूपा एव।

(प्रत्य)अन्तःसाक्ष्यसामग्री-१.एकला मातृका

एकस्या एव मातृकाया उपलब्धिर्न तृप्तिकरी परिस्थितिः। शुद्धपाठनिर्धारणे क्लेशप्रदा लिपिकरप्रमादाः, दुर्वाच्यं लेखनं, पत्राणां भग्नता, कृमिदष्टता च संपादकस्य तितिक्षां परीक्षन्त इव। सौभाग्यवान् संपादको बाह्यसाक्ष्यस्याधारेण कांश्चन प्रमादान् समीकुर्यात्। अष्टादश-शतकोत्पन्नेन वेङ्कामात्येन रचिता कुशलवचम्पूः केवलमेकस्यां मातृकायामुपलभ्यते।(प्रा.वि.सं.,मैसूरु.मातृकाङ्कः बि. ५६२).केषुचन स्थलेषु कृमिदष्टत्वात्तत्र किमवर्तत मूल इति ज्ञातुमतीव कष्टम्।भाग्यवशाद् ग्रन्थकर्ता स्वेनैव विरचिते अलंकारमणिदर्पणे (प्रा.वि.सं.,मैसूरु.मातृकाङ्कः पि.एल्.२५७०) बहूनाम् अलङ्कारलक्षणानां लक्ष्यत्वेन कुशलवचम्पूगतानि पद्यान्युद्धृतवान् येषां साहाय्येन कृमिदष्टेष्वपि स्थलेषु वर्तमानस्य पाठस्य

योजनं कर्तुं शक्यते।

जगन्नाथविजयाख्यं व्याकरणकाव्यमेतेनैव रचितं केवलमेकलायां मातृकायामुपलभ्यत इदानीम्। (प्रा.वि.सं.,मैसूरु.मातृकाङ्कः सि. .२०२०). मातृकैषा अधिकतरं कृमिदष्टा। कतिचन पत्राणि जालानीव प्रतिभान्ति! बाह्यसाक्ष्यस्याभावादस्य संपादनकार्यमतीव क्लिष्टम्। तत्रभवता विदुषा एच्.वि.नागराजरावेण न केवलमेतत् संपादितं परन्तु स्वविरचितया संस्कृतव्याख्ययैतद् विभूषितं च। असाधारणमिदं पण्डितकृत्यं न केवलं काव्यस्थपदानां पाणिनिसूत्रैः संवादार्थां तितिक्षामपेक्षते अपि तु परमोत्कृष्टं विद्वत्त्वं गभीरमन्तर्दर्शनं च।

भर्तृहरिविरचिताया महाभाष्यव्याख्याया दीपिकाख्यायाः संपादनस्य वृत्तान्तो भिन्नतरः। वृत्तान्तोऽयं गणेशभास्करपलसुलेकेन समग्रं विवृता[१]। स कथयति-"मातृकाणां संवादः, तासां वर्गीकरणं, वंशक्रमयोजना,उपलब्धानां मातृकाणां प्राचीनतमाया निर्धारणेत्यादिकं किमपि न संभवमत्र, दीपिकायाः केवलमेकलायाम् एव मातृकायामुपलभ्यमानत्वात्। अपि च दीपिकामातृकाया लिपिकरा अनेक इत्यपि विसंवादिनीभिर्लेखनशैलीभिरवगतम्। ग्रन्थपाठा अत्रातितमां भ्रष्टाः। संपादकैरत्र दूषितपाठारण्ये शुद्धपाठनिर्धारणार्थम् आयोधनमेव करणीयमापतितम्। प्रतिपदं प्रायशोऽक्षराध्यासनिमित्तकाः प्रमादास्तैरदर्शिषत। देवनागर्यां प-य-माः अक्षराध्यासस्य विपुलमवकाशं ददति। त-नौ निकटौ। निवेश्यानामूर्ध्वाधश्चिह्नानां क्वचिदभावः शिरोवेदनायै। अनावश्यकस्य लाङ्गूलसदृशस्य चिह्नस्य योजनेन टकारो दकारभ्रान्तिं जनयति।

१.*Problems of text-reconstruction in the Mahābhāṣyadīpikā* . Annals of Bhandarakar Oriental Research Institute. (Vols.LXXII and LXXIII) Pages:- 395-408. Pub: BORI,Pune 1993

'षष्ठी' इति लिखितव्ये 'षब्दा' इति, 'सर्वत्र प्रदेशेषु' इति लिखितव्ये 'सत्रप्रदेशेषु' इति, 'शिष्टव्यवहार' इति लिखितव्ये 'शब्दव्यवहार' इति च लेखनं हिंस्रम्। 'अस्मणोऽत्र' इत्यबद्धेन पाठेन पठितेन 'अस्मरणादत्र' इति शुद्धस्य पाठस्याभ्यूहनं सर्वथाऽप्यसंभवम्।"

"एवं भ्रष्टपाठानामोघे सर्वथाऽनर्थः पाठः कश्चन दृष्टः-'पिप्याझेरवीतीति'-इति। अतीव श्रमेण 'पिप्याझे' इत्ययं भागः 'यथा शे' इति लिखितस्य पाठस्य दर्शनेनाक्षराध्यासकारणाल्लिखितमिति संपादकैर्निरणायि। परन्तु किमिदं 'रवीतीति'- इति ?"

ग्रन्थसंपादनज्ञस्य तत्रभवतो गणेशभास्करपलसुलेकस्यैव वाक्यमत्र श्रोतव्यम्:-

"वस्तुतस्तु 'रवीतीति' इत्यस्य मूलं निर्दोषश्च पाठः क इति महाभाष्यस्य सूक्ष्मेण परिशीलनेनावगन्तुं शक्यते। 'श'स्य 'चण'श्च गुणे, 'रियति' 'धियति' 'प्रादुद्रुवत्', 'प्रासुस्रुवत्' इति रूपाणि संभवन्ति।"

"अहो हन्त लब्धम्। 'रवीतीति' इत्यत्र 'रियति' इति शुद्धः पाठः।"

ग्रन्थसंपादनज्ञानां गणेशभास्करपलसुले-सदृशानां ग्रन्थसंपादनाद्भुतं वर्णयितुं समुचिताः शब्दा एव न लभ्यन्ते।

(प्रत्य)अन्तःसाक्ष्यसामग्री-२.द्वे मातृके /द्व्यधिका मातृकाः

एकलाया मातृकाया विषये यदुक्तं पूर्वं तस्य पुनरत्र स्थूणानिखननन्यायेन कथनं न दोषाय। एकलां मातृकामवलम्ब्य ग्रन्थसंपादनं कथं क्लेशप्रदमित्यनुभवसंपन्नानां ग्रन्थसंपादकानां ज्ञायत एव। लेखनेऽहृद्ये तु संपादनकष्टमधिकायते। व्याकरणदोषाः शिरःशूलाय। यथा यथा मातृका

अधिकास्तथा तथा साधु। तत्र कारणमेकस्यां मातृकायां वर्तमानाः पाठा दोषाधिक्ययुजः स्युः, अपरस्यां च मातृकायाम् (अपरासु च मातृकासु) वर्तमानाश्च पाठाः शुद्ध्याधिक्ययुजः स्युः। एकस्यां मातृकायां यत्र पाठः कृमिदष्टत्वाद् वा भङ्गाद् वा अस्फुटलेखनाद् वा पठनानर्हो भवति, तस्मिन्नेव स्थले अपरस्यां मातृकायां पाठः पूर्वोक्तदोषरहितः पठनार्हश्च भवेत्। मातृकासु सुवाच्या लिपिरप्यत्रावधानमर्हति। कासुचन मातृकास्वक्षराणि स्पष्टानि स्युरन्यासु मातृकासु पुनरतीवास्पष्टानि।

अन्यदपि कारणमनेकमातृकाणामुपयोगे। एकस्यां मातृकायां कियतांशेन ग्रन्थो न्यूनः स्यात्। अपरस्यां मातृकायां च ग्रन्थः पूर्णः स्यात्। एकत्र मातृकायां ग्रन्थस्य प्राथमिकाः भागाः, अपरस्यां चान्तिमा भागाः स्युः। तस्मात् "अनेकमातृकासंचयनं संपादनकर्मण्यस्यस्तव्यस्ततां जनयति "इति भयं न साधु। प्रत्युतानेकमातृकासंचयनं पाठानामधिकाया अस्तव्यस्ततताया निवारणे साहाय्यं जनयति।

(प्रत्य)अन्तःसाक्ष्यसामग्री-३.मुद्रितं संस्करणम्।

पूर्वमुद्रितस्य ग्रन्थस्य पुनः संस्करणे प्रबलतमो हेतुस्तु, पूर्वमुद्रितग्रन्थे समुपयुक्तमातृकातो भिन्नानां मातृकाणाम् उपलब्धौ पूर्वमुद्रितग्रन्था-दृतपाठापेक्षया प्रशस्ततराणां पाठानां संप्रत्युपलभ्यमानासु मातृकासु सत्त्वम्। पूर्वप्रकटितस्य ग्रन्थस्य मुद्रणदोषवत्त्वे,अनङ्गीकार्यपाठवत्त्वे, संशो-धनानुकूलपीठिकापरिशिष्टादिसामग्रीरहितत्वे च तस्य पुनःसंस्करणावश्य-कता भवत्येव। अमुद्रितव्याख्याया उपलब्धिरत्रान्यत् कारणम्।

कदाचित् संस्कृतपत्रिकासु(सहृदया-विद्योदयादिषु) संशोधनपत्रिकासु (वेङ्कटेश्वरप्राच्यविद्यासंशोधनालयपत्रिकादिषु)च प्रकटिताः ग्रन्था विशेषत उल्लेखमर्हन्ति। महाराष्ट्रे 'गोपाळनारायणकम्पेनि' इत्यत्र"ग्रन्थमाला"-नाम्नी काचित् संस्कृतमासिकी प्रकाश्यते स्म। तत्र प्रकृतेन ग्रन्थकर्त्रा

एतासां साहित्यकृतीनां कतिपये भागा दृष्टाः :- मल्लकवेरुदारराघवं, जगन्नाथस्य भामिनीविलासः,त्रिविक्रमस्य कुवलयाश्वविलासः, वेङ्कटाध्वरिण उत्तररामचरित्रचम्पूः, गोविन्दान्तर्वाणेः रुक्मिणीपरिणयम्, जगन्नाथस्य रतिमन्मथनाटकं, कविकुलतिलकस्य प्रसङ्गाभरणम्, भानुदत्तस्य गीतगौरीपतिकाव्यम्, कविराजस्य राघवपाण्डवीयं च[1]।

शिलायन्त्रीयग्रन्थानां मातृकात्वं नास्ति तेषां मुद्रितत्वादिति ग्रन्थस्यास्योपक्रम एवोक्तम्। शिलायन्त्रीयग्रन्थेषु तथा मुद्रणालयमुद्रितेषु ग्रन्थेषु लभ्यमानानां पाठानां गजनिमीलिकया तिरस्कारो नैव समुचितस्तेष्वङ्गीकारार्हत्वस्य संभवात्। कदाचिदस्माकं पुरस्ताद् वर्तमानास्वेव मातृकास्वनङ्गीकार्याः पाठा अधिकतरा वर्तेरन्। प्रथमे संपादकाः सदाऽपि ग्रन्थसंपादने केवलं प्रमादमेवाकुर्वन्निति घोषणा न साध्वी। क्रैस्तवीयेषु १८,१९,२० शतकेषु संस्कृतग्रन्थान् संपादितवन्तो विद्वांसः सर्वेऽपि परम्परानुगतेन पथा प्राप्तपाण्डित्याः सश्रद्धाश्चेति न प्रस्मर्तव्यम्। कदाचित् तैः पादटिप्पणीषु चर्चितानां पाठानां विषयेऽस्माभिरुदासीनैर्न भाव्यम्। पूर्वप्रकाशितेषु ग्रन्थेषु यद्यपि मुद्रणोत्कृष्टता मृग्यैव,तथापीदमवधेयं यत् **मुद्रणस्य उत्कृष्टापकृष्टत्वे संपादनस्य उत्कृष्टापकृष्टत्वाभ्यां भिद्येते।**

अर्थात्, ग्रन्थसंपादनकाले पूर्वमुद्रितेषु संस्करणेषु लब्धानां पाठानां संपादकैर्दर्शितानां चर्चितानां च पाठान्तराणां साहाय्यमवश्यं प्राप्तव्यम्।

सर्वेषामपि नियमानां केचिदपवादा अपि सन्ति। मुद्रणावसरे संपादकैः पाठपरिवर्तनमपि क्वाचित्कं कृतमासीत्। केषुचन मुद्रितेषु बसवपुराणसंस्करणेषु "वर्णाश्रमानुसारेण शैवधर्मान् प्रवर्तय।" इति वाक्यं दृश्यते यत् सर्वथाऽयसंबद्धं वीरशैवैर्वर्णाश्रमधर्माणामनङ्गीकृतत्वात्। वर्णाश्रमाभिमानिना केनचित् संपादकेन पाठो व्यत्यासितस्तस्मादेष पाठो

१.केचन प्रकाशनमासा अत्रोल्लिखिताः-एप्रिल् १८९०,मार्च् १८९१,मे १८९१, जनेवरी १८९५। कासुचन संचिकासु रक्षापत्रस्यानुपलब्धेः प्रकाशनतिथिर्न ज्ञायते। हलायुधकृतं कविरहस्यमपि ग्रन्थमालायामस्यां प्रकटितं दृश्यते।

दृश्यते। वस्तुतस्तु तत्र "वर्णाश्रमानुसारेण" इत्यत्र "वर्णाश्रमान् परित्यज्य" इति भाव्यम्[1]।

(प्रत्य)बाह्यसाक्ष्यसामग्री-१.उद्धृतयः

कात्यायनस्मृत्याः पुनःसृष्टौ डा.पि.वि.काणे निबन्धग्रन्थेषु व्याख्यासु चोद्धृतानि कात्यायनवाक्यान्यवालम्बत[2]। डा.फ्रूह्रर्, डा.जालि तथा रङ्गस्वामि ऐय्यङ्गार् इत्येते त्रयो विद्वांसो बृहस्पतिस्मृतेः पुनर्निर्माणमकुर्वन् उद्धृतीनामवलम्बनेन[3]।

भरतप्रणीतस्य नाट्यशास्त्रस्य व्याख्याया अभिनवभारत्याः अधुना उपलभ्यमानासु मातृकासु काऽपि न समग्रा। हेमचन्द्रेण अभिनवभारतीतः केचन भागा उद्धृताः स्वकीये काव्यानुशासने। अभिनवभारत्याः संस्करणे हेमचन्द्रोद्धृतानां नाट्यशास्त्रभागानां प्रयोजनं लब्धुं शक्यते।

अष्टाध्याय्याः काचन विस्तृता वृत्तिर्भागवृत्तिनाम्नी दौर्भाग्याल्लुप्ता। विभिन्नेषु ग्रन्थेष्वेतद्ग्रन्थादुद्धृतान् भागान् संकलय्य तत्रभवता युधि-ष्ठिरमीमांसकेन **भागवृत्तिसंकलन**मित्याख्या लघ्वी कृती रचिता।

बृहत्संहिताया उत्पलभास्करयोगिरचितयोर्व्याख्ययोः, बल्लालसेनरचितेऽद्भुतसागरे च समुद्धृतानां पराशरवाक्यानां संकलनेन तद्वर्गीकरणेन च सेङ्ग्लीषनुवादं **पराशरतन्त्रं** श्री आर्.एन्.ऐय्यङ्गार्वर्येण रचितम्।

(प्रत्य)बाह्यसाक्ष्यसामग्री-२.संग्रहाः

प्रायः सुभाषितसंग्रहग्रन्थाः प्राचीनपद्यानां संकलनानि। एतेषु संग्रहेषु संग्रहकारस्य दृष्टिपथे पतितानामेव पाठानामुद्धृतिर्वर्तते। वल्लभदेवस्य सुभाषितावलौ दृष्टान्तशतकतः कतिचन पद्यानि समुद्धृतानि। दृष्टान्तशतकस्यास्मदुपलब्धेभ्यः पाठेभ्यो भिन्नतरा एते पाठाः। सुभाषि-

१.तत्रभवता विदुषा श्रीबसवराजय्येन ज्ञापितमिदम्।

२.*History of Dharmaśāstra*, संपुटः-१, भागः-१, अध्यायः-३८

३.तत्रैव, अध्यायः ३७

तावली अस्मदुपलब्धदृष्टान्तशतकमातृकाणामपेक्षया प्राचीनतरा। तस्मात्तत्र वर्तमाना दृष्टान्तशतकपाठा बाढं परामर्शयोग्याः[1]।

(प्रत्य)बाह्यसाक्ष्यसामग्री-३.पादग्रहीतृ साहित्यम् / सांशग्रहणाः कृतयः

पादग्रहीतृ साहित्यमिति शब्देन कस्यापि खण्डकाव्यस्य, महाकाव्यस्य स्त्रोत्रस्यापि वा पद्यानां पादान् आहरत् खण्डकाव्यं, महाकाव्यमथवा स्तोत्रं क्रमेण ज्ञेयम्। इत्थंभूतलक्षणं साहित्यं जैनैरतिविपुलया संख्यया निर्मितम्। यस्मात् काव्यात् पादा आह्रियन्ते तस्य पाठनिर्धारणे पादग्रहीतृ साहित्यं भूरिश उपकरोति।

पादग्रहीतृणां साहित्यानां प्रसिद्धतमं जिनसेनाचार्यप्रणीतं पार्श्वाभ्युदयम्। (क्रैस्तवीयं ८ शतकम्)। अत्र मेघदूतस्य सर्वेषां पद्यानां सर्वे पादाः क्रमशः स्वपद्येष्वाहृताः। एतेषु पादेषु क्रमशो लिखितेषु समग्रं मेघदूतं प्राप्यते , येन जिनसेनाचार्यस्य समये मेघदूतीयः पाठः कीदृश आसीदित्यपि स्पष्टं ज्ञायते। जिनसेनाचार्यसमये मेघदूतगताः पाठभेदा उत्तरकालिक-मेघदूत-मातृकागत-पाठाभेदापेक्षया अल्पतरा इति हेतोः पार्श्वाभ्युदये लभ्यमानस्य मेघदूतपाठस्य सप्रयोजनत्वं वर्तत एव।

अन्यत् पादग्रहीतृ साहित्यम्-

शीलदूतम्-चारित्रसुन्दरगणिकृतम्। अत्र केवलं मेघदूतपद्यानां चतुर्थाः पादा आहृताः।

नेमिदूतम्-विक्रमकृतम्। वक्तव्यविशेषः पूर्ववत्।

चन्द्रदूतम्-विमलकीर्तिगणिकृतम्। वक्तव्यविशेषः पूर्ववत्।

मेघदूतसमस्यालेखः-मेघविजयकृतः। वक्तव्यविशेषः पूर्ववत्।

१.अधिकं विवरणमेतत्संबद्धं डा.शिवगणेशमूर्तिविरचिते Introduction to Manuscriptology ग्रन्थे लभ्यते पु.१४३

देवानन्दाभ्युदयः-मेघविजयकृतः। अत्र शिशुपालवधपद्यानां केवलं चतुर्थाः पादा आहृताः।

शान्तिनाथचरितम्-मेघविजयकृतम्। अत्र नैषधीयचरितस्य पद्यपादाः क्रमशः(पार्श्वाभ्युदयवत्) आहृताः। केषुचन पद्येषु एक एव नैषधीयपादो द्विर्वा त्रिर्वा आहृतो यत्र श्लेषमहिम्नाऽर्थभेदः !

बाबू अगरचन्द् नाहटा[1] मानतुङ्गाचार्यरचितस्य भक्तामर-स्तोत्रस्य पादानाहर्तॄणि सप्त स्तोत्राणि नाम्ना कीर्तयति।

त्रीण्यत्र नामग्राहमुल्लिखितानि-

ऋषभभक्तामरस्तोत्रं समयसुन्दरकृतम्। शान्तिभक्तामरस्तोत्रं लक्ष्मीविमलकृतम्। नेमिभक्तामरस्तोत्रं रत्नसिंहकृतम्।

नाहटाकस्य प्रबन्धेऽतिकुतूहलप्रदायाः कस्याश्चन स्तुतेरुल्लेखः कृतोऽस्ति या क्षमाकल्याणविरचिता सङ्केश्वरपार्श्वस्तुतिः। अत्र नामलिङ्गा-नुशासनीयस्य प्रथमपद्यस्य सर्वेऽपि पादा आहृताः।

श्रीमता अमृत् पटेलेनेमानि पञ्च स्तोत्राणि संपादितानि[2]- १.मुनिरत्नसिंहेन प्रणीतो युगादिजिनस्तवो यत्र रघुवंशपद्यस्य पादद्वय-माहृतम्। २. मुनिरत्नसिंहेन प्रणीतः श्रीवीतरागस्तवो यत्र रघुवंशपद्यस्य त्रयः पादा आहृताः। ३. महीसमुद्रगणिरचितम् ऋषभदेवस्तोत्रं यत्र भक्तामरस्तोत्रस्यैकः पाद आहृतः ४.ज्ञानसागरसूरिरचितं महावीरस्तोत्रं यत्र संसारदावानलस्तुत्या एकः पाद आहृतः, ५.ज्ञानसागरसूरिप्रणीतं श्रीशान्तिजिनस्तवनं च यत्र आनन्दानम्रस्तुत्या एकः पाद आहृतः।

१.जैन् पाद्पूर्ति-काव्य्-साहित्य्- बाबू अगर्चन्द् नाहटा-प्रणीतो लेखः। प्र.जैन्सिद्धान्त्-भास्कर्-सेप्टेम्बर् १९३६ ३-२; पु.६५-७१;१०७-११२

२.अनुसंधान् संशोधनपत्रिका-३८. सं.विजयशीलचन्द्रसूरिः। कर्णावती-अमदाबाद्

(परो)बाह्यसाक्ष्यसामग्री-१.अन्याः कृतयः

प्रायः सर्वेऽपि कोशग्रन्थमातृकास्थाः पाठा विभिन्नैः कोशग्रन्थगतपाठैस्तुलनीया दोषाश्चापवारणीयाः। डेक्कन्कालेज्-मुद्रिताः कोशा अत्र सुप्रसिद्धान्युदाहरणानि। तद्वत्, कस्यांचन व्याकरणग्रन्थमातृकायां 'प्रागिलीय' इति पाठ इत्यभ्यूहामहे। स च सिद्धान्तकौमुद्यवलम्बनेन 'प्रागिवीय' इति शोधनीयः। समानशास्त्रग्रन्थग्रहणमतन्त्रम्। सत्यावश्यकत्वे भिन्नशास्त्रसाहित्यग्रन्थोपलब्धैरपि पाठैः संवादः करणीयो यथा तत्रभवता शिवदत्तदाधिमथेन अमरकोशसंपादने कृतः[१]।

(परो)बाह्यसाक्ष्यसामग्री-२.व्याख्यानानि

व्याख्यानानि पाठनिश्चये प्रबलानि साधनानि।

द्वयोर्भिन्नपाठयोः कतरः पाठः/ द्व्यधिकानां भिन्नपाठानां कतमः पाठो ग्राह्य इत्यत्र प्रायो दृढा दृष्टिर्वर्तते व्याख्यातॄणाम्। यथा- "अनन्यगुर्वास्तव तेन केवलः[२]...."इत्यादौ माघपद्ये 'अनन्यगु**र्वाः**'इत्यत्र 'अनन्यगु**र्व्याः**' इति पाठान्तरम्। व्याख्याता मल्लिनाथः 'अनन्यगु**र्वाः**' इत्येव शुद्धः पाठ इत्यभिप्रैति "अनन्यगुर्वा इत्यनीकारान्तः पाठः" इत्यभिदधत्, "समासात् प्राङ् ङीषि 'नद्यृतश्च' इति कप्प्रसंगः स्यात्" इति च हेतुमुपन्यस्यन्।

कोषादिपरिचयमात्मनः प्रदर्श्यन्तो व्याख्यातारः प्रामादिकान् पूर्वव्याख्यातृदत्तानर्थान् खण्डयन्ति। चम्पूभारते[३] पद्यमिदम्-

पुत्रं तत्र घटोत्कचं[४] पवनभूसङ्गादनङ्गातुरा

१.निर्णयसागरप्रेस् मुम्बयी

२.शिशुपालवधम् १.३५

३.चम्पूभारतम् अनन्तभट्टप्रणीतं, कुरविकुलरामचन्द्रबुधेन्द्रविरचितव्याख्यासमेतं, सं.काशीनाथपाण्डुरङ्गपरब-वासुदेवलक्ष्मणशास्त्रिपणशीकराभ्यां संपादितं, निर्णयसागर-मुद्रणालयः, मुम्बयी-1930 चतुर्थ संस्करणम्-पु.58.

४.घटोत्कटमिति मुद्रितमत्र। मुद्रणदोषोऽयमित्यत्र न संशयः।

प्राप्तं सर्वगुणैर्मनोजवसतां प्रासूत नक्तञ्चरी।
'कुर्या वः कृत एव कर्मसु हरेः शक्तेरपि स्त्रंसनाम्'
इत्युक्त्वा स पितॄन् यथाभिलषितं युक्तस्तया निर्ययौ।(२.३६)

द्वितीयपादगतं 'मनोजवसताम्' इति पदं विचार्यम्। व्याख्याता कुरविरामचन्द्रः 'पितृतुल्यत्वम्' इत्यर्थं वदंस्तत्रार्थे 'अथ मनोजवसः पितृसन्निभः' इत्यमरकोशं प्रमाणयति। अत्र 'मनोजवसत्वम्' इत्यर्थं वदन्तमन्यं व्याख्यातारं नृसिंहनामानं स खण्डयति, ''तत्तस्योक्तकोशा-नभिज्ञताविलसितमेवेति नास्माकमाग्रहः'' इति कटु निन्दन्[१]।

व्याख्याकाराः स्वासम्मतानपि पाठान् क्वचिदवशेषयन्ति। यथा तत्रैव चम्पूभारते (१.४३ पद्यानन्तरं गद्यम् पु.२२)

''अधुना तस्य प्रभावेन शतमखमुखासु निखिलासु लेखारेखासु ये ये परार्घ्यास्ते ते रहसि कृतसांनिध्याः स्वानुगुणगुणगणविभवानात्म-भवान् मयि विकसदनुकम्पाः संपादयिष्यन्ति।''

इत्यत्र, 'कृतसांनिध्या' इति भागे 'ध्यानमात्रसाध्यसांनिध्याः' इति पाठान्तरम्। तदवशेषयति कुरविरामचन्द्रः स्वव्याख्यायाम्। परन्तु न व्याख्याति। एतेनेदं स्पष्टं यत् 'कदाचिन्मातृकान्तरप्राप्तौ स्वासम्मतोऽपि पाठः समर्थ्येत ' इत्यभ्यूहमानः स तथा कृतवान्।

मल्लिनाथस्य मतेन पूर्वमेघे ''नीपं दृष्ट्वा हरितकपिशम्'' (२१) इत्यादिपद्यस्यानन्तरं कासुचिन्मातृकासूपलभ्यमानम् ''अम्भोबिन्दुग्रहण-चटुलान् चातकान् वीक्षमाणः''इत्यादिकं पद्यं प्रक्षिप्तम्। परन्तु स न

१.भूयो भूयो नृसिंहव्याख्यानं बलवद् गर्हतेऽयं कुरविरामचन्द्रः ''अदूषयत् काव्यमिदं नृसिंहः कश्चिन्निजाख्यानुगुणैः श्ववादैः। सिंहो नृषु श्वा हि सुनिर्मलानां स्पर्शाद् यतो दूषणमातनोति। अपमूलमनन्वितमतिदुरूहंयुभिरत्र कल्पितान् पाठान्। अपि विदुषो मोहयितुं व्याचख्यौ बत स पण्डितंमन्यः।'' इति परुषं भाषमाणः। उपक्रमपद्ये ४.५

केवलमवशेषयति "इतः परं प्रक्षिप्तमपि व्याख्यायते" इति कथयन्, पद्यं तद् व्याखाति च। अग्रे "दीर्घीकुर्वन् पटु मदकलम्" (३१) इत्यादि-पद्यानन्तरमुपलभ्यमानानि "हारांस्तारान् तरलगुटिकान् कोटिशः शङ्ख-शुक्तीः... ", "प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे...", "पत्रश्यामा दिनकरहयस्पर्धिनो यत्र वाहाः...",(२१) एतानि त्रीण्यपि पद्यानि तन्मतेन प्रक्षिप्तानि। परन्तु स तान्यवशेषयन् व्याख्याति "इतः परं **प्रक्षिप्त**मपि श्लोकत्रयं व्याख्यायते"इति वदन्।

'अमुके पाठे अमुकोऽर्थः, तद्भिन्ने पाठे चैवमर्थ' इत्यभिप्राय-वन्ति वाक्यानि व्याख्यानेषु सहस्रश उपलभ्यन्ते।

एतेन यदाधुनिकानां केषाञ्चन भारतीयानां ग्रन्थसंपादनशास्त्र-ज्ञानां गदनं "स्वासम्मतानामपि पाठानामवशेषणं करणीयमिति विधिः, वैदेशिकानां ग्रन्थसंपादनशास्त्रकृतीनामध्ययनानन्तरमेव परिचितोऽभूदा-स्माकानां विदुषां न तु स ज्ञातपूर्वस्तेषाम्" इति, तदयुक्तमेवेति सिद्ध्यति।

कदाचिच्च "कासुचन मातृकासु श्लोकस्यास्यानुपलब्धत्वेऽपि अमुकासु मातृकास्वस्य श्लोकस्य दृश्यमानत्वात्प्रक्षिप्तत्वमस्य नाशङ्कनीयम्" इत्याद्यपि सुविस्फुटं वदन्ति व्याख्यातारः[१]।

परन्तु व्याख्याकारनिर्धारिते पाठे जागरूकताऽऽवश्यकी।

१.'नारायणं नमस्कृत्य(३.४)' इत्यादिश्लोकस्य विषये "क्वचिदन्तरितानपि इति वचनात् इदमाद्यं पद्यम् असहमानाः केचिदादौ न लिखन्ति। केरलदेशस्य-पुरातनपुस्तकेषु अद्यापि दृश्यते"इति व्याख्याता वादिराजः ।"निर्दोषकः स्मृतिविहीन उदारपूर्णसंविद्गुणः प्रथमकृत् सकलात्मशक्तिः। मौक्षैकहेतुरसु-रूपसुरैश्च मुक्तैर्वन्द्यः स एक इति चोक्तमथोत्तरार्धे।(२.७८) जयतीर्थव्याख्यो-द्धृतभागः। श्रीमन्मध्वाचार्यविरचितो महाभारततात्पर्यनिर्णयो जनार्दनभट्ट-व्याख्यासमेतः-सं.पण्डित-श्रीनिवासतीर्थाचार्यः -पं. जयतीर्थाचार्यपुराणिकश्च। उत्तरादिमठः, विश्वमाध्वमहापरिषत्। बेङ्गलूरु -४ २००७। पु.७८

१.व्याख्याकारैः 'किमत्र भाव्यम्' इत्यत्रैव बद्धदृष्टिभिर्भूयते, न पुनः 'ग्रन्थकारेण कः पाठो वस्तुतः प्रणीतः स्यात्' इत्यत्र। अर्थात्, प्रायो व्याख्याकाराः उत्कृष्टत्वेन भासमानं पाठं गृह्णन्ति तदितरं च त्यजन्ति[१]। ग्रन्थसंपादनशास्त्रे 'ग्रन्थकारेण कः पाठो रचित ' इत्यत्र अवधेयत्वं न पुनः 'कस्मिन् पाठे स्थापिते ग्रन्थपाठ उत्कृष्टो भवती'त्यत्र।

२.भिन्नैर्व्याख्यातृभिर्भिन्नाः पाठा आद्रियन्ते यथास्माभिः पूर्वमेव दर्शितम् "आषाढस्य 'प्रथ(श)म' दिवसे" इत्युद्धृते पद्यभागे ।पूर्व-मुद्रितेष्वपि सव्याख्येषु संस्करणेषु, सति पाठवैविध्ये मातृकापाठपरीशीलनं सूक्ष्मदृशा करणीयम्। अत्रेदमवधेयम्- मल्लिनाथीयादीनि पञ्चमहाकाव्य-व्याख्यानादीनि, सायणादिप्रणीतानि वेदभाष्यादीन्यपि न मुक्तानि पाठान्तरेभ्यः !

मल्लिनाथप्रणीताया रघुवंशसंजीविनीव्याख्याया भिन्नेषु संस्करणेषु दृश्यमानं पाठभेदमधिकृत्य तत्रभवता प्राचार्येण डा.रेवाप्रसादद्विवेदिना सनातनेन संशोधनं कृतम्[२]। तदनुसारेण-

"७.५१ पद्यस्य गुजरातीसंस्करणे-'अग्निपुराणे-वराप्सरः-सहस्राणि भूपमायोधने हतम्। त्वरितान्युपधावन्ति मम भर्तायमेति च'-इति प्रमाणं 'समरे नृत्यत्' इत्यतश्च पूर्वं योजितं लभ्यते। नन्दर्गीकर-निर्णयसागरसंस्करणयोस्तु तन्नास्ति।

१."पाठभेदोऽत्र साधुर्वा तदन्यो वात्र मूलतः। किन्त्वध्येतृभ्रमात्तेन तत्प्रदर्शन-मज्ञता। अथैकः पुस्तकेभ्योऽसौ पाठो ग्राह्यो विचार्य तत्। साधुरेव तु संग्राह्यः साधूनामपि भानतः। ततश्च पाठभेदेभ्यः .....प्रोद्धृतैः पदैः। तदभावाद् युक्तमन्यैस्तन्त्रमेतत् प्रकाश्यते "। मातङ्गपरमेश्वरागमव्याख्या रामकण्ठप्रणीता। विद्यापादः। सं। एन्.आर्.भट्। पु.२. Institut Français D' Indologie.

१.रघुवंशसंजीविनी-सागरिका ३,१-४ पु.१२६-१३२.

"९.५ पद्यस्य गुजरातीसंस्करणे-'चतस्रः कीर्तयेद् वाष्टौ दश वा ककुभः क्वचित् इति वाग्भटः' इति वाग्भटस्य वचनं 'दशदिगन्तजित्' इति पद्यानन्तरं दत्तम्। न चैतत् तदितरयोर्द्वयोरपि संस्करणयोरुपलभ्यते। एतत् पद्यं व्याख्यात्रा स्वयमुद्धृतं वाऽऽहोस्वित् , केनचन पाठकेन प्रान्तभागे निवेशितं सत्,परवर्तिना केनापि लेखकेन व्याख्याशरीरे योजितं वा ?

"१७ सर्गस्य 'अम्बुगर्भोऽपि जीमूतश्चातकैरभिनन्द्यते'। इत्युत्तरार्धीयस्य ६० तमस्य पद्यस्य जीमूतशब्दे संजीविन्या 'पृषोदरादित्वात् साधुः न तु कर्तरि क्तः' इत्येवं व्याकरणव्युत्पत्तिः प्रस्तूयते। सेयं व्युत्पत्तिर्गुजरातीसंस्करणे नास्त्येव। निर्णयसागरसंस्करणे विद्यमानापि व्युत्पत्तिरियं विषयान्तरव्यवहिता काव्यार्थानुशीलनप्रवाहं खण्डयन्ती 'पृषोदरादित्वात् साधुः चातकैरभिनन्द्यते सेव्यते न तु कर्तरि क्तः' इत्येवंरूपा स्थितास्ति।

"दर्पणस्य(=हेमाद्रिविरचितस्य दर्पणाख्यस्य रघुवंशव्याख्यानस्य) कोल्कत्तादिसंस्करणेषु यथा लेखकैः संजीविनी मिश्रितास्ति तथैव प्रायः कैश्चन पाठकैः संजीविन्यां दर्पणांशा मिश्रिताः स्युः।"

शिशुपालवधस्य पञ्चदशे सर्गे "अयमुग्रसेनतनयस्य..(३८)" इत्यादेः पद्यस्यानन्तरं "ननु सर्व एव समवेक्ष्य.." इत्यादीनि चतुस्त्रिंशत् पद्यानि मल्लिनाथव्याख्यायां न सन्ति। तानि केवलं वल्लभदेवव्याख्याने समुपलभ्यन्त इति निर्णयसागरे मुद्रिते पणशीकरवासुदेवशास्त्रिसंपादिते शिशुपालवधसंस्करणेऽभिहितम्। विद्यामाधवविरचितशिशुपालवधव्याख्यायाम्[१] अपि तानि न सन्ति। तानि-१.किं माघेन रचितानि सन्ति, विद्यामाधवमल्लिनाथाभ्यां समुपलब्धासु मातृकासु लुप्तानि वा २.आहोस्वित् प्रक्षिप्तानि वा - इत्येतत् परिशीलनसापेक्षम्।

१.प्राच्यविद्यासंशोधनालयस्य पि.४७१९ मातृकायां तिगळारिलिपिलिखितायाम्।

एतत्सदृशमन्यदुदाहरणं यथा- 'मातृकासु समुपलभ्यमाने काशिकायाः पाठे वामनजयादित्ययोः व्याख्यानभागा मिश्रिता' इति, 'गुणोपसंहारन्यायोऽत्र लिपिकरैरवलम्बित' इति च तत्रभवता श्रीनारायणमिश्रेण सप्रमाणं प्रदर्शितम्[1]।

व्याख्याकृद्भिः मूलपाठयुक्ताः सर्वा अपि मातृकाः परिशीलिता इति वा, तैर्व्याख्यातः पाठ एकान्तेनार्थप्रशस्त इति वा वक्तुं न शक्यते। कदाचित् तैरङ्गीकृतः पाठोऽनङ्गीकार्यः सन् 'स्थितस्य गतिश्चिन्तनीया' इति न्यायानुरोधेन तैर्व्याख्यातो भवति यथा-

निर्णयसागरमुद्रिते भट्टनारायणीये वेणीसंहारे उपसंहारवचनम् एतत् :

"काव्यालापसुभाषितव्यसनिनस्ते राजहंसा गतास्
ता गोष्ठ्यः क्षयमागता गुणलवश्लाघ्यास्तु वाचः सताम्।
सालङ्काररसप्रसन्नमधूराकाराः कवीनां गिरः
प्राप्ता नाशमयं तु भूमिवलये जीयात् प्रबन्धो महान् ॥"

अत्राभिप्रायो न स्पष्टः। 'तु' इति द्वितीयपादगतो निपातस्तथा समग्रश्चतुर्थः पादः न कमपि समञ्जसमर्थं दत्तः। 'तु' इत्यस्मिन् स्थले 'न' इति कासुचन मातृकासु पाठः। 'तु' इत्येव पाठमङ्गीकृतवता व्याख्यात्रा जगद्धरेण व्याख्यातोऽयं भाग एवंक्रमेण- "सतां साधूनां वाचः पुनर्गुणलवैर्गुणकणैः श्लाघ्याः श्लाघ्यविषयाः"। अत्र 'तुकारस्थाने चकारे पठिते क्षयमागता इत्यनेनान्वेतुं शक्यत' इति एम्.आर्.काले कथयति।

१........"गुणोपसंहार्न्याय् से कुछ् अंश् जयादित्य् की वृत्ति से और् कुछ् अंश् वामन् की वृत्ति से लिया था" काशिका सं.नारायणमिश्रः। प्र.चौखाम्भा संस्कृतसीरीस् आफीस् वाराणासी-१. १९६९. पीठिका पु.६९

चतुर्थपादस्य इङ्ग्लीष्भाषानुवादम् एम्.आर्.काले इत्थं कृतवान्-*May this great composition however continue to exist triumphantly on the circle of the earth.*

अत्र *however* इति पदं शुद्धसंयोजनहीनादपि वाक्यात् कथमप्यर्थं निःसारयितुम् एम्.आर्.काले दत्तवानिति सुस्पष्टम्। जगद्धरस्तु प्रतिपदार्थं परिहरन् चातुर्येणेदमुक्तवान्- "अत्र च कवेरयमाशयः मत्कविताया अप्यलङ्कारशालिता रसयोगिता च स्वभावसिद्धैव। भगवत्प्रसादेन पुनर्गुणान्तरत्वयोगित्वमपि भवतु। तथा च काव्यलक्षणं समस्तमिहापि स्यात्। तत्कर्तृतया च कीर्तिविवर्तलाभः प्रीतिलाभश्च स्यादिति।"

अत्रेदं करबदरायितं यज्जगद्धरेण वेणीसंहारगतस्य प्रकृतपद्यस्य यः पाठो दृष्टः सोऽत्यन्तमतृप्तिकार्यासीत्। 'स्थितस्य गतिश्चिन्तनीया'इति न्यायमाश्रित्य स किमपि वदति। तेन 'कीर्तिविवर्तलाभ' इति यदुक्तं तन्नातीव संतोषजनकम्।

अस्माभिरत्र अवतारिकावाक्यं सावधानं परिशीलनीयम्। "इदं च विदग्धस्निग्धवियोगदुर्मनसा विप्रलपितं तेन कविना" इङ्ग्लीष्भाषानुवादोऽत्र एम्.आर्.काले-रचित एवंभूतः-*This is the lament poured forth by the poet with a mind uneasy at the separation of learned and loving friends.* (= अत्र कविना रसिकमित्राणां वियोगः सविषादमुच्यते।)

समग्रस्य चतुर्थपादस्य पाठान्तरं वर्तते यत्र पद्यस्यास्याभिप्रायः स्फुटतरो भवति। 'शान्तिं प्रापुरवाप दुर्जनगणो वाक्पाटवीं (वं?)सांप्रतम्' [=कवीनां गिरः(तृतीये पादे वर्तेते शब्दावेतौ) शान्तिं प्रापुः, कवित्वशक्तिशून्यो दुर्जनगणस्तु सर्वत्र विजृम्भते]इत्यर्थः। जगद्धरो मातृकान्तरं

नालभत,एम्.आर्.काले च पाठान्तरे नावधानं बद्धवानिति वस्तुस्थितिः।

तत्रभवता पि.के.गोडेकेन प्रदर्शितेभ्यः सायणाचार्यीय-सामवेद-भाष्यपाठभेदेभ्यः[१] सप्तात्रोद्ध्रियन्ते(अ=अग्रभागो मातृकापत्रस्य। पृ= पृष्ठभागो मातृकापत्रस्य): –

बिब्लि-संस्करणीयः[२] सामभाष्यपाठः			लिमये-संग्रहे[३] दृष्टः सामभाष्यपाठः		
पुटम्	पङ्क्तिः		पुटम्	पङ्क्तिः	
२	७	°रूपोपेताः	१पृ	९	°भेदैरुपैताः
२	१३	नन्वथ ये	२अ	१	नन्वद्याथ
५	१	अभ्यशिश्रयन्	२पृ	२	अभ्यश्रीणन्
७	१०	स्तोत्रैः स्मर्यमाणः	२पृ	८	स्तोत्रैः प्रेर्यमाणो
१५	८	बृहदग्न सुवीर्यम्	३पृ	८	बृहदग्ने सुवीर्यम्
१८	६	त्वदर्थं	४पृ	२	तदर्थं
९२	१२	टु क्षु क्षये	८अ	९	टु क्षु शब्दे

एतेन, व्याख्यात्रा व्याख्यातस्यापि पाठस्य स्वीकारे संपादकेन जागरूकेण भाव्यमिति, केवलं मूलेषु पाठशोधनं न पर्याप्तमिति, ग्रन्थ-संपादनविधीनामनुष्ठानं व्याख्यास्वपि करणीयमेवेति च सिद्ध्यति।

व्याख्याकारैः स्वीकृतस्य पाठस्याङ्गीकारे तस्य पाठस्यापरासु मातृकासु सत्त्वस्यैव हेतुत्वेनोपन्यासोऽत्यन्तं विरलः। एतादृशः कश्चन परामर्शो दर्शितपूर्वः[४]।

(परो)बाह्यसाक्ष्यसामग्री-३.भाषान्तरेऽनुवादाः

भाषान्तरेऽनूदिता कृतिः प्रबलतमा परोक्षसामग्री। प्रायः सर्वा

१.*Studies in Indian Literary History* by P.K.Gode Vol-II. Bharatiya Vidyabhavan, Bombay 1954. Pp 6-7.

२.*Bibliotheca Indica* Edition ३. Ms.of Madhulimaye collection. Oldest dated ms.(date: AD 1463) BORI.

४.पु.८८ पादटिप्पणी द्रष्टव्या।

अपि मुख्याः संस्कृतकृतयः भाषान्तरेष्वनूदिताः। कन्नडभाषायाम् अनूदितानां द्वित्राणां संस्कृतग्रन्थानामत्र नाम्ना संकीर्तनं क्रियते- रामायणमहाभारतयोरनेकेऽनुवादाः,(येषु कुमारवाल्मिकिकुमार-व्यासकृतावनुवादौ प्रसिद्धतमौ), कादम्बर्या नागवर्मणानूदिता कृतिः कर्णाटकादम्बरीनाम्नी , दशकुमारचरितस्य चौण्डरसेन कृतोऽनुवादो-ऽभिनवदशकुमारचरिताख्यः,शार्ङ्गदेवरचितसंगीतरत्नाकरस्थस्य नृत्या-ध्यायस्य सिंहभूपालकृतो लास्यरञ्जननामकोऽनुवादः, जैमिनिभारतस्य लक्ष्मीशकविकृतोऽनुवादः, बृहत्संहितायाः कतिपयभागानां चावुण्ड-रायकृतो लोकोपकारनामकोऽनुवादः।

नागार्जुनप्रणीतग्रन्थानामनुवादा अत्र विशेषत उल्लेख्याः। उपलब्धस्य विग्रहव्यावर्तिनीमूलग्रन्थस्य पाठशोधने तद्ग्रन्थस्य मण्डारिन्-भोटभाषयोः कृतावनुवादौ सहायकौ। महाप्रज्ञापारमिताशास्त्रं केवलं मण्डारिन्भाषायामुपलभ्यते। कैश्चन विद्वद्भिः संस्कृतेतरभाषागतान् बौद्धग्रन्थानुवादान् दृष्ट्वा तेषां संस्कृतमूलं पुना रचयितुं प्रयत्ना अपि विहिताः।नष्टसंस्कृतमूलस्य द्वादशमुखशास्त्रस्य संस्कृतानुवादः मण्डारिन्-भाषायामनूदितस्य तद्ग्रन्थस्यावलम्बनेन तत्रभवता अय्यास्वामिशास्त्रिणा रचितः।

शिवाग्रयोगिविरचितायाः शैवपरिभाषाया अनुपलब्धः पञ्चमो-ऽध्यायः संपादकेन तत्रभवता आर्.रामशास्त्रिणा तमिळुभाषायाम् अनूदितस्य ग्रन्थस्य तं भागमवलम्ब्य संस्कृतभाषायामनूदितः। तस्यानु-वादकार्यसमाप्तौ देवकोटाप्रदेशतः समग्रस्य संस्कृतमूलस्य सतमिळ-नुवादस्य काचिन्मातृकोपलब्धा।मातृकालब्धेन मूलसंस्कृतेन रामशास्त्रि-रचितानुवादोऽत्यन्तं सदृशः केषुचनांशेषु प्रकृष्टतरश्चासीत्[१]।

अत्रास्माकं तु "अनुवादेषु वर्तमानाः पाठा मूलग्रन्थपाठस्य स्थिरीकरणे कियत् साहाय्यमाचरन्ति" इति मुख्यं वस्तु न तु केवलं मूलानुवादयोरुत्तमाधमत्वनिश्चयः।

१. *Śaivaparibhāṣā* of Śivāgrayogi, for instance,is a text of

पैशाचीभाषायां नष्टा बृहत्कथा त्रिषु संस्कृतानुवादेषु बुधस्वामि-क्षेमेन्द्र-सोमदेवप्रणीतेषु बृहत्कथाश्लोकसंग्रह-बृहत्कथामञ्जरी-कथासरित्सागरेष्ववशिष्टेत्यन्यदेतत्।

प्राचीनकालिका अनुवादकाः प्रायो मूलविपरिवर्तनमैच्छन्। भागवते पूतनी यशोदाया अग्रे कृष्णं स्वस्तन्यं पाययति[१]। नित्यात्मशुकयोगिनः कन्नडभागवते तु पूतनी वञ्चनया तदा कृष्णमुपसर्पति यदा यशोदा न सन्निहिता[२]। तर्कस्यावलम्बनमत्र स्पष्टम्। कापि माता स्वशिशो-

five chapters. When the Oriental Research Institute took it up for publication, neither of the codices it had(one of the ORI Mysore and of Adyar), did contain the last chapter. Nor any library reported about a complete copy. But there was a Tamil translation of the entire text available to the editor Late Vidwan R.Ramashastri.He retranslated the Tamil version, so that he could present a complete text. When the script was about to be sent to press, a codex complete with text and translation was reported from Devakota.On comparison it was surprising that the re-translation appeared just like author's copy only. It was even better than the copy procured from Devakota.Shastriyar did not yield to the temptation of retaining his attempt, true to his editorial spirit. Unfortunately he did not even allow it to be printed as an appendix. *Introduction to Manuscriptology* by Dr.R.S.Shivaganesha Murthy P.142

१.तां तीक्ष्णचित्तामतिमात्रचेष्टितां वीक्ष्यान्तराकाशपरिच्छदाऽसिवत्। वरस्त्रियं त्तत्प्रभया च धर्षिते निरीक्ष्यमाणे जननी अतिष्ठताम् (भागवतम् १०.६.९)

२. नोडि कंडळु मनेय मुन्दण
माडदलि अरेगुळिय कुरुहनु
दाडेयिल्लद दुष्टे होक्कळु नंदनालयव।
माडहोगिरे तायि केलसव(=मातरि गृहकृत्यार्थमन्यत्र गतायाम्)

रन्यया स्त्रिया स्तन्यपायनं न सहते। मूले 'अतिमात्र' इत्यत्र 'अतिवाम' इति पाठान्तरम्। अनयोः कतरद् ग्राह्यमित्यत्र अनुवादकेन व्यत्यासिता कथा न साहाय्यमाचरति। इत्थंभूतानि तर्कजन्यानि परिवर्तनानि साहित्यकृतीनाम् अनुवादेष्वधिकानि शास्त्रग्रन्थानुवादेषु तु न्यूनानि।

परिवर्तनस्यापरे हेतवस्तु व्यत्यासकरणचापल्यं, मतीयता, रङ्गस्थले प्रयोक्तव्यस्य मूलवस्तुनः प्रयोगे परिवर्तनानिवार्यता, विनोद-प्रियता, बालिशता, उन्मत्तता-इत्यादयः ! परिवर्तनं सदापि मूलापे-क्षयोत्कृष्टम् एवेति वक्तुमपि न शक्यते। कदाचित् मूलमेवोत्कृष्टं सत् परिवर्तनमपकृष्टमपि भवेत्। अत्र ग्रन्थसंपादकैरतीवजागरूकैर्भाव्यम्।

बाणभट्टस्य कादम्बर्यामेक एव जरद्द्रमिडधार्मिकः। किन्तु नाग-वर्मणः कर्णाटकादम्बर्यां जरद्द्रमिडधार्मिका अनेके। मूले किमर्थमेक एव जरद्द्रमिडधार्मिक इत्यजानानो नागवर्मा परिवर्तनकुतूहलेन अनेकान् जरद्द्रमिडधार्मिकान् सृष्टवानिति स्पष्टम्। दक्षिणापथचक्रवर्तित्वमात्मनः प्राप्तुं दुर्गाया अग्रे वरं प्रार्थयते मूलकादम्बरीस्थो जरद्द्रमिडधार्मिकः। वस्तुत एष हर्षवर्धनविजेतुरिम्मडिपुलिकेशिनः सोत्प्रास उल्लेख इति, स्वाश्रयदातु-र्हर्षवर्धनस्य पराजयमसहमानो बाणभट्टो हर्षचरितमसमाप्य, पराजय-वृत्तान्तं चारचयन्, कादम्बर्यां दक्षिणापथेश्वरस्य इम्मडिपुलिकेशिनः प्रस्तावं कुर्वाणः सन् "पुलिकेशी वस्तुतो जरद्द्रमिडधार्मिक आसीद् यो बालिशोऽस्तव्यस्तं भाषमाणः कलहप्रियश्च सन् स्वासामर्थ्यमनभिजानन् 'दक्षिणापथेश्वरम्' आत्मानं कर्तुं दुर्गां प्रार्थयत" इति सापहास्यं कल्पयामासेति प्रकृतेन ग्रन्थकर्त्रा विरचिते कादम्बर्यनुवादरूपे 'पुण्डरीक' इत्याख्ये कन्नडग्रन्थे पीठिकायां सप्रमाणं दर्शितम्[१]।

नूडि कोलुवेनु शिशुवनेनुतवे

दूडिदोरेय कठारियंते कठोरभावदलि। (कन्नडभागवतम् १०.५.३२)

१.पुण्डरीकः एस्.जगन्नाथः। प्र.राघवेन्द्रस्वामिमठः,मन्त्रालयः। द्वितीयसंस्करणम्

(परो)बाह्यसाक्ष्यसामग्री-४.तात्पर्य-सार-ग्रन्थाः

वनमालिमिश्रप्रणीतस्य न्यायामृतसौरभस्य द्वित्रा मातृका या अधुनोपलभ्यन्ते, ताः सर्वा अपि भ्रष्टपाठा विच्छिन्नाश्च। भाग्याद् ग्रन्थस्यास्य सारः कुम्भकोणम्-आनन्दतीर्थप्रणीते न्यायरत्नाकरे समुपलभ्यते। एतस्य साहाय्येन न्यायामृतसौरभस्य संपादनं निष्क्लेशं भवति[१]।

रामायण-भारत-बृहत्कथानां साराः क्षेमेन्द्रप्रणीतासु रामायण-मञ्जरी-भारतमञ्जरी-बृहत्कथामञ्जरीषु वर्तन्ते। भारतगतान्युपाख्यानान्यपि भारतमञ्जर्यां सम्यक् स्थापितानि। क्षेमेन्द्रस्य रचनानामध्ययनेन क्षेमेन्द्रजीवितसमये समुपलभ्यमानासु मातृकासु रामायण-भारत-बृहत्कथानां कथावस्तु केन क्रमेण निर्व्यूढमासीदिति स्फुटं ज्ञायते। वस्तुतस्तु पुणेनगरीय-भण्डार्कर्-प्राच्यविद्यासंशोधनालये निर्वर्तिते महाभारतस्य संपादनशास्त्रीये संस्करणे प्रधानं परोक्षसाक्ष्यं भारतमञ्जर्येवासीत्।

अद्वैतसिद्धिः मधुसूदनसरस्वतीप्रणीता अद्वैतसिद्धिसिद्धान्तसारे सदानन्दव्यासेन समग्राहि। अभिनन्दविरचितं लघुयोगवासिष्ठं योगवासिष्ठस्य सारः। (अपरस्य)अभिनन्दस्य कादम्बरीकथासारो बाणभट्टीयकादम्बर्याः सारः। गौडब्रह्मानन्देन अद्वैतसिद्धौ व्याख्याद्वयं विरचितं-लघुचन्द्रिका गुरुचन्द्रिका च। उभययोः तुलनेन उभययोः संपादनं सुलभायते। अत्रैतादृशमन्यदुदाहरणं तु, भट्टोजीदीक्षितरचितायाः सिद्धान्तकौमुद्याः लघुशब्देन्दुशेखर-बृहच्छब्देन्दुशेखरेति नागोजीभट्टरचितं व्याख्याद्वयम्।

2009 पीठिका- पु. 16-20

१.श्रीकुम्भकोणानन्दतीर्थाचार्यकृतन्यायरत्नाकरः-डा.माधवाचार्यपाण्डुरङ्गी। श्रीगुरुसार्वभौमः, सांस्कृतिकमासपत्रिका (मार्च् 2012).पु.26-30

(परो)वाह्यसाक्ष्यसामग्री-५.शिलाशासनानि

वि.राघवन् ज्ञापयति[१] यदष्टोतरशतं नृत्यकरणानि तञ्जापुरीये बृहदीश्वरदेवालये विग्रहैः प्रदर्शितानि,संबद्धानि भरतनाट्यशास्त्रगतानि पद्यान्यपि तत्र विग्रहाणामधोभागे उत्कीर्णानि। श्रीरङ्गोपलब्धे कस्मिंश्चित् चोलशासने "सन्निमित्तकृतं पापमपि धर्माय कल्पते " इत्ययं श्लोकार्धः 'भगवद्गीतागतोऽयं श्लोक(?)' इति तमिळुभाषायां टिप्पणीपूर्वक-मुत्कीर्णः। काम्भोजदेशीयेषु बहुषु शासनेषु रामायणमहाभारतगतानि पद्यान्युत्कीर्णानि। रामायणमहाभारतयोः संपादनशास्त्रीये संस्करणे पद्यपाठानाममीषामपि परिगणनमवश्यं कर्तव्यं भवति।

(परो)वाह्यसाक्ष्यसामग्री-६.संशोधनलेखाः

डा.आर्.श्यामशास्त्रिणा मानसोल्लासस्य संपादनं विहितं मैसूरु-नगरीयप्राच्यविद्यासंशोधनालये प्रकटितं च। तेनोपयुक्तायां मातृकायां लिपिकरकृता बह्व्योऽशुद्धय आसन्। तदनु वटोदरप्राच्यविद्यासंशो-धनालये प्रकटितेऽपि संस्करणे केचन भागा असंतृप्तिकरा आसन्। डि.एल्.नरसिंहाचार्येण "मानसोल्लासदल्लि छन्दस्सु "इत्यस्मिन् लेखे[२] तद्गता दोषाः समीकृताः।

डा.प्रेमस्वरूपगुप्तेन रचिते 'नाट्यलक्षणे भावलक्षणपाठः ' इत्यस्मिन् संशोधनप्रबन्धे[३] भरतप्रणीतनाट्यशास्त्रगतस्य भावलक्षण-पाठस्य संपादनं कृतम्।

१.Sanskrit and Epigraphy (*The Mysore Orientalist*. IV.1. March 1971 Pp 1-7)

२.पीठिकेगळु मत्तु लेखनगळु। डि.एल्.नरसिंहाचार् पु ६८८-७०७.डि.वि.के. मूर्ति, मैसूरु १९७१

३.सागरिका १३.४ पु. ३४९-३५७

'शिवपुराणे केषाञ्चित् पाठानां विचार'[1] इत्याख्यः श्री विनायकपराञ्जपेरचितः प्रबन्धोऽन्वर्थः। तत्रभवता निर्धारितेषु पाठेषु केचनेत्थंभूताः सन्ति। यत्र पाठदोषस्तेन संशोधितास्तत्र अधोरेखया तत्सूचना दत्ता।

संख्या	पराञ्जपेकेन दृष्टः पाठः	तेन शोधितः पाठः
१.	आस्व पृष्ठादिदेशेषु	आस्य
२.	इन्द्रजिच्चन्द्रसेनानीः	च्चेन्द्र
३.	तृतीयावरणे चक्रुः	चक्रम्
४.	नन्दीशं सुयशं यथा।	सुयशां
५.	निर्मित्तानुगुणाः	निमित्ता
६.	पूजायतेऽतिकृपणः	कर्णायते
७.	प्राणायामनिरोधनम्	प्राणानां सन्निरोधनम्
८.	बहिष्करा यथा लोके	बहिश्चरा
९.	रुद्रप्रथमभूताख्याम्	प्रमथ
१०.	वृक्षराजो महातेजाः	वृष
११.	शिवस्यारोप्यः	शिरस्या
१२.	होमविशिष्टेन	होमावशिष्टेन

दुष्पठनम् अनावश्यकस्य परिवर्तनस्य हेतुर्भवतीति, तत् परिवर्तनं पुनरन्यस्य परिवर्तनस्य हेतुर्भवतीति चास्माभिर्दृष्टपूर्वम्[2]।

"मीमांसाभाष्यप्रत्यक्षसूत्रे वृत्तिकारमतेन व्याख्या[3]" इति प्रबन्धकर्तुः डि.टि.ताताचार्यस्य मतेन मीमांसाभाष्ये 'चक्षुराद्यनुप-

१.पुराणम्-आर्धवार्षिकी पत्रिका ५-१ जनेवरी १९६३ पु.११४-१२१

२.द्र.पु. ७५, ७९,९०,११३-११४

३.Journal of Venkatesvara Oriental Institute Tirupati ४.१ जनवरी-जून् १९४३

घातादि' इत्ययं भागो वस्तुतस्तु 'क्षुदाद्यनुपघातादि' इति स्यात्।

तस्येत्थंकारं विश्लेषणम्:

मूलपाठः: क्षुदादि(=क्षुध्+आदि)
सरलीकरणेन जातं परिवर्तनम्: क्षुरादि
ऊहात्मकं परिवर्तनम्: चक्षुरादि

टि.ताताचार्येण कृतस्यैद्विषयकस्याभ्यूहस्य मूलं तु, कमल-शीलप्रणीते तत्त्वसंग्रहे वर्तमानः 'क्षुदाद्यनुपघातादि' इति पाठभागः।

महाविद्वान् के.गोपालकृष्णशास्त्री "कुवलयानन्दपाठसंशोधनम्" इति स्वीये प्रबन्धे[1] बहुपु भागेपु पाठशुद्धिं चकार यत्र शुद्धत्वेन स्थिरीकृतानां पाठानां मध्येऽन्यतमं कञ्चित् परिशीलयाम :-

कुवलयानन्दे समुद्धृतं पद्यमिदम्:-

भजेम भवदन्तिकं प्रकृतिमेत्य पैशाचिकीं
किमित्यमरसंपदः प्रमथनाथ नाथामहे।
भवद्भवनदेहलीविकट-तुण्ड-दण्डाहति-
त्रुटन्मुकुटकोटिभिर्मघवदादिभिर्भूयते॥

विवादास्पदं पाठः :- तुण्ड
शास्त्रिणा शोधितः पाठः :-तण्डु

तेन कृताः समर्थनाः-१.तुण्ड इति प्रकृतासंबद्धम्। २.चन्द्रिका-व्याख्यायां दत्तोऽर्थोऽसंतृप्तिकरोऽनङ्गीकार्यश्च।३.तण्डु इत्येव संगतमत्र। तण्डोः पूजा शिवागमेपु विहिता।तण्डुपूजाप्रसंगे अधोनिर्दिष्टानि वाक्यानि उच्चार्यन्तेः- "श्वेतवर्णं निर्मलविग्रहं गन्धाक्षतसूत्रधरं विलसच्छिखं शिवालोकनतत्परं ह्लादिनीसमेतं तण्डुं पूजयामि।" ४.रसिकरञ्जिनी-

---

१.श्रीमन्महाराजमहापाठशालासंस्कृतपत्रिका मैसूरु जुलै १९३२ ८.३

व्याख्यायामपि 'तण्डु' इत्येव पाठो न पुनस्तुण्ड इति।

प्रो.विजयपण्ड्यावर्येण *The spurious portion in the tenth act of the Mṛcchakaṭika:A case of reconsideration* इत्यस्मिन् लेखे[१] ग्रन्थसंपादनशास्त्रानुसारं कस्मिंश्चन भागे अप्रक्षिप्तत्वं साधितम्।

विषयः:-मृच्छकटिकव्याख्यात्रा लल्लादीक्षितेन मृच्छकटिकगतस्य 'नेपथ्ये कलकलः' इत्यत आरभ्य... 'युष्मत्प्रसादेन' इति पर्यन्तस्य भागस्य (धूतादेव्या संभावितचारुदत्तमृत्युदण्डनाया अग्निप्रवेशनिश्चयः, भाग्याद् दृष्टचारुदत्तायास्तस्यास्तत्प्रयत्नस्थगनम्।) लल्लादीक्षितमतानुसारं नीलकण्ठाख्येन विदुषाऽस्य प्रक्षिप्तत्वमुक्तम्।

प्रक्षिप्तत्वनिर्धारणार्थं लल्लादीक्षितेनोपन्यस्तो हेतुः-मृच्छकटिककृता शूद्रकेण नाटकान्ते सर्वाणि पात्राणि रङ्गे नैव प्रवेशितानि सूर्योदयभयात्(?)परन्तु नीलकण्ठेन एतद्विषये कृतावधानेन एतत् समीकृतम्।

उक्तस्य मतस्य अनङ्गीकार्यत्वे प्राचार्येण विजयपण्ड्यामहोदयेनोपन्यस्ता हेतवः-

१.लल्लादीक्षितस्याधुनिकत्वात् तेन 'सांप्रदायिकं' मतमुपन्यस्तमित्यसंभवम्।२. कासुचन मृच्छकटिकमातृकासु उपर्युद्धृतभागस्य नीलकण्ठेन प्रक्षितत्वं नैव सूचितमिति स्वयं लल्लादीक्षित एव वक्ति ! ३.प्रायो मृच्छकटिकगतः प्रसंगोऽयं मुद्राराक्षसकृता विशाखदत्तेन दृष्टवता भाव्यं यत्प्रेरणयैव तेन 'चन्दनदासस्य मरणात् प्राग् विष्णुदासो कृतमरण-

१.Sanskrit Textual Critisism. (Pp.28-40).Parshva publication, Nisha pole,Zaverivad, Relief road, Ahmadabad-380001 2001

प्रयत्नोऽभूत्' इति प्रसंगं सृष्टवान्। ४.मृच्छकटिकसंपादकौ जि.के.भट्ट-जीवानन्दविद्यासागरौ अस्य प्रसंगस्य प्रक्षिततत्वाभ्यूहनमपि न कृतवन्तौ। ५.अन्यः संपादकः एन्.बि.गोडबोले लल्लादीक्षितपक्षेऽरुचिं दर्शयतीव भाति। ६.धूतादेवी-वसन्तसेनयोः परस्परेण प्रेम प्रदर्शयन्नेष प्रसंगः सुन्दरतमो यस्यावश्यकता बाढमस्ति नाटके। ७."चारुदत्त-प्राणसखस्य मैत्रेयस्य चारुदत्तलाल्यपुत्रस्य रोहसेनस्य च रङ्गे नाटककर्ता प्रवेशं न कारयतीति ऊहितुमपि न शक्यते, किमुत धूतायाः।[१]"

(परो)बाह्यसाक्ष्यसामग्री-७.संशोधनग्रन्थाः

जग्गूवेङ्कटाचार्यविरचतः "कुवलयानन्दचन्द्रिकाचकोरः[२]" कुवलयानन्दव्याख्यायाश्चन्द्रिकाया विमर्शं कुर्वन् ग्रन्थः। एतत्स्वाभाविकं यच्चन्द्रिकायां स्वीकृतेषु पाठेष्वपि ग्रन्थकृता स्वीयः कटाक्षः पातितः।

कुवलयानन्दोद्धृतानां पद्यानामन्यतममिदं पद्यमिदम्:-

"खिन्नोऽसि मुञ्च शैलं बिभृमो वयमिति वदत्सु शिथिलभुजः।
भरभुग्न-वितत-बाहुषु गोपेषु हसन् हरिर्जयति।[३]"

अत्र चन्द्रिका व्याख्या "भरभुग्नविततबाहुषु-भरेण- शैलभारेण भुग्नाः वक्रा वितता विस्तीर्णा बाहवो येषाम्।

अत्र जग्गूवेङ्कटाचार्यस्य विमर्शोऽयम्:शैलभारेण वक्रत्वे विस्तीर्णत्वं न संभवतीति, विस्तीर्णत्वे च वक्रत्वं न संभवतीति विरोधः स्फुट एव।

जग्गूवेङ्कटाचार्येण शोधितः पाठः- 'वितथ'

१.प्राचार्यविजयपण्ड्यावर्यवाक्यानां संस्कृतानुवादोऽयम्।
२.प्र.जग्गूसुदर्शनाचार्यः मेलुकोटे १९४३
३.कुवलयानन्दचन्द्रिकाचकोरः पु.१३९.

तेन कृता समर्थना-१.इदं पद्यं सुबन्धुप्रणीतायाः वासवदत्तायाः मङ्गलपद्यम्। 'वितथ' इति तत्रत्यः पाठः। २.'वितथाः व्यर्थाः' इति तत्र टीका। ३.कुवलयानन्देऽपि अवतारिकाभाग एतत्पाठस्यैव समर्थको यथा 'शैलधारणरूपेष्टानवाप्तिमात्रम्'४. जग्गूवेङ्कटाचार्यस्य पित्रा गुरुणा च बालधन्वी शिङ्गराचार्येण कृतायां कुवलयानन्दपुत्रिकायामपि 'वितथ' इत्येव पाठः।

नवल्पाकं देवनाथाचार्यविरचिते "प्राचीनपाठपरित्राणम्" इत्याख्ये ग्रन्थे श्रीभाष्यादिकतिपयविशिष्टाद्वैतग्रन्थानां पाठनिर्णयाय प्रयत्नः कृत इति ज्ञायते[1]।

पण्डितरघुनाथशर्मणा विरचिते "वाक्यपदीयपाठभेदनिर्णय" इत्याख्ये ग्रन्थे[2] ग्रन्थस्याभिधानेन प्रतीयते यथा वाक्यपदीयपाठान्तरेषु आदातव्यस्य पाठस्य निर्णयः कृत इति।

३.मातृकाणां (मुद्रितानां संस्करणानां च) संज्ञाकरणम्

अधुना मातृकाणां संज्ञाप्रदानं विम्रष्टव्यम्। मातृकाणां क,ख,ग, घ,ङ इत्यादिभिर्वर्णैरथवा १, २, ३, ४, ५ इत्यादिभिः संख्याभिः संज्ञानां करणे मातृकागतं वैशिष्ट्यं किमपि न भासते। अर्थवत्पदानामाद्याक्षर-युक्तासु संज्ञासु कृतासु मातृकागतं वैशिष्ट्यं झटिति ग्रहीतुं शक्यते। लिपिं,

१.ग्रन्थोऽयं न दृष्टः प्रकृतेन ग्रन्थकर्त्रा ।तत्रभवान् श्रीरामानुजताताचार्यो वेदान्तवैजयन्तीग्रन्थस्य प्रस्तावनायां नाम्ना कीर्तयत्यमुं ग्रन्थम्-"अयं श्रीभाष्यादिषु कोशेषु प्राचीनपरम्परया समागच्छतां पाठानां साधुत्वस्य समर्थको ग्रन्थः" इत्यभिदधत्। वेदान्तवैजयन्ती,देवनाथाचार्यजन्मशत-मानोत्सवसमितिः नवल्पाकं वण्डिवाश् जुलै १९७६.

२.संपूर्णानन्दसंस्कृतविश्वविद्यानिलयः, वाराणसी। १९८०

मातृकोपलब्धिस्थलं, मातृकास्वामिनं वावलम्ब्य संज्ञाकरणं प्रशस्तम्।

लिप्यवलम्बनेन यथा-ग्र(न्थलिपिलिखिता मातृका), म(लयाळं-लिपिलिखिता मातृका),न(न्दिनागरीलिपिलिखिता मातृका)-इत्यादि। मातृकोपलब्धिस्थलावलम्बनेन यथा-भ(ण्डारकर् प्राच्यविद्या-संशोधना-लयस्था मातृका), रा(यल् एष्याटिक् सोसैटिस्था मातृका), का(श्यामुप-लब्धा मातृका)- इत्यादि। मातृकास्वाम्यवलम्बनेन यथा गो(विन्दभट्ट-स्वामिका मातृका)-दे(वराजशास्त्रिस्वामिका मातृका) सी(तादेवीस्वामिका मातृका)क(रुणाकरस्वामिका मातृका) इत्यादीत्यादि।

परन्तु संपादनार्थं स्वीकृताया एकस्या एव कृतेरेकस्यामेव लिप्यामुपलब्धा अनेका मातृका यदि वर्तन्ते, यदि चैकस्मिन्नेव च संशोधनालये ताः सर्वा वर्तन्ते तदा १,२,३,४,५ इति संख्या एव संज्ञात्वेन स्थापनीया भवन्ति ।परन्तु कमपि मातृकागतं धर्मं सा संज्ञा प्रतिनिदध्यादेव यथा-ति$_{१}$(गळारी),ति$_{२}$,ति$_{३}$,ति$_{४}$,ति$_{५}$ इत्यादि। संशोधनालये दत्तानां क्रमाङ्कानामेव संज्ञापर्यायत्वेन लेखनं कर्तुमपि शक्यते।संख्यायाः ए.४५२, सी.९५६ इत्यादिरूपायाः अधिकाङ्कमौल्यवत्या लेखनार्थमधिकतरस्य स्थलस्यावश्यकता।अन्यथा तु A.२, P.५, इत्यादिरूपायास्तु संख्याया न्यूनमौल्यवत्या लेखनेऽधिकस्थलस्यऽनावश्यकत्वादङ्करूपाणामेव संज्ञानां सलिपिसूचनानां करणं न दोषाय यथा-मए.९, मपि.७ इत्यादि।

मुद्रितानामपि संस्करणानां संज्ञायाः करणमावश्यकं यथा-चौ(खम्भा), नि(र्णयसागरः), बा(लमनोरमाप्रेस्), वि(द्यामुद्राक्षर-शाला), हि(तचिन्तकमुद्रणालयः),वा(विळ्ळरामस्वामुलु एण्ड् सन्स्)-इत्यादीत्यादि।अथवा संपादकनाम्नामाधारेण संज्ञाकरणं कर्तुं शक्यते यथा-शि(वदत्तदाधिमथः),भा(र्गवशास्त्री),क(स्तूरी रङ्गाचार्यः)-इत्यादीत्यादि। अन्यश्च क्रमः-मुद्रणस्थलमवलम्ब्य संज्ञाकरणं यथा का(श्यां मुद्रितं), मु(म्बयीमुद्रितं),को(षिक्कोड्मुद्रितं),भा(वनगरे मुद्रितं)-

इत्यादीत्यादि।

४.प्रतिलेखनम्

आपाततः शुद्धत्वेन स्पष्टलेखनवत्त्वेन च भासमानस्य मातृकागतस्य ग्रन्थपाठस्य प्रतिलेखनं प्रथमतः कर्तव्यम्। एवं लेखने लिपिकरकृतान् दोषांस्तथैव अवशेषय्य, पाठशुद्धिरावरणचिह्ने सूचनीया।

प्रश्नः:- केनचन लिपिकरेण रा<u>मा</u>यणेति लेखनीये प्रमादवशात् रा<u>म</u>यणेति लिखिते ‘‘तद् दृष्टवता संपादकेन रा<u>मा</u>यणेति शुद्धं लेखनं न करणीयं किन्तुं रा<u>म</u>यण इत्येवाशुद्धं प्रथमतो लिखित्वा तदनन्तरं शुद्धः पाठोऽप्यावरणे सूचनीय’’ इति किमर्थमुपदिश्यते ?

उत्तरम्:- सर्वेऽपि लिपिकराः (प्रायः) स्वस्वविशिष्टान् दोषान् कुर्वन्ति। अर्थाद् रा<u>मा</u>यण इति लिखितव्ये रा<u>म</u>यण इति लिखितवान् लेखकः (प्रायः) <u>मा</u>कारस्थले <u>म</u>कारं लिखति। कदाचिदेवं संभवम्- ‘<u>मा</u>या ज्ञाता ’इति लिखितव्ये सः ‘<u>म</u>या ज्ञाता’ इति लिखति। संपादकेन तद्विषयिकायां टिप्पण्यां कृतायां, ‘<u>म</u>या ज्ञाता’ इति लिखिते ‘<u>मा</u>या ज्ञाता’ इति शुद्धीकर्तुं शक्यते।

प्रश्नः:-प्रथमवारं प्रतिकृतिकरणावसरे संपादको मातृकायां यथैव वर्तते तथैव लिखतु। अर्थात् मातृकास्थं रा<u>म</u>यणेति लेखनं दृष्ट्वा रा<u>म</u>यणेत्येव प्रतिकरोतु। तावता अलम्। किमर्थं तेन रा<u>मा</u>यणेति आवरणचिह्ने शुद्धोऽपि पाठो निर्देशनीयः ?

उत्तरम्:-यदा संपादकजनो द्वितीयवारं स्वलिखितं पठति, तदा रा<u>म</u>यणेति प्रमादं दृष्ट्वा ‘किं तथैव मातृकायां लिखितम् आहोस्वित् स्वस्यैव स प्रमाद’ इति विविच्य स्मर्तुं प्रायो न शक्नोति। तस्मान्मातृकागतमशुद्धं पाठं लिखित्वा शुद्धपाठसूचनाऽपि आवरणचिह्नगता तेन

करणीयैवेति समीचीनः पन्थाः।

५.पाठान्तरसंकलनम्

एकस्या मातृकायाः पठनेन संपादकस्तत्रत्यस्य पाठस्य प्रतिलेखनं कुर्यादित्युक्तम्। ततोऽपरमातृकागतैः पाठैः स्वकृतां प्रतिकृतिं तुलयित्वा लब्धानि पाठान्तराणि लिखेत्। पाठान्तरलेखनात् पूर्वं पाठान्तरयुक्तानां मातृकाणां / मुद्रितानां संस्करणानां वा संज्ञाः लिखेत्। विभिन्नमातृकागतानां विभिन्नपाठान्तराणां लेखने विभिन्नवर्णानां मषीणामुपयोग इत्येवमाकारिका सांप्रदायिकी पद्धतिरत्र।

सति तु मातृकाणामाधिक्ये संकलनपत्रकेषु (Collation sheets)अक्षराणां पार्थक्येन लेखनमभीष्टतरम्। महाभारतसंस्करणावसरे सुक्थङ्करप्रभृतयः संपादका इदमेव कर्म विद्वद्भिरकारयन्। अत्र सर्वाण्यप्यक्षराणि एकैकस्मिन् चतुरश्रे गृहे लिख्यन्ते यथा-

क१		दे	व	द	त्तो	गृ	हं	ग	तः
क२						व	नं		
ति		य	ज्ञ			भु	वि	स्थि	
न		रा	ज			दि		श्रु	

अत्रैकैकमक्षरं पार्थक्येन लिख्यते। प्रथमपङ्क्तौ लिखितस्य पाठस्य यस्मिन्नक्षरस्थले भिन्नमातृकासु अन्याक्षररूपं पाठान्तरं <u>केवलं</u> <u>तद्</u> द्वितीयादिपु पङ्क्तिपु लिख्यते। एतेन कस्मिन्नक्षरे कीदृशं पाठान्तरमिति सुज्ञेयत्वात् कस्या मातृकायाः साक्षात्पुत्रिकारूपा का मातृकेति निर्णयं कर्तुं सुलभम्। अत्र पद्धतौ केवलमेक एव दोषः। एतत्पत्राणां कलेवरस्य महत्तरत्वात् पाठान्तरराहित्ये सर्वेपु गृहेपु अक्षरपूरणं नैव संभवति यत्फलतया संकलनपत्राणां भूयान् भागो व्यर्थीभवति।

कम्प्यूटर्यन्त्रेण एतत् कर्तुं सुलभम्। "मैक्रोसाफ्ट् एक्सेल्" उपयोगेन विभिन्नमातृकागतानां पाठानां सर्वेष्वक्षरेषु दृश्यमानानां व्यत्ययानां पार्थक्येन प्रदर्शनं च सुलभतरम्। अथवा, "पेज्मेकर्" इति तन्त्रांशस्योपयोगेन अमुद्रणार्हे भागे पाठान्तराणि आदावुट्टङ्क्य, उट्टङ्कनसमाप्तौ मुद्रणार्हे भागे तत्तत्पुटगतानां पाठान्तराणामधस्तान्निवेशनं सुलभम्।

६.मातृकाणां(पुत्रिकाणां)वंशक्रमनिर्धारणा

मातृकाणां (पुत्रिकाणां वा)वंशक्रमनिर्धारणा षष्ठं सोपानम्। अत्र पदेषु, वाक्येषु,व्याकारणदोषेषु, अक्षरप्रमादेषु, पाठान्तरेषु च वर्तमाने साम्यवैषम्ये साहाय्यं कुरुतः। अस्माभिरुपलब्धासु मातृकासु कां मातृकामुपयुज्य कस्या अपरस्या मातृकायाः(पुत्रिकायाः) लेखनं कृतमिति स्पष्टमवधारणा अनेन कार्येण जायते।

एतेन फलद्वयमासाद्यते। अस्माभिरुपलब्धानां मातृकाणां मूलभूता मातृका या सा किम् **अस्माभि<u>रुपयुज्यमानानाम्</u> <u>एव</u> मातृकाणामन्यतमा** इति निर्धारणा प्रथमं फलम्। यदि सर्वा अपि मातृकाः अस्मदनुपलब्धायाः कस्याश्चन मूलमातृकायाः पुत्रिकाः, तदा तस्या मूलमातृकायाः स्वरूपं किमिति निश्चयो द्वितीयं फलम्।

मातृकाणां पुत्रिकाणां वा वंशक्रमनिर्धरणा ग्रन्थसंपादनेऽतिमुख्यः स्तरः। अङ्कपाशेन (=by Permutation and Combination) द्वयोर्मातृकयोस्तिसृणां च मातृकाणां संबन्धोऽत्र दर्शितः-

→ = जाता मातृका ।

मा=मातृका

आ = आदर्शमातृका अथवा मूलमातृका, या अस्मदुपलब्धानां सर्वासामपि मातृकाणां मूलम्।

□एतत्पेटिकान्तर्गता मातृका भिन्नादर्शमातृकाजन्या।

सति मातृकाद्वये-

मूलमातृका→	**जन्ये मातृके**
१.आ→	मा$_{१}$, मा$_{२}$
२.आ→	मा$_{१}$→ मा$_{२}$
३.आ→	मा$_{२}$→ मा$_{१}$
४.आ→	मा$_{१}$ [मा$_{२}$]
५.आ→	मा$_{२}$ [मा$_{१}$]

तिसृणां तदधिकानां वा मातृकाणां वंशक्रमनिर्धारणा क्लेशाय, तासां संकीर्णत्वात्।अत्र संभवन्तो मातृकाक्रमसंबन्धा अङ्कपाशेन (=by Permutation and Combination) अभ्यूहिताः।

मू.मा.→	**जन्या मातृकाः**		
आ→	मा$_{१}$	मा$_{२}$	मा$_{३}$
आ→	मा$_{१}$→	मा$_{२}$→	मा$_{३}$
आ→	मा$_{१}$→	मा$_{३}$→	मा$_{२}$
आ→	मा$_{२}$→	मा$_{१}$→	मा$_{३}$
आ→	मा$_{२}$→	मा$_{३}$→	मा$_{१}$
आ→	मा$_{३}$→	मा$_{१}$→	मा$_{२}$
आ→	मा$_{३}$→	मा$_{२}$→	मा$_{१}$

आ→	मा$_{१}$	मा$_{२}$	[मा$_{३}$]
आ→	मा$_{१}$	मा$_{३}$	[मा$_{२}$]
आ→	मा$_{२}$	मा$_{३}$	[मा$_{१}$]

आ→	मा$_{१}$	मा$_{२}$	मा$_{३}$
आ→	मा$_{२}$	मा$_{३}$	मा$_{१}$
आ→	मा$_{३}$	मा$_{१}$	मा$_{२}$

आ→	मा$_{१}$→	मा$_{२}$	मा$_{३}$
आ→	मा$_{२}$→	मा$_{१}$	मा$_{३}$
आ→	मा$_{३}$→	मा$_{१}$	मा$_{२}$

यथा यथा मातृकाणां संख्या वर्धते तथा तथा वंशक्रमस्य संकीर्णतापि वर्धते। मातृकाणां परस्परेण वर्तमानस्य संबन्धस्य निर्माणे काश्चन मितयः सन्ति। सति तु पाठान्तराणां प्रमादानां च वैविध्याधिक्ये मातृका व्यामिश्रिता भवन्ति यासां वंशक्रमनिर्धारणा अतीवसमस्या-प्रदात्री भवति। मातृकास्थितानां पाठानामाधारेण मातृकावंशनिर्धारणा श्रमसापेक्षेति यद्यपि सत्यं तथापि साऽधिकज्ञानकरीति द्रष्टव्यम्।

कल्पितेन केनचन पद्येन युक्तासु, कल्पितासु मातृकासु स्थितैः, कल्पितैः पाठै रूपितः, कल्पितो वंशक्रमः

सार्वत्रिकः पाठः

(सा.पा.) जनता यदि नास्रक्ष्यल्लिपिज्योतिरनुत्तमम्।
जगदेतत् तमोभूतमभविष्यन्न संशयः॥

तिगळारि : (ति) जनता यदि नास्रक्ष्यल्लेखनालोकमुत्तमम्।
जगदेतत् तमोभूतमभविष्यन्न संशयः॥

नन्दिनागरी : (न.) अनता चेन्नाकरिष्यल्लिपिदीपमनुत्तमम्।
विश्वमेतत् तमोमग्नमभविष्यन्न संशयः॥

कन्नड$_{१}$: (क$_{१}$) जनता यदि नास्रक्ष्यल्लिपिज्योतिरनुत्तमम्।
जगदेतत् कमोभग्नमभविष्यन्न संरयः॥

कन्नड$_2$: जसना यदि नास्रक्ष्यल्लिपिजोतिरनुत्तमम्।
(क$_2$) जगदेतत् तमोभूतमभविष्यन्न संशयः॥

मलयाळम् : जनता यदि नास्रक्ष्यल्लिपिज्योतिरनुत्तमम्।
(म) जगत्येषाऽन्धकाराक्ताभविष्यन्नैव संशयः॥

ग्रन्थ : जनता यदि नास्रक्ष्यल्लिविज्योतिरनुत्तमम्।
(ग्र) जगत्येषाऽन्दकाराक्ताभविष्यन्नैव संशयः॥

(कल्पित)"लिपिरञ्जिनी"व्याख्यायां (कल्पित)"लिपीश्वर" रचितायां वर्तमानः पाठः :

(लि) जनता यदि नास्रक्ष्यल्लिपिज्योतिरनुत्तमम्।
जगदेतत् तमोभूतमभविष्यन्न संशयः।

लिपीश्वररचिता व्याख्या= जनता-जनानां श्रेणिः, अनुत्तमम्-अतिप्रशस्तं, लिपिज्योतिः-अक्षरविन्यासरूपं प्रकाशं, न, अस्रक्ष्यत्-अकरिष्यत्, यदि-चेत्, एतत्-दृश्यमानं, जगत्-विश्वं, तमोभूतम्-अन्धकाराकारम्, अभविष्यत्, न संशयः-संदेहः।

सा,लि,क$_2$ तथा **ति**-एता मातृकाः प्रथमं वर्गं कुर्वन्ति। **क$_2$** मातृकायां 'न'कार'त'कारौ क्रमेण 'स'कार'न'कारत्वं प्रापितौ अक्षराध्यासकारणात्। 'ज्योति'रित्यत्र 'जोति'रिति लेखनं केवलं साधारणो लिपिकरकृतः प्रमादः। **ति**-मातृका तु भिन्नतरेण वर्गेण संयुनक्तीति यद्यपि भाति, तथापि नैतदस्ति। वस्तुतस्तु 'अनुत्तमम्' इति शब्दं दुष्टं मन्वानेन लिपिकरेण 'उत्तम'मिति तत्र परिवर्तनं कृतम्। परन्तु च्छन्दोभङ्गः समजनि। तदपि शुद्धीकर्तुं प्रयतितवाँल्लिपिकरः पादमेव पर्यवर्तयत् !

ममातृका, ग्रमातृका च द्वितीयं वर्गं जनयतः। **ग्रमातृकायां** 'वि' इत्यत्र 'पि' इति लिखितम् अक्षराध्यासकारणात्। 'द'कारस्थले

'ध'कारलेखनं साधारणो लिपिकरप्रमादः।

न-मातृका भिन्नतमा। 'ज'कारस्थले 'अ'कारलेखनम् अक्षराध्यासजम्।

क,मातृका पूर्वार्धे प्रथमवर्गीयमातृकागतं पाठं धत्ते। परन्तु उत्तरार्धे **न**-मातृकागतं पाठमेषा अनुसरति। तस्मादियं व्यामिश्रिता मातृका। 'त'कारस्थले ककारः, 'म'कारस्थले भकारः, 'श'कारस्थले च रेफः- एते सर्वेपि अक्षराध्यासजाः दोषाः।

प्रथमे वर्गे वर्तमानः पाठः सार्वत्रिकं पाठं तथा व्याख्यागतं पाठं समर्थयते। 'ज्योतिः'शब्दः दीपशब्दाद् बलवत्तरार्थवान्। 'लेखन' मिति शब्दो 'लिपि'रिति शब्दस्याग्रे न्यूनशक्तिकः। 'तमोभूत'शब्दस्य केवलं तमोवाचकत्वात् 'तमोमग्न'शब्दात् प्रबलतरः। अपि च 'तमः' शब्दस्य कदाचिदज्ञानपर्यायत्वमपि (वेदान्ते)। 'अन्धकार' इति शब्दो मितः। 'जनता-जगतोः' प्रथमाक्षरगतः प्रासोऽवधेयः। तस्मात् प्रथमवर्ग्यमातृकागतः पाठः आदर्शमातृकागतं पाठं समीचीनमनुसरति। "लिपिमालिका"नाम्नी काचित् स्वतन्त्रा कृतिरस्तीति, सा पद्यमेतत् प्रथमवर्गीयमातृकापाठयुक्तमेवोद्धरतीति च भावयाम। तदा चास्मदीयो निर्णयो दृढायते। तथापि 'तमोमग्न-तमोभूत'शब्दौ विभिन्नौ द्वौ पाठसंप्रदायौ प्रतिनिदधाते।

अग्रे (पु.११२)निर्दिष्टं चित्रं मातृकाणामेतासां वंशक्रमं ददाति।

अ.आ.मा.मू-अनुपलब्धा आदर्शमातृका या सर्वासामप्यस्मदुपलब्धानां मातृकाणां मूलम्।

अ/उ.मू.मा-अनुपलब्धा/उपलब्धा मूलमातृका



अस्माभिरुपलब्धानां मातृकाणां परिशीलनेन कदाचिदेवं ज्ञातुं शक्यते यत् **तास्वेवान्यतमा** मातृका मूलमातृका, अन्याश्च पुत्रिकारूपाः।

यदि एवं लिख्यते तदाऽस्यार्थः सुगमो भवति :-

ग्रन्थकर्त्रा रचितं मूलम्(अनुपलब्धम्)→आदर्शमातृका (अनुपलब्धा/ उपलब्धा वा)→ मातृकाः पुत्रिकाश्च।(उपलब्धाः)

एषा मूलमातृका केवलम् **अस्माभिरुपलब्धानां** मातृकाणां मूलमिति वक्तुं शक्यते ; किन्तु 'ग्रन्थकर्त्रा रचितं पाठम् **अलोपागमादेशम् प्रतिनिदधानं मूलम् इदमेव**' इति सपणबन्धं प्रतिज्ञातुं **नैव** शक्यते।

प्रश्नः :-तर्ह्येवं मातृकावंशक्रमनिर्धारणा किमर्थिका ?

उत्तरम् :-ग्रन्थकर्त्रैव रचितस्य वास्तविकस्य ग्रन्थपाठस्य स्वरूपं न वयं जानीमहे।कनिष्ठपक्षत्वेनास्मदुपलब्धानां मातृकाणां यः पाठस्तस्य मूलं कीदृशमासीदिति निर्धारणां कर्तुं मातृकावंशनिर्माणेन शक्यतेऽस्माभिः। अस्माकं जीवितकालस्य ग्रन्थकर्तृजीवनकालापेक्षया आधुनिकत्वात्,

ग्रन्थकर्त्रा किं वस्तुतो रचितमिति आमूलचूलं ज्ञातुमशक्यत्वेऽपि पुत्रिकाणां पौत्रिकाणामपेक्षया तदादर्शमातृकायां पाठान्तरप्रमादा न्यूनतराः इति तु प्रतिज्ञातुं शक्यते।

अत्रैतदवधेयम्। प्राचीनासु मातृकासु वर्तमानाः पाठाः सदापि दोषदूरा इति, नवीनमातृकासूपलभ्यमानेष्वेव पाठेष्वङ्गीकार्यत्वधर्मोऽधिक इति च केषाञ्चनोन्मिषेन्मनीषा। वस्तुतस्तु नैषा साध्वी दृष्टिः। कदाचित् पुरातनासु मातृकासु स्वीकरणायोग्याः पाठा वर्तेरन्, नवीनास्वेव मातृकासु ग्राह्याश्च पाठाः। अन्यच्च। संपाद्यमानस्य ग्रन्थस्य पूर्वमुद्रितत्वे पूर्व-मुद्रितस्य पाठानां तथा,भिन्नग्रन्थेषूपलभ्यमानानां प्रकृतग्रन्थोद्धृतीनां च परिशीलनं मातृकावंशक्रमनिर्धारणार्थमवश्यं करणीयम्।

७.अधिकाः केचन विचाराः

ग्रन्थसंपादकेन यावच्छक्ति उपलब्धानां सर्वासां मातृकाणामथवा मातृकाणामतीवभूयस्त्वे, प्रदेशप्रतिनिधिभूतानां लिपिप्रतिनिधिभूतानां वा संकलनं करणीयम्। प्रदेशप्रतिनिधिभूता मातृका यथा-आन्ध्रतो द्वे मातृके तमिळुनाडुप्रदेशतस्तिस्रो मातृका इतिवत्। लिपिप्रतिनिधिभूतास्तु ग्रन्थलिपिमातृके द्वे, तिगळारिलिपिमातृकास्तिस्रः, मैथिलीलिपिमातृका एका गौडीलिपिमातृके द्वे इतिवत्। किन्तु समानलिपिमातृकाणां सदापि समानवंशक्रम इति न भ्रमितव्यं, कदाचित् समानलिपिमातृकाणामपि भिन्नवंशक्रमवत्वात्, भिन्नलिपिमातृकाणामपि समानवंशक्रमवत्वाच्च।

मातृकायाम् “उद्बुद्ध्वा” इत्यशुद्धे पाठे सति तेन पाठेन साकं(न पुनस्तदपवारणेन)“उद्बुद्ध्य” इति शुद्धः पाठो दर्शनीय इति यदि संपादको मन्यते, इत्थङ्कारं तत्प्रदर्शनं कर्तुं शक्यते-

उद्बुद्ध्वा (उद्बुद्ध्य ?)

प्रामादिकेनापि पाठेन कस्मिंश्चनार्थे निःसृते, तस्य चार्थस्य

हास्यास्पदत्वे आश्चर्यसूचकचिह्नं दातव्यम्। यथा-

आनन्दमन्दाग्निस्तोत्रम् [!आनन्दमन्दाकिनीस्तोत्रम्]; द्वितीये दाये [!द्वितीयेऽध्याये]; तनुर्वेदः[!धनुर्वेदः]; युद्धयन्नपि क्षितिलवेन [!क्षतिलवेन] विहीन, राजन् ! ; रामेभः [!रामेभ्यः]

कस्याञ्चिन्मातृकायां समग्रस्य वाक्यस्य पाठान्तरम्, अपरस्यां च मातृकायां च वाक्यैकदेशस्य पाठान्तरमिति परिस्थितिः शिरोवेदनाय। यथा-

अङ्गीकृतः पाठः- "हिता गीस्ते सुधा यथा"
मैथिलीः (समग्रस्य वाक्यस्य पा.) "तव वाण्यमृतायते "।
गौडी : (केवलं 'हिता'इत्यस्य पा.) "स्वाद्वी"
नेवारी :(केवलं 'यथा'इत्यस्य पा.) "समा"

एतादृशेषु प्रसंगेषु पाठान्तराणां प्रदर्शनं शीर्षविदनं प्रसूत इत्यत्र न संशयः। प्रकृतेन तु ग्रन्थकर्त्रा सूच्यमानोऽभ्युपाय इत्थंभूतः-

$^{१--२}$हिता^{२} गीस्ते सुधा ^{३}यथा$^{३--१}$ ॥

पाठान्तराणि:-१.तव वाण्यमृतायते-मै.
२.स्वाद्वी-गौ.
३.समा-ने.

अत्र,अङ्गीकृतस्य पाठस्य समग्रेऽपि भागे पाठान्तरमस्तीति सूचनार्थं स्वीकृतस्य पाठस्यादिमे भागे तथाऽन्तिमे भागे १ संख्या निवेशिता। लघुस्तिर्यग्रेखा आदिमभागे संख्यानन्तरम्, अन्तिमे च भागे संख्यातः पूर्वं निवेशिता। एतेन समग्रस्यापि स्वीकृतस्य पाठस्य पाठान्तरं वर्तत इति स्पष्टीकृतम्। स्वीकृतपाठान्तर्गतेषु भागेषु वर्तमानयोः पाठान्तरयोः सूचनं पाठान्तरयुक्तभागयोरादौ अन्ते च तिर्यग्रेखालेखनं विना केवलं २,३ संख्ययोर्निवेशेन कृतम्। अथवाऽधोनिर्दिष्टः क्रम आश्रीयताम्:-

^{१}[^{२}हिता^{२} गीस्ते सुधा ^{३}यथा^{३}]^{१} ॥

अत्र समग्रे भागे पाठान्तरं सूचयितुम् आवरणचिह्नं दत्तम्।

पाठान्तराधिक्ये प्रमादाधिक्ये च, कः पाठः स्वीकरणीयः कश्च त्याज्यः? प्रायोऽधिकासु मातृकासु वर्तमानस्य पाठस्यैव ग्राह्यतमत्वं, सति च तस्य प्रसंगौचित्यवत्त्वे ।

उपलब्धासु सर्वासु मातृकासु सत्यपि पाठानामैक्ये, तेषां प्रसंगौचित्यहीनत्वे लिपिकरप्रमादजन्यत्वे व्याकरणदोषवत्त्वे छन्दोभङ्ग-वत्त्वे(पद्येषु) च, तच्छोधनं बाढं करणीयं संपादकेन। अकृते शोधने केवलं प्रतिलिपिकरणमेतद्भविष्यति न पुनः संपादनम्।

प्रसंगौचित्यहीनत्वे-प्रविष्टौ किन्नरानीकं निगूढं शुकसारणौ।
पाठ एवं शोधनीयः- प्रविष्टौ वानरानीकं निगूढं शुकसारणौ।

लिपिकरप्रमादजन्यत्वे-घनेशो विज्ञनाशकः।
पाठ एवं शोधनीयः-गणेशो विघ्ननाशकः।

व्याकरणदोषवत्त्वे-विलासमान् नृत्यति नीलकण्ठः।
पाठ एवं शोधनीयः-विलासवान् नृत्यति नीलकण्ठः।

छन्दोदोषवत्त्वे-हरियक्षान्न बिभेति पश्यन् परं हसति स्वशुण्डां मुदा।

पाठ एवं शोधनीयः-हर्यक्षान्न बिभेति पश्यति परं हस्ती स्वशुण्डां मुदा (शार्दूलविक्रिडितम्)।

मातृकासु दृष्टानां <u>सर्वेषां</u> भिन्नानां पाठानां प्रसंगौचित्यवत्त्वे, पदप्रयोगशुद्धिमत्त्वे छन्दःशुद्धिमत्त्वे च संपादकस्य धर्मसंकटम्। किं ग्राह्यं किं न ग्राह्यम् ? यथा-

कस्यापि ग्रन्थस्य पञ्च मातृका उपलभ्यन्त इत्यूह्यताम्। तत्र-तिसृषु मातृकासु "खलाद् बिभीत मा युष्मान् पाति धर्मो न संशयः" इति पाठः। द्वयोर्मातृकयोः-"नीचाद् बिभित मा यस्माद् यूयं धर्मेण संगताः" इति पाठः।

अत्र किं प्रथमः पाठो ग्रन्थकर्तृरचितत्वेन द्वितीयश्च पाठान्तरत्वेन परिगणनीयोऽथवा द्वितीय एव ग्रन्थकर्तृरचितत्वेन प्रथमश्च पाठान्तरत्वेन परिगणनीयः? एतादृशेषु प्रसंगेषु निर्णयकरणं सर्वेषामपि कृच्छ्रसाध्यम्। तादृशे प्रसंगे एकमभीष्टं पाठं ग्रन्थशरीरे दत्त्वा तदधः ~~~~~एवं तरङ्गरेखां लिखित्वा अन्यः पाठः पाठटिप्पण्यां दातव्यः। तरङ्गरेखेयं ग्रन्थकर्तृनिर्मितपाठस्य निर्णये संपादकस्य मतिर्दोलायत इति सूचयति।

स्वीकृतग्रन्थपाठशरीरे प्रथमस्य पाठस्य समादृतत्वे स पाठः- "खलाद् बिभीत मा युष्मान् पाति धर्मो न संशयः" एवं, द्वितीयपाठस्य ग्रन्थशरीरे समादृतत्वे पुनः, स पाठः- "नीचाद् बिभित मा यस्माद् यूयं धर्मेण संगताः" एवं च सतरङ्गरेखाको ग्रन्थशरीरे दातव्यः।

इदमिहावधेयम्-यः पाठो ग्रन्थकर्तृरचितत्वेन स्पष्टं ज्ञातः तस्य ग्रन्थकर्तृरचितत्वेन ज्ञापनं, यश्च पाठो ग्रन्थकर्तृरचितत्व-पाठान्तरवत्त्वोभयधर्मवत्त्वेन भासमानः संशयास्पदं भवति, तस्य च संशयास्पदत्वेनैव विना विकाङ्क्षां ज्ञापनम्-**एतदुभयमपि** संशोधनकोटिप्रविष्टम्।

परिगणनानर्हाणां प्रमादानां प्रदर्शनं नावश्यकम्। 'त्यजति' इति लेखनस्थले 'तजति' इति लेखनं कृतमिति भावयामः। तादृशानां क्षुद्राणां प्रमादानामाधिक्ये, पाठटिप्पण्यां तेषां प्रदर्शनं केवलं ग्रन्थकलेवरवृद्धये, येषाम् अप्रदर्शनमेव वरं, वैरल्ये तु प्रदर्शनं न दोषाय। मातृकागतैतादृशक्षुल्लकप्रमादाधिक्ये, पीठिकायां तज्ज्ञापनमलम्।

अवसितः पाठान्तरसूचनविचारः। इदानीं संपादकीया टिप्पणी (पाठटिप्पणी)विचारयितव्या। पाठान्तराणां संपादकीयटिप्पणीनां (पाठटिप्पणीनां)चोभयेषाम् एकस्मिन्नेव भागे केषुचन ग्रन्थेषु यत्प्रदर्शनं तत्पाठकानां मनस्यस्तव्यस्ततामिव जनयति। निर्णयसागरमुद्रणालये

मुद्रितेषु ग्रन्थेषु तु ग्रन्थशरीराधः काचित् तिर्यग्ररेखा, ततो पाठान्तर-सूचनार्थं कश्चन स्तरः, ततस्तिर्यग्रा तरङ्गरेखा तदधश्च संपादकीयटिप्पण्य एवं प्रायिकः क्रमः। (केषुचन ग्रन्थेषु च तरङ्गरेखा प्रथमं ततश्च तिर्यग्रेखा एवं साधारणरेखा-तरङ्गरेखयोर्निवेशनविपर्यासः।)अयमेव क्रमः साधुतरो येन पाठान्तरैर्व्यामिश्रणं न जायते संपादकलिखितानां पाठटिप्पणीनाम्।

अन्यच्च। निर्णयसागरे मुद्रितेषु ग्रन्थेषु पाठान्तरसूचनार्थं स्वीकृत-स्य पाठस्याव्यवहितोत्तरमूर्ध्वभागे १, २, ३, ४ इत्यादिरीत्या देवनागर्या सूक्ष्मा अङ्का दीयन्ते। तत्तत्पाठसंख्यायुक्ता अधस्तान्निर्दिष्टा भागा-स्तत्पाठानां पाठान्तररूपाः। संपादकीयटिप्पण्या आवश्यकता यत्र प्रतीयेत तत्र तद्भागव्यवहितोत्तरमूर्ध्वभागे 1, 2, 3, 4 इत्यादिरीत्या सूक्ष्मा अराबिक् अङ्का दीयन्ते। तत्तद्भागसूचितसंख्यायुक्ता अधस्तान्निर्दिष्टा भागा अमुके भागे वक्तव्यं चिन्त्यं वा वर्तते इत्यादिरीत्या संपादकीय-टिप्पणीसूचनात्मका भागाः। संपूर्णानन्दसंस्कृतविश्वविद्यानिलये प्रकटितेषु नित्याषोडशिकार्णवादिषु ग्रन्थेष्वप्ययमेव क्रमोऽनुसृतः। परन्तु अत्र स्तरभेदिका तिर्यग्रेखा नास्ति।

डा.वि.राघवन् अपि सकिञ्चिद्व्यत्यासं क्रममुमाश्रित्य कृष्ण-सूरिविरचितस्य अमरमण्डनस्य संपादनं कृतवान्[१]। संपादकीयटिप्पण्यर्थं तेनाङ्कान् अदत्तवता * एवंप्रकारकं नक्षत्रचिह्नं निवेशितमिति विशेषः।

प्रश्नः: § ‡ † $ इत्यादीनां केषाञ्चन चिह्नानाम् उपयोगः पाठान्तरनिर्देशनार्थं केषुचन ग्रन्थेषु पूर्वं क्रियते स्म। किमत्र वक्तव्यम्?

उत्तरम्: एतेषां चिह्नानामुपयोगे, यानि चिह्नानि स्वीकृत-पाठभागे दर्श्यन्ते तेष्वेव पाठटिप्पणीभागे वर्तमानेषु शृङ्गग्राहिकया शीघ्रं दृङ्निपातनं न शक्यते नेत्रायासश्च जायते। तस्मात् तानि सर्वथा

१.अमरमण्डनम्-सं.वि.राघवन्। प्र.डेक्कन् कालेज्, पुणे १९४९

नोपयोक्तव्यानीति प्रकृतग्रन्थकर्त्रीयं मतम् (अद्यत्वे प्रायो नोपयुज्यन्ते)।

पाठान्तरलिपिकरप्रमादादिप्रदर्शनभागः-मातृकायामुपलब्धेन ग्रन्थपाठेन संबद्धः। संपादकीयटिप्पणीभागश्च-ग्रन्थकर्तृरचितेन वाङ्मयेन संबद्धो यत्र १.व्याकरणविचारः २.खण्डनं ३.मण्डनं ४.अध्यायान्तरेण ग्रन्थान्तरेण वा संवादः ५.उद्धृतांशस्यौचित्यानौचित्ये इत्यादयो विषयाः।

अन्ये क्रमाः:-१.पाठान्तराणां संपादकीयटिप्पणीनां च निवेशनं कैश्चिद् ग्रन्थान्ते क्रियते।२.वामे पुटे ग्रन्थपाठः, अधस्तात् पाठान्तर-सूचना, संपादकीयटिप्पणी दक्षिणे पुटे.३.दक्षिणे पुटे ग्रन्थपाठः, अधस्तात् पाठसूचना, संपादकीया टिप्पणी वामे पुटे।४.वामे पुटे ग्रन्थपाठः, दक्षिणपुटे पाठान्तरसंपादकीयटिप्पण्यौ ५.दक्षिणे पुटे ग्रन्थपाठः, वामपुटे पाठान्तरसंपादकीयटिप्पण्यौ।६.ग्रन्थस्य केचन भागाः, ततः पाठा-न्तराणि, पुनर्ग्रन्थपाठः पुनस्तत्पाठान्तराणि।प्रथमे क्रमे स्वीकृत-पाठपाठान्तरयोर्वा पाठटिप्पण्योर्वा झटिति संवादं कर्तुं कष्टमेव।२-५ एतेषु क्रमेषु पाठान्तराणाम् अल्पत्वे पुटगतः स्थलावकाशो व्यर्थीभवति। ६ष्ठः क्रमः अनुस्यूतपठने विघ्नं जनयति।पुटानामुपरि मध्यभागे ग्रन्थनाम दत्त्वा पुटानामधस्तात् पुटसंख्याम् मध्यभागे दत्त्वा परामार्शसंख्यासु उपरि दत्तासु सुष्ठुतरं पाठकनेत्रसुखं सौन्दर्यं भवति।केषुचन ग्रन्थेषु परामर्शसंख्या वामपुटस्य दक्षिणभागे दक्षिणपुटस्य वामभागे च दीयते। प्रकृतस्य ग्रन्थकर्तुरभिप्रायेण यदि वामपुटीया परामर्शसंखा वामभागे, दक्षिणपुटीया परामर्शसंख्या च दक्षिणभागे दीयते, झटिति अभीष्टस्य पुटस्य परिवर्तने सौकर्यं जायते। इङ्ग्लीष्भाषायां Thesaurus ग्रन्थेऽयमेव क्रमः।पद्यसंख्यायाः पद्योत्तरं लेखनं संप्रदायानुसारेण। किन्तु क्रमेणानेन कदाचिज्झटित्यभीष्टपद्ये दृङ्निपातनं क्लेशायेव।तस्मात् पद्यारम्भ एव पद्यसंख्या दातव्येति प्रकृतग्रन्थकर्त्रीयं मतम्।

अधस्तान्मुद्रितग्रन्थादर्शपुटं (वामपुटं) प्रदर्शितम्।



१३.पीठिका

एकस्मिन् वाक्ये ग्रन्थनाम-विषय-ज्ञापनम् एव प्रथमनिर्देष्टव्यं वस्तु(प्रतिज्ञावाक्यम्) ।ग्रन्थकर्ता, तदीया अपराः कृतयः(यदि सन्ति), तस्य जीवितसमयः (यदि ज्ञायते)तस्य स्थलं(यदि ज्ञायते), इत्यादिकं द्वितीयादिवाक्यपरिचेतव्यम्।ततो व्याख्या/व्याख्यानानि, तेषामुपलब्धा-नुपलब्धत्वे, केवलमन्यत्रोद्धृतव्याख्यानाम्/ व्याख्याभागैर्व्याख्यास्तित्वा-नुमानं,ग्रन्थकर्तृजीविताावधौ प्रसिद्धा इतरे ग्रन्थकर्तारः, ग्रन्थकर्त्रा नामग्राहमुद्धृता अन्यरचितग्रन्थभागाः, तेषामुद्धृतौ हेतुस्तत्खण्डनं तन्मण्डनं वेति विचार इत्यादीत्यादि।

ग्रन्थपरिचयमदत्त्वैव- मातृकाणां विवरणं, मातृकायां वर्तमानस्य ग्रन्थस्य यत् प्रतिपाद्यं शास्त्रं तस्य क्रमिक इतिहास- इत्यादिके वस्तुनि प्रथममेव दत्ते, ग्रन्थपरिचयं वाञ्छतः पाठकजनस्य अपरिचिते निबिडे च कानने दिग्भ्रमो गम्यनगरमार्गान्विषणे प्रयासश्चेव भवेत्।

पीठिकेयं द्विस्तरा भवितुमर्हति। पूर्वस्तरीया पीठिका संपादितस्य ग्रन्थस्य, उत्तरस्तरीया च मातृकाणाम्।

ग्रन्थपीठिकासु मातृकाणां परिचयम् उपक्रमभागत्वेन यत् केचित् संपादकाः कुर्वन्ति तत् स्वश्रमस्य पाठकेभ्यो ज्ञापनकुतूहलात्। रामायण-महाभारताद्यत्यन्तप्रसिद्धग्रन्थेष्वेवं क्रमः प्रशस्तो नान्यत्रेति प्रकृतग्रन्थ-कर्त्रीयं मतम्।

शाकक्रयन्यायोऽत्रानुसन्धेयः। आपणं गत्वा देवदत्त आह "भोः शाकं मे देहि "इति। आपणिकः "अमुकशाकस्यैतन्मूल्यम् अमुकशाकः पाकार्ह" इत्यादि वदति। "अमुकशाकस्य क्षेत्रे वर्धनार्थममुकं कष्टमनु-भूतम्"इति नापणिको ज्ञापयति, "किं कष्टमनुभूतम्" इति नापि देवदत्तः पृच्छति। यदि कदाचित् पृच्छति, तच्छाकक्रयानन्तरम्। तद्वदि-हापि द्रष्टव्यम्।

ग्रन्थे यद् वर्तते तस्य ज्ञापनं प्राथमिकं कर्तव्यं संपादकस्य। मातृकास्वरूपाणां तत्संपादनेऽनुष्ठितानां च विधीनां परिचयस्तदनन्तर-कालिको भवितुमर्हति। ग्रन्थपरिचयमलब्ध्वा कोऽपि पाठकः संपादकीयं श्रमं स्पष्टं न वेत्ति। संपादिते ग्रन्थे प्रधानो भागः संपादितो ग्रन्थ एव। तस्मात् पीठिकायां ग्रन्थपरिचयस्य प्राधान्यं दातव्यम्। वृक्षस्य फलं बुभुक्षति लोको न मूलं, न चैतदपराधाय ! (केषाञ्चित् कन्दानां मूलत्वेऽपि यत्तेषां भक्षणं तत् तेषां भक्षणार्हत्वात् फलसदृशत्वाच्च।)ग्रन्थः फलं, ग्रन्थपरिचयः फलायितः कन्दः !

ननु "पुटपरिवर्तनं कुर्वाणेन पाठकेन स्वाभीष्टानुसारं मातृका-परिचयभागस्य ग्रन्थपरिचयभागस्य वा प्रथमं पठितुं शक्यत्वात् मातृका-परिचयभागस्य पीठिकायां प्रथमं स्थापितत्वे कोऽपि दोषो न भवति" इति चेन्न, पीठिकायां ग्रन्थपरिचयस्यापि प्रथमं स्थापनस्य तुल्यत्वात्, रक्षाकवचे यस्य ग्रन्थस्य संज्ञा मुद्राप्यते, पीठिकायां तस्यैव ग्रन्थस्य विषये प्रथमपरिचायनमूलकस्य प्राधान्यप्रदानस्य औचित्यतरत्वाच्च।

पूर्वोक्तं सर्वमपि मुद्रिते ग्रन्थे पीठिकायां को विषयः प्रथम-**मुद्रणीय** इतिविषयकं **न पुनः संशोधनकर्म**विषयकम्। वास्तविकं पाठ-विश्लेषणकार्यं प्रथमत एव करणीयम्। ततो ग्रन्थस्तरमौल्यनिर्णयः। पाठनिर्णयमकृत्वा संपादकेन यस्मिन् कस्मिंश्चिदुक्ते, ततश्च तत्र दोषो वर्तत इति ज्ञाते('अयं पाठः प्रक्षिप्तः', 'अस्मिन् पाठे दोषोऽस्ति', 'अत्र किञ्चिल्लुप्तं तस्मात् पूर्वमेतद्विषये यदुक्तं तन्न समीचीनम्' इत्यादिक्रमेण) सर्वोऽपि मौल्यनिर्णयायासो व्यर्थीभवति। तस्मात् पाठ-निर्णयः प्रथमं कार्यः। किन्तु पाठनिर्णयविषयकं यद् वक्तव्यं तत्तु पीठिकायां ग्रन्थपरिचयानन्तरं दातव्यम्।

कासुचन संपादितग्रन्थस्थपीठिकासु कदाचिदस्तव्यस्ततेवानु-भूयते। उपक्रमभाग एव ग्रन्थसंपादनार्थं प्रेरणा, कार्तज्ञ्याभिव्यञ्जनमि-त्यादिका वैयक्तिका विषयाः, अपरिचाय्यैव ग्रन्थं पीठिकायाः प्रथम एव प्रघट्टके-ग्रन्थविमर्शो ग्रन्थस्तुतिरित्यादिकं क्वचिद्दृश्यते। मातृकापरि-चयप्रसंगे वैयक्तिकविषयाणाम् अनावश्यकः प्रवेशस्तु सुतरामसंबद्धः। इङ्ग्लीष्पीठिकासु कदापि नेमे दोषाः भवन्तीति यत् केषांचिन्मतं तदिङ्ग्लीष्-भाषाभक्त्यावेशादिजन्यम्। **न हि पीठिकोत्कृष्टत्वस्य लक्षणं 'पीठिकात्वे सतीङ्ग्लीष्भाषारचितत्वम्' इत्यतिव्याप्त्यव्याप्त्यसंभवदोषरहितं संभवति।**

अधुना पीठिकाकरणशिक्षणार्थं कल्पितस्य "वाक्यार्थसुमनः-श्रेणी"नामकस्य(किञ्चिदिव क्लिष्टस्य)ग्रन्थस्य पीठिका रच्यते:-

१.एकं वाक्यं सग्रन्थनाम सदार्ढ्यं सनिर्णयं च (प्रतिज्ञावाक्यम्)।

इयं **वाक्यार्थसुमनःश्रेणी** व्याकरणकृतिः सप्ताध्यायात्मिका या "पराक्रमबाहु" रचित "धीरोच्चाटना"ख्यग्रन्थे वर्तमानस्य "धीर-शम्भु"रचित"धीरार्थरत्नाकर"ग्रन्थखण्डनस्योत्पाटनपूर्वकं धीरशम्भु-मतसमर्थनरूपा।

२.ग्रन्थकर्तृनाम

अस्याः कर्ता सार्वभौमपण्डितः।

३.एतेनैव ग्रन्थकर्त्रा प्रणीता अपरे ग्रन्थाः(यदि सन्ति)।

अधोनिर्दिष्टा अन्ये ग्रन्था ग्रन्थकर्तृप्रणीताः:-

१.गौरवसुमनःश्रेणी-मीमांसाग्रन्थः।संपादको मलयाळंभाषानु-वादकश्च डा.ए.एन्. वामनशास्त्री।प्र.शास्त्रपरिषत्, कुकुटक्रोडः, केरलम्। १९८२

२.शारदाविलासनाटकम्-व्याकरणालङ्कारमीमांसान्यायवेदा-न्तानां श्लेषभङ्ग्या प्रतिपादकमपूर्वं सप्ताङ्कं नाटकम्।संपादकः करदीपिका-ख्यव्याख्याकारश्च शतावधानी गरुडाचार्यः।प्र.भारतीयविद्याप्रतिष्ठानं, चेन्नपत्तनम् १९७४.

३.क्रियाकामधेनुः-पद्यात्मको धातुकोशग्रन्थः।अप्रकटितः। अस्य ग्रन्थस्य ग्रन्थलिपिलिखिता मातृका बन्नेरुघट्ट इत्यत्र वर्तमाने हस्तप्रति-संस्थाने समुपलभ्यते।हस्तप्रतिसंख्या एस्.२४५/१३. (अत्र पुटाधस्ताद् ग्रन्थस्य उपक्रमोपसंहारौ पुष्पिका उत्तरपुष्पिका च एतत् सर्वं प्रदर्शनीयम्।)]

४.प्रमोददीपिका-वेणुरामविरचितब्रह्मप्रमोदस्तोत्रस्य व्याख्या। अप्रकटिता।चित्रदुर्गस्थे लिपिकासंशोधनकेन्द्रे ग्रन्थस्यास्यास्तिस्रो मातृका

उपलभ्यन्ते। प्रथमा मातृका तालपत्रेषु कन्नडेन लिखिता। मातृकाङ्कः ३४३५ (अन्तिमं पत्रं नष्टम्।). द्वितीया मातृका तालपत्रेषु तिगळारी-लिप्या लिखिता। मातृकाङ्कः ५६/२. तृतीया मातृका नन्दिनागर्या कागदे लिखिता। मातृकाङ्कः ३४८ (अत्रापि पूर्ववत् पुटाधस्ताद् ग्रन्थस्य उपक्रमोपसंहारौ पुष्पिका उत्तरपुष्पिका च- एतत् सर्वं प्रदर्शनीयम्।)]

५. साङ्ख्यशोधिनी-अनुपलब्धा। नाम्ना साङ्ख्यशास्त्रखण्डनपरेति ऊह्यते। एतस्याः परामार्शो वाक्यार्थसुमनःश्रेण्यां द्विः कृतः-१. "शब्दार्थ-संबन्धविषये साङ्ख्यनामाधिश्चिकित्सित एवास्मत्कृतायां साङ्ख्यशोधि-न्याम्।" (पु. ६८). २. "अत्र यद्बुद्धिवैभवं साङ्ख्यैः प्रदर्शितं तत्तु सम्यगेवा-स्माभिः साङ्ख्यशोधिन्यां स्फोरितम्।" (पु. ९७)

४. जीवितकालः(यदि ज्ञातः).

सार्वभौमपण्डितस्य कालः क्रि.श. १६शं शतकमिति वयं निष्क्लेशं निश्चिनुमहे-अस्मन्निश्चयस्येमे हेतवः-१. धीरोच्चाटनकर्ता पराक्रमबाहुः क्रि.श. चतुर्दशशतके समुत्पन्नः। (द्र. धीरोच्चाटनम्-संपादकः महामहोपा-ध्यायकर्णाटकनाथशास्त्री गुञ्जेश्वरप्रकाशनसंस्था मैसूरु १९४४। पीठिका पु. ६-९) २. वाक्यार्थसुमनःश्रेण्याम् 'उद्दामनरसिंह'प्रणीतस्य 'शाब्दिक-घण्टाघोष'स्य परामर्शो बहुवारं कृतः। एष उद्दामनरसिंहः क्रि.श. १५शे शतके जीवित आसीदिति निश्चितम्। (द्र. एल्. पि. रामनायकचतुर्वेदि-रचितो लेखः, "उद्दामनरसिंहस्य समयः" *Northern College Bulletin* सं. १५ पु. १३४-१४३). ३. सार्वभौमपण्डितस्य मतानि पौनःपुन्येन भूरिबोधस्य आर्षाकूते नामग्राहं समुद्धृतानि-यथा "तस्मादेव सार्वभौमाचार्यो वाक्यार्थसुमनःश्रेण्याम् इत्थमाह-'अटोऽशो हशिणोः सिद्ध्यै भगवानुपदिश्य हम्। वल्रलोर्झल्शलोश्चैव सिद्ध्यै पुनरुपा-दिशत्। द्वितीयकोटये हं स द्विर्हल्यल्यप्युपादिशत्।' इति" (आर्षाकूतम्

पु. ४५)।(अस्माकं संस्करणे द्र.पु. ८८)भूरिबोधस्य समयो निश्चितः। सः आर्षाकूतं १७३४ ईसव्यां समापितवान् (अधिकं विवरणं जिज्ञासुभिः द्र.आर्षाकूतं, मया संपादितं, भूमिका-पु. १९-२५प्र.संतृप्तिप्रकाशनम्, कुमारपुरम् १९८१).

५.ग्रन्थकर्तुः देशः(यदि ज्ञातः)

सार्वभौमपण्डितः करञ्जग्रामे न्यवसदिति पुष्पिकावाक्येन[1] स्पष्टम्। प्रकृतस्य संपादकस्य ज्ञानानुसारेण करञ्जनामानौ द्वौ ग्रामौ स्तः।प्रथम उत्तरगुञ्जूमण्डलान्तर्गतो द्वितीयश्च लोण्डोमण्डलान्तर्गतः। सार्वभौमपण्डितेन लोण्डोमण्डलान्तर्गते करञ्जग्रामे निवासिना भाव्यमित्यभ्यूह्यते तस्मिन् ग्रामेऽधुनाऽपि सार्वभौमपण्डितस्य स्वपूर्वजत्वं मन्यमानानां ग्रामीणानां सत्त्वात्।नैषा श्रद्धा निर्मूला भवितुमर्हति तत्राधुनापि सार्वभौमोत्तरसंज्ञायुक्तानां जननाम्नामुपलब्धेः।परन्तु गुञ्जूमण्डलान्तर्गते करञ्जग्रामे नास्ति तादृशः संप्रदायः।अन्यच्च-लोण्डोमण्डलान्तर्गते करञ्जग्रामे किमपि विशालं गृहमस्ति। तत्रैव सार्वभौमपण्डितो जात इति तत्रत्या जना वदन्ति।अधुना तद्गृहस्वामी भुवनेशनामकः सज्जनो यः पि.डब्ल्यू.डी.विभागे उद्योगी। (गृहस्यैतस्य द्युतिचित्रं प्रकृतग्रन्थस्य द्वादशे पुटे दत्तम्।)

६. प्रतिपाद्या विषयाः (Synopsis)

सार्वभौमस्य परमोत्तुङ्गं ध्येयं धीरशम्भुमतसमर्थनमेवेति प्रोक्तपूर्वम्।

प्रथमगुच्छे संज्ञासाराख्ये-"त्रिमुनीनां धीरशम्भोश्च नमनम्।

१.इति पदवाक्यप्रमाणपारावारपारीणेन करञ्जग्रामनिवासिना सार्वभौमपण्डितेन विरचिता वाक्यार्थसुमनःश्रेणी समाप्ता।

पराक्रमबाहुर्वस्तुतो महाभारतगतेनोत्तरकुमारेणोपमेयः। धीरशम्भु-खण्डनं पराक्रमबाहुना यद् रचितं तत् केवलं खण्डनव्यसनितया। 'यट्' इति प्रत्याहाराभावे हेतुः(यद्यप्यकाण्डताण्डवितमेतत् प्रतिभाति तथाप्यत्र चर्चिताः केचन विषया अन्यत्र दुर्लभाः)। वृद्धिरिति संज्ञाकरणमत्यन्तोचितम्। गुणवृद्ध्योः वृद्धेरेव पूर्वोपन्यासे धीरशम्भुमतं न सम्यक्।"

द्वितीयगुच्छे शाब्दसंविदाख्ये- वेदलोकयोः सादृश्यवैसादृश्ये। "शबरस्वामिमतं पराक्रमबाहुर्न सम्यग् वेत्ति। व्याकरणप्रयोजनपरिष्कारे कुमारिलदृष्टिव्युदासाय पराक्रमबाहोः प्रयतनम् अज्ञानजन्यम्।"

तृतीयगुच्छे उपग्रहानुग्रहाख्ये- "यदात्मनेपदपरस्मैपद-व्यवस्थायां पराक्रमबाहोः पराक्रमः, स धीरशम्भुशक्तिविशेषाज्ञानमूलकः।"

चतुर्थगुच्छे सेट्कानिट्कत्वसौरभाख्ये-अनिट्कारिकाणां सविमर्शं व्याख्यानं(अत्र सार्वभौमेनोपन्यस्ताः केचन विचारा अनितरसाधारणाः)।

पञ्चमगुच्छे गजसूत्रगर्जनाख्ये- णेरणावित्यादिसूत्रस्य पराक्रमबाहुमतेन पाठपरिवर्तनावश्यकता, तन्मतस्य विस्तरशः खण्डनं च (गजसूत्रे किमपि न वदति धीरशम्भुः। प्रसंगादत्र पराक्रमबाहुर्यद् गजसूत्रे वदति, तस्य आमूलाग्रं ध्वंस एव कृतः सार्वभौमेन। किन्तु नव्यन्यायशैल्या परिष्कारे सार्वभौमस्य त्रिचतुराणि स्खालित्यानि प्रतीयन्ते)।

षष्ठगुच्छे तद्धितसिद्ध्याख्ये-तद्धितलक्षणकरणार्थं पराक्रमबाहुना कृतस्य प्रयत्नस्यावहेलना। स्वयं त्रयाणां लक्षणानां निर्मितिः स्वयमेव तत्खण्डनं च। तद्धितलक्षणकरणमसंभवमिति घोषणा।

सप्तमगुच्छे विभाषाविलासाख्ये केचन नवीना विचाराः (वस्तुतस्तु चिन्त्या एव! अत्र धीरशम्भुखण्डनकृत् पराक्रमबाहुरेव विजृम्भत इति प्रतिभाति। सार्वभौमस्य धीरशम्भौ पक्षपातः केवलमावेशजन्यः।)।

७. ग्रन्थविमर्शः / ग्रन्थस्तरनिर्णयः(Higher Criticism)

पूर्वग्रन्थानां प्रकृतग्रन्थे प्रभावः, प्रकृतग्रन्थस्य परवर्तिग्रन्थेषु प्रभावः। [ग्रन्थकर्ता दुर्घटवृत्त्या बहुधा प्रभावितः।ग्रन्थकर्तृपरवर्ती 'वटेश्वरदत्त'स्तु स्वकीये 'पदगाम्भीर्यविलासे' सार्वभौमपण्डितं सादरम् उल्लिखति।परन्तु वटेश्वरदत्तो न सार्वभौमपण्डितस्यान्धानुकारी।यत्र यत्र स सार्वभौमस्य मतमनङ्गीकार्यं मन्यते तत्र तत्र स सविनयं परन्तु सदार्ढ्यं तन्मतं प्रणुदति(इत्थंभूतलक्षणाः प्रसंगाः सर्वेऽत्र समुद्धरणीयाः)।प्रतिपादनरीतिः।[ग्रन्थकर्तुः शैली सरला द्राविडप्राणायामरहिता,अन्यूनानतिरिक्ता च।]यदुद्दिश्य स ग्रन्थरचनामारभत तस्मिन् किं सफलो वा विफलो वा।[प्रायः स सफलः। 'पराक्रमबाहुर्महाभाष्यं न सम्यग् ज्ञातवान्'इति तस्य प्रधान आक्षेपः। "एतद् भाष्यार्थापरिज्ञानमूलकम्", "इति यत् तद्भाष्याकूतावबोधाभावात्", "तत्तु भाष्यपरामर्शशून्यत्वात्" इत्यादिकानि वाक्यानि पौनः पुन्येनास्मद्दृष्टिपथमायान्ति।बहुत्र तेन कृतं पराक्रमबाहौ महाभाष्यज्ञानाभावाक्षेपः समीचीन एव तेन कृतस्य हेतूपन्यासस्य संगतत्वात्।परन्त्वेतदपवादत्वेन केषुचन स्थलेषु पराक्रमबाहुरेव पराक्रमतेतराम्।(एतत्समर्थकाः सर्वेऽपि प्रसंगाः पट्टिकया प्रस्तोतव्याः)]।अन्यच्च-या तेन वेदमन्त्राणां प्रासंगिकी व्याख्या विरचिता साऽन्यत्र दुर्लभा। [एतत्समर्थनापट्टिका]

ग्रन्थनामविषयेऽस्माकमित्थं प्रतिभाति-"वाक्यार्थसुमनोगुच्छ" इति नाम यदि ग्रन्थकर्ताऽदास्यत् समीचीनं तदभविष्यत्।क्षुपलतागुल्मवृक्षादिषु पुष्पितानां सुमनसां वृन्दस्य 'गुच्छ' इति हि प्रसिद्धं नाम।ग्रन्थानामध्यायाः 'गुच्छ' इत्येव संज्ञिताः किल ग्रन्थकर्त्रा।

क्वचिदेष त्वरया लेखनीं व्यापारयन् प्रसंगौचित्यं न गणयति। यथा----सूत्रमेष उद्धरति समर्थयते चैतदाधारेण धीरार्थरत्नाकर-

मतम्।(तत् सूत्रमुद्घियतां ससूत्राङ्कम्)किन्तु तत् सूत्रमप्रकृतमत्र (अप्रकृतत्वे कारणं दीयताम्)।

सार्वभौमश्चान्द्रव्याकरणं पौनःपुन्येनोद्धरति।परन्तु तेनोपलब्धश्चान्द्रव्याकरणपाठो दोषदूर आसीन्न वेति नास्माकं स्पष्टम्।स इत्थं वदति-"चन्द्रेणापि 'रषाभ्यां नो णः समानपदे' इत्येव सूत्रयता पाणिनीये सूत्रे कोऽपि पाठभेदो नैव सृष्टः।" परन्तु दारिलशास्त्रिणा संपादिते चान्द्रव्याकरणे (शाब्दप्रकाशनं गम्भीरपुरम् २००३) सूत्रपाठ एवं वर्तते: 'रषान्नो ण एकपदे'.

'शास्त्रेष्वाकाशशब्दस्य नपुंसि प्रायिकात्प्रयोगात्तस्य पुंस्त्वेन नामलिङ्गानुशासने निर्देशः प्रामादिकः' इति ग्रन्थकर्तुर्मतम् ।नेदं सम्यगाकाशशब्दस्य विकल्पेन पुंस्त्वस्याभिप्रेतत्वादमरसिंहेन 'वा तु पुंस्याकाशविहायसी' इत्यभिदधानेन, पुंस्यप्याकाशशब्दप्रयोगस्य प्रचुरमुपलब्धेश्च।

ग्रन्थकर्तुर्भाषा क्वचिद् विनयगन्धरहिता धृष्टा विद्वदनुचिता च। "त्वया सम्यग् व्याकरणमध्येतव्यं , तिरस्कृतगुरुकुलानां कोकिलम्मन्यमानानां गर्दभानां घोणात् किमन्यन्निःसरेत् ?; किञ्चिच्छास्त्रं ममापि ज्ञातमिति मा गर्ज " इत्यादीनि वाक्यानि निम्नस्तरीयाणि।

सत्स्वप्येतेषु सार्वभौमस्य स्पष्टतरेषु दोषेषु तस्य महावैयाकरणत्वं न हीयते।तेन 'औङ आपः' (७.१.१८) इति सूत्रस्य यद् विश्लेषणं कृतं तदाधुनिकानां विमर्शकानां संशयं नाशयतीव। 'गजसूत्रे' अर्थात् 'णेरणौ यत् कर्म णौ चेत् स कर्त्तानाध्याने' (१.३.६७)तेन दत्ता व्याख्या परमप्रशस्ता(कथमिति समर्थ्यताम्)।सः'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति वाक्यं चर्चन् कांश्चिदन्यैरपरामृष्टान् सूक्ष्मान् विचारान् आददाति। यत्तु वृद्धिशब्दस्य सूत्रकारेणादावुपन्यासस्तत् सन्धिसमासतद्धितेषु अजादिधातूनां लङ्रूपेषु च वृद्धेः सत्त्वात् तस्य प्रयोगविस्तरं दर्शयितुमिति

तदीयं मतं, तच्चिन्त्यं भाष्यकाशिकामनोरमादिष्वनुक्तत्वात्। परन्त्वत्र ग्रन्थकर्त्रोत्थापिता विचारा व्युत्पत्तिविशेषाधायका इत्यत्र न संशयः। मातृकासु उपलब्धानां ग्रन्थानां पाठनिर्धारणे स किञ्चिद् वक्ति यद् वस्तुतः कुतूहलप्रदम्। मूलपाठस्वरूपनिर्धारणा प्रथमकरणीयेति सोऽभिप्रैति "-'पृदाकोः[1]' 'कृत्तद्धितकाव्यं' पिहितस्वरूपमासीत् पुस्तकेषु बहुधा व्यामिश्रितानां पाठानाम् उपलब्धेः; अस्माभिस्तु विविधेषु कोशेषु यल्लब्धं त'च्चित्रघोषेण[2]' विरचितया 'शब्दनिर्धारिण्या' सह संवाद्य अक्षरसादृश्यभ्रमनिमित्तकांश्च दोषानपवार्य पृदाकुनैव विरचितस्य पाठस्य यथावद् रूपस्य सृष्ट्ये यावच्छक्ति प्रयतितम्" इति वदन्।

एष सार्वभौमो देशाचारेषु विचित्रान् परामर्शान् ददाति यस्मिन् विषये संशोधनं कर्तुं विपुला अवसराः सन्ति। विशिष्य विवाहादिषु संस्कारेषु तेन ज्ञापिता आचारा विचित्राः "विवाहकाले वध्वा वरस्य शिरसि ताम्रनिर्मितेन लगुडेन त्रिस्ताडनीयमित्यौदीच्यः संप्रदायः"; "दम्पत्योः कलहे दृष्टे तद्वार्तायां वा श्रुतायाम् उपोषणं कृत्वा प्रायश्चित्तम् आचरेदिति महिषघोणप्रदेशीयः सांप्रदायिको धर्मशास्त्रानुसारी चाचारो दृश्यते।" सः कुतूहलप्रदं श्लोकार्धं संन्यासिनां विषये वर्तमानमुद्धरति- "यदत्र शातातपस्मृतौ 'ऊढानां वदनं दृष्ट्वा सचेलं स्नानमाचरेत्'इति तत्त्वार्यविषयं न पुनरनार्यविषयम्।" किन्तु मुद्रितायां शातातपस्मृतौ नेदं पद्यं दृष्टम्। इदमपरं वैशिष्ट्यमस्य यत् पौनःपुन्येन चित्ताकर्षका आभाणका उपन्यस्यन्तेऽनेन यथा "केचन वैयाकरणाः स्वग्रन्थमुत्कृष्टं परग्रन्थं चापकृष्टं मन्यन्ते। तथा चाभाणको गुर्जरेषु-'मरुप्रियोऽपि

१.एतस्य पृदाकुनाम्नो विदुषो वैतद्विरचितस्य कृत्तद्धितकाव्यस्य वा विषये न वयं किमपि जानीमः सार्वभौमेतरेण केनाप्येतयोः परामृष्टत्वाभावात्।

२.एतस्य चित्रघोषाख्यस्य विदुषो वैतद्विरचितायाः शब्दनिर्धारिण्या वा विषये न वयं किमपि जानीमः सार्वभौमेतरेण केनाप्येतयोः परामृष्टत्वाभावात्।

(उष्ट्रोऽपि) प्रसूतवतां मयूरः।'-"।

सार्वभौमस्य वाक्यार्थसभाविषयिका हास्यगर्भिता दृष्टिरति-विचित्रा।स एवं वदति-:'कदाचिद् वाक्यार्थसभासु किमपि सूत्रं न दृढीभवति, सर्वाण्यपि सूत्राणि शिथलीभवन्ति।सूत्राणामेव यदीदृशी दुरवस्था किमुत परिभाषाणां यासां व्याख्यानेषु 'अनित्येयं परिभाषा' इत्यसकृदुच्यते? एतादृशीषु सभासु लाभो न वाक्यार्थान् कर्तॄणां नापि मठाधिपानां किन्तु पाचकानामेवेति सर्वेषां सुज्ञातोऽयं विचारः।अस्मिन्नेवार्थे 'विवाहे लक्ष्मीर्लगुडकारिणः' इति गुर्जरेषु प्रथित एवाभाणकः।"

छन्दस्सु सुष्ठुतर एवाधिकारोऽस्य यः शम्भुनटनं, नर्कुटकं, मत्तमयूरः, वंशपत्रपतितं,मेघविष्फूर्जितं सुरसेत्यादीनि विरलतमानि छन्दांसि प्रयुङ्क्त संग्रहकारिकासु।कस्याञ्चित् संग्रहकारिकायामेष प्रतिपादम् एकादशाक्षरयुक्तायां त्रिष्टुभि 'नजसलगे'ति लक्षणयुक्तं छन्दः प्रयुङ्क्त यत् कुत्राप्यस्मदुपलब्धेषु च्छन्दोग्रन्थेषु न लक्षितम्।

इयं सा संग्रहकारिका:

वद! सति मूलविशये बुधा विदधति किं न विवृतौ दृशम्।
सुविदित एष विषयोऽत्र किं विवरणदृष्टिपरिभाषया? ॥(पु.५०)

तेन चर्चितानां शब्दानां पट्टिका दीर्घा स्वारसिकी च यत्रान्तर्गताः शब्दा अतीवविरलाः यथा- अप्नम्, अर्यम्, आजिहीर्षिणी,उललम्, इष्म, ऋज्रं, कच्छूः, कणीची, कवषः, कषीका, खलूषं,गेष्णिः, छित्वरं, जनित्वा, जिव्रि, जीरदानु, तसरम्, तुथ, तृप्रम्, दध्यङ्, देवटः, दृदरः, धर्त्रम्, निहाका, पारक्, प्रध्या, फलूषः, भरीमा, भ्राजः, मीवा, यजेणुः,रुदथः, लट्वा, वर्वरीकम्।

अत्र बहवः शब्दा उणादिगताः।अवशिष्टा वेदस्य।कस्यापि शब्दस्य व्युत्पत्तौ सार्वभौमः संप्रदायं न रक्षतीति विस्मयावहम्।

८.मातृकाविमर्शः (मातृकास्वरूपं, पाठसंवादविचारः, पाठनिर्णयार्थमवलम्बिता अंशाः, मातृकावंशः). (Lower Criticism)

प्रकृतं संस्करणं तिसृणां मातृकाणामवलम्बनेन संपादितम्। मातृकाणां स्वरूपमित्थं वर्तते:-

मातृकासंख्या	१	२	३
मातृकाङ्कः	५६८ /२[१]	——	——
संज्ञा	रा(अथवा ग्र)	चा(अथवा क)	गो(अथवा ति)
लिपिः	ग्रन्थ	कन्नडम्	तिगळारी
मापनम्	१८X५.५ से.मी	१४.५X५.५से.मी	१४X७.५से.मी
पत्रसंख्या	२९^{ब}-२६७	१-२११	१-७७,८५-९८ (७८-८४ पत्राणि नष्टानि)
प्रतिपत्रं पङ्क्तयः	११	१०	१४
प्रतिपङ्क्ति अक्षराणि	६४	६०	४८
समग्रा वा असमग्रा	स	स	अस(तृतीयगुच्छ-पर्यन्ता)
स्थितिः	साधारणी	साधारणी	त्रुटिता
लिपिकरः	वरदः	सुब्बप्पः	——
कस्मै प्रतिलिपिः कृता	——	——	माधवपुणिञ्चत्तायाय
मातृकास्वामी	विट्ठलेशः	नीलकण्ठः	——
प्रतिलेखनतिथिः	विक्रमसं. चैत्रषठी	——	——
उपलब्धिस्थलम्	रामय्यसंस्था गायत्रीनगरं मैसूरु	चारुमती नञ्जनगूडु	गोविन्दराव् आनेकल्

१.५६८ /१ इत्यङ्कितो ग्रन्थः सूर्यस्तोत्रस्य सव्याख्यस्य (१-२९^{अ} पत्रेषु) अज्ञातकर्तृकस्य। मूलकर्त्रैव व्याख्याकृदित्यभ्यूह्यते। स्तोत्रेऽस्मिन् वसन्ततिलकं छन्दः।

रा(ग्र):

उपक्रमः:

ओम्। श्री गणेशाय नमः। श्रीसरस्वत्यै नमः। शुभमस्तु। वाक्यार्थसुमनःश्रेणी लिख्यते। विघ्नानां विविधानां निर्विघ्नं परिहर्तुः। पादाब्जे चिरमुष्याच्चित्तालिर्मम चारौ।। अङ्गुलिनर्तकि लेखननृत्यं दर्शय पुस्तकरङ्गधरायाम्। भानुविभा भव भव्यगतिस्त्वं पाठकभावुकमानसकञ्जे।।

भाषोदधिप्रमथने स्वयमेव हित्वा
दैतेयतां विबुधतामुभयीमपि द्राक्।
धन्वन्तरित्वममृतस्फुरणात् ततोधाद्
योसौ सुधां हृदि निषिञ्चतु पाणिनिर्मे।।

सुघुमंघुमितां पदसुममालां मद्गुम्फितां दृढैः सूत्रैः।
कात्यायनः पतञ्जलिरपि सामोदं समर्पितां धरताम्।।

धीरशम्भुपदपङ्कजद्वयं सिद्धशब्दबुधषट्पदप्रियम्।
उत्तमाङ्गममलं कृषीष्ट मे शास्त्रजे जगति बोधविश्रमे।।

उपसंहारः:

अत एव 'अर्धर्चाः पुंसि च' इत्यत्र 'सारशब्द उत्कर्षे पुल्लिङ्गः, न्यायादनपेते नपुंसकलिङ्ग'मिति स्पष्टमभाषिष्ट जयादित्यः। उदाजहार च 'नैतत् सार'-मिति। लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति वैयाकरणाः। यदि लोकेन सर्वं ज्ञायते किं व्याकरणेनेत्यत्र साधु समाहितं पृदाकुना 'लौकिकानां व्याहाराणां विज्ञानार्थं व्याकरणमध्येतव्य'मिति।

चञ्चूर्यन्ते कण्टकैर्हन्त कीर्णे क्लेशक्लिन्नाः कापथे विक्लवा ये।
नृत्यासुस्ते मत्कृतायां पदव्यां पुष्पास्तारैः पादसौख्यप्रदायाम्।।

पुष्पिका:

इति सप्तमगुच्छः समाप्तः। इति पदवाक्यप्रमाणपारावारपारीणेन करञ्जग्राम-निवासिना सार्वभौमपण्डितेन विरचिता वाक्यार्थसुमनःश्रेणी समाप्ता।

उत्तरपुष्पिका:

वत्सरे वैक्रमे चैत्रषष्ठ्यां पाठकतुष्टये। वाक्यार्थसुमनःश्रेणीं वरदो व्यलिखन्मुदा। बिन्दुदुर्लिपिसर्गवीकाशृ----भे-ष------तुमर्हथ। तैलाद्रक्ष जलाद् रक्ष रक्ष मां श्लथबन्धनात्। मूढहस्ते न दातव्यमेवं वदति पुस्तकम्। कुलिखितमुचितं वा त्यक्तमज्ञानतो मेऽधिकमपि लिखितं वा योजितं वाऽप्यबद्धम्। स्वसुतलिखितमित्येवमेतद् विदन्तः करकृतमपराधं क्षन्तुमर्हन्ति सन्तः। कोटे वेङ्कटरमणस्वामी शुभं करोतु। विट्ठलेशस्य पुस्तकम्। श्रीः श्रीः।

चा(क):

उपक्रमः:

ओम्। श्री सारदागुरुव्यो नमहा। श्रीनिमिसाम्भादेवि मह। नमो नुसिंहाय परात्पराय बूतालिसृष्टिस्थितिनासनाय। समस्तदेवादिपसंस्तुताय हिरण्यहत्ते शुभवोषकाय॥ वाक्यार्थसुमनश्रेणि लिखितु शुभस्तु।

भासोधदिप्रमथने सयमेव धृत्वा
धैतेयतां विबुदतामुभयीमपि प्राक्।
धन्वन्तरित्वममृतस्मरणात् ततती
येस सुधां हृदि निमिषञ्चतु पाणिर्मे॥

सुघमघमितां पदसुममालां मद्गुरुतां दृढैः सूतैः।
कात्तायनः पथञ्जलिरपि सम्मोदं समर्पितां दरताम्॥

धिरशम्बुपदपकजद्वयं शुद्धशब्दबुधषट्पदप्रियम्।
उत्तमाङ्गममळं कृपि इष्टं मे शास्त्रजे जगति बाधविश्रमे॥

उपसंहारः

अत येव 'अर्धर्चाः पुंसि च' इतत्र 'सारशब्द उकर्षे पुलिङ्गः, न्यायदपेते नपुंशकलिङ्ग'मिति स्पष्टमभाशि जयदित्यः। उदजहर च 'नैतत् सार'-मिति। लिङ्गमशिष्यं लोकाश्रयत्वलिङ्गस्येति वैयकारणाः। यदी लोकेन सर्वं ग्नायते किं व्यकारणेनेत्यत्र साधु सम हितं वृदाकुन 'लौकिकानां व्यवहाराणां विग्नानार्थं व्यकारणमद्येतव्य'मिति।

संचूर्णं ते कण्टकैर्हन्त कीर्णे क्ळेशक्लिन्नाः कापते विक्ळवा ये।
नृत्यासुस्ते मत्कृतायां पदव्यां पुष्पातारैः पातसौक्यप्रदायाम्॥

पुष्पिका:

इति सप्तमोध्याय। इति पदवाक्यप्रमाणपरिवारप्रवीणेन करञ्जग्रामनिवासिना सार्वबोमपडितेन विरचिता वाक्यार्थसुमनःश्रेणि समाप्तह।

उत्तरपुष्पिका:

करकृतमपरादं क्षतुमहति सतः। सुब्बप्पस्य स्वाहसलिकितम्। नीलकण्ठस्य पुस्तकमिदम्। समस्थशम्मङ्गळानि बवन्तु।

गो(ति):

उपक्रमः

ओम्। श्रीभगवत्यै महात्रिपुरसुन्दर्यै नमः। पाणिनिकात्यायनपतञ्जलिभ्यो नमः। मधुकैटभमारणश्रमात् किमु शेषे मृदुले सरीसृपे। अमृताढ्यकटाक्ष-वीक्षणैरनुगृह्णासि न येन मां हरे॥ वाक्यार्थसुमनःश्रेणी माधवपुणि-ञ्चत्तायस्य पाठार्थे लिख्यते।

भाषोदधिप्रमथने स्वयमेव धृत्वा
दैतेयतां विबुधतामुभयीमपि प्राक्।
धन्वन्तरित्वममृतस्फुरणात् ततोधाद्
योसौ सुधां हृदि निषिञ्चतु पाणिनिर्मे॥

सुघुमंघुमितां पदसुममालां मद्गुम्फितां दृढैः सूत्रैः।
कात्यायनः पतञ्जलिरपि सामोदं समर्पितां धरताम् ॥

धीरशम्भुपदपङ्कजद्वयं सिद्धशब्दबुधषट्पदप्रियम्।
उत्तमाङ्गममलं कृषीष्ट मे शास्त्रजे जगति बोधविभ्रमे ॥

उपलब्धपाठान्तिमो भागः (९८ तमस्य पत्रस्यान्ते):[ग्रन्थोपसंहारो न लब्धः]

वस्तुतस्तु अकाण्डताण्डवितं भवान् विदधाति। भवादृशमेव दृष्ट्वा भगवान् पतञ्जलिरपि "आम्रे पृष्टे कोविदारानाचष्ट" इत्याभाणकं बभाण स्म। प्रकृते किमायातम्---स्त्विति चेन्न, महाकविप्रयोगस्यानौचित्यप्रतिपादनस्यैवानौचित्यात्।...र्हि 'तं पातयां प्रथममास पपात पश्चात्' इत्यादिषु कथं निर्वाह इति चेदि------नात्र स्थितगतिचिन्तनन्यायावसरो यथा देवानांप्रियेणान्वग्राहि।अन्यथा 'निपीये' ति रूपस्य 'पीङ् पाने' इति धातुना सिद्धत्वेपि बालिशबन्धुना"कवयः स्वैरं प्रयुञ्जत"इति लोकोक्तिमाश्रित्य वैयाकरणा अनुगृह्येरन्।कोषकारा अपि कदाचित् प्रमाद्यन्तीति पश्यतु भवान्। यथाकाशशब्दस्य शास्त्रेषु भूयो नपुंसकलिङ्गवत्त्वेन प्रयुक्तत्वेऽप्यमरसिंहः 'पुंस्याकाशविहायसी' इति श्लोकयति स्म[१]।

पुष्पिका:

इति तृतीयोऽध्यायः।हरिः ओम्।

उत्तरपुष्पिका:

रा(ग्र)मातृकायां, तथा गो(ति)मातृकायां च स्फुटा लेखनशैली।पा(क)मातृकायां तु लेखनरीतिर्नातीवस्फुटा यत्राक्षराध्यासाः पौनःपुन्येनानुभूयन्ते।लिपिकरप्रमादा अस्यां मातृकायाम् अधिकतरा। परन्त्वत्रत्याः पाठाः प्रायेण रा(ग्र) मातृकागतैः पाठैः प्रायः संवदन्ति। वाक्येषु पदक्रमे क्वाचित्को व्यत्ययोऽपि गोचरीभवति।

१.द्र.पु.१२७

अत्र त्रयः संभवाः-१.चा(क)मातृका रा(ग्र)मातृकायाः पुत्रिका। २.रा(ग्र)मातृका चा(क)मातृकायाः पुत्रिका।३.उभे मातृके समानाया आदर्शमातृकायाः पुत्रिकाभूते।

चा(क)मातृकायां वर्तमानानि पाठान्तराणि सरलीकरणेन संजातानि।तथाप्येतानि शुद्धपाठनिर्णये सहकारीणि यथा-

१. रा(ग्र): तस्मादेव तृतीयानिदाने प्रकृत्यादिभ्य उपसंख्यान-मिति वार्तिके प्रायेण याज्ञिकाः, प्रायेण वैयाकरणा इत्युद्धृतं जयादित्येन चोदाहृतं गच्छते। (पत्रसंख्या १०४पृ)

चा(क) : तस्मादेव तृतीयाव्यवधाने प्रकृत्यादिभ्य उपाख्यानमिति वार्तिस्थे भाष्ये प्रायो अग्निकाः, प्रायो व्यकारणम् इत्युदहृतं जयदितेन चोदाहृतं गछते।(पत्रम् ११०अ)

परिष्कृतः पाठः : तस्मादेव ''तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यान'' मिति वार्त्तिकस्थे भाष्ये 'प्रायेण याज्ञिकाः', 'प्रायेण वैयाकरणा' इत्युदाहृतं जयादित्येन चोद्धृतं संगच्छते।(पुटम् १५७)

२. रा(ग्र): अत श्रीयुटोत्रैव निधानमस्त्विति चेन्न (प. ९६अ)

चा(क): यथ श्रीयुतोत्रैव विद्यादानमस्त्विति चेन्न(पत्रं ८४पृ)

परिष्कृतः पाठः : अथ सीयुटोऽत्रैव विधानमस्त्विति चेन्न (पुटं १६१)

गो(ति) मातृकायां तु लिपिकरप्रमादा अत्यन्तमेव न्यूनाः। अतीवविरलाः केचन पदरूपगता दोषास्तत्र तत्र गोचरीभवन्ति। रा(ग्र) चा(क) मातृकयोरस्य भूयस्स्वंशेषु विसंवादः। अन्यच्च। अत्रोपलब्धे भागे कैयट-कृतात् उद्योतात् किमपि न समुद्धृतम्। एतेनेदमभ्यूहितुं शक्यते-गो(ति) मातृकागतः वाक्यार्थसुमनःश्रेणीपाठः पुरातनो यः कैयटोद्धरण-रहितः। अर्थाद् ग्रन्थकर्त्रा कैयटात् किमपि नोद्धृतमासीत्। परवर्तिभि-

र्विद्वद्भिः कैयटात्तत्र तत्रावश्यकतानुसारेण केचन भागा उद्धृता ये रा(ग्र)चा(क) मातृकयोर्दृश्यन्ते।

एतेषां सर्वेषां विचाराणां परिगणनेन मातृकाणां वंश इत्थंभूत इति ज्ञायते-

अ.आ.मा.मू-अनुपलब्धा आदर्शमातृका या सर्वासामप्यस्म-दुपलब्धानां मातृकाणां मूलम्।**अ.मा**-अनुपलब्धा मातृका।

अथवा एवं रूपयितुं शक्यते मातृकावंशक्रमः :



(ग्रन्थकर्तृरचिता मूलकृतिः) → अ.आ.मा.मू } **अ.मा→ रा(ग्र), चा(क)**
अ.मा→ गो(ति)

अस्माभिः परिष्कृते पाठे १३८ पुटपर्यन्तं गो(ति)मातृकापाठः आदृतः।[गो(ति)पत्रसंख्या ९८] अपरयोश्च मातृकयोः लब्धानि पाठान्तराणि पाठटिप्पणीभागे न्यवेशि।ततः रा(ग्र)चा(क)मातृकयो-राधारेण पाठपरिष्कारः कृतः।अर्थादस्मदीयं संस्करणं प्राचीनपाठ-नवीनपाठयोरुभयोः प्रतिनिधिः।

[एतत् सर्वं किमर्थं लेखनीयमिति केषाञ्चनाक्षेपः। तत्र सरलतममुत्तरम्। अकृतेनैतेन, संपादनप्रतिलेखनयोः कोऽपि भेदो न सेत्स्यति। "न केवलं प्रतिलेखनमस्माभिः कृतं परन्तु आवश्यकतानुसारेण प्रमादपरिशोधनं, लुप्तयोजनं,पुनरुक्त्यादिपरिहार इत्यादिकं कृतम्" इति कथ्यते चेद् भद्रं , तस्य "इत्यादिक"स्य साक्ष्यं दीयताम्। संपादनसाक्ष्यप्रदानं हीदं पीठिकारचनम्। ग्रन्थो यथा मुख्यस्तथैव ग्रन्थस्तरस्य, मातृकासूपलब्धस्य ग्रन्थपाठस्तरस्य निर्णयोऽपि मुख्यः। लिपिकरविद्वत्कृतपुष्पिकेव संपादककृतपीठिकापि मूल्यवतीति द्रष्टव्यम्। अपि च ग्रन्थ-ग्रन्थपाठ-स्तरमौल्यनिर्धारणं व्याख्यानरचनासोदरं पवित्रं कर्म।]

९. प्रकृतं संस्करणम्

मम ज्ञानं यावत्, वाक्यार्थसुमनःश्रेणीयम् इदंप्रथममधुनैव मुद्र्यमाणमस्ति। प्रकृते संस्करणे परिष्कृतः पाठ ऊर्ध्वं दत्तः। पाठान्तराणि संपादकीयटिप्पण्यश्च पाठटिप्पणीभागे दत्तः। पाठान्तरयुक्ताः पाठा देवनागर्या अङ्किताः, संपादकीयटिप्पणीयुक्ताश्च भागा अराबिक्-अङ्कैः। शुद्धपाठनिर्धारणे **वाक्यपदीयपाठभेदनिर्णयो**ऽत्यन्तमेव प्रयोजनकृदासीद् ग्रन्थकर्त्रा पौनःपुन्येन वाक्यपदीयपद्यानाम् उद्धृतत्वात्। सरस्वतीवल्लभस्य शास्त्रमार्ताण्डे वटेश्वरदत्तस्य च पदगाम्भीर्यविलासे वाक्यार्थसुमनःश्रेण्या उद्धृतत्वात् संपादने बाह्यसाक्ष्यत्वेन रूपेण तयोः साहाय्यमङ्गीकृतम्। त्रिसप्तति(७३)स्थलेषु तयोरुद्धृताः पाठाः अस्मदुपलब्धमातृकापाठानामपेक्षया प्रशस्ततरा इति निश्चित्य तत्तत्स्थलेषु तेषामेवाङ्गीकारः कृतः, पाठटिप्पणीभागे च तत्सूचना क्रमशः 'प'(दगाम्भीर्यविलास) इति, 'शा'(स्त्रमार्ताण्ड) इति अक्षरमुद्रणपूर्वकं दत्ता। (ते त्रिसप्ततिपाठाः सर्वेऽपि पट्टिकायामत्र दातव्याः।)

कस्याश्चन संग्रहकारिकाया व्याख्यायां कश्चन ग्रन्थिरधुनापि

न विमोचितः। संग्रहकारिकेयम् (पुटम् ८४):-

प्राप्नोतीडित्येव निर्णीतिरास्तां धातौ सेटि प्रत्यये चापि सेटि।
नाप्नोतीडित्येव निर्णीतिरास्ताम् इत्येकत्राप्यस्थिते शाब्दिकीया ॥

अस्य विवरणभागे सर्वासु मातृकासु पाठास्तथा भ्रष्टा यथा बहुशो विचारितोऽपि ग्रन्थिस्तथैवावशिष्टः। मया तु सर्वेषाम् अप्यत्रत्यानां वाक्यानामन्ते प्रश्नचिह्नं न्यवेशि,मातृकान्तरलाभे द्वितीयसंस्करणं विनिवा-रितैतत्प्रश्नचिह्नावरणं भूयादित्याशासता।

पीठिकानन्तरं ग्रन्थोपक्रमात् पूर्वं सविवरणा विषयानुक्रमणिका स्थापिता। ग्रन्थान्तेऽष्टौ परिशिष्टानि दत्तानि। तानि यथा १.वाक्यार्थ-सुमनःश्रेणीसमुद्धृतानां सूत्राणां सूची। २.वाक्यार्थसुमनःश्रेणीसंग्रह-कारिकापादनां सूची। ३.वाक्यार्थसुमनःश्रेण्यामुद्धृताः ग्रन्थाः ४.वाक्यार्थ-सुमनःश्रेण्यामुद्धृता ग्रन्थकाराः ५.वाक्यार्थसुमनःश्रेणीगता न्यायाः ६.वाक्यार्थसुमनःश्रेणीसंग्रहकारिकागतानां छन्दसां सूची ७.शारदा-विलासनाटकगौरवसुमनःश्रेणीगताः समाना अभिप्रायाः ८.सार्वभौम-पण्डितस्य चिन्त्यानामभिप्रायाणां सूची।

सर्वासां मातृकाणां द्वयोः पत्रयोर्द्युतिचित्राणि ग्रन्थान्ते दत्तानि।

१०. वैयक्तिका विषयाः/ कृतज्ञतासमर्पणं च।

वाक्यार्थसुमनःश्रेणीति नाम मया होळल्केरेस्थमातृकाभवने प्रकटितायां 'शर्वभौमपण्डितविरचिता' इत्युल्लेखपूर्वकं मातृकासूच्यां मया दृष्टम्। 'सार्व' इति लेखनस्थले 'शर्व' इति लेखनं लिपिकर-प्रमादजन्यमित्यत्र न कोऽपि न संशयः। मातृकाङ्कः १२९३, कन्नडलिपिः, असमग्रा चेयमिति सूची कथयति। मया मातृकाभवनं गत्वा बहुधाऽन्वेषणे तत्रत्यैः कारिते, स्वयं च कृतेऽपि ग्रन्थमातृका न लब्धा तत्र। अस्थाने

स्थापिता चोरिता वा स्यात्। मम मित्रेभ्य एतदज्ञापयम्। पञ्चदश-दिनानन्तरं श्रीमान् केशवः स्वबन्ध्वोर्गृहयोर्ग्रन्थस्यास्य मातृकाद्वयं वर्तमानं स्वदृष्टं मह्यं ज्ञापितवान्। तयोरेकतरा आनेकल्लुमण्डलस्थस्य श्रीमतो गोविन्दराव्कस्य गृहेऽन्या च नञ्जनगूडुस्थायाः श्रीमत्याश्चारुमत्या गृहे। झटित्यहं उभयोर्गृहे पर्यायेण धावितवान्। मया साकं श्रीमान् केशवोऽप्यासीत्। सफलं जातं तत्र संभाषणम्। द्वे अपि मातृके मह्यं दत्ते।

अहं श्रीमतो गोविन्दराव्कस्य तथा श्रीमत्याश्चारुमत्याश्च कृतज्ञोऽस्मि। ताभ्यां मातृके मह्यं दापयितुं श्रीमता केशवेन कृतं साहाय्यं यावज्जीवं न स्मरामि येन विना मातृकालाभो मम स्वप्नेऽप्यसंभावितोऽभविष्यत्।

ततः 'स्वपितुः संस्कृतपण्डितस्य श्रीरामय्यस्य स्मरणार्थं मैसूरुनगरे डा.दीपिकया काचिन्मातृकासंस्था स्थापिता' इति, 'मातृकानाम्नां पट्टिकाक्रमेण लेखनकार्यं तत्रारब्धं किन्तु न समाप्तम्' इति च श्रुतवान्। 'परिशीलनीयं मद्भाग्यम्' इति धिया तत्र गत्वा पट्टिकां परिशीलितवान्। आसीत् तत्र वाक्यार्थसुमनःश्रेण्या नाम ! दृष्ट्वा तत् मम मनसि तथाऽऽनन्दः संजातो यथा "तनौ ममुस्तत्र न कैटभद्विषस्तपोवनाभ्यागमसंभवा मुदः" इति माघवाक्यं झटिति स्मृतिपथमारूढम्। मासद्वयावधौ तन्मातृकायाः प्रतिलेखनं कृतवान्।

डा.दीपिकावर्या 'रामय्य'संस्थायाः संस्थापनानन्तरम् अमूल्या काचिन्मातृका तत्रोपलब्धेति ज्ञात्वा, प्रमोदभूम्ना तत्प्रतिलेखनार्थं न केवलमनुमतिं दत्तवती, अपितु स्वमातृकालयत एव तत्प्रकाशनम् अप्रार्थिताऽपि स्वयमधुना करोतीति यत्, तेन धन्यतमोऽहमस्मि।

श्रीमतो गोविन्दराव्कस्य गृहे लब्धा मातृका तिगळारीलिप्यामासीत्। मम तिगळारीलिपिज्ञानाभावात् तिगळारीलिप्या वेत्तारं

श्रीसुन्दरेशं देवनागर्यां प्रतिलेखनार्थं व्यजिज्ञपम्। स शीघ्रं सुन्दरतरैः सुवाच्यैश्चाक्षरैर्देवनागर्यां प्रतिलेखनं समाप्य दत्तवान्। कैः शब्दैर्मम हृदि जातः कृतज्ञभावस्तस्य पुरस्तात् प्रकाशनीय इति नाहं जानामि।

यो ग्रन्थं मुद्रणात् प्राग् द्विवारमामूलचूलं परिशीलितवान्, सप्रयोजनांशसूचनेन बहुधोपकृतवांश्च, स डा.के.कल्याणशास्त्री ममातीवादरभाजनमस्ति। केषाञ्चन वार्त्तिकानां विश्लेषणं यदस्ति ग्रन्थे तत्र विचारशुद्धिस्तेनैव कृता। अतीवतितिक्षया प्राग्रूपशोधनं कृतवत्या डा.एल्. सुशीलया संजातोऽहमस्म्यधमर्णः। महामहोपाध्यायस्य इन्दुभास्करस्य विषयेऽत्यन्तं कार्तज्ञ्यमभिव्यनज्मि योऽस्फुटग्रन्थार्थविषयकान् मदीयान् सुबहून् संशयान् निवारितवान्।

(अतीवविरलेषु प्रसंगेषु उपकारं कृतवान् जनः स्वनाम्नो निर्देशनं न करणीयमिति विज्ञापयति। तादृशेषु प्रसंगेषु) संपादकोऽतीव कृतज्ञोऽस्ति तस्य यः स्वनाम गोप्यमेव भवेदिति कृतनियमः सन् ग्रन्थमुद्रणाय पर्याप्तं धनं दत्तवान्।

[मुद्रितस्य वाक्यार्थसुमनःश्रेणीग्रन्थस्य प्रथमं पुटं विन्यासद्वययुतम् (अभ्यूहितं) पार्थक्येन अग्रे प्रदर्शितम्। **प्रथमे पुटविन्यासे** पाठानां सपाठान्तराणां शृङ्खग्राहिकाकान्यायेन निर्देशनं भवति। तेषां पाठान्तरवत्त्वं सूचयितुं तेषां दक्षिणे भागेऽङ्का लिखिताः। वामदक्षिणभागयोरुभययोः सूचितेऽङ्के न केवलमहृद्यता पठनविघ्नजननं च । द्वितीये विन्यासे पङ्क्तिसंख्या पुटस्य दक्षिणपार्श्वभागे लिखिता। पाठटिप्पण्यां च पाठान्तराणाम् आदौ। अयं द्वितीयो विन्यासः पाठान्तराणामाधिक्ये मूलपाठभागस्य विरूपतापरिहारार्थं क्रियते। विन्यासेऽस्मिन् न केवलं पाठान्तराणां परन्तु परिष्कृतानामपि पाठानां पाठान्तरस्थापनात् पूर्वं स्थापनम् अनिवार्यम् अन्यथा अमुकस्यैव पाठस्यामुकमेव पाठान्तरमिति शीघ्रं पाठकानां न ज्ञायते। इदं स्वाभाविकं यदस्मिन् विन्यासे स्थलावकाशः प्रथमविन्यासार्थस्य

स्थलस्यापेक्षया अधिकतर आदातव्यः।

[उभययोः पुटविन्यासयोः समाना अंशा इमे :

[१.पाठान्तरसूचनार्थं देवनागर्यङ्काः, संपादकीयवक्तव्यसूचनार्थं च अराबिक् अङ्का दत्ताः।२.पाठान्तराणां तथा संपादकीयवक्तव्यानां च भिन्नयोः स्तरयोर्निविशनं द्वाभ्यां तिर्यग्रेखाभ्यां सूचितम्।३.पद्यानाम् अनुक्रमसंख्या वामभागे पद्यारम्भात् पूर्वं दत्ता ततश्च विरामचिह्नं निवेशितम्।४.कस्यचित् पाठस्य संशयास्पदत्वं स्फुटं सूचितम्। ५.भूमिज्जयशब्दस्यार्थः संपादकीये वक्तव्ये सूचितः।६.चा(क)मातृकायां वर्तमाना अतिक्षुद्रा लिपिकरप्रमादा न सूचिताः।किन्तु पीठिकायां तेषां काचित् पट्टिका दत्ता।

[पाठान्तराणां संपादकीयवक्तव्यानां चोभयेषां ग्रन्थान्ते मुद्रणं झटित्युभयदर्शनकुतूहलिनां क्लेशं जनयति पाठकानाम्।संपादकीय-वक्तव्यस्याधिकपरिमाणस्य मुद्रितग्रन्थशरीरवत्स्वेव पुटेषु स्थापनाशक्यत्वे तु नान्य उपायः। एवं ग्रन्थान्ते पाठान्तराणां मुद्रणे गुणस्तु-एकपदे एव सर्वेषां पाठान्तराणां दर्शनेन मूलार्थविषये केचन नवीना विचारा अपि प्रतिभायुः।

[ग्रन्थमुद्रणात् पूर्वमनुपलब्धायाः मातृकायाः - ग्रन्थमुद्रणे समाप्ते समाप्तप्राये वा - समुपलब्धौ, तत्रत्यानामपि पाठान्तराणां सूचनाऽत्यन्तम् आवश्यकी।सा तु ग्रन्थान्त एव करणीया, गत्यन्तराभावात्।

[पीठिकाया अनन्तरं, ग्रन्थारम्भात् पूर्वं च विषयानुक्रमणिका दातव्या।अर्थात् पीठिकाग्रन्थयोर्मध्ये स्थाप्यतां विषयानुक्रमणिका।]

वाक्यार्थसुमनःश्रेणी

कल्पिता कृतिः

सार्वभौमपण्डितविरचिता

१.भाषोदधिप्रमथने स्वयमेव हित्वा[१] [1]
दैतेयतां विबुधतामुभयीमपि प्राक्[२]।
धन्वन्तरित्वममृतस्फुरणात् ततोऽधाद्
योऽसौ सुधां हृदि निषिञ्चतु पाणिनिर्मे।।

२.सुघुमंघुमितां पदसुममालां मद्गुम्फितां दृढैः सूत्रैः।
कात्यायनः पतञ्जलिरपि सामोदं समर्पितां धरताम्॥

३.धीरशम्भुपदपङ्कजद्वयं सिद्धशब्दबुधषट्पदप्रियम्।
उत्तमाङ्गममलं कृषीष्ट मे शास्त्रजे जगति बोधविभ्रमे[३]॥

४.ज्ञानभ्रान्तिजदम्भतोऽन्धतमसक्रूरां प्रविश्याटवीं
भूरिप्रस्तरगुल्मकण्टकचितां म्लानाय दीनाय च।
कारुण्यद्रवसारिणी(! वाहिनी ?)क्षरणतो वात्सल्यभूम्ना महा-
रथ्या राजरथप्रयाणविशदा विज्ञेन सुज्ञाप्यते॥

५.वाक्यार्थसुमनःश्रेणी पदाब्जानि महीयसाम्।
विधेयाद् विदुषां गाढं[४] सदा सुरभिलान्यलम्।।

इह किल कोऽपि धीरभगवत्पादानां पादधूलिलेशस्पर्शोऽप्यपर्याप्त-महिमाऽनासादितविद्याकेषु पदज्ञानशून्येषु स्वविचित्रविक्रमक्रमविभ्रमविस्मयो-त्पादनपटिष्ठो भूमिंजय[2]समानधर्मा परिचक्राम पराक्रमबाहुनामा।....

१.धृत्वा-चा,गो.
२.द्राक्-रा.
३.विश्रमे-चा,रा.
४.विद्यामोदा विधत्सीष्ट(विधासीष्ट ?)-गो, रा.

← कल्पिता पाठटिप्पणी

1.इदं 'धा' धातोः क्त्वान्तं रूपम्।
2.'भूमिंजय' इति महाभारतीयस्योत्तरकुमारस्यापरा संज्ञा।

← कल्पिता संपादकीयटिप्पणी

कल्पिता कृतिः

वाक्यार्थसुमनःश्रेणी

सार्वभौमपण्डितविरचिता

१.भाषोदधिप्रमथने स्वयमेव हित्वा
दैतेयतां विबुधतामुभयीमपि प्राक्।
धन्वन्तरित्वममृतस्फुरणात् ततोऽधाद्
योऽसौ सुधां हृदि निषिञ्चतु पाणिनिर्मे॥

२.सुघुमंघुमितां पदसुममालां मद्गुम्फितां दृढैः सूत्रैः।
कात्यायनः पतञ्जलिरपि सामोदं समर्पितां धरताम्॥

३.धीरशम्भुपदपङ्कजद्वयं सिद्धशब्दबुधषट्पदप्रियम्।
उत्तमाङ्गममलं कृषीष्ट मे शास्त्रजे जगति बोधविभ्रमे॥

४.ज्ञानभ्रान्तिजदम्भतोऽन्धतमसक्रूरां प्रविश्याटवीं
भूरिप्रस्तरगुल्मकण्टकचितां म्लानाय दीनाय च।
कारुण्यद्रवसारिणी(! वाहिनी ?)क्षरणतो वात्सल्यभूम्ना महा-
रथ्या राजरथप्रयाणविशदा विज्ञेन सुज्ञाप्यते॥

५.वाक्यार्थसुमनःश्रेणी पदाब्जानि महीयसाम्।
विधेयाद् विदुषां गाढं सदा सुरभिलान्यलम्॥

इह किल कोऽपि धीरभगवत्पादानां पादधूलिलेशस्पर्शोऽप्य-पर्याप्तमहिमाऽनासादितविद्याकेषु पदज्ञानशून्येषु स्वविचित्रविक्रमक्रमविभ्रम-विस्मयोत्पादनपटिष्ठो भूमिंजयसमानधर्मा परिचक्राम पराक्रमबाहुनामा।....

१.हित्वा-धृत्वा-चा,गो. २.प्राक्-द्राक्-रा. ८.विभ्रमे-विश्रमे-चा,रा.
१४.विधेयाद् विदुषां गाढं-विद्यामोदा विधत्सीष्ट(विधासीष्ट ?)-गो, रा.

↑ कल्पिता पाठटिप्पणी

1.'हित्वा' इत्येतद् 'धा' धातोः क्त्वान्तं रूपम्।
17.भूमिंजयः-इयं महाभारतीयस्योत्तरकुमारस्यापरा संज्ञा।

← कल्पिता संपादकीयटिप्पणी

१४. भाषा का भवतु पीठिकायाः ?

यदि पीठिकाया भाषा संस्कृतं भवति, सर्वेऽपि पाठकजना जानन्ति पीठिकागतं विषयम्। संस्कृतभाषायां वर्तमानं ग्रन्थशरीरं ये जानन्ति, ते संस्कृतपीठिकां जानन्तीत्यर्थापत्त्या सिद्धम्। ये संस्कृतभक्ताः संस्कृतस्य सार्वत्रिकीम् अभिवृद्धिं कामयन्ते, तैरिदमभ्युपगन्तव्यं यद् ग्रन्थसंपादनशास्त्रेऽपि संस्कृतस्याभिवृद्धिर्भवेदिति। संस्कृतस्य शब्दसंपदद्भुतेति सावेशं भाषमाणैस्तु , 'पीठिकारचनार्थमावश्यकी शब्दसंपत् संस्कृतभाषायां वर्तत एव' इत्यकामैरप्यङ्गीकर्तव्यम्। प्रकृतेन ग्रन्थकर्त्रा अतिविशिष्टविषयगर्भिताः मूलाभिप्रायज्ञानेऽत्यन्तमेव सहायिकाः बह्व्यः संस्कृतपीठिकाः पठिताः। पीठिकासु संस्कृतेतरभाषायां सतीषु, तां संस्कृतेतरभाषां जानतामेव तत्प्रयोजनं न तद्भाषानभिज्ञानाम्। संस्कृतज्ञानां सर्वेषां संस्कृतभाषया रचितानां पीठिकानां बोधजननीत्वात् पीठिकासु संस्कृतस्यैव प्राधान्यं दातव्यमित्यत्र न द्वापरः। यदि संस्कृतेतरभाषायां पीठिकानां योजनमनिवार्यं मन्यते संपादको जनः, संस्कृतपीठिकां दत्त्वा तदनु संस्कृतेतरभाषामयी पीठिका योजनीयेत्येव श्रेयान् पन्थाः।

संस्कृतभाषया रचितासु पीठिकासु न केवलं दृष्टिर्निक्षिप्यते विद्वद्भिरपि तु क्वचित्स्वनिर्मितेषु संशोधनलेखेषु तेषामुपयोगश्च क्रियते यथा काश्यपसंहितायाः पण्डितराजगुरुहेमराजशर्मणा संपादितायाः निर्णयसागरे च मुद्रितायाः (१९२८) बहुकृत्व उल्लेखः श्रीमता उमाकान्त पि. पा वर्येण '*Geographical and Ethnic data from the Kāśyapasaṁhitā*' इति लेखे कृतः[1]। 'संस्कृतेतरभाषापीठिकायुक्ताः सर्वे संस्कृतग्रन्थाः शीघ्रतरं विक्रीयन्ते' इति मतं नात्र विभ्रष्टव्यं, प्रकृतप्रतिपाद्यविषयकोटिबहिर्भूतत्वात्तस्य।

1. JORI, Baroda. Vol. VII. No. 4 June 1958

केभ्यश्चन वर्षेभ्यः पूर्वं प्रकाशकैः संस्कृतपीठिकायुक्तानां ग्रन्थानां पुनर्मुद्रणावसरे संस्कृतपीठिका अपवार्यन्ते स्म। एतद् व्यसनं नाधुनापि स्थगितम् इति नूनं विषाद्यम्। कोऽपि प्रकाशकः प्रकृतेन ग्रन्थकर्त्रा संभाषणावसरे "ग्रन्थप्रकाशनाधिकारस्य संपादकमात्रविश्रान्तत्वादेवं क्रियत" इत्यवोचत्। नायं वादो यौक्तिकः। इङ्लीष्भाषापीठिकानां त्ववशेषणं दृश्यते पुनर्मुद्रितेषु संस्करणेषु। तत्र का वाचोयुक्तिः ? इङ्लीष्-भाषापीठिकानां पुनर्मुद्रणाधिकारः संपादकानां किं नैव भवति ? संस्कृत-विषयकः सूक्ष्मस्तिरस्कार एव संस्कृतपीठिकानिर्मूलने बीजम्। कोऽपि प्रकाशकमहानुभावो निर्णयसागरे मुद्रितस्य महाभाष्यस्य द्युतिविन्यास-साधनेन पुनर्मुद्रणावसरे न केवलं संस्कृतपीठिकां परन्तु सर्वा अपि पाद-टिप्पणीः अपवारितवान्। संपादकनाम, पूर्वमुद्रितस्य संस्करणस्य प्रकटन-वर्षं, संपादकनामादियुक्तं प्रथमपुटं च-एतत् सर्वं त्याजितवान् मुद्रकेण सः! बहवः संस्कृतग्रन्था अधुना यथावदन्तर्जाले उपलभ्यन्ते यत्र दैवात् किमपि नापवार्यते। एतस्य प्रभावेण प्रकाशका आगामिनि काले कुत्सितं संस्कृत-पीठिकापवारणदुरभ्यासमेतं त्यज्यासुरित्याशास्ते प्रकृतो ग्रन्थकर्ता।

१५. ग्रन्थसंपादने केचन प्राचीनाः परामर्शाः

पञ्चतन्त्रस्यैव बन्धोः पञ्चाख्यानकस्य रचयिता पूर्णभद्रसूरिः "सोममन्त्रिण आदेशानुसारेण पञ्चतन्त्रस्य कथानां 'प्रतिकथं, प्रतिवाक्यं प्रतिपद्यं प्रत्यक्षरं च' संशोधनमकरवम् " इति ब्रूते[१]। भगीरथश्रम-

१. श्रीसोममन्त्रिवचनेन विशीर्णवर्णमालोक्य शास्त्रमखिलं खलु पञ्चतन्त्रम्। श्रीपूर्णभद्र-गुरुणा गुरुणादरेण संशोधितं नृपतिनीतिविवेचनाय॥ प्रत्यक्षरं प्रतिपदं प्रतिवाक्यं प्रतिकथं प्रतिश्लोकम्। श्रीपूर्णभद्रसूरिर्विशोधयामास शास्त्रमिदम्॥ [विषयममुं ज्ञापितवता तत्रभवता श्री विजयशीलचन्द्रसूरिणाऽधमर्णोऽस्ति प्रकृतो ग्रन्थकर्ता।]

तस्य शोधनं सुमनोबाणकवीन्द्रोऽभयचन्द्रसिद्धान्ती च कृतवन्ताविति ज्ञायते[१]। तिर्दुदु(= शोधनम्) इत्यत्र पाठशोधनमित्यर्थः[२]। 'संपाद्य भूरिकष्टेन...[३]' इत्यादिके पद्ये **'संपाद्य'** इति पदमप्यत्रावधेयम्।

प्राच्यविद्याध्ययनस्य प्राधीतानामपि सुज्ञातोऽयं विषयो यन्महा-भारतं पाठान्तरकाननाकीर्णमिति। भारतभावदीपव्याख्याता नीलकण्ठः विभिन्नदेशस्थमातृकास्थान् पाठान् अपरैः पाठैः संवाद्य, पाठनिर्णये ज्येष्ठानां साहाय्यं प्राप्य, विभिन्नप्रदेशस्य प्रतिनिधित्वेन वर्तमानानां महाभारतमातृकाणां पाठान् स संकलय्य, सर्वानपि पाठान् 'गुणोप-संग्रहन्यायेन' एकत्रास्थापयत्[४]।

संप्रत्युपलभ्यमानः काशिकापाठो 'गुणोपसंग्रहन्यायम्' अनुसरद्भिर्लेखकैर्विद्वद्भिश्च जयादित्यवामनोभयकृतव्याख्याभागयोजनेन व्यामिश्रित इति श्रीनारयणशर्मणो मतमुक्तपूर्वम्[५]।

महाभारततात्पर्यनिर्णयकारेण तत्रभवता मध्वाचार्येण (१२३८-१३१७ क्रि.श.) ग्रन्थेषु पाठव्यत्यये कारणानि दर्श्यन्ते यानि व्याख्यात्रा तत्रभवता वादिराजतीर्थेन विस्तीर्यन्ते। "वाचकैः स्वयमेव पद्यादीनि रच्यन्ते स्वमतपोषणाय ग्रन्थमध्ये प्रक्षेप्यन्ते। स्वमतविरुद्धार्थानि पद्यानि त्यज्यन्ते। देवमहिमस्तावकाः पाठाः परिवर्त्यन्ते। कदाचित् साधवोऽपि

१.सुमनोबाणकवीन्द्र प्रमुखं बेरेसभयचन्द्रसिद्धान्तिगळु
त्तममागे **तिर्दुदी** कृतिगमर्दुदु सौभाग्यमोन्दिदायुं श्रीयुम्॥

२.एतमर्थं दृढीकृतवत्या डा.वै.सि.भानुमत्याऽधमर्णोऽस्ति संवृत्तः प्रकृतो ग्रन्थकर्ता।

३.द्र.पु.२९६

४.....बहून् समाहृत्य विभिन्नदेश्यान् कोशान् विनिश्चित्य च पाठमत्र्यम्। प्राचां गुरूणामनुसृत्य वाचमारभ्यते भारतभावदीपः।। .... भाष्यकारादिभि-र्व्याख्यातान् संप्रतितनपुस्तकेषु च स्थितान् पाठान् श्लोकांश्च गुणोपसंहार-न्यायेनैकीकृत्य व्याख्यायते।

५.द्र.पु.९१

प्रमादात् अन्यथा लिखन्ति। धर्मप्रज्ञाहीनैः शुद्धाः पाठा बहुत्र नाशिता एव। महाभारतेऽप्येवं संजातम्। श्रीहरिभक्तै रस्माभिः शुद्धपाठनिर्धारणार्थं प्रयत्न आस्थेयः[1]। ”

स्वासम्मता अपि पाठाः कथञ्चिदवशेषणीया इति प्राचीनानामपि विदुषां मतमासीदाधुनिकानामिव[2]। ग्रन्थपाठनिर्धारणे काः समस्या उपस्थिता भवन्तीत्यस्मत्पूर्वजैः सम्यगेव ज्ञातमिति, यावच्छक्ति ग्रन्थपाठानां संपादने तैरपि प्रयतितमेवेति च उदाहरणैरेतैः करबदरायितम्[3]। अक्षराध्यासजन्यदोषाः, प्रामादिकानि पाठान्तराणि, अक्षरस्खालित्यानि, इत्यादिकं सर्वमपि जानन्तस्ते किमर्थं स्वयं ग्रन्थसंपादनशास्त्रं नासृजन्निति त्वप्रतिसमाधेयः पर्यनुयोगः। ते यदि ग्रन्थसंपादनशास्त्रम् अस्रक्ष्यन्, वयं नूनं धन्याः समभविष्याम !

१. “क्वचिद् ग्रन्थान् प्रक्षिपन्ति क्वचिदन्तरितानपि। कुर्युः क्वचिच्च व्यत्यासं प्रमादात् क्वचिदन्यथा। अनुत्सन्ना अपि ग्रन्था व्याकुला इति सर्वशः। उत्सन्नाः प्रायशः सर्वे कोट्यंशोऽपि न वर्तते। ग्रन्थोऽप्येवं विलुळितः किम्वर्थो देवदुर्गमः। कलावेवं व्याकुलिते निर्णयाय प्रचोदितः। हरिणा निर्णयान् वच्मि विजानंस्तत्प्रसादतः। शास्त्रान्तराणि संज्जानन् वेदांश्चास्य प्रसादतः। <u>देशे देशे तथा ग्रन्थान् दृष्ट्वा चैव पृथग्विधान्</u>। यथा स भगवान् व्यासः साक्षान्नारायणः प्रभुः। जगाद भारताद्येषु तथा वक्ष्ये तदीक्षया। संक्षेपात् सर्वशास्त्रार्थं भारतार्थानुसारतः(म.भा.ता.नि.२.३-८)। ”वादिराजप्रणीता व्याख्या- “भारतादयोऽपि दुर्विदग्धकुत्सितविद्वज्जनकौटिल्यादुत्सन्नप्राया आसन्। अतोऽस्माभिरेव हरिकैङ्कर्यधुरन्धरैः प्रयतितव्यमिति भावेनाह। क्वचिदित्यादिना। ग्रन्थात् स्वमतानुकूलस्वकपोलकल्पितश्लोकान् क्वचिन्मूलग्रन्थस्य भागे प्रक्षिपन्ति। क्वचित् स्वप्रतिकूलश्लोकान् अन्तरितान् अन्तर्धानप्राप्तान् कुर्वन्ति त्यजन्तीत्यर्थः। अस्मद्ग्रन्थे नास्तीति वक्तुमुत्सादयन्तीत्यर्थः। व्यत्यासम् उक्तहरिमहिमसंबन्धश्लोकान् इह लिखन्ति। क्वचित् साधवोऽपि प्रमादात् साज्ञानाद् अन्यथाऽभिसंधानेनान्यथा कुर्युः। ”

२.द्र.पु. ८७- ८८

३.अन्यदुदाहरणं सप्तमे परिशिष्टे योजितम् द्र.पु. ३०१

१६.यूरोप्खण्डे ग्रन्थसंपादनम्[१]।

ग्रन्थसंपादनशास्त्रं यूरोप्खण्डे विशिष्य ग्रीस्-इटलीत्यादिषु राष्ट्रेषु कथमभिवृद्धमभूदिति ज्ञानमत्यन्तं मुख्यम्। अथेन्स्(क्रि.पू.६००-क्रि.पू.३००)-अलेग्झाण्ड्रिया(क्रि.पू.३००-१क्रि.श.)-रोम्(क्रि.पू.१६८-क्रि.श.५३०)-प्रभृतिषु स्थलेषु मातृकाणामतिविपुलः संग्रहः कृत आसीत्। बैसाण्टियं-व्याप्तिमत्सु प्रदेशेषु प्रदेशे क्रि.श. १५३० पर्यन्तं मातृकाणां संग्रहोऽध्ययनं च निर्वर्तिते। संस्कृतिपुनरुत्थानसमये (क्रि.श. १३५०-१५२१ पर्यन्तं)पुरातनमातृकाणामध्ययनमतीव संरम्भेण प्रवर्तितम्। तस्मादेव कालादारभ्य ग्रन्थसंपादनशास्त्रमारब्धम्।

"ईलियड्" "ओडिस्सी" इति द्वे ग्रीक्भाषाया महाकाव्ये स्तो ये गीयेते स्म न मातृकायां लिख्येते स्म। गायनैः स्वेच्छानुसारं तयोर्गानं क्रियमाणमासीत्। क्रि.पू.५९४ वर्षे सोलोन् नामकः प्रजाधीश्वरः कथाक्रमानुसारेणैव तयोर्गानं करणीयमिति शासनं चकार। लैकर्गुस्-नामकः(क्रि.पू.६७६) क्रेट्द्वीपं गत्वा होमर्प्रणीतयोरेतयोः काममपि मातृकामानीतवान्। पिसिस्ट्राटस् नामकः अथेन्स्देशस्य सर्वाधीकारी (क्रि.पू.५६०-५२७),होमर्कस्य काव्ये पुनःसंस्कृतवान्। सः द्वित्राः पङ्क्तीः प्रक्षिप्तवान् कांश्चन पङ्क्तीस्त्यक्तवांश्च। स तस्य सुतो हिप्पार्कस् च अधुना होमर्रचितस्य काव्यस्योपलभ्यमानं स्वरूपं कृतवन्तौ।

लैकर्गस्नामा कोऽपि राजकीयः पुरुषः (क्रि.पू.३९०-२४७) प्रसिद्धानां नाटककाराणाम् अधिकृताः मातृकाः सार्वजनीनेषु ग्रन्थालयेषु स्थापनीया इति,नाटके पात्रधारिभिर्नटैः केवलं तासु मातृकासु वर्तमानाः पाठा अनुसर्तव्या इति चादिष्टवान्। तालेमीराजस्य(क्रि.पू.३२५-२८५ BC) समये झेनोडोटस्नामकः पण्डितः ईलियड्-ओडिस्सीकाव्ययोः

१.डा.डि.एल्.नरसिंहाचार्यकृतात् कन्नडग्रन्थसंपादने-ग्रन्थादत्रत्या विषया आदत्ताः।

संपादनं प्राचीनमातृकास्थपाठानामाधारेण संपादितवान्। स कंचन शब्द-कोशमपि निर्ममे यत्रैतासु मातृकासु वर्तमानानां बहूनां प्रयोगाणामर्थो विवृतः। कासाञ्चन पङ्क्तीनां तेन प्रक्षिप्तत्वेऽपि स विभिन्नमातृकाणां परिशीलनेन तत्रत्यपाठानां संवादेन च समुचितत्वेन भासमानानां पाठानां चयनं कृतवान्। कुठारिका(†)चिह्नं स उपयुयोज प्रक्षिततत्व-सूचनार्थम्। ग्रन्थकर्त्रा रचितस्य मूलपाठस्य शोधनमेव संपादकस्य ध्येयमिति तस्य मतमासीत्। तेनाङ्गीकृतेषु पाठेषु भूयांसः पाठा मूलपाठानुगामिन इति संशोधनेन ज्ञातमिदानीम्। परन्तु तस्य संपादनक्रमो दोषदूर इति वक्तुं न शक्यते। स्नेनोडोट्कस्य शिष्योऽरिस्टोफेन्स् (क्रि.पू.२५७-१८०) होमर्कस्य काव्ययोः संपादने किञ्चिदग्रेऽगच्छत्। सः तिरस्कृतानपि पाठान् अदर्शयत्। सोऽपि स्वाचार्यवदेव कतिपयानि चिह्न ानि उपयुयोज। यथा अर्थसन्दिग्धे पाठे स नक्षत्रचिह्नम्(*) प्रायुनक्।

अरिस्टोफेनीस्कस्य शिष्यः अरिस्टार्कस्(क्रि.पू.२२०-१४५BC) ग्रन्थसंपादनं व्याकरणं च बोधयन्तीं शालां कामप्यारब्धवान्। होमर्कस्य कृती पुनः स संपादयमास। स होमर्कस्य भाषाशैलीं गभीरमधीत्य संपादनकर्मणि आत्मानं प्रवर्तयामास। तेनोपलब्धानां सर्वासामपि होमर्कवेः कृत्योर्मातृकाणां परिशीलनात् प्राक् स कमपि निर्णयं नैव कृतवान्। स सर्वत्र प्रचलितपाठानामपि परिशीलनं सावधानं कृतवान्।

हिब्र्यूभाषाया बैबल्ग्रन्थो ग्रीक्भाषया तालेमीराज्य-भार-समयेऽनूदितः। सप्ततिविद्वद्भिरनुवादकार्यं निर्वर्तितम्। क्रमेण अनुवादे तस्मिन् पाठभेदाः समजायन्त। अलेक्साण्ड्रियादेशनिवासी ओरिगेन् नामा (क्रि.श.१८६-२५३) अनूदितं तत् संस्करणं संपादितवान्।

बैस्राण्टियंसाम्राज्यकाले ((क्रि.पू.३३०-१४५) यद्यपि प्राचीन-मातृकाणां संग्रहस्तथा तत्रत्यानां ग्रन्थानां प्रतिलेखनं महता संरम्भेण निर्वर्तितमिति सत्यं परन्तु लिपिकरैः स्वमनोऽभिरुच्यनुसारेण ग्रन्थपाठाः

परिवर्तिताः।

कतिपयशतकानन्तरं ग्रन्थसंपादनशास्त्रस्य किञ्चन मौल्यं इस्यान्युयेल् बेक्कर्नामकस्य जीवितावधौ(क्रि.श.१६८५-१७७१) वर्धितं यः ६० कृतीः ४०० मातृकाणामवलम्बनेन संपादितवान्। ग्रन्थसंपादनस्य शास्त्रत्वं तु कार्ल् लाछ्मन्(क्रि.श.१७९३-१८५१) नामकेन ग्रन्थसंपादनज्ञेन प्रापितम्।

यूरोप्देशे प्रचलितस्य ग्रन्थसंपादनशास्त्रस्य गम्भीराध्ययनान्तरं वि.एस्.सुक्थङ्करेण (क्रि.श.विंशे शतके)भारतीयग्रन्थानां संपादनार्थं केचन दृढा निर्णयाः कृताः। मातृकासूपलभ्यानां पुरातनग्रन्थगतानां पाठानां परिशीलनस्यापेक्षा कथमितिहासज्ञाने प्राधान्यमावहतीति सुक्थङ्करेण तथाऽन्यैश्च भारतीयभाषाग्रन्थानां संपादकैः सम्यक् प्रदर्शितम्।

१७.मातृकासूची-पूर्वपीठिका

अस्माकं राष्ट्रे ग्रन्थसंरक्षणसंप्रदाय आबहोः कालादस्ति। भारतीभाण्डागार-सरस्वतीभण्डार-भारतीपत्रधामेत्यादि नामभिर्मातृकालयाः परिचिताः। भोजेन सरस्वतीकण्ठाभरणनामा ग्रन्थालयो निर्मित इति ज्ञायते। जैनग्रन्थालयानां चित्कोश इति नामधेयमासीत्। नालन्दाविश्वविद्यानिलये रत्नोदधि-रत्नसागर-रत्नरञ्जकाख्यास्त्रयो बृहद्ग्रन्थालया आसन् यत्र लक्षशो मातृका रक्षिताः। मातृकासूचीं विना केनापि ग्रन्थालयनिर्वाहो न शक्यते कर्तुम्। तस्माद् बृहत्स्वेतेषु ग्रन्थालयेषु स्थितानां ग्रन्थानां निर्वहणार्थाः काश्चन ग्रन्थसूच्य आसन्नेवेत्यत्र न कोऽपि संशयः। परन्तु घस्नीमोहम्मद्कस्य दुराक्रमणेन नालन्दाघटिकास्थाने दग्धे ग्रन्थालयैः साकमेताभिर्ग्रन्थसूचीभिरपि दग्धाभिर्भाव्यमिति दुःखाकरमिदम्।

ग्रन्थसूच्यो मातृकासूच्यो वा ग्रन्थालयस्वामिभिः क्रियते/कार्यते स्थाप्यते चेति प्रसिद्धम्। अस्माकं राष्ट्रे उपलभ्यमानानां ग्रन्थसूचीनां मध्ये प्राचीनतमा ग्रन्थसूचिः **बृहट्टिप्पणिका**-नाम्नी केनचित् जैन-संन्यासिना क्रि.श.१३८३ ईसव्यां कृता[१]।

विस्तरेण विरचिताभ्यो ग्रन्थसूचिभ्यो भिन्नाः ग्रन्थनामपट्टिकाः सर्वेषु मातृकासंग्रहालयेषु प्रायो वर्तन्त एव यासु विदुषां कटाक्षपातो न कृत इव। ग्रन्थालये संयोजितासु मातृकासु तन्निर्देशनं क्रमाङ्कोल्लेखन-पूर्वकं विदधानाः पञ्जिकास्त्वेताभ्यः पट्टिकाभ्यो भिन्नतरा इति द्रष्टव्यम्।

एताश्च पट्टिकाः प्रायो वैयक्तिकायोपयोगाय विद्वद्भिः कृताः। नैताः कस्मिन्नपि ग्रन्थालये स्थापितानां मातृकाणां सूच्यः।

चेन्नैस्थस्य मद्रास्विश्वविद्यानिलयस्य संस्कृतविभागे काचित् मातृकानामपट्टिका वर्तते। अतिदीर्घे वर्तुलाकारेण पुटयितुमर्हे कागदपत्रे लिखिता नामपट्टिकेयम्। ग्रन्थकाराणां नामान्यप्यत्र लिखितानि। अत्राहत्य ७३८ संख्याकानां ग्रन्थानां नामानि लिखितानि। साहेब्राम्-नामकस्य सुतेन दामोदरशास्त्रिनामकेन विदुषा पट्टिकेयं रचितेति ज्ञायते[२]। अत्रत्या पीठिका दीर्घा एकेनैव वाक्येन कृता। अत्र नवीनन्याय-ग्रन्थयोर्व्युत्पत्तिवादशक्तिवादयोर्व्याकरणविभागे गणना कृतेति विशेषः[३]।

१. संस्कृत् पाण्डुलिपियों के सूचीकरण् का क्रमबद्ध् इतिहास् Dr. Vijaya Shankara Shukla Kalākalpa, Journal of IGNCA Vol. 1 No.1 page 211

२. उपक्रमः- "राजाधिराजभास्वत्प्रतापधीरवीरलोकामोदकप्रज्ञासद्भाग्यमूर्ति-श्रीमहाराजसाहिभबह्वादर(बहादूर?)संपादितयोगक्षेमेषु कश्मीरेषु भ्रातृवर-भाभोसाहिभभाभोनीलाम्बरमुखेन शास्त्रीयपाठशालाध्यापकेन दामोदरशास्त्रिणा वर्तमानानांग्रन्थानां सूची लिख्यते।"

३. एतां ग्रन्थसूचीं द्रष्टुं डा.भुवनेश्वरीवर्यया दत्ताऽनुमतिः। तदर्थं तस्या अस्ति कृतज्ञः प्रकृतो ग्रन्थकर्ता।

सि.कुन्हन्राजेन A list of Manuscripts इति नामकः कश्चन लेखो रचितो यत्र अड्यार्ग्रन्थालये समुपलब्धा काचित् ग्रन्थनामसूचिका प्रकाशनं प्रापिता[१]। अत्र १६७८ ग्रन्थनाम्नामुल्लेखो वर्तते।

अधुना सहस्रशो ग्रन्थसूच्यो मातृकासूच्यश्च (संस्कृतभाषा रचितानां ग्रन्थानां संस्कृतेतरभाषारचितानां ग्रन्थानां च) भारतीयै-र्वैदेशिकैश्च कृता उपलभ्यन्ते।

संपादनार्थं ग्रन्थस्य कस्य चयनं करणीयमिति निर्धारणार्थं सविवरणा ग्रन्थसूच्यः परिशीलनीयाः। सविवरणायां ग्रन्थसूच्यामेते विषयाः स्युः :-

क्रमाङ्कः स्तम्भेषु विषयाः

१. विभागः।
२. क्रमाङ्कः।
३. मातृकाङ्कः।
४. ग्रन्थस्य नाम।
ग्रन्थस्यान्यन्नाम(यद्यस्ति)।
५. ग्रन्थकर्तुर्नाम।
ग्रन्थकर्तुरन्यन्नाम(यद्यस्ति)।
६. व्याख्याया नाम।
व्याख्याया अन्यन्नाम(यद्यस्ति)।
७. व्याख्यातुर्नाम।
व्याख्यातुरन्यन्नाम(यद्यस्ति)।
८. लेखकस्य नाम (यद्युपलभ्यते)।
९. भाषा ।

१.Brahmavidyā VI.3 1st October, 1942

अन्याऽपि भाषा (यद्यस्ति)।

१०. लिपिः।

अन्याऽपि लिपिः(यद्यस्ति)।

११. समग्रा वा असमग्रा वा ? यद्यसमग्रा, उपलब्धस्य भागस्य विवरणम्।

१२. लुप्तं पत्रं/लुप्तानि पत्राणि/लुप्ता भागाः।

१३. ग्रन्थस्य रचनासमयः (यद्युपलभ्यते)।

१४. लेखन(प्रतिलिपिकरण)समयः(यद्युपलभ्यते)।

१५. तस्य नाम यस्मै लेखनं कृतम् (यद्युपलभ्यते)।

१६. मातृकायाः स्वामिनो नाम(यद्युपलभ्यते)।

१७. लेख्यसामग्री:(तालपत्रं/भूर्जत्वक्/अगुरुत्वक्/कागदं/अन्यत्)।

१८. परिमाणम्।

१९. आहत्य पत्रसंख्या।

२०. प्रतिपत्रं पङ्क्तीनां संख्या।

२१. प्रतिपङ्क्ति अक्षराणां संख्या।

२२. स्थितिः-सामान्या/कृमिदष्टा/त्रुटिता/निम्नस्तरीया।

२३. उद्धृता भागाः(उपक्रमः पुष्पिका-उत्तरपुष्पिका च)।

२४. विशिष्टं किमपि(यद्यस्ति-चित्रं,रेखाविन्यासाः इत्यादिकम्)

२५. विशेषः(ग्रन्थविषयकं किमपि, सत्यामावश्यकतायाम्)।

२६. ग्रन्थप्राप्तिस्थलम्।

२७. मातृकादाता/त्री, तस्य/स्याः संपर्कसंकेतश्च।

२८. ग्रन्थप्राप्तितिथिः।

२९. मातृकास्वामिना दत्ता वा, मातृकालयेन क्रीता वा।यदि क्रीता, क्रयस्य विवरणानि।

३०. ग्रन्थसूचीपत्रे एतत् सर्वं केन पूरितम्।तन्नामहस्ताक्षरे।

३१. विवरण-पूरण-तिथिः।

स्तम्भः १.विषयाणां वर्गीकरणमतीव मुख्यम्।संस्कृतग्रन्थानां विषयानुगुण्येन कथं वर्गीकरणीयमित्यग्रिमेऽध्याये निरूप्यते। सविवरणानां ग्रन्थसूचीनां विषयविभागानुगुण्येनैव मुद्रितत्वे स्तम्भोऽयमनावश्यको भवति मुखपत्र एव विषयविभागस्य व्यक्तमुक्तत्वात्।

स्तम्भः ३.एकस्मिन्नेव मातृकाकोशे द्वयोर्द्व्यधिकानां ग्रन्थानां (कदाचित् पञ्चाशदधिकानां लघुस्तोत्राणां !)सत्ता न विरला।यद्येवं, कथं मातृकाणामङ्को दातव्य इति प्रश्नस्य सावकाशता।तादृशेषु प्रसंगेषु मूलो मातृकाङ्कः प्रथमं दीयताम्।तदनु '-' अथवा'/'इत्यस्य चिह्नस्य लेखनपूर्वकं मातृकायां वर्तमानानां ग्रन्थानाम् अनुक्रमाङ्को दर्श्यताम्। अधुना पद्धतिरियं सार्वत्रिकी।

यथा-एकस्मिन्नेव मातृकाकोशे तर्कसंग्रहः, आचारकौस्तुभः, वेदान्तपरिभाषा च वर्तन्ते इत्यभ्यूह्यताम्।मातृकाया अङ्के २८८ इत्येवं सति, तर्कसंग्रहस्याङ्कः २८८-१ (२८८/१),आचारकौस्तुभस्याङ्कः २८८-२ (२८८/२) तथा वेदान्तपरिभाषाया अङ्कः २८८-३ (२८८/३) च भवति।

स्तम्भः ४.१ ग्रन्थस्य सतोर्द्वयोर्नाम्नोः सत्सु वा द्व्यधिकेषु नामसु किं करणीयमिति प्रश्न उद्भवति।नामलिङ्गानुशासनस्य 'अमरः/ अमरकोश'इति प्रसिद्धं नामेत्यत्र स्मरणीयम्।कदाचित् प्रचलितं नाम ग्रन्थकर्त्रा स्थापितस्य नाम्न एकदेशो भवति। 'मणि'रिति तत्त्वचिन्तामणेः प्रचलितं नाम।('नामैकदेशग्रहणेन नामग्रहण'मिति शास्त्रीयो न्यायः)। एतादृशेषु प्रसंगेषु मूलनाम्नः (ग्रन्थकर्त्रा स्वयं स्थापितस्य नाम्न एव) उल्लेखस्य मुख्यत्वमङ्गीकरणीयम्।प्रचलितं नाम आवरणचिह्न योर्दातव्यम्।प्रायो वाचकैः सर्वप्रचलितनामानुसारेण उल्लेखदर्शने प्रयत्यते।अर्थात् तैः प्रथमम् 'अमरः/अमरकोश' इति शब्दस्य दर्शने प्रयत्यते न पुन'र्नामलिङ्गानुशासन' मिति पदस्य दर्शने।तस्मात् 'अमरः/

अमरकोशः’,‘मणि’रित्यपि नामनी अकारादिक्रमिकायां पट्टिकायां क्रमशः अकारवर्गे, मकारवर्गे च प्रविष्टिमर्हतः। आवरणचिह्नयोः “दृश्यतां-नामलिङ्गानुशासनं, तत्त्वचिन्तामणिः” इति सूचना दातव्या। पार्थक्येन मातृकाङ्काः एतयोर्गौणप्रविष्ट्योर्नैव दातव्याः।

स्तम्भः ४.२ द्वयोरनतिप्रसिद्धयोर्नाम्नोः सतोः, मातृकागतस्यैव नाम्नो मुख्यत्वमङ्गीकरणीयम्। “हनुमत्स्तव” इति यत् स्तोत्रं मातृकागतं तस्यैव “आञ्जनेयस्तव”इति संज्ञापूर्वकं मुद्रितत्वे मातृकासूच्यां “हनुमत्स्तव” इत्येवोल्लेखः करणीयो मातृकागतायां पुष्पिकायां तस्यैवोल्लेखात्।

स्तम्भः ४.३ ग्रन्थनामोल्लेखे कदाचिद् विचित्राः पद्धतयोऽक्षिलक्ष्यीभवन्ति। अतिप्रसिद्धासु कृतिषु साधारणमिदम्। एकस्यां मातृकायां भर्तृहरिप्रणीतस्य शतकत्रयस्य “भर्तृलहरी” इति संज्ञा प्रकृतेन ग्रन्थकर्त्रा दृष्टा। भर्तृशब्दो भर्तृहरिरिति शब्दस्यैकदेशः। सौन्दर्यलहरीगङ्गालहर्यादिशब्दानुकृत्या लिपिकरोऽत्र शतकत्रयशब्दस्थले लहरीशब्दं प्रायुङ्क्त। इदं न सम्यगिति स्पष्टम्।

स्तम्भः ४.४ पुष्पिकायामनुपलब्धे ग्रन्थनाम्नि मातृकासूचीनिर्मात्रा जनेनातीवजागरूकेण सता ‘ग्रन्थनाम किमपरेषु स्थलेषु वर्तते’ इति परिशीलनीयम्। तान्यपराणि स्थलानि-मातृकायाः रक्षाकवचं, पत्राणां प्रान्तभागः, ग्रन्थशरीरभूते पाठे उपक्रमपद्यान्युपसंहारपद्यानि चेत्यादि। कदाचिच्च अन्तिमपुष्पिका नैव लिख्यते। किन्तु अन्तिमाद् भागात्पूर्वं ग्रन्थाध्यायानां समाप्तिषु ग्रन्थसंज्ञावती पुष्पिका भवति ! ग्रन्थशरीरभूतेषु पद्येषु ग्रन्थनामयोजनं ग्रन्थकर्त्रैव क्रियते न पुनर्लिपिकरेण।

साम्बशिवाख्येन रचितायामनिरुद्धचम्वां ग्रन्थनामैवं सूचितम्:

यः कौण्डिन्यवरेण्यवंशजलधेर्जैवातृको विश्रुतः
श्रीमद्वेङ्कटदासनामकमहोपाध्यायसूनुः कविः।

श्रीमत्साम्बशिवाख्यया जनिमते (तः ?)काव्ये तृतीयः स्फुर-
च्चम्पूनाम्न्यनिरुद्धशब्दमहिते रङ्गस्तरङ्गोऽजनि[१]।

एवं शार्दूलविक्रीडितच्छन्दसि ग्रन्थकर्तुर्ग्रन्थनाम्नश्च सूचनं नैषधीयचरिते श्रीहर्षेणेदंप्रथमं कृतमिति भाति।

स्तम्भः ४.५ नवीनन्यायक्रोडपत्रेषु कदाचिदुपक्रमे वा उपसंहारे वा ग्रन्थसंज्ञासूचकं न किमपि लिख्यते। संप्रदायानुगतेन पथाऽधीतवतां विदुषां साहाय्यं लब्ध्वा "सामान्यनिरुक्तिक्रोडम्", "अवच्छेदकत्व-निरुक्तिक्रोडम्' इत्यादीनि नामानि प्रतिपाद्यवस्त्वनुरोधेन दातव्यानि।

स्तम्भः ४.६ अप्रसिद्धस्य ग्रन्थस्य नाम्नि कुत्राप्यनुपलब्धे (पुष्पि-कासु कदाचित् केवलमध्यायसमाप्तिः सूच्यते न पुनर्गन्थनाम!) 'मीमांसा-ग्रन्थविशेषः', 'खण्डकाव्यविशेषः', 'आयुर्वेदग्रन्थविशेष' इत्यादिकं नाम दातव्यं भवति। ग्रन्थनाम्नामलेखनं लिपिकराणां बुद्धिपूर्वकमपि कृत्यं भवितुमर्हति। इत्थंभूतेषु प्रसंगेषु मातृकासूचिनिर्मातृभिरेव स्वयं नामप्रदाने बुद्धिरुत्पद्येत। 'विद्याकर'प्रणीत'सुभाषितरत्नकोश'स्य या मातृका तत्र-भवता हरप्रसादशास्त्रिणा प्रथमं प्राप्ता तस्यां ग्रन्थनाम नैवासीत्। स उपक्रमपद्यगतशब्दानामाधारेण "कवीन्द्रवचनसमुच्चय" इति नाम स्वयं सृष्टवान्[२]। ततो मातृकान्तरे वास्तविकं ग्रन्थनाम लब्धमित्यन्यदेतत्। मातृकासूचीनिर्मातारो विज्ञाप्यन्ते यत्तैरेवं **नैव** करणीयं, तैर्दत्तेनैव नाम्ना समुपेतस्य ग्रन्थान्तरस्यान्यत्र नाम्ना संकीर्तनाद् ज्ञाने, तस्यैव समुपलब्धौ वा संशयजननसंभवात्। किन्त्वतिलघुस्तोत्रादिकमत्रापवाद इति द्रष्टव्यम्।

१.1.Descriptive Catalogue of Sanskrit Manuscripts.Vol-VIII ORI, Mysore-1982 P.267

२.पद्यं तदिदम्- नानाकवीन्द्रवचनानि मनोहराणि
संख्यावतां परमकण्ठविभूषणानि।
आकम्पकानि शिरसश्च महाकवीनां
तेषां समुच्चयमनर्घमहं विधास्ये।।

डब्ल्यू.एफ्.थामस्केन संज्ञेयं कृतेति NCC सूची यद्वदति, तत् प्रामादिकम्।

यथा प्रकृतेन ग्रन्थकर्त्रा संपादितो गङ्गानवरत्नमालास्तोत्रम्[१]।

स्तम्भः ४.७ वेदमातृकाणामन्ते "इति ऋग्वेदः समाप्त" इत्यादि पुष्पिकावाक्यं कदापि न लिख्यते। ब्राह्मणारण्यकोपनिषन्मातृकाणामपि प्राय इयमेव स्थितिः। "अनन्ता वै वेदा" इति प्रतीतिरेवात्र कारणम्। सूचीनिर्माता स्वयं वेदज्ञश्चेद् भद्रम्। अन्यथा संप्रदायपथेनाधीतवेदानां विदुषां साहाय्येन मातृकागता मन्त्राः कस्य वेदस्य भागरूपा इति ज्ञानं प्राप्तव्यम्। अपि च वेदब्राह्मणारण्यकोपनिषदां सर्वमन्त्रपादानाम् अकारादिक्रमिकां सूचीं दातुः ब्लूम्फील्ड्रचितस्य Vedic Concordance ग्रन्थस्य परिशीलनेन मातृकायां को वेदो वर्तत इति ज्ञातुं शक्यते।

स्तम्भः ४.८ मातृकायां मूलरहितस्य केवलव्याख्यानस्य सत्त्वे ग्रन्थनामोल्लेखं कृत्वा "व्याख्या" इति शब्दोऽवश्यं योजनीयो येन मूलं मातृकायां नास्तीति, व्याख्यामात्रं लभ्यते मातृकायाम् इति च ज्ञायते।

स्तम्भः ४.९ केवलमूलमात्रस्य मातृकायां सत्त्वेऽपि व्याख्यानगताः केचनोपक्रमश्लोका मातृकायां लिखिताः स्युः। अतीवविरलतमोऽयं प्रसंगः। मातृकासूचीनिर्मात्राऽत्यन्तं जागरूकेण भाव्यमत्र। मूलग्रन्थनाम्न उल्लेखस्तु करणीय एव। वक्तव्यविशेषस्तम्भे च व्याख्यागतानां कतिपयेषां पद्यानां मातृकायाम् उपलब्धिर्बाढं सूचनीया।

स्तम्भाः ४-७.१ मातृकायामसतोरपि ग्रन्थस्य ग्रन्थकारस्य च नाम्नोः,(अनुपलब्ध्योर्वापि सतोर्मातृकापत्राणां पुष्पिकायुक्तानां नष्टत्वात्) तयोः मातृकासूचीनिर्मातृजनेन श्रुतपूर्वत्वे, विसंदेहे च चेतसि तयोर्मातृकायामस्तित्वविषये,तयोरुल्लेखो निर्विकाङ्क्षं स्तम्भेष्वेतेषु करणीयः।

स्तम्भाः ४-७.२ एते स्तम्भा देवनागर्या,ध्वनिसूचकचिह्नयुक्तया रोमन्लिप्या च पूरणीयाः। केवलं देवनागर्या पूरितेऽस्मिन् स्तम्भे केषाञ्चनाधुनिकानां झटिति पठनं क्लेशाय, तस्मादुभे लिपी प्रयोक्तव्ये।

१.द्र.पुटम् २४७

स्तम्भः ५.१ द्वाभ्यां ग्रन्थरचनायां निर्वर्तितायाम्, उभौ अपि ग्रन्थकारौ उल्लेखमर्हतः। इदं प्रसिद्धं यत् काशिकाया रचयितारौ जयादित्यवामनाख्यौ द्वाविति। प्राथमिकमध्यायपञ्चकं जयादित्यीयमिति, अन्यच्चाध्यायत्रयं वामनप्रणीतमिति संप्रदायः। जयादित्यवामनाभ्यामुभाभ्यामपि रचितयोर्व्याख्ययोर्योजनीयांशानां, गुणोपसंग्रहन्यायेन व्यामिश्रकैः परवर्तिभिर्लिपिकरैर्विद्वद्भिश्च संप्रत्युपलभ्यमामानः काशिकापाठः सृष्ट इति काशिकासंपादकस्य श्रीनारायणमिश्रस्य मतं प्रोक्तपूर्वम्[१]। श्रीमान् डा.मल्हारकुलकर्णिस्तु काश्मीरोपलब्धासु काशिकामातृकासु केचन भागा "जयन्तरचिता" इत्युल्लेखः प्राप्यत इति दर्शितवान्। (५.१,२,३; ६.१,२; ३.४;४.२)[२].

स्तम्भः ५.२ स्तोत्राणां काव्यानां वा "इति शङ्कराचार्यविरचितं महिषासुरमर्दिनीस्त्रोत्रं समाप्तम्, इति शङ्कराचार्यविरचितम् अमरुशतकं समाप्तम् " इत्यादिरीत्या शङ्कराचार्यप्रणीतत्वस्य पुष्पिकासु सूचितत्वे मातृकासूचीनिर्मात्राऽत्यन्तमेव जागरूकेण भाव्यम्। महिषमर्दिनीस्तोत्रस्य रचयिता कोऽपि रामकृष्णाभिधः[३], अमरुशतकस्य पुनरमरुक एव। "मण्डनेन सह शङ्कराचार्यस्य वादप्रसंगे मण्डनस्य पत्नी उभयभारती कामकलाविषयकान् प्रश्नान् पप्रच्छ, स्वस्य सार्वज्ञ्यं दर्शयितुं शङ्कराचार्यो मासद्वयावधिकं कालं संप्रार्थ्य अङ्गीकृतवत्यामुभयभारत्यां परकायप्रवेशज्ञानबलादमरुकराजस्य देहं प्रविश्य रतिकलां विज्ञायामरुशतकं रचयामास" इति योदन्तकथा सा गप्यैकशरीरा। स्तोत्रादिकानां शङ्कराचार्यविरचितत्वस्य पुष्पिकासु सूचितत्वे, मातृकासूचीनिर्मातृभिः पुष्पिकागतं ग्रन्थकर्तृनामैव स्तम्भेऽस्मिन् लिखित्वा तदग्रे प्रश्नचिह्नं निवेशनीयम्।

१.द्र.पुटम् ९१

२.*The shortest manuscript of Kāśikāvṛtti.Tattvadīpa*, Academy of Sanskrit Research,Melukote,Vol: III. No.1-2)

३.द्र. पु.१९५

स्तम्भः ६.१ पुष्पिकायां व्याख्या-नामाभावे, किमपि न लेखनीयं स्तम्भेऽस्मिन् ।केवलमेका ह्रस्वा तिर्यग्रेखा पर्याप्ता।

स्तम्भः ६.२ सतद्धितप्रत्ययै रूपैर्व्याख्याननाम्नो निर्देशनमतीव प्रसिद्धं यथा- तर्कसंग्रहदीपिकाया व्याख्या प्रकाशिकाख्या नीलकण्ठीयेति प्रसिद्धा तस्या नीलकण्ठाख्येन विदुषा रचितत्वात्।व्याख्याया वास्तविकं नाम स्तम्भेऽस्मिन्नादिमं प्रवेशमर्हति,ततश्च सतद्धितप्रत्ययं नाम।

स्तम्भः ७.उपलब्धेषु सादरेषु सप्रीतिषु व्याख्याकृन्नामसु, तेषां परामर्शोऽवश्यं करणीयः। परन्तु मूलनाम्न आदौ उल्लेखः करणीयो यथा-माध्ववेदान्तसंप्रदाये जयतीर्थाचार्यस्य टीकाकृत्पादेति विद्वद्भिः सादरं दत्तस्य नाम्नः पुष्पिकायां सत्त्वे, जयतीर्थ इति मूलनाम्नः प्रथममुल्लेखं दत्त्वा टीकाकृत्पाद इति संज्ञाया उल्लेखस्तदनन्तरमेव करणीयो भ्रमोत्पत्ति-प्रसंगनिवारणाय।

स्तम्भः ११. अत्यन्तं विशिष्टा विचाराः, परस्परेण संबन्धरहिताः पुष्पिकाश्चेत्यादिकं चतुर्विंशस्य(२४) स्तम्भस्य प्रतिपाद्यम्।समग्रासमग्रत्वे तु न 'विशेष'कोटिप्रविष्टे , ये चतुर्विंशे स्तम्भे प्रवेशं नार्हतः।तस्माद् ग्रन्थस्य समग्रत्वासमग्रत्वे अस्मिन्नेव स्तम्भे दर्शनीये।

स्तम्भः १९.प्रायेण मातृकासु पत्राङ्काः स्फुटं दीयन्ते।तस्मात् सत्सु पत्राङ्केषु स्तम्भेऽस्मिन् तान् दृष्ट्वा १-६७, १-१३४ इत्यादि लेखनीयम्। नष्टे मातृकायाः प्रथमे पत्रे-सत्युपक्रमपत्रे तु द्वितीये, २-१६९ एवं, तथा नष्टेषु मातृकायाश्चतुर्षु पत्रेषु-सत्युपक्रमपत्रे तु पञ्चमे, ५-२१४ एवमित्यादीत्यादि।अलिखितेषु मातृकायाः पत्राङ्केषु मातृकासूचीकारेण स्वयं पत्रगणनां कृत्वाऽक्षरैरेव 'चत्वारिंशदुत्तरैकशतम्,अष्टाशीतिः' इत्यादि-रीत्या लिखितव्यमिति पद्धतिः कासुचन मातृकासूचिष्वनुसृता। अङ्कलेखनं विना पद्धत्यन्तरेण मातृकापत्रेषु पत्रसंख्यासूचनेऽपि क्रम एष आदर्तव्यः।

पद्धत्यन्तरं च-अ आ -इत्यादिभिरक्षरैः, अर्थहीनैरक्षरसमुदायैः, कस्यापि ग्रन्थस्य श्लोकैर्वैदिकमन्त्राक्षरैस्तान्त्रिकमन्त्राक्षरैर्वा पत्रसंख्यासूचनम्[1]। तादृशे प्रसंगे तदुल्लेखो वक्तव्यविशेषार्थं सृष्टे स्तम्भेऽवश्यं करणीयः। कागद-मातृकाणां तु सत्यां पुटसंख्यायां , सैव निर्देष्टव्या न च पत्रसंख्या।

स्तम्भः २३.उद्धृता भागा नाम उपक्रमस्य केचन भागाः, अन्तस्य समग्रः पुष्पिकापाठः, उत्तरपुष्पिका च (यद्यस्ति)। असमग्रमुपलब्धेषु ग्रन्थेषु उपक्रमोपसंहार-शब्दाभ्यां मातृकालब्धग्रन्थभागस्य उपक्रमो-पसंहारौ मन्तव्यौ न पुनर्ग्रन्थस्य। न्यूनतरम् अर्धपत्रपरिमाणकौ उपक्रमो-पसंहारौ दातव्यौ।

उद्धृतांशानां दर्शनेन ग्रन्थसंपादनज्ञा जनाः-

१.संपादनार्थं को ग्रन्थ आदातव्यः, को नेति निश्चिन्वते।

२.ग्रन्थरचनातिथि-कर्तृ-ग्रन्थकर्तृरचितान्यरचना-वंश-विद्या-चार्य-पोषकराज-वासस्थलेत्यादिविचारान् जानन्ति।

३.संपादनार्थम् अनादीयमानस्यापि ग्रन्थस्य आद्यन्तयोर्ज्ञानेन संशोधने सप्रयोजनां सामग्रीं लभन्ते।

पुष्पिकावाक्यानां क्वाचित्केऽतिदीर्घत्वेऽपि तानि समग्रश एव दातव्यानि तेषां संशोधनानुकूलवस्तुमत्त्वात् ।

डा.वै.सि.भानुमत्याः "ग्रन्थसंपादने: केलवु अध्ययन" इत्याख्ये कन्नडग्रन्थे[2] 'जैनहस्तप्रतिकाररु[3]' इत्यध्यायः-

-चामराजनगरस्य आदिमं नाम अरिकुठार इत्यासीत्, पञ्चबाणाख्येन कविना भुजबलिचरिते इत्याख्यस्य काव्यस्य स्वहस्त-लिखिता मातृका समुपलभ्यते, मुद्रणकलायाः सत्यप्यारम्भे मातृकासु प्रतिलेखनकर्म न स्थगितमासीत्,दानार्थमेव प्रतिलेखनस्योल्लेखः

१. द्र. पु. ३६, २७५-२७८.कागदमातृकासु तु पुटसंख्या सूचनीया।

२. कागिनेले प्रकाशन,१/२२ गुरुराजनिलय,अर्कनाथमार्गः,के.आर् नगर, मैसूरु।

३. तत्रैव पु. १-१९.

कदाचिदुपलभ्यते, प्रायिकेऽपि स्त्रीविद्याभ्यासविरहिते काले महिलानां पठनार्थं कादाचित्कं प्रतिलेखनकर्म विहितम्(यथा अक्कम्माख्याया महिलायाः पठनार्थं चन्द्रप्रभचरितं प्रतिलिखितं, वड्डाराधनेग्रन्थस्य प्रतिलेखनं कमलश्रीअव्वायाः कृते विहितं, आदिदेवस्य सुकुमारचरितं लिपिकरस्य तिसृणां पुत्रीणां पाठनार्थं प्रतिकृतम्)-

-इत्यादिकान् कांश्चन विशिष्टान् विचारान् व्यनक्ति ।

डा.वै.सि.भानुमत्या विरचिते "ग्रन्थसंपादने विवक्षे" इत्याख्ये अपरस्मिन् कन्नडग्रन्थे[1] 'वैदिक हस्तप्रतिगळु मत्तु लिपिकाररु[2]' इत्यध्यायः पुष्पिकावाक्यैरवबुध्यमानान्-

-ग्रन्थकर्तॄणामेव निवासस्थले कृतस्य प्रतिलेखस्य, तदितरस्मिन् स्थले कृतात् प्रतिलेखादधिकं विश्वास्यतरत्वं(मलेबेन्नूरुग्रामनिवासिन्याः हेळवनकट्टे गिरियम्मायाश्चन्द्रहासकथा कस्याञ्चिन्मातृकायां मलेबेन्नूरु-ग्राम एव प्रतिकृता), लिपिकरै रचितायाः पुष्पिकाया आधारेण ग्रन्थकर्तृ-जीवितसमयनिर्धारणायां जायमानं साहाय्यं, इतिहाससंबन्धिनां विषयाणां स्फुटं पुष्पिकास्थिताभिः सूचनाभिर्ज्ञेयत्वं (अद्यत्वे यः साधारणो ग्रामः सासलुनामकः स १७८१ ईसव्यां राज्यमासीद्यत्र सोमराजय्यनामकः कोऽपि राजाऽऽसीत्),कदाचिदेकस्यैव मातृकास्थस्य ग्रन्थस्य द्वाभ्यां कृतं प्रतिलेखनं(लक्ष्मय्य-चौडप्पाख्याभ्यां द्वाभ्यां कर्णाटभारतकथामञ्जर्याः प्रतिलेखः कृतः), वेदधर्मानुयायिनां ये ग्रन्थाः पूज्यास्तेषां ग्रन्थानां वैदिकेतरैरपि जनैः कृतं कादाचित्कं प्रतिलेखनम्-

-इत्यादिकान् कांश्चन विषयान् सप्रमाणं दर्शयति।

---

१. राज् प्रकाशन ८३,के.एस्.आर्.टि.सि. सि बडावणे, हनुमन्तनगर, मैसूरु-५७००१५.

२. तत्रैव पु. २१-२९.

डा.मनीषा निमिष भट्टवर्या पुष्पिकाणामेतेषाम् अध्ययनं कृत्वा गुर्जरभाषया "गुजरातनी मध्यकालीन् संस्कृत् हस्तप्रतोनी प्रशस्तिओ अने पुष्पिकाओनुम् तलस्पर्शी अध्ययन्" इति ग्रन्थं[१] रचितवती यत्र कासाञ्चन चरित्रघटनानां सुविपुलानि साक्ष्याणि सन्ति,यथा-महामात्य-वाहडदेवस्य मृत्युः, सुल्तान्बहादूर्षाकस्य निःसन्तानस्य मरणं, तस्मिन् निष्ठावतो मोहम्मद्षाकस्य सिंहासनारोहणमित्यादि।

सर्वेषामध्यायानां सत्सु समानेषु पुष्पिकावाक्येषु अन्तिमस्य पुष्पिकावाक्यस्योल्लेखः पर्याप्तः। अनुपलब्धेऽन्तिमे पुष्पिकावाक्ये उपान्तिमाध्यायस्य पुष्पिकावाक्यं लेखनीयम्। अत्रोपान्तिमाध्यायशब्दस्य उपलब्धानां पुष्पिकाणामन्यतमत्वे लक्षणा ज्ञेया।

स्तम्भः २३. उत्तरपुष्पिकाशब्देन ग्रन्थपुष्पिकोत्तरं कासुचन मातृकासु लिखितानि लिपिकरनाम-लेखनतिथि-लेखनोद्देश-ग्रन्थ-परिमाणसूचकानि वाक्यानि, तथा लिपिकरविज्ञापनरूपाणि "यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया।अबद्धं वा सुबद्धं वा मम दोषो न दीयते॥" इत्यादीनि च पद्यानि ग्राह्याणि।

अ.यस्मै ग्रन्थस्य प्रतिलिपिः कृता तस्य नाम, लिपिकरस्य च नाम स्तम्भेऽस्मिन् दर्शनीये।प्रकृतेन ग्रन्थकर्त्रा दृष्टास्तादृशविषययुजः केचन परामर्शा अत्र दत्ताः-

"श्रीमद्बेळ्गुळविन्ध्यशैलमहितश्रीगोमटेशार्हतः
श्रीपादाम्बुजसन्निधावनुचरः श्रीचारुकीर्तेर्गुरोः।
पाताख्योऽलिखदादिवर्णिमुनये ग्रन्थं मुदेमं जडः
सन्तः सन्तु करापराधशमने कारुण्यजातोद्यमाः॥[२]"

१.Pub.Dhruvila Nimish Kumara Bhat, C-36, Mangalam Society,Vibhag 3,Dhodasar, Isanpur,Amadabad-380050 2007.२. दानलक्षणस्य उत्तरपुष्पिकायां वर्तत इदं पद्यम्। द्र.पु. २५०-२५४

"आत्रेयगोत्राम्बुजभास्करो यः श्रीश्रीनिवासाय महीसुराय।
सुब्बय्यविद्वत्प्रवरो लिलेख कर्णस्य पर्वातिविचित्रगाथम्।।"

"श्रीमुरारिचक्रवर्तिनः पाठार्थे।"

"इदं पुस्तकं कंसवधस्य सदाशिवसूनुना लिखितं स्वार्थं परार्थं च।"

"उपकोशिगोपालाचार्यस्येदं पुस्तकम्। (उपकोशिगोपालाचार्यस्वामिकमिदं पुस्तकमिदमित्यर्थः।)"

आ. मातृकालेखनतिथौ परामृष्टायां (ग्रन्थकर्तृजीवितसमयावधावनिश्चिते) तस्योल्लेखोऽवश्यं करणीयस्तस्यो ग्रन्थकर्तृजीवितसमयस्य उत्तरसीमादर्शिनीत्वात्।

प्रकृतेन ग्रन्थकर्त्रा दृष्टाः कतिपये तिथिपरामर्शा एवं सन्तिः-

"राक्षसाब्दभवकार्त्तिकमासे श्रीहयाननपदाम्बुजद्वयम्।
संप्रणम्य नरसिंहतातयो न्यासविंशतिमलीलिखन्मुदा।"

"तपस्यमासि प्रभवाब्ज(!ब्द?)जाते पक्षे वलक्षे दिवसे दशम्याम्।
निक्षेपरक्षां व्यलिखत् प्रणम्य सर्वान् गुरून् वेङ्कटकृष्णदासः।"

"सौम्याब्दे मृगशीर्षमासि बहुळे पक्षे तृतीये दिने
कासारादिमुनीश्वरान् हरिपरीवारांशकान् द्वादश।
ध्यात्वा श्रीवृषशैलदेवचरणौ नत्वा पुराणं परं
श्रीमद्भार्गवनामकं नृमृगराट्तातारव्यदासोऽलिखत्।।"

"हेविळम्बि............ष्टपञ्चम्यां श्रीशतुष्टये।
वेङ्कटेशेन भक्त्येयं लिखिता तन्त्रदीपिका।"

"तारणसंवत्सरमार्गशीर्षमासपौर्णिमायां श्रीनिवासपुरवीरराघवेण लिखितः शक्तिवादः समाप्तः।"

"विजयाब्दे मार्गशीर्षे भार्गवाख्ये शुभे दिने।
पारणं वृषभेन्द्रस्य जगत्पावनरूपिणः।"

"लिखितं येन भक्त्या च पारणाख्येन योगिना ॥"

"प्लवाब्दे मासि तुलायां बुधवारयुक्तपौर्णम्यामश्विनीनक्षत्रयुक्तशुभदिवसे न्यायपरिशुद्धिव्याख्यायां न्यायसारसमाख्यायां तिरुमलार्यदासेन लिखितं भगवद्भागवतपादारविन्देषु समर्पितम्। सर्वापचारान् क्षमस्व।"

"सिते महाग्निचयनं शार्वर्यब्दे तु फाल्गुने।
कृष्णेन लिखितं हृद्यं विद्वाज्ञनमनोहरम्।"

"विलम्बिवत्सरे श्रीमद्वेङ्कटेशसुधीमता।
सोमप्रयोगो लिखितः पुष्यमासे मुदेऽस्तु वः।"

"भाद्रे मासि सिते पक्षे दशम्यां शनिवासरे।
लिखिता पुस्तिका चैषा श्रीरामेश्वरशर्मणा।"

"अब्जे(!ब्दे?)ऽस्मिन् विजयाभिधे रघुपतिं सीतासमेतं सदा
पुष्ये मासि वळक्षपक्षदशमीतारेशवारे शुभे।
आनम्योत्तरचम्पुकाव्यममलं शृङ्गाररङ्गा.–
श्रीशैलाख्य.–.तातकविना संतोषतोऽलिख्यत ॥"

"आनन्दाभिधवत्सरोदगयने नागाशिदैवे दिने
मासे फाल्गुनिके भदे(?) हि धवले नत्वा रमावल्लभम्।
श्रीशैलान्वयजो निधाय हृदये त्रय्यन्तविद्यागुरुं
सत्सामान्यनिरुक्तिपत्रमलिखत् कृष्णो महामोदतः।"

संस्कृतग्रन्थानाम् उत्तरपुष्पिकाः क्वचित् संस्कृतेतरभाषासु विरच्यन्ते। दृश्यतामियं कन्नडभाषायां विरचितोत्तरपुष्पिका -

"प्रमोदूतसंवत्सरद चैत्रशुद्धसप्तमीसोमवारपुनर्वसुनक्षत्रदल्लि १६-घळिगॆयल्लि रामचन्द्रभट्टन कैय्य लिखित।"

स्तम्भाः ४, ५,६, ७,२३. ग्रन्थ-ग्रन्थकर्तृ-व्याख्या-व्याख्यातृ-नाम्नां लेखने देशाचारप्रभावान्मातृकासूचीकर्ता मुक्तः स्यात्। देशसंप्रदाययुक्तेन लिपिकरेण सस्कृतेतरप्रभावपतितेन मातृकासु काळिदास इति लिखितत्वेऽपि मातृकासूच्यां कालिदास इत्येव लेखनीयम्। अपवादत्वेन माध्ववेदान्तिनां ग्रन्था उदाहरणीया यत्र ळकारस्य सत्ताऽङ्गीकृता। संस्कृतेतरभाषाग्रन्थमातृकासु तु यथावल्लेखनीयम्। तत्र कारणं संस्कृतेतरभाषासु ळकारादीनां प्रायिकी सत्ता यथा कन्नडभाषायाः "शबरशङ्करविळास", "राजशेखरविळास"च षडक्षरिकवि (क्रि.श. १६५५) विरचिते द्वे चम्पूकाव्ये। किन्तूद्धृतभागेषु (उपक्रमोपसंहार-पुष्पिकोत्तरपुष्पिकासु) मातृकायां यथाऽस्ति तथैव लेखनीयं, प्रमादाः (सशुद्धपाठसूचनाः) अप्यवशेषणीया , येन मातृकायां लिखितस्य भागस्य स्वरूपपरिचयः पाठकानां सम्यग् भवति।

स्तम्भः २४. चित्राणि, ग्रहस्थितिसूचकानि चक्राणि, लिपिद्वयं, लिपित्रयं, तद्वद् भाषाद्वयं भाषात्रयमित्यादिकमस्मिन् स्तम्भे सूचनीयम्। मातृकासु लिपिद्वयस्य लिपित्रयस्य वोपयोगो विरलतमः। परन्तु मूलग्रन्थस्य, संस्कृतेतरभाषाव्याख्यानस्य च मातृकायां सत्त्वे भाषाद्वयं सहजम्। संस्कृतमूल-संस्कृतेतरभाषाव्याख्ययोर्लेखनं त्वेकयैव लिप्या क्रियते प्रायः।

स्तम्भः २५. वक्तव्यविशेषाय कृते स्तम्भेऽस्मिन् विषयपूरणं सश्रद्धस्याध्ययनस्य फलम्। अत्र लेखनीयेषु केचनांशाः-ग्रन्थस्वरूपविषयके विद्वन्मतेऽनङ्गीकरणीयं किमपि वर्तते वा ? ग्रन्थोऽयं मुद्रितो वा ? (अर्थात्, मुद्रितग्रन्थशरीरवान् समानो ग्रन्थो वा ?) मुद्रितग्रन्थसंज्ञामात्रवान् भिन्नशरीरो वा ?

मैसूरुप्राच्यविद्यासंशोधनालयस्थाया वंशब्राह्मणस्य औशनसस्मृतेश्च मातृकायाश्च विषये टि.टि.श्रीनिवासगोपालाचार्येण यदुक्तं तन्मननीयम्ः-

A.वंशब्राह्मण-(पि.२४९७/७)[१]विषये।

"कोशेऽस्मिन् इदं ब्राह्मणं समग्रं दृश्यते। श्रीसत्यव्रतसामश्रमिभिरेतद्ब्राह्मणसायणभाष्योपोद्घाते 'मन्त्रं वोपनिषत्ततः' इत्यत्र पुष्पिकां प्रक्षिप्य तत्र ' भवेदुपनिषत्ततः इत्यपि पाठः क्वचित्, स त्वसमीचीन इति प्रतिभाति मन्त्रस्याग्रहात् ' इति टिप्पणी न्यवेशि। तत्र चास्माकं त्वेवं प्रतिभाति, मन्त्रस्य पार्थक्येनाभ्युपगमे ' अष्टौ हि ब्राह्मणग्रन्थाः'इति श्रीमत्सायणार्योक्त्यसाङ्गत्यभिया षष्ठब्राह्मणस्य मन्त्रब्राह्मणमिति उपनिषद्ब्राह्मणमिति च नामधेययुगलमवश्यमूरीकरणीयम्। अत एव ' मन्त्रं वा ' इति वाशब्दः प्रयुक्त उपपद्यते। ब्राह्मणान्तर इव उपनिषद्ब्राह्मणे पूर्वभागरूपत्वं मन्त्राणामित्यभ्युपगमेन न मन्त्रासंग्रहो दोषः प्रसजति। अत एव षष्ठस्योपनिषद्ब्राह्मणस्य मन्त्रविद्याभेदेन द्वैविध्यं 'तत्रोपनिषदाख्यो यः षष्ठो ग्रन्थः स च द्विधा। मन्त्रपर्व च विद्येति...॥' इत्यादिना सायणार्यैः स्पष्टमेवाभ्यधायीति ' भवेदुपनिषत्ततः'इत्यपि पाठः समीचीन इति। कोशेऽस्मिन् मुद्रितकोशेऽनुपलभ्यमानऋषिदेवपितृतर्पणप्रदर्शनपरभागोऽपि वंशब्राह्मणघटकतया निर्दिष्टो दृश्यते।"

औशनसस्मृति(ए.१३६/१)[२] विषये-

"कोशेऽस्मिन् परिदृश्यमानेयं स्मृतिः पञ्चमाध्याये ३७ पद्यपर्यन्तं मुम्बैकल्कत्तनगरयोर्मुद्रितैतत्स्मृतिसमाना दृश्यते। ३७पद्यानन्तरं यावत्

१.लिखितग्रन्थसूची सविवरणा प्रथमं संपुटम्(वेदः,ब्राह्मणं)-प्र.प्राच्यविद्यासंशोधनालयः मैसूरु-१९३७

२.लिखितग्रन्थसूची सविवरणा द्वितीयं संपुटम्(स्मृतिः) -प्र.प्राच्यविद्यासंशोधनालयः मैसूरु-१९४४

पञ्चमाध्यायसमाप्ति यज्ञोपवीतप्रशंसनपरग्रन्थबहुला दृश्यते। पञ्चमाध्यायान्त एवैतत्स्मृतिसमाप्तिः सूचिता। मुद्रितकोशयोस्तु एतदपेक्षयाऽधिकाश्चत्वारः षष्ठसप्तमाष्टमनवमाध्याया आशौचौर्ध्वदेहिकपातकतत्प्रायश्चित्तनिरूपणपरा दृश्यन्ते! मुम्बैकल्कत्तानगरयोरानन्दाश्रमग्रन्थमालायां च औशनसधर्मशास्त्रनाम्ना मुद्रितमेतद्विलक्षणमनुलोमप्रतिलोमजातितद्वृत्तिनिरूपणपरम् एकपञ्चाशच्छ्लोकपरिमितमन्यदप्युपलभ्यते।"

स्तम्भः २५. ग्रन्थासम्बद्धायां पुष्पिकायां सत्यां तस्याः सुस्पष्ट उल्लेखः करणीयः। मातृकायां लिखितो ग्रन्थ ईश्वरसंहिता इति आदिमपत्राणां पठनेन ज्ञातेऽपि, पुष्पिकायां "इति पुष्करागमः समाप्त" इति सत्याम्, ईश्वरसंहितापुष्करागमयोर्व्यामिश्रणं प्रायिकं स्वभ्यूह्यम्। मातृकापाठे अज्ञैर्जनैरुभयोर्ग्रन्थयोः पत्राणां संङ्करः कृत इत्यत्र न संशयः। इत्थंभूतलक्षणे प्रसंगे, अतीवतितिक्षया ग्रन्थद्वयं वियोजनीयम्।

एतैर्विचारैरिदं सिद्ध्यति यत् **सविवरणमातृकासूच्या निर्माणं पण्डितकृत्यं, न पुनरधिगतलिपिमात्रैः साधारणैर्जनैर्निर्वर्त्यं कर्म।**

कासुचन मातृकासूचिषु उद्धृता भागाः सूच्या अन्ते मुद्राप्यन्ते। अपरासु सूचिषु तु ग्रन्थसूचिभाग एव तत्र तत्र अन्तः प्रवेश्यन्ते। प्रथमायां पद्धतौ पुटपरिवर्तनमतीव क्लेशप्रदं मातृकासूच्या बृहदाकारवत्त्वे। द्वितीयपद्धतौ मातृकाणां स्वरूपपरिचयानन्तरं मातृकालिखितग्रन्थानां परिचयो झटिति पाठकानां भवतीत्यतः सैवादर्तव्या। मातृकापरिचय ऊर्ध्वभागे, मातृकागतग्रन्थपरिचयोऽधोभागे च यदि मुद्राप्येते, सुष्ठुतरं भवति। ऊर्ध्वभागाधोभागभेदिकायां तरङ्गरेखायां रचितायामतीव सुन्दरावपि भवत एतौ। परन्तु मातृकागतग्रन्थपरिचयभागस्य परिमाणवैविध्यात् पुटविन्यसनकार्यं (ले औट्) दुष्करमस्यां तृतीयायां पद्धतौ।

१८. सूचीगतं ग्रन्थविषयवर्गीकरणम्।

सविवरणमातृकासूचीनां विषयीयं वर्गीकरणमतीव मुख्यतमम्। ग्रन्थकर्तृसंज्ञावलम्बकं वर्गीकरणं न प्रधानं , बहूनां ग्रन्थानां तत्कर्तृनामानुपलब्धेः। केषाञ्चन वाङ्मयानां कर्तार एव न सन्ति यथा वेदानाम्। बह्वीषु मातृकासु अन्तिमपत्राणां नष्टत्वाद् ग्रन्थकर्तृनाम न ज्ञायते। परन्तु नष्टग्रन्थानां नामानि नष्टग्रन्थकर्तृनामापेक्षया सुलभतरमभ्यूह्यानि।

विषयपत्रपूरणम्, अधिकृतायां विषयपञ्ज्यां विषयाणां प्रवेशनं, मातृकाप्रदात्रे प्राप्तिपत्रदानं च त्वरितं कार्यमपेक्षते। एवं क्रियमाणे सविवरणाया ग्रन्थसूच्या निर्माणं सर्वथाऽसंभवम्। तादृशे च प्रसंगे विषयपत्रे अल्पसंख्याकानां विषयाणां पूरणं पर्याप्तम्। इमे ते विषयाः-

१. वैदिकवाङ्मयम्।
२. वेदाङ्गम्।
३. धर्मशास्त्रं/कर्मकाण्डम्।
४. व्याकरणम्।
५. छन्दः।
६. इतिहासः/पुराणम्।
७. आर्षस्तोत्रं/नामावली/माहात्म्यम्/व्रतम्।
८. काव्यस्तोत्रम्।
९. साहित्यम्-गद्यं, पद्यं, चम्पूः, नाटकम्।
१०. दर्शनं-वेदान्तीयम्/अवेदान्तीयम्
११. कोशः।
१२. संगीतम्।
१३. वैद्यम्।
१४. शिल्पम्।

१५.वास्तु।

१६.ज्यौतिषं/गणितम्।

१७.तन्त्रशास्त्रम्।

१८.प्रकीर्णकम्।

सविवरणासु ग्रन्थसूचिषु , सत्यपि विषयवर्गीकरणसंबद्धे प्रायिके सादृश्ये , भूयो वैसादृश्यमपि दृग्गोचरः। विश्वस्य सर्वेषां ग्रन्थानां विषयानुगुण्येन विभागाय नवीनग्रन्थालयशास्त्रज्ञैः सृष्टा 'यूनिवर्सल् डेसिमल् क्लासिफिकेषन्' नैवाात्रानुकूला, या मुद्रितमात्रान् ग्रन्थान् परामृशति न पुनर्मातृकाः। तस्मात् सविवरणग्रन्थसूचिषु मातृकोल्लेखे विषयवर्गीकरणानाम् ऐकरूप्यस्य संपादनार्थमधोदर्शितः क्रमोऽनुसरणीयः। एकस्यामेव मातृकायां संस्कृतसंस्कृतेतरग्रन्थानां समावेशो न विरलः। तस्मादस्माकं राष्ट्रे समुपलभ्यमानानां संस्कृतेतरभाषामातृकाणामपि सूच्यो विषयवर्गीकरणार्थं परिशीलनीया इत्यत्र न द्वापरः। संस्कृतेतरभाषासाहित्येषु निष्णाता विद्वांसो ग्रन्थवर्गीकरणे संस्कृतभाषाग्रन्थवर्गीकरणाद् भिन्नतराः पद्धतीराश्रयन्ते यथा कन्नडसाहित्ये षट्पदीसाहित्यं, साङ्गत्यसाहित्यम् इत्यादि। एते विभागाः पद्यकाव्यमिति विभागस्योपविभागा भवितुम् अर्हन्ति। सामान्यतोऽत्र ग्रन्थे दर्शितः क्रमः संस्कृतेतरवाङ्मयस्याप्यन्तर्भावायालं, कृतेषु कतिपयेष्वावश्यकेषूपविभागेषु। प्रायः संस्कृतमातृकालयाः संस्कृतेतरभाषामातृकाणामप्यालयाः।

अत्रेदमवधातव्यम्। संस्कृतग्रन्थस्य संस्कृतेतरभाषाव्याख्यानां संस्कृतकोटिप्रविष्टत्वमेव द्रष्टव्यम्। तद्यथा नाचिराज-विठ्ठलाभ्यां कन्नडभाषया विरचिते नामलिङ्गानुशासनव्याख्ये। संस्कृतेतरकोटौ १.संस्कृतेतरभाषायां मूलं, २.कस्यापि संस्कृतग्रन्थस्य संस्कृतेतरभाषायामनुवादः, ३.कस्यापि संस्कृतग्रन्थस्य संस्कृतेतरभाषायां सार इत्येतेऽन्तर्भवन्ति।

संस्कृतेतरग्रन्थानां व्याख्यासु संस्कृते रचितसु तेषां संस्कृतेतरत्वमेव।

मातृकासूचीप्रविष्टग्रन्थानां विषयानुगुण्येन वर्गीकरणार्थं सूचनाप्रदाने प्रकृतेन ग्रन्थकर्त्रा मैसूरुप्राच्यविद्यासंशोधनालयात् प्रकटितया मातृकासूच्याऽधिकं साहाय्यं लब्धम्। तेनापरत्र प्रकटितास्वपि मातृकासूचिषु दृष्टिर्निक्षिप्तैव। बहव उपविभागास्तु तेन स्वयं कल्पिताः।

विषयवर्गीकरणं यदत्र दत्तं तन्मातृकास्थग्रन्थानामुल्लेखे मातृकासूचीनिर्माणकालेऽनुसर्तव्यमिति धिया। अत्र सूचितेन क्रमेण **मातृकाधानीषु मातृकाणां वर्गीकृत्य स्थापनं नैव शक्यक्रियम्** । दृश्यन्ते ह्येकस्मिन्नेव मातृकाकोशे विभिन्नविषयिण्योऽनेकाः कृतयः। विभिन्नविषयिणीनां कृतीनां वियोजनमपि न शक्यक्रियम्। दृश्यते च यस्मिन् पत्रे ग्रन्थस्य कस्यचनान्तस्तस्मिन्नेव पत्रेऽन्यस्य ग्रन्थस्यादिः ! परन्त्वेतदर्थं लिपिकरा न दूष्याः। किमर्थमेवं तैः कृतमित्यस्माभिः सावधानं चिन्तनीयम्। अत्रेदमाकलनीयम्। पूर्वस्मिन् काले लेखनार्थं सज्जीकृतानां पत्राणां नेदानीमिव सौलभ्येन प्राप्तिरासीत्। तस्मात् कारणाल्लिपिकरैराश्रितकृपणत्वैरयम् अभ्युपायोऽनुष्ठित इति हेतुरत्र भवितुमर्हति। अन्यदिहावधेयम्-यदृच्छया गृहोपकरणानां गृहस्वामिना स्वेच्छानुसारेण स्थापनमिवैतत्। लिपिकरस्य मनसे यथा रोचेत तथा मातृकाया यस्मिन्नपि कस्मिन्नपि भागे ग्रन्थोपक्रमभागस्य कृतेऽपि लेखने,पौनःपुन्येन तन्मातृकोपयोगिनो जनस्य झटित्यभीष्टभागोपरि शृङ्गग्राहिकया दृग्विनिपातने कोऽपि क्लेशो न भवति।

अत्राधुना (१७३ पुटादारभ्य) सूच्यमानस्य विषयविभागक्रमस्य मातृकासूचीनिर्दिश्यमाण-विषयवर्गीकरणैकप्रयोजनकृत्त्वेऽपि, ग्रन्थालयानां ग्रन्थधानीषु भारतीयभाषारचितानां मुद्रितग्रन्थानां (संपादितानां) स्थापनेऽपि किञ्चित् साहाय्यमनेन लभ्येतेत्याशास्यते।

ग्रन्थविषयवर्गीकरणक्रमः

१.वेदः

संहिता

सूक्तसंग्रहः/ मन्त्रसंग्रहः/ वेदमन्त्रसंग्रहः[1]

वेदविकृतिः(पदपाठो घनपाठ इत्यादिका)

२.आरण्यकम्

३.ब्राह्मणम्

४.उपनिषत्(मूलपाठमात्रा)

प्राचीनोपनिषत्

संहिताब्राह्मणारण्यकोपनिषत्

स्वतन्त्रोपनिषत्

नवीनोपनिषत्

५.वेदाङ्गम्

अ.शिक्षा

आ. प्रातिशाख्यम्

इ. वेदलक्षणम् (अनिङ्गचं, तपरं, नपरमित्यादि)

ई. अनुक्रमणिका

उ.वेदपरिशिष्टम्

ऊ.व्याकरणम्

अष्टाध्यायी

सूत्रवार्त्तिकभाष्याणि

१.एकाग्निकाण्डमन्त्रप्रश्नः, पूजामन्त्राः, वेदसंहितागतानां मन्त्राणां सङ्ग्रहः, गृह्यमन्त्राः, श्रौतमन्त्राः,सूक्तसंग्रहाश्चात्र विभागे परिगण्यन्ते।कुण्डलिनीषट्चक्रादिप्रतिपादनपरेण मन्त्र(तन्त्र)शास्त्रेण नास्य विभागस्य संबन्ध इति द्रष्टव्यम्।

गच्छद्व्याख्या[१]
प्रक्रिया-फक्किका[२]
परिभाषा
धातुपाठः
उणादि
गणपाठः
फिट्सूत्रम्
लिङ्गानुशासनम्
पाणिनिपक्षीयम्[३]
सूत्रवार्त्तिकभाष्याणि
गच्छद्व्याख्या
प्रक्रिया-फक्किका
परिभाषा
धातुपाठः
उणादि
गणपाठः
लिङ्गानुशासनम्
क्रोडपत्रम्
पाणिनीयेतरत्[४]
सूत्रवार्त्तिकभाष्याणि

१.काशिकेत्यादिका।

२.रूपसिद्धि-प्रक्रियासर्वस्व-प्रक्रियाकौमुदी-वैयाकरणसिद्धान्तकौमुदीत्यादिका।

३.चान्द्र-कण्ठाभरणादिकम्।यद्यपि वेदाङ्गव्याकरणशब्देन केवलमष्टाध्यायी गृह्यते न तु चान्द्रादिकम्।परन्तु तस्मिन्नपि शब्दस्यैव प्रतिपाद्यत्वादत्र तस्यापि गणना।

४.कातन्त्र-जैनेन्द्र-हैम-सौपद्म-मलयगिरि-मुग्धबोधादिकम्।

गच्छद्व्याख्या
प्रक्रिया-फक्किका
परिभाषा
धातुपाठः
उणादि
गणपाठः
लिङ्गानुशासनम्

संस्कृतेतरत्[1]

ए.छन्दः

पिङ्गलीयम्
पिङ्गलीयेतरत्
संस्कृतेतरत्

ऐ. निघण्टुः / निरुक्तम्

ओ.१. लगधीयं ज्यौतिषम्

औ.२. लगधीयेतरद् ज्यौतिषम्

सिद्धान्तज्यौतिषम्
गणितज्यौतिषम्
फल(फलित)ज्यौतिषम्
मिश्रितम्
विविधज्यौतिषाणि
नाडीशास्त्रं/सप्तर्षिनाडी
हस्तसामुद्रिकम्
स्वप्नशास्त्रम्

१.बहूनि संस्कृतेतरभाषाव्याकरणानि संस्कृतेनैव रचितानि। तान्यत्रैवान्तर्भवन्ति। तेषां किल प्रतिपाद्यं वस्तु संस्कृतेतरा भाषाः।

शकुनशास्त्रम्

स्वरशास्त्रम्

प्रश्नशास्त्रम्

रमलुप्रश्नः

संस्कृतेतरत्

अं.कल्पः

श्रौतम्

श्रौतसूत्रम्

आपस्तम्बीयम्, आश्वलायनीयं,कौथुमं,
खादिरं,गोभिलं, जैमिनीयं, पारस्करं,
बोधायनं, वैखानसं

पितृमेधसूत्रम्

गौतमीयं, द्राह्यायणीयं, पारस्करीयं,
भारद्वाजीयं, वैखानसीयं च

गृह्यप्रयोगः

आश्वलायनीयः, आपस्तम्बीयः,
बोधायनीयः, द्राह्यायणीयः,
कात्यायनीयः, माध्यन्दिनीयः,
वैखानसीयः

६.धर्मशास्त्रम्

धर्मसूत्रम्

आपस्तम्बं,गौतमं,वैखानसम्

स्मृतिः

निबन्धः

७.इतिहासः

रामायणम्
संस्कृतम्
संस्कृतेतरत्
महाभारतम्
संस्कृतम्
संस्कृतेतरत्

८.पुराणम्

महापुराणम्
संस्कृतम्
संस्कृतेतरत्
उपपुराणम्
संस्कृतम्
संस्कृतेतरत्
स्थलपुराणम्
संस्कृतम्
संस्कृतेतरत्

९.गीता

भगवद्गीता
मूलपाठमात्रा महाभारतीया
भगवद्गीतेतरा महाभारतीया
पुराणीया
स्वतन्त्रा
संस्कृतेतरा

१०.उपाख्यानम्/इतिहाससंग्रहः

संस्कृतम्

संस्कृतेतरत्

११.माहात्म्यम्

क्षेत्र-तीर्थ-माहात्म्यम्

इतिहासीयम्

पुराणीयम्

स्वतन्त्रम्

संस्कृतेतरत्

ग्रन्थमाहात्म्यम्

इतिहासीयम्

पुराणीयम्

स्वतन्त्रम्

संस्कृतेतरत्

इतरमाहात्म्यम्

संस्कृतम्

इतिहासीयम्

पुराणीयम्

स्वतन्त्रम्

संस्कृतेतरत्

१२.व्रतम्, व्रतकथा

वेदधर्मीयं/पौराणिकम्

जैनम्

बौद्धम्

१३.शान्तिः

वेदधर्मीया/पौराणिकी

जैनी

बौद्धी

१४. पूजा

वेदधर्मीयम्/पौराणिकी

जैनी

बौद्धी

१५.आगमः

वैष्णवः

पाञ्चरात्रः

वैखानसः

शैवः

१६.तन्त्रशास्त्रं, तान्त्रिकमन्त्रः, तन्त्रप्रयोगश्च

१७.आर्षस्तोत्रम्

इतिहासीम्

पुराणीयम्

आगमीयम्

तन्त्रीयम्

अष्टोत्तरस्तोत्रं, सहस्रनामस्तोत्रं, नामावली

जैनसंप्रदायीयम्

बौद्धसंप्रदायीयम्

संस्कृतेतरत्

१८.स्वतन्त्रस्तोत्रम्

अद्वैत+देवता+ऋषि-गुरु-स्तोत्रम्

विशिष्टाद्वैत+देवता+ऋषि-गुरु-स्तोत्रम्

द्वैत+देवता+ऋषि-गुरु-स्तोत्रम्

शुद्धाद्वैत+देवता+ऋषि-गुरु-स्तोत्रम्

अचिन्त्यभेदाभेद+देवता+ऋषि-गुरु-स्तोत्रम्
शैव+देवता+ऋषि-गुरु-स्तोत्रम्
वीरशैव+देवता+ऋषि-गुरु-स्तोत्रम्
तन्त्र+देवता+ऋषि-गुरु-स्तोत्रम्
शाक्त+देवता+ऋषि-गुरु-स्तोत्रम्
जैन+देवता+ऋषि-गुरु-स्तोत्रम्
बौद्ध+देवता+ऋषि-गुरु-स्तोत्रम्
अभिनवविशिष्टाद्वैत(स्वामिनारायणीय)+देवता+ऋषि-गुरु-स्तोत्रम्
क्षेत्र-स्तोत्रम्
नदी-स्तोत्रम्
विविधदेवता-स्तोत्रम्
पादपूर्तिस्तोत्रम्
वेदपादस्तोत्रम्
संकीर्णम्
संस्कृतेतरत्

१९. पद्यकाव्यम्

महाकाव्यम्
कल्पितवस्तुकम्
इतिहासवस्तुकम्
पुराणवस्तुकम्
राजचरित्रवस्तुकम्
वंशावलीवस्तुकम्
आचार्य-संन्यासि-पण्डितजीवनम्
व्याकरणवस्तुकम्

व्याकरणेतरशास्त्रवस्तुकं
पादपूर्तिरूपं
संस्कृतेतरत्
खण्डकाव्यम्
संस्कृतेतरत्
पादपूर्तिखण्डकाव्यम्
गीतकाव्यम्
संस्कृतेतरत्
सुभाषितम्
एकव्यक्तिकृतम्
संगृहीतम्
मिश्रितम्
संस्कृतेतरत्
एकव्यक्तिकृतम्
संगृहीतम्
मिश्रितम्
मुक्तकम्
एकव्यक्तिकृतम्
संगृहीतम्
मिश्रितम्
संस्कृतेतरत्
एकव्यक्तिकृतम्
संगृहीतम्
मिश्रितम्

२०.गद्यकाव्यम्

कल्पितवस्तुकम्
इतिहासवस्तुकम्
पुराण-वस्तुकम्
राजचरित्रम्
वंशावलीवस्तुकम्
आचार्य-संन्यासि-पण्डितजीवनम्
व्याकरणवस्तुकम्
व्याकरणेतरशास्त्रवस्तुकम्
संस्कृतेतरत्
    कल्पितवस्तुकम्
    इतिहासवस्तुकम्
    पुराणवस्तुकम्
    राजचरित्रम्
    वंशावली
    आचार्य-संन्यासि-पण्डितजीवनम्

२१.प्रबन्धः,कथा, महाकथा
संस्कृतम्
संस्कृतेतरत्

२२.चम्पूः
कल्पितवस्तुका
इतिहासवस्तुका
पुराणवस्तुका
राजचरित्रवस्तुका
वंशावलीवस्तुका
आचार्य-संन्यासि-पण्डितजीवनम्

- संस्कृततेतरा
    - कल्पितवस्तुका
    - इतिहासवस्तुका
    - पुराणवस्तुका
    - राजचरित्रवस्तुका
    - वंशावलीवस्तुका
    - आचार्य-संन्यासि-पण्डितजीवनम्

२३.दृश्यकाव्यम्

- कल्पितवस्तुकम्
- इतिहासवस्तुकम्
- पुराणवस्तुकम्
- राजचरित्रम्
- वंशावलीवस्तुकम्
- आचार्य-संन्यासि-पण्डितजीवनम्
- दर्शनवस्तुकम्
- संगीतरूपकं, नृत्यरूपकम्
- संस्कृतेतरत्
    - कल्पितवस्तुकम्
    - इतिहासवस्तुकम्
    - पुराणवस्तुकम्
    - राजचरित्रम्
    - वंशावली
    - आचार्य-संन्यासि-पण्डितजीवनम्
    - दर्शनवस्तुकम्।
    - संगीतरूपकम्, नृत्यरूपकम्

२४.यमककाव्यं/श्लेषकाव्यम्/चित्रकाव्यम्

२५.राजबिरुदकाव्यम्

२६.काव्यशास्त्रम्

संस्कृतम्

संस्कृतेतरत्

२७.राजनीतिः, अर्थशास्त्रम्

संस्कृतम्

संस्कृतेतरत्

२८.शिल्पशास्त्रम्

संस्कृतम्

मूर्तिशिल्पम्

वास्तु

चित्रकला

संस्कृतेतरत्

मूर्तिशिल्पम्

वास्तु

चित्रकला

२९.रत्नशास्त्रम्

संस्कृतम्

संस्कृतेतरत्

३०.भरतशास्त्रम्

संस्कृतम्

नाट्यशास्त्रम्

संगीतशास्त्रम्/गेयरचना

नृत्यशास्त्रम्

मिश्रितम्

संस्कृतेतरत्

नाट्यशास्त्रम्

संगीतशास्त्रम्/गेयरचना

नृत्यशास्त्रम्

मिश्रितम्

जानपदम्

संप्रदायगानम्

३१.आयुर्वेदः

संस्कृतम्

आयुर्वेदसंहिता

बृहत्त्रयी; लघुत्रयी

सामान्यम्

रसशास्त्रम्/ रसायुर्वेदः/

रसेश्वरसिद्धान्तः

सिद्धायुर्वेदः

गजायुर्वेदः

अश्वायुर्वेदः

वृक्षायुर्वेदः

आयुर्वेदनिघण्टुः[१]

संस्कृतेतरत्

सामान्यम्

रसशास्त्रम्/ रसायुर्वेदः/

१.धन्वन्तरिनिघण्टु-शिवकोशादय आयुर्वेदनिघण्टव एवात्र समावेशनमर्हन्ति, न पुनर्नामलिङ्गानुशासन-वैजयन्त्यादीनि तेषां सामान्यकोशत्ववत्त्वात्।

रसेश्वरसिद्धान्तः
सिद्धायुर्वेदः
गजायुर्वेदः
अश्वायुर्वेदः
वृक्षायुर्वेदः
आयुर्वेदनिघण्टुः

३२.पाकशास्त्रम्

संस्कृतम्
संस्कृतेतरत्

३३.कामशास्त्रम्

संस्कृतम्
संस्कृतेतरत्

३४.जैनम्

अर्धमागधी/प्राकृतम्
संस्कृतम्
विविधभाषा

३५.बौद्धम्

त्रिपिटकम्
सौत्रान्तिकम्
योगाचारः
वैभाषिकम्
माध्यमिकम्
मिश्रितम्
वज्रयानम्

३६.सांख्यम्

३७.योगः

पातञ्जलः

पातञ्जलेतरः

३८.वैशेषिकम्

३९.न्यायः

प्राचीनन्यायः

नव्यन्यायः

तत्त्वचिन्तामणिः

तद्व्याख्योपव्याख्याः

स्वतन्त्रः

क्रोडपत्रम्

तर्कः(न्याय-वैशिषिके)

४०.मीमांसा

जैमिनीयम्

गुरुमतम्

कुमारिलमतम्

मिश्रितम्

नव्यमीमांसा

क्रोडपत्रम्

४१.अद्वैतम्

संस्कृतम्

प्रस्थानत्रयम्

श्रुतिप्रस्थानम्(उपनिषदः)

स्मृतिप्रस्थानम्(भगवद्गीता)

न्यायप्रस्थानम्(शारीरकमीमांसा/ब्रह्म-सूत्रम्)

स्वतन्त्रम् / प्रकरणम्
नव्यवेदान्तः
मिश्रितम्
क्रोडपत्रम्
संस्कृतेतरत्

४२.भास्करीयम्

४३.विशिष्टाद्वैतम्

संस्कृतम्
प्रस्थानत्रयम्
श्रुतिप्रस्थानम्(उपनिषदः)
स्मृतिप्रस्थानम्(भगवद्गीता)
न्यायप्रस्थानम्(शारीरकमीमांसा/ब्रह्म-सूत्रम्)
स्वतन्त्रम् / प्रकरणम्
क्रोडपत्रम्
द्राविडम्
द्राविडभिन्न-संस्कृतेतरत्

४४.द्वैतम्(ब्रह्ममीमांसा)

संस्कृतम्
प्रस्थानत्रयम्
श्रुतिप्रस्थानम्(उपनिषदः)
स्मृतिप्रस्थानम्(भगवद्गीता)
न्यायप्रस्थानम्(शारीरकमीमांसा/ब्रह्म-सूत्रम्)
स्वतन्त्रम् / प्रकरणम्
क्रोडपत्रम्
कन्नडम्

४५.प्रत्यभिज्ञा

४६.शैवम्

संस्कृतम्

संस्कृतेतरत्

तमिळु

तमिळुभिन्नभाषा

४७.वीरशैवम्/शिवाद्वैतम्/शक्तिविशिष्टाद्वैतम्

संस्कृतम्

कन्नडम्

वचनम्

वचनेतरत्

तेलुगु

मिश्रितम्

४८.शुद्धाद्वैतम्

४९.अचिन्त्यभेदाभेदः

५०.अभिनवविशिष्टाद्वैतम् (स्वामिनारायणीयम्)

५१.अनुभवाद्वैतम् (अप्पयशिवाचार्यीयम्)

५२. क्रैस्तम्[१]

५३. विविधदर्शनसंग्रहः

५४. भक्तिः

संस्कृतम्

संस्कृतेतरत्

१.तालपत्रेषु केचन क्रैस्तग्रन्थाः सिंहळीभाषायाम् अथ च तमिळुभाषायां लिखिताः श्रीलङ्कायां (केरलेऽपि क्वचित्) समुपलभ्यन्त इति केनचित् सज्जनेन ज्ञापितः प्रकृतो ग्रन्थकर्ता। ते नातीवप्राचीना इति तु स्पष्टम्।

५५.कोशः[१]

संस्कृतम्

अभिधानम्(सामान्यम्)

नानार्थकोशः

शब्दभेदः

एकाक्षरकोशः

मिश्रितः

क्रिया/धातु-कोशः

संस्कृतेतरत्

५६.विश्वकोशः

संस्कृतम्

संस्कृतेतरत्

५७.क्रीडा-

संस्कृतम्

संस्कृतेतरत्

५८.कृषिः

संस्कृतम्

संस्कृतेतरत्

५९.बृहद्भारतम्

पूर्वा दिक्

इण्डोनेष्या-मयन्मार्-थाय्ल्याण्ड् मलयः,

पश्चिमा दिक्

गान्धारः

१.धन्वन्तरिनिघण्टु-शिवकोशादय आयुर्वेदनिघण्टवो नात्र समावेशनमर्हन्ति, कोशशब्देनात्र नामलिङ्गानुशासन-वैजयन्त्यादि-सामान्यकोशानामभिप्रेतत्वात्।

दक्षिणा दिक्
श्रीलङ्का
उत्तरा दिक्
नेपालः
टिबेट्-कञ्जूर्-तञ्जूर्
रष्या
चीना/मञ्चूरिया
निहोन्(जपान्)
हान्-गूक्(कोरिया)

६०.प्रकीर्णम्

संस्कृतम् (धनुर्वेदः, मल्लविद्या इत्यादि)
संस्कृतेतरत्(कळारिप्पयट्टु इत्यादि)

१९.मातृकासूची-उत्तरपीठिका

संपादनार्थं ग्रन्थवरणे मातृकासूच्यः प्रधानमवलम्बनम्। सविवरणमातृकासूचीनां पौनःपुन्येन दर्शनं, पठनं च ग्रन्थसंपादनक्षेत्रे प्रवेशमिच्छुकानां कृतप्रवेशानां पक्वहस्तानां चात्यन्तम् अपेक्षितोऽभ्यासः। केचन ग्रन्थसंपादनक्षेत्रं प्रविविक्षवः कामपि सविवरणां ग्रन्थसूचीमपश्यन्तः "मह्यं स ग्रन्थो रोचते, मह्यमेतच्छास्त्रं रोचते" इति मन्त्रमावर्तयन्ति। एकस्मिन् ग्रन्थेऽथवा शास्त्रेऽभिरुचिर्न दोषाय परन्तु साऽभिरुचिर्विस्तारसापेक्षा।

तण्डुलगोधूमदर्शनन्यायोऽत्रानुसन्धेयः। तण्डुलेच्छुर्देवदत्तः प्रविश्यापणम्। तत्र न केवलं तण्डुलं परन्तु गोधूममपि पश्यति। दृष्टतण्डुल-

गोधूम उभयं क्रीणात्यथवा केवलं गोधूममथवा केवलं तण्डुलम्। केवले तण्डुले क्रीते, परेद्यवि पुनश्च गोधूमवन्तं तमेवापणं प्रविश्य "गोधूमं भो देहि मे" इत्यापणिकं वदति। तद्वदिहापि द्रष्टव्यम्। आपणायतेऽत्र मातृकालयः। वस्तुपट्टीसदृशी च सविवरणमातृकासूची। आपणिकायते च मातृकापालकः।

सविवरणमातृकासूच्या ग्रहणानन्तरमापाततो ज्ञाते, श्रुतपूर्वे दृष्टपूर्वे चापि ग्रन्थनाम्नि दृष्टिपातः साधारणो वृत्तान्तः। परन्तु सविवरण-मातृकासूचीदर्शनानन्तरं ज्ञायमानस्याश्रुतपूर्वग्रन्थस्य संपादने यत्नो ग्रन्थसंपादनक्षेत्रं संवर्धयति। सर्वैरपि ग्रन्थसंपादकैः श्रुतपूर्वाणामेव ग्रन्थानां संपादनोद्यमे कृते सहस्रशो ग्रन्थाः केवलं मातृकायामेवोपतिष्ठन्ति। मातृकास्थानां ग्रन्थानामाधारेण मातृकास्वेव प्रतिलेखनं भारते सर्वत्र संप्रति स्थगितम्। अगुरु-ताल-भूर्ज-कागद-लिखिता मातृकाः क्रमेण नङ्क्ष्यन्ति। तस्मात् अप्रकटितानां ग्रन्थानां संपादने प्राधान्यं दातव्यम्। व्याकरण-वेदान्त-न्याय-मीमांसा-काव्यशास्त्रग्रन्थातिरिक्ते कस्मिन्नपि क्षेत्रे ग्रन्थसंपादनज्ञानां विंशे एकोनविंशे च क्रैस्तवीये शतके यदि प्रवृत्तिर्नाभविष्यत्, अर्थशास्त्रं, राजमानसोल्लासः, विविधाः कोशाः, अपूर्वाः साहित्यकृतय इत्येतदादिकं सर्वमपि मातृकायामेवास्थास्यत्। अभीष्टेऽपि क्षेत्रेऽप्रकटिताः कृतय उपलभ्यन्ते सहस्रशो यत्रापि दृष्टिः प्रसारणीयैव। एतेनेदं सिद्धं यत् **सविवरणमातृकासूचीनां सश्रद्धमध्ययनं ग्रन्थसंपादकानां प्राथमिकं कर्तव्यम्।** अश्रुतपूर्वाणि ग्रन्थनामानि, प्रकटितानां ग्रन्थानां पीठिकासु परामृष्टानामप्रकटितग्रन्थानामुल्लेख इत्यादिकं विशेषतोऽवधातव्यम्।

संपादनाय ग्रन्थस्य वरणे सदाप्यन्यमुखावलोकनं न साधु-रभ्यासः। स्वाभिरुच्यनुकूलस्य ग्रन्थस्य संपादनार्थमपरेषु ग्रन्थसंपादकेषु बलप्रयोगस्तु नितरां हेयः। सर्वेषामपि ग्रन्थसंपादकानां स्वस्वाभिरुचयो

वर्तन्त एव। ग्रन्थसंपादनेच्छुभिस्तद्विषयकोपदेशस्य प्रार्थितत्वे तु तासाम् अभिरुचीनां विस्तारं कर्तुं (त एव ग्रन्थसंपादका यथा प्रयतेरंस्तथा) तेभ्यः केषाञ्चन ग्रन्थनाम्नां ज्ञापनं नापराधाय। उपदेशस्याप्रार्थितत्वेऽपि "त्वयाऽमुक एव ग्रन्थः संपाद्यताम्, अमुको ग्रन्थो न" इत्यादिव्याहारै-र्निर्बन्धरूपं हिंसनं नूनमपराधाय कल्पते।

एतेन, संपादनार्थमादत्तस्य केनापि हेतुनाऽसमाप्तसंपादनस्यापि ग्रन्थस्य संपादनार्थम् , अन्येषु निर्बन्धकरणं व्याख्यातम्।

संपाद्यस्य ग्रन्थस्य चयने निर्धारणहीनैर्नूतनाधीतिभिः साहाय्यार्थं ग्रन्थसंपादनज्ञेषु प्रार्थना नावरा। तथापि सविवरणमातृकासूचीपरिशीलन-राहित्यं तु तेषां कथञ्चिन्न समर्थनीयम्।

सश्रद्धं विहितेन सविवरणमातृकासूचीपरिशीलनेन ग्रन्थसंपादन-शास्त्रीया बहवो विषया अवगता भवन्ति, नवीनमातृकान्वेषणे कुतूहलो-त्साहादिकं च जायते।

२०.संदेग्धव्यकर्तृका रचनाः

कासाञ्चन कृतीनां कृतिकारत्वेन यस्य लोके प्रसिद्धिस्तद्भिन्नेन विदुषा रचितत्वस्य निर्धारणाऽऽहोस्वित् कासाञ्चन कृतीनां सन्देग्धव्य-कर्तृकत्वस्य वा सूचना-एतदुभयं ग्रन्थसंपादनशास्त्राध्ययनस्य कोटा-वेवायातीति अवगमयितुम् अध्यायेऽस्मिन् संदेग्धव्यकर्तृकाणां रचनानां विषये किञ्चिदुच्यते।

उपशतं स्तोत्राण्यादिशङ्कराचार्यविरचितत्वेन लोके प्रसिद्धानि। संप्रदायानुसारेण द्वाविंशतिस्तोत्राणि वस्तुत आदिशङ्कराचार्यविरचितानि। परन्तु कानीमानि द्वाविंशतिस्तोत्राणीत्यत्र संप्रदायो भजति तूष्णींभावम्।

आदिशङ्कराचार्यस्य जीवितावधिर्द्वात्रिंशद्वर्षाणि इति या शङ्करविजयमूलिका श्रद्धा, सा 'शङ्कराचार्यविरचितानां स्तोत्राणां संख्या द्वात्रिंशत्' इत्यभ्यूहने हेतुरिति प्रतिभाति।

प्रस्थानत्रयभाष्योपदेशसाहस्र्यतिरिक्तानाम् आदिशङ्कराचार्यरचितत्वेन महाजनैः सश्रद्धं विश्वस्तानां कृतीनाम् आदिशङ्कराचार्यविरचितत्वं सन्दिग्धं मन्यते संशोधकवर्गः। केनोपनिषदो द्वे भाष्ये स्तः पदभाष्यवाक्यभाष्याभिधे । "पदश उपनिषदं व्याख्यायापि न तुतोष भगवान् भाष्यकार" इति व्याख्याताऽऽनन्दगिरिः। वस्तुतस्तु वाक्यभाष्यस्य शङ्कराचार्यप्रणीतत्वं नैवास्तीति सच्चिदानन्देन्द्रसरस्वत्या मतम् [1]।

विवेकचूडामणेरपि शङ्कराचार्यप्रणेतृत्वं सच्चिदानन्देन्द्रसरस्वती नाङ्गीकरोति, तत्रत्यैरभिप्रायैः प्रस्थानत्रयभाष्यगताभिप्रायाणां वैसादृश्यात्, अथ च शङ्करानन्दप्रणीतगीतातात्पर्यबोधिन्याख्यव्याख्यागताभिप्रायाणां सादृश्याच्च[2]। आचार्येण प्रणिपातचैतन्येन इङ्ग्लिष्भाषया अनूदितस्य विवेकचूडामणेः पीठिकात इदं ज्ञायते यत् श्रीमता सतीन्दर्धीमान्वर्येण -"Comans, Alston, Ingalls एते वैदेशिका विद्वांसो विवेकचूडामणेरादिशङ्कराचार्यप्रणीतत्वं नास्तीति प्रतिपादयन्ति, किन्तु Hacker, John, Grimmes एते विवेकचूडामणेः आदिशङ्कराचार्यकर्तृकत्वमङ्गीकुर्वत "- इत्युक्तम्[3]। उभयत्र हेतूपन्यासो न विहितः।

शङ्कराचार्याद् भिन्नतरान् कर्तॄन् सुविस्पष्टं नामतो निर्दिशन्त्यपि स्तोत्राणि आदिशङ्कराचार्यरचितानीत्येव प्रायो मन्यते महाजनः !

१.केनोपनिषत्-सशाङ्करभाष्या-सं.सच्चिदानन्देन्द्रसरस्वती। अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुर-१९५९.पीठिका पु.6-11. तत्रभवता श्रीधरशास्त्रिपाठकेनाप्येवमेवाभिप्रेतमासीदिति श्रूयते।

२.विवेकचूडामणिः-सं.कन्नडानुवादकश्च-सच्चिदानन्देन्द्रसरस्वती। अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुर-१९५७.पीठिका, पु.6-11.

३.अन्तर्जाले समुपलभ्यो विवेचकचूडामणिः।

कदाचिदेवं श्रद्धा पण्डितानपि प्रभावयतीत्याश्चर्यम्। बहुषु संस्करणेषु किमपि स्तोत्रं 'महिषासुरमर्दिनीस्तोत्र'नाम्ना मुद्रितं "जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते" इति ध्रुवपदकारणात् । एतस्य आदिशङ्कराचार्यप्रणीतत्वम् आबालगोपालं प्रसिद्धमस्माकं राष्ट्रे। इदमेव स्तोत्रं 'भगवतीपुष्पाञ्जलिस्तोत्र' मितिसंज्ञायुङ् मुद्रितं गुजरातीमुद्रणालयप्रकटिते बृहत्स्तोत्रमुक्ताहारे यत्र श्रीपतिसूनुना कृताज्ञो रामकृष्णाख्यः कविरिदं रचितवानित्यन्तिमे पद्ये ब्रूतः[1] ।द्वयोरनयोः पद्ययोरसार्वत्रिकत्वेऽपि आदिशङ्कराचार्यकर्तृकत्वं स्तोत्रस्यास्य दोलायमानमेव।

सौन्दर्यलहर्या अपि आदिशङ्कराचार्यकर्तृकत्वं दोलायते यत्रेमे हेतवः-

१. 'सौन्दर्यलहर्याः कर्ता क' इति कोऽपि सम्यङ् न जानाति, 'शिवः, शिवा अथवा शङ्कराचार्यः सौन्दर्यलहर्याः कर्ता' इत्यनिर्धारणस्य मतत्रयस्य डिण्डिमव्याख्यायां दर्शितत्वात्, 'प्रवरसेनः सौन्दर्यलहरीकर्ता' इति सुधाविद्योतिनीव्याख्यायामुक्तत्वात्, 'तिरुज्ञानसंबन्धर् नामको योगी सौन्दर्यलहरीकर्ता ' इति तमिळुनाडुराज्ये किंवदन्त्याः सत्त्वाच्च।

२. न च "शक्तिशक्तिमतोरभेद" इति गीताभाष्ये(१४.२७) यदुक्तं तदेव सौन्दर्यलहर्यां "शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुम्"इत्यनेन प्रथमपद्येनोक्तमिति वाच्यं, 'शक्तिं विना शिवः

१.रमयति किल कर्षस्तेषु चित्तं नराणाममरजवर(?)यस्माद् रामकृष्णः कवीनाम्।अकृत सुकृतगम्यं रम्यपद्यैकहर्म्यं स्तवनमवनहेतुं प्रीतये विश्वमातुः।।
इन्दुरम्यो मुहुर्बिन्दुरम्यो (?) मुहुर्बिन्दुरम्यो (?) यतः साऽनवद्यं स्मृतः।
श्रीपतेः सूनुना कारितो योऽधुना विश्वमातुः पदे पद्यपुष्पाञ्जलिः।। (बृहत्स्तोत्रमुक्ताहारः।गुजराती मुद्रणालयः १९२७ पु.२३०-२३४.)एते द्वे पद्ये तेलुगुलिप्या एम्.जि.सुब्बरायशास्त्रिणा संपादिते १९०५ ईसव्यां चेन्नैस्थे एम्प्रेस् आफ् इण्डिया प्रेस् इत्यत्र मुद्रिते च बृहत्स्तोत्ररत्नाकरे (तृतीये संपुटे पु.२०१-२०४) न विद्येते।

सन्नपि स शक्तिहीनो भवति ' इति, 'पुण्यैकलभ्यं शक्तये प्रणमनम्' इति, 'तान्त्रिकैः शक्तेरेव पारम्यमङ्गीक्रियते न तु देवतान्तराणाम्' इति च तत्र प्रतिपादितत्वाच्छक्तिपूजायाः सूचितत्वाद्वेदान्ताध्ययनस्यानुल्लेखाच्छक्तिशक्तिमतोरभेदाङ्गीकारस्य तत्राप्रस्तुतत्वाच्च।

३. सौन्दर्यलहर्यां कामुकत्वफलं स्पष्टं वदन्ति वाक्यानि गोचरीभवन्ति[१]। नेत्थंभूतलक्षणानि वेदान्तवाक्यानि। शङ्कराचार्येण वेदान्तिना कामुकत्वफला मादनप्रयोगा उपदिष्टा इति स्वप्नेऽपि नाङ्गीकार्यम्।

४. 'अपावृतायामविद्यायां स्वात्मन्यवस्थानं मोक्ष[२]' इत्यद्वैतमतात् 'शक्तौ सायुज्यं[३]' प्रतिपादयन्ती सौन्दर्यलहरी दवीयसी।

५. सौन्दर्यलहरी हि तन्त्रग्रन्थः। तन्त्रशास्त्रोक्तोपायानुष्ठानं भोगमोक्षोभयफलकम्[४]। परन्तु वेदान्तोक्ताज्ञाननिवृत्तिर्मोक्षैकावाप्तिरूपा।

६. ननु "-'तन्त्रग्रन्थाः सामान्यानां कृते, वेदान्तास्तु प्रौढानां कृते' इति मत्वैव तान्त्रिकयोः कौलसमयोभयमार्गयोः समन्वयकरी शास्त्रकृतिः स्तोत्ररूपा शङ्कराचार्येण सामान्यजनतायाः प्रीतये कृता" इति चेन्न, शङ्कराचार्यकाले शिष्टजुष्टस्यापि सांख्यशास्त्रस्य तेन खण्डितत्वात्, पूजयितव्यदेवताधिक्यवतां पारिभाषिकशब्दनिबिडानां च तन्त्रग्रन्था-

१. इमे सौन्दर्यलहरीपद्ये द्रष्टव्ये : १८, १९

२. "अविद्यानिवृत्तौ स्वात्मन्यवस्थानं परप्राप्तिः" (तैतिरीयोपनिषद्भाष्यं शीक्षावल्ली अवतरणिका) "अविद्याप्रतिबन्धमात्रो हि मोक्षो नान्यप्रतिबन्धो नित्यत्वा-दात्मभूतत्वाच्च।" (मुण्डकोपनिषद्भाष्यम् ३.२.९) इत्यादि।

३. "-'भवानि ! त्वं दासे मयि वितर दृष्टिं सकरुणाम्'
इति स्तोतुं वाञ्छन् कथयति 'भवानि ! त्व'मिति यः।
तदैव त्वं तस्मै दिशसि **निजसायुज्य**पदवीं
मुकुन्दब्रह्मेन्द्रस्फुटमुकुटनीराजितपदाम्॥" (सौन्दर्यलहरी २२)

४. यस्यास्ति भोगो न च तस्य मोक्षो यस्यास्ति मोक्षो न च तस्य भोगः।
श्रीसुन्दरीसाधनतत्पराणां भोगश्च मोक्षश्च करस्थ एव॥

नामेव क्लिष्टत्वात्,केषाञ्चन तन्त्ररहस्यानां केवलमन्तरङ्गशिष्येभ्यो ज्ञाप्यत्वात्, वेदान्तानामात्मविचारयुजां तु सामान्यैरप्यवगन्तव्यत्वाच्च।

७.कुत्रापि प्रस्थानत्रयभाष्येषु तन्त्रग्रन्थानामध्येयत्वस्य शङ्कराचार्येणानुक्तत्वमपि प्रबलो हेतुः।अनेन श्रीविद्या-कादिमत-हादिमत-षट्चक्रकुण्डलिनीत्यादिशब्दानां प्रस्थानत्रयभाष्येष्वभावो व्याख्यातः।

शङ्कराचार्यनामक एव कोऽप्यादिशङ्कराचार्यभिन्नस्तान्त्रिकः सौन्दर्यलहर्याः कर्तेति प्रकृतग्रन्थकर्त्रीयं मतं-भगवत्पादेति बिरुदस्य तान्त्रिकैरपि धृतत्वात्,तान्त्रिकेण केनापि कालिदासभगवत्पादाख्येन विरचितस्य सकलजननीस्तोत्रस्य लक्ष्मीधराव्याख्यायामुल्लेखात्, 'सौन्दर्यलहरी शङ्करभगवत्पादेन रचिता' इति लक्ष्मीधरेण व्यक्तमुक्तत्वेऽपि तस्य प्रस्थानत्रयभाष्यरचयितृशङ्कराचार्याभिन्नत्वेन परामृष्टत्वाभावाच्च।

एतादृशमन्यदिदमुदाहरणम्-पूर्वपरामृष्टेनैव कालिदासभगवत्पादेन तान्त्रिकेण संन्यासिना श्यामलादण्डकं विरचितवता भाव्यं यो रघुवंशादिकर्तुः कालिदासाद् भिन्नः।परन्तु भारतीया महाजनता(कदाचिद् विद्वज्जनोऽपि) श्यामलादण्डककर्तृ रघुवंशादिप्रणेतुर्भेदं स्वप्नेऽप्यशङ्कमाना उदन्तकथायां कस्याञ्चिच्छ्रद्दधाति यदनुसारेण युवाऽपि विद्यागन्धहीनो बालिशः सन् कालिदासो जिह्वायां कालिकादेव्या लिखिते सति बीजमन्त्रे झटिति महाकविर्बभूव यः प्रथमं श्यामलादण्डकं रचयित्वा ततो रघुवंशाभिज्ञानशाकुन्तलादि रचयामास !

अश्वधाट्यां रचितस्य 'चेटीभवन्निखिल' इत्यादेरम्बास्तोत्रस्य कालिदासकृतत्वं क्वचित्ख्याप्यते।अस्यान्यत्र शङ्कराचार्यरचितत्वं घुष्यते।

सुभाषितसंकलनेषु पद्यप्रणेतृणां नामोल्लेखे दृश्यमाना दोषाः, क्वाचित्क्योऽस्तव्यस्तताश्चाप्येतत्कोटिप्रविष्टा एव।

भोजमाघादीनां समकालजीवितत्वकल्पना, भोजराज्यावधि-

भिन्नकाले जीवितवतां बहूनां कवीनां भोजसभायां प्रवेशनमित्यादिकं बल्लालसेनप्रणीते भोजप्रबन्धे कल्पितम्[१]।

केनचिद् विरचित इतिहाससमुच्चयो महाभारतशैलीमनुकुर्वन् "भीष्मयुधिष्ठिरसंवादरूप"(?)स्त्रिंशन्मिताः कथाः बिभर्ति। महाभारतस्यानुशासनपर्वणि एतद्गतं बहुलोपाख्यानं कथञ्चित् प्रक्षिप्तम्[२]।

पि.साम्बमूर्तिना कथितेयं कथाऽस्मदवधानमर्हतिः-

"त्यागराजेन तेलुगुभाषायां 'नौकाचरितमु' इत्याख्या कृती रचिता, कैश्चन युवभिस्तस्य गेयनाट्यस्य प्रदर्शनं कारितं च ।तदतीव सफलमभूत्।सांप्रदायिकाः पण्डिताः तत्र वर्तमानं कथावस्तु पुराणेषु नास्तीति प्रत्यपादयन्।पण्डितानां तादृशं प्रतिपादनं कश्चन 'वालजपेटे वेङ्कटरमण् भागवतर्'नामकः असहमानः, शरभोजिराजस्यास्थानविद्वांसं 'महार्णवम्बुचावडि'नामके प्रदेशे आञ्जनेयदेवस्थाने निवसन्तम् आञ्जनेयोपासकम् कविं वेङ्कटसूरिणमुपासर्पत्।स नौकाचरित्रं संस्कृतेन त्यागराजीयस्य नौकाचरित्रमुगेयनाट्यस्याधारेण रचितवान्। रचनेयं प्राचीनेषु तालपत्रेषु लिखिता।पण्डितानां पुरो दर्शितायां तस्यां सर्वैरपि पण्डितैरैककण्ठ्येन तस्य पुराणाधारत्वमङ्गीकृतम्।त्यागराजेन श्रुतायाम् अस्यां वार्तायां स जहास, स्वशिष्यस्य चेष्टितमानन्देनानुमुमोद च !"[३]

दिवङ्गतेन मधुरैसोमसुन्दरेण गीतस्य 'गोपिकातिलक'-रागनिबद्धस्य 'महागणपतिं भावये भक्तमनोरथफलप्रदं वरप्रदं श्री' इति गेयरचनाया ध्वनिमुद्रिका काचिदस्ति।मुत्तुस्वामिदीक्षितस्य 'गुरुगुह'

१. भोजराजप्रबोधितेन निचुलाख्येन विदुषा स्वसखेन कालिदासपण्डितेन प्रणीतं नानार्थशब्दरत्नं व्याख्यातम्।(सं.) डा.विरूपाक्षजड्डीपाल्।(Amar Granth Publications 8/25, Vijayanagar Delhi- 110009.)भोजराजसभायां रघुवंशादिकर्तृकालिदासस्य सभाकवित्वरूपा कथा रघुवंशादिकर्तृभिन्नकालिदासज्ञानाभावजन्या। २.कन्नडस्य गोगीतस्य कथावस्तु एतदनुकरोतीति विस्मयावहम्।३.अग्रिमपुटं दृश्यताम्-

इत्यङ्कितस्य तत्रान्ते योजितत्वेऽपि नेयं रचना मुत्तुस्वामिदीक्षितीया भवितुमर्हति, मुत्तुस्वामिदीक्षितीयायाः शैल्याः अत्रत्यायाश्च शैल्या भिन्नतरत्वात्। अनुपल्लवीचरणयोः समानो गेयभागो मुत्तुस्वामिदीक्षितीयासु रचनासु नैवास्ति। परन्त्वत्रास्ति ! केन कूटेयं गेयकृती रचितेति प्रकृतो ग्रन्थकर्ता न जानाति।

त्यागराजेत्यङ्कितवतीनां कृतीनां मध्ये न्यूनतमं सप्त गेयरचनास्त्यागराजेन वस्तुतो नैव रचिताः।१.'विनतासुतवाहनुडै' (हरिकाम्भोजी)।२.'नीदु चरणमुले ' (सिंहेन्द्रमध्यमा)। ३.'नतजनपरिपालक' (कीरवाणी) ४.'वेडलेनु कोदण्डपाणि'(तोडि) ५. 'श्रीरघुकुलमन्दु' (हंसध्वनि) ६.'नीलकण्ठनिरञ्जन'(आभोगि) ७. 'दिनमे सुदिनमो' (लताङ्गी) ८.'विनरादा ना मनवि'(चक्रवाक)[१]

ग्रन्थसंपादनज्ञैरेतादृंशि कृत्यानि नैवाभिनन्दनीयानि।

शालासु विद्यालयेषु च भोजप्रबन्धस्य पाठ्यग्रन्थत्वेन स्थापना यत् क्रियते तत्र प्रकृतग्रन्थकर्त्रीया दृष्टिरित्थंभूताः-कथाश्रावणेन विद्यार्थिजनेषु मनोरञ्जनसृष्टिर्नापराधाय, किन्तु, भोजप्रबन्धकथानां पाठ्यत्वेन स्वीकारप्रसंगे तासां बल्लालसेनेनैव कल्पितत्वं स्पष्टं सूचनीयम्। अथवा संज्ञोच्चाटनपूर्वकं भोजकालिदासादिसंज्ञास्थले "कोऽपि राजा", "कोऽपि कविः " इत्यादि परिवर्तनीयं, येन गप्पकथासु बालिशजनयोग्यो विश्वासो न प्रादुर्भवेद् विद्यार्थिजनेषु।

३.Great composersII Tyagaraja by P.Sambamurthy. Indian Music Publishing house,Madras 1970.Pp.231-232.नल्लान् चक्रवर्ति कृष्णमाचार्येणेदं संस्कृतेऽनूदितम्।संस्कृतप्रतिभा संपुटः १ संचिका ७. १९६९

१. प्राथमिकं त्रयं के.वि.श्रीनिवास ऐय्यङ्गार्येण प्रणीतमिति साम्बमूर्तिः।४-७ एतच्चतुष्टयं एम्.वि.श्रीनिवासैय्यङ्गार्येण प्रणीतमिति; अष्टमी कृतिरन्येन वस्तुतो रचिता, किन्तु तञ्जावूरु कृष्णभागवतर्केन भ्रान्त्या त्यागराजविरचिता कृतिः सेति प्रचारः कृत इति च श्रीमता स.कार्त्तिक्वर्येण मह्यं ज्ञापितम्।

२१. किमर्थं ग्रन्थसंपादनशास्त्रम् ?

बहुवारं प्रश्न एष उत्तिष्ठति विदुषामपि हृदये 'ग्रन्थसंपादनशास्त्रस्य वास्तविकं प्रयोजनं किम् ? ' इति। तेषां प्रश्नस्यायमाशयः :

"विद्वज्जनेन मातृकास्थस्य ग्रन्थस्य प्रथमं प्रतिलिपिः क्रियते, पाठाशुद्धयो व्याकरणाशुद्धयश्च विनिवार्यन्ते ततो ग्रन्थो मुद्राप्यते, तावताऽलम्। अत्र किं त्यक्तं किं वा च योजनीयम् ? सहस्रश उपलभ्यन्ते भाषाप्रज्ञानसंपन्ना मेधाविनो विश्वस्मिन्नस्मिन्। यदि कोऽपि नाभविष्यद् विद्वान्, कोऽपि ग्रन्थं न समपादयिष्यत्। 'मातृकागतग्रन्थपाठानां शास्त्रीयम् अध्ययनम्' इत्यस्य पदगणस्य कोऽप्यर्थो वर्तते वा ? प्रथमवारं ये ग्रन्थानां मुद्रणमकारयन्, ते सर्वे किं मूर्खाः ? 'ग्रन्थसंपादनशास्त्राध्ययनम्' इति शब्दः, प्रसिद्ध्यर्थं क्रियमाणं व्यायामविशेषं किं न द्योतयति ? "

अत्रैतद् वक्तव्यम्-ग्रन्थसंपादनशास्त्रमिति शब्दमेकवारमपि अश्रुतवन्तो विद्वत्तल्लजा बहवो ग्रन्थसंपादनं तथा कुर्वन्ति यथा, ग्रन्थसंपादनशास्त्रज्ञा अपि कदाचित्तैः कृतं पाठपरिष्कारं दृष्ट्वा विस्मितविस्मिता भवन्तीति यद्यपि सत्यं ; तथापि, ग्रन्थसंपादनशास्त्राध्ययनं कर्तव्यमेव ग्रन्थान् संपिपादयिषूणामिति प्रकृतग्रन्थकर्त्रीयं मतम्।

नागरकाः स्वेच्छानुसारेण यत्र कुत्रापि येनापि केनाप्याकारेण गृहं निर्मापयितुं प्रायेण जानन्त्येव। तत्र नगरपालिकायाः किमपि न कृत्यम्। किन्तु नगरपालिकाया अभावे स्वेच्छानुसारं निर्मितेषु गृहेषु, कुत्र मार्गाः क्रियन्तां कुत्र विद्युत्तन्त्र्यः स्थाप्यन्तां कुत्रोद्यानवनं स्यात्, कुत्र कच्चरपरीवाहार्थं भूमिः खननीयेत्यादिकेषु विषयेषु निर्णयाभावाद् यद्वा तद्वा यत् किमपि क्रियते, संचारव्यवस्था भ्रष्टा क्लिष्टा च भवति, सर्वमस्तव्यस्तं भवति। तस्मान्नगरपालिका आवश्यकी यया नगरनिर्वहणार्थं

विधयो रूप्यन्ते 'अत्र सन्तु मार्गाः, अत्र गृहनिर्माणाय स्थलावकाशोऽत्रोद्यानमत्र च विपणि'रित्यादयः। अनुष्ठितेषु तेषु विधिषु, नागरकैः स्वयं कृतया गृहादिनिर्मापणनिर्धारणया संभवन् भूयान् दोषः सुपरिहरो भवति। नगरपालिकास्थाने ग्रन्थसंपादनशास्त्रं, नागरकस्थाने च ग्रन्थसंपादकाः। सम्यगधीतशास्त्राः प्रवचनादिचतुरा विद्वांसो लक्षश उपलभ्यन्त इति सत्यम्। तैश्च पठ्यन्तां मातृकाः, संशोध्यन्तां ग्रन्थपाठाः, विरच्यतां पीठिका, परन्तु ग्रन्थसंपादनशास्त्रविधीनाम् अननुष्ठानात् पीठिकायाम् अस्तव्यस्तता, ग्रन्थपाठेऽनङ्गीकार्या निर्णया इत्यादिका दोषाः क्वचित् संभवन्त्येव। ग्रन्थसंपादनशास्त्रं संपादकानां मित्रं, न पुनर्विघ्नकारी रिपुः। सर्वेषां ग्रन्थसंपादनशास्त्रप्रतिपाद्यानां विषयाणां ये स्वयमेव विनाध्ययनं ज्ञातारस्तैः शास्त्रमिदं नाध्येतव्यम् !

ग्रन्थकर्त्रा **यो विरचित एव** पाठो न केवलं तस्य, परन्तु ग्रन्थकर्त्रा यः पाठो **नैव विरचितस्**तस्यापि ज्ञानमस्माकमावश्यकम् अविरचितस्य पाठस्य ग्रन्थशरीरादुच्चाटनीयत्वात्। ग्रन्थपाठमौल्यमापनम् (पाठाङ्गीकारे पाठानङ्गीकारेऽपि हेतवः) एतानंशानवलम्बते- १.अत्यक्तो ग्रन्थपाठो यत्र न किमपि लुप्तम्। २.अव्यामिश्रितो ग्रन्थपाठो यत्र ग्रन्थकर्तृरचितपाठशरीरे तदरचितः पाठो न प्रविष्टः। ३.अनादिष्टो ग्रन्थपाठो यत्र ग्रन्थकर्तृ-रचिते पाठेऽन्यपाठस्याक्रमणं मूलपाठस्यापवारणं च न कृते।

ग्रन्थानां तुलनात्मकाध्ययने "ग्रन्थकर्ता कदाऽजीवत्, के तस्य समकालिकाः कवयः शास्त्रकाराश्च, केन स प्रभावितः, काँश्च स प्रभावितवान्" इत्यादिकं मूलभूतं वस्तु। ग्रन्थसंपादनशास्त्रे तु अस्मदुपलब्धासु मातृकासु वर्तमानस्य ग्रन्थपाठस्य मूलं किं, केन मूलपाठेन को भिन्नः पाठः कथमुद्भूत इत्यादिकं प्रतिपाद्यं वस्तु। किमुक्तं किमनुक्तं किं व्यत्यस्तमिति च मातृकागतग्रन्थपाठतुलनया निर्णीते, उक्तस्य अङ्गीकार्यानङ्गीकार्यस्वल्पाङ्गीकार्यत्वेषु निर्णयः सुलभः। ग्रन्थकर्त्रा यन्नैव रचितं

तस्यावलम्बनेन ग्रन्थकर्तुः स्तुतिस्तु, ग्रन्थकर्तृनिन्दनस्यैव सोदरी, उभयोर्व्यर्थत्वात्। ग्रन्थसंपादनशास्त्रविध्यनुसारेण मातृकागतग्रन्थपाठानां संवादो मुद्रितानां ग्रन्थानां संवादाय मार्गं निर्माति। वस्तुतस्तु 'तुलनात्मकम् अध्ययनं' ग्रन्थसंपादनशास्त्रस्यैव संतानः। ग्रन्थकर्त्रा यन्नैव विरचितं तस्य ग्रन्थकर्तृरचितत्वभ्रान्त्या तदाधारेण ग्रन्थकर्तुर्विषये किमपि कथनं हास्यास्पदम्। उद्वेगावेशादिकं संशोधनक्षेत्रबहिर्भूतम्। **मातृकागतग्रन्थपाठसंवादं विना मुद्रितग्रन्थानां संवादो न शक्यः।**

अनेकेषां स्त्रोत्रप्रकरणग्रन्थादीनाम् आदिशङ्कराचार्यप्रणीतत्वेन कालिदासप्रणीतत्वेन च प्रसिद्धिः,बल्लालसेनरचितासु गप्पकथासु सत्यत्वबुद्धिः, सुभाषितसंकलनेषु पद्यप्रणेतॄणां नामोल्लेखे प्रमादा इत्येतदादिकं ग्रन्थसंपादनशास्त्रज्ञानाभावजन्यमिति द्रष्टव्यम्[१]।

१.शास्त्रकाव्यग्रन्था ये मुद्रिता उपलभ्यन्ते, तेषामाधारेण बोधनम् अलमिति दृष्टिः प्रायिकी। मुद्रितेष्वपि विभिन्नसंस्करणदृश्यमानेषु पाठेषु ग्रन्थकर्तृरचितं वास्तविकं मूलं कतममित्यत्र संशोधनकुतूहलं,अध्येतत् अपरेण कृते क्रियमाणे च संशोधने तज्ज्ञानस्य प्राप्तौ श्रद्धेत्यादिकं ग्रन्थसंपादनशास्त्रकार्यागारे भागभाक्षु विद्यार्थिजनेषु यत् संप्रत्युन्मील्यते तत् संतोषावहम्। ग्रन्थसंपादनशास्त्रकार्यागारेषु लब्धप्रवेशानां सर्वेषां विद्यार्थिजनानां मातृकाविषयिका प्रीतिर्जायत एवेति वक्तुमपि न शक्यते। दृश्यन्ते हि स्वगृहेषु मातृकावन्तोऽपि केचिन्मातृकाप्रीतिलेशेनापि शून्याः ! तद्वदिहापि द्रष्टव्यम्। मातृकासंशोधने प्रेरणां ददात्येव ग्रन्थसंपादनशास्त्रबोधनमिति नायम् एकान्ततो नियमः। एतेन, ग्रन्थसंपादनशास्त्रकार्यागाराणि व्यर्थान्येवेति प्रतिपिपादयिषति प्रकृतो ग्रन्थकर्तेति न भ्रमितव्यं, यो ग्रन्थसंपादनकुतुकोत्पादका भूयासुरेतानि कार्यागाराणीत्याशास्ते केवलम्। विविधेषु विश्वविद्यानिलयेषु यदधुना ग्रन्थसंपादनशास्त्रशिक्षणं दाप्यते विद्यार्थिजनः तत् परमोत्कृष्टानां संस्करणानां निःसारणे निदानं भूयादित्येव ग्रन्थकर्तुराशीः।

२२. संपादकभिन्नेन जनेन लिप्यन्तरकरणम्

कैश्चिद् ग्रन्थसंपादनमिच्छद्भिः देवनागरीतरलिपिलिखितानां ग्रन्थानां देवनागरीलिप्या परिवर्तने स्वयमक्षमैस्तल्लिपिज्ञानामन्येषां साहाय्यं वाञ्छ्यते। लिप्यन्तरकर्मैतद् दाक्षिण्येन क्रियते प्रायः। विगते क्रैस्तशतके निरुद्योगाः लिपिकराश्चासन्नेव ये किलोदरभरणार्थं देवनागर्या लिप्यन्तरं कुर्वन्ति स्म। अपि च तस्मिन् काले बहुषु मातृकासंग्रहालयेषु लिप्यन्तरार्थमेव केचन विद्वांसो नियुक्ता ये प्रतिदिनं देवनागरीभिन्न-लिपिलिखितानां(जीर्णशीर्णासु मातृकासु देवनागरीलिपिलिखिताना-मपि) प्रतिकृतिं देवनागर्या निर्मान्ति स्म। द्युतिचित्रनिर्माणं पूर्वं न शीघ्रमनुमन्यते स्म मातृकालयाधिकारिभिः। मातृकालयोद्योगिभिन्नानां बाह्यानां देवनागरीतरलिपिज्ञानामपि मातृकालय एवोपविश्य प्रतिलेखने कदाचिन्नासीत् समयावसरः। तादृशेषु प्रसंगेषु मातृकालयोद्योगिनां मुखावलोकनमनिवार्यमभूत्। अद्यत्वे तु कांश्चनापवादान् मुक्त्वा प्रायेण सर्वत्र मातृकालयेष्वाधुनिकयन्त्राणां साहाय्येन स्कान्निङ्ग्, मैक्रोफिल्मिङ्ग् इत्यादि कर्तुं कारयितुं चानुमतिर्दीयते। तस्मादधुना देवनागरीतरलिपीनां ज्ञानस्य संपादकेष्वभावोऽक्षम्योऽपराधः । अपि च देवनागरीतरलिपि-ज्ञानप्राप्तिर्न क्लेशायेति ज्ञापितपूर्वम्। आलस्यं, विकाङ्क्षा, कर्तव्यप्रज्ञा-शून्यतेत्यादयोऽवगुणा एव कदाचिदस्माकं देवनागरीतरलिपिज्ञानप्राप्तौ विघ्ना येषां कारणाद् वञ्चनादिदुर्व्यवहाराः प्राप्तजन्मानो भवन्ति। प्रतिलिपिकर्तारो मुग्धा भवन्ति प्रायः। कदाचिदेवं भवति यद् यैर्देवनागरी-लिपीतरलिपिज्ञैर्देवनागर्यां प्रतिलिख्यते, ते गौरवाच्च्यवन्ते तन्नामनिर्देशस्य पीठिकासु प्रायिकादभावात्।

लिप्यन्तरकर्तारः पदच्छेदं कृत्वा पङ्क्तिशो लेखनं यत् कुर्वन्ति, पद्यानि च पादशोऽथवाऽर्धशो विभज्य च यल्लिखन्ति, किं तन्न

संपादनकर्माङ्गम् ? केचन प्रतिलिपिकर्तारस्तु स्वयं विद्वांसः। प्राप्ते चावसरे ते बाढं ग्रन्थसंपादनशास्त्रानुगुण्येन ग्रन्थसंपादनं कुर्युः।

कियताचित् परिमाणेन लिप्यन्तरकारिणामपि दोषोऽस्त्यत्र। असति मानवर्धनप्रसङ्गे लिप्यन्तरकार्यं तैर्नाङ्गीकार्यम्। एकस्मै विदुषे एकवारं प्रतिलेखनं कृतवान् जनस्तस्मिन्नेव कर्मण्यपरैः प्रार्थ्यते न पुनः संपादन-कर्मणि। मानाद्युपलब्धौ तु विदुषां साहाय्यकरणं नापराधः। तथापीदं ज्ञातव्यं तैः- संपादकत्वेन रूपेण या प्रतिष्ठा यश्च तज्जन्य आनन्दस्तौ केवलमन्येषां साहाय्यप्रदानेन जायमानादनुभवात् प्रशस्ततरौ।

विद्वद्भ्यः साहाय्यकरणं न हि नीचस्तरीयो मन्तुः। परन्तु कृतज्ञतासमर्पणप्रसंगे ग्रन्थसंपादनशास्त्रविध्यनुसारेण साहाय्यकर्तुर्नाम प्रथममुल्लेखनीयम्। पीठिकायां मातृकाविवरणप्रसंगे लिपिकरस्यापि नाम्नः सलेखनतिथि लिखितव्ये, अर्थापत्त्या, संपादिते ग्रन्थे, प्रतिलिपिं कर्तुर्नाम बाढमुल्लेखनीयमिति यत् तद् **ग्रन्थसंपादनशास्त्रविध्यनुगुणम्।**

पीठिकायां किल संपादनार्थं यद् यत् कृतं तस्य तस्य सर्वस्यो-ल्लेखः क्रियते। किमर्थमत्र लिप्यन्तररचना कल्पतामपवादाय ?

विश्रुतश्लोका अपि केचन संपादकाः 'प्रतिलिपिकरणं कृतज्ञता-व्यञ्जनार्हं कर्म नैव' इति यद् ग्रन्थसंपादकानां समवायाय (कु)सन्देशं ददति तदसह्यम्। प्रतिलिपिकर्तृभ्य एकेनापि वाक्येन कृतज्ञतामसूचयन्त एते, असति प्रतिलिपिकर्तृणां श्रमे, संपादनं कर्तुं किमशक्ष्यन् ? मातृकाप्रतिलिपिकारिणां नामानि कुत्राप्यलिखन्त एते महानुभवाः प्रतिलिपिकारिणां श्रमः कियता परिमाणेन परमश्रेष्ठ इति पाठकेभ्यः ज्ञापयितुं लब्धमुत्कृष्टमवसरं नाशयन्ति। संकलनपत्रकेषु (Collation sheets) पूरितानां पाठानां संवादं कृतवन्तो बुधा यत् वि.एस्.सुक्थङ्करेण स्वीये महाभारतसंस्करणे नाम्ना कीर्तितास्तत् साधु, परन्तु नालं,

संकलनपत्रकेषु पाठपूरणं ये कृतवन्तस्तन्नाम्नां तेनासंकीर्तितत्वात्। यच्चातुर्यं डा.वि.राघवन्केन प्रदर्शितं- प्रतिलिपिं कृतवत्सु कृतज्ञभावस्यानुक्तिः, प्रतिलिपिं **कारितवद्भ्योऽधिकारिभ्यो** धन्यवादस्य व्यक्तोक्तिश्च-तन्नैव शिष्टजुष्टः पन्थाः[१]।

प्रतिलेखननिर्मातृ-नामानुल्लेखनरूपं यदौदासीन्यं तत् ग्रन्थसंपादनक्षेत्रीयोऽपराधो येन प्रतिकृतिरचयितृणां नाम कीर्तिश्च हन्यते।

अलसाः कीर्त्यभिलाषिणस्तु 'देवनागरीलिपीतरलिपिं ज्ञातुं समयावसरो नास्ति'इति व्याजं कल्पयन्ति। अद्भुतमेतत्। कीर्तिं संपादयितुं तेषां समयावसरो वर्तते येषां लिपीरभ्यस्तुं नास्ति समयावसरः !

केश्चिच्चतुरैरित्थं दर्श्यते सूक्ष्मा बुद्धिः''वयं विद्यार्थिनां प्रोत्साहं दित्सामः''इति घोषयद्भिः। हन्त, किमेतत् सत्यम् ? यद्येवं, विद्यार्थिभ्यो लघ्वीः कृतीर्दत्त्वा ग्रन्थसंपादनशास्त्रविध्यनुगुण्येन तत्संपादनं तैः कारयित्वा **तेषामेव** नाम संपादकत्वेन ग्रन्थरक्षापुटे स्थापयितव्यं न पुनः साहाय्यकारित्वेन, लिप्यन्तरकारित्वेन वा तैः कर्म कारयितव्यम् !

गानकार्यक्रमे विद्यार्थिभ्यो ये प्रोत्साहं दित्सन्ति, तैः **विद्यार्थिजनैरेव** गापयितव्यं न पुनस्तम्बूरीवाद्यादिवादनं सदा करणीयमिति

१.' It now remains for me to thank all those who helped me to bring out this publication. *The authorities* (व वक्रता प्रकृतेन ग्रन्थकर्त्रा कृता) of Government Oriental Library, Mysore and the Saraswathi Mahal Library, Tanjore for supplying me with transcripts of the manuscripts of the *Śṛṅgāramañjarī* and photographs of a sample page and leaf of them'.(प्रतिलिपिं कारयितृणाम् अधिकारिणां विषये कार्तज्ञ्यं प्रकटितमत्र, यत्र प्रतिलिपिं कृतवत्सु कृतज्ञभावस्य गन्धोऽपि नास्ति।) शृङ्गारमञ्जरी-अक्बर्षाविरचिता। सं.वि.राघवन् Archeological Department, Hydarabad Government 1951. 'Acknowledgments'.

निर्बन्धः करणीयः !

अस्त्वेतत्। मानसंमानकार्तज्ञ्यप्रकाशनादिविचारो वैयक्तिकः। वस्तुतस्तु ग्रन्थसंपादकेन स्वयं प्रतिलिपिकरणं किमर्थं करणीयमित्यत्र ग्रन्थसंपादनशास्त्रीयमिदं कारणत्रयम्-१. अक्षराध्यासजन्याः प्रमादाः लिपिकरेण क्रियमाणाः कदाचिद् विपरीतार्थं जनयन्तीति प्रोक्तपूर्वम्। ग्रन्थसंपादकेन स्वयं रचितायां प्रतिकृतौ, तादृशाः प्रसंगाः सुपरिहराः। यदि प्रतिलिपिकर्ता संपादकादन्यः सन् दोषं करोति, स दोषः कदाचिन्न ज्ञायते। अन्येन कृतायां प्रतिकृतौ प्रमादः कोऽपि न भवतीति कथङ्कारं सपणबन्धं प्रतिज्ञातव्यम् ? २. संपादकेन स्पष्टप्रतिपत्तये मातृका पौनः-पौन्येन द्रष्टव्या भवति। ३.मातृकाकोशे कदाचित्-रक्षाकवचे वा लिखित-पाठवत्पत्रेभ्यो भिन्ने पत्रे वा-ग्रन्थसंबद्धे कस्मिंश्चिल्लिखिते, प्रायेण लिप्य-न्तरकर्तारस्तदवगणयन्ति यत्र किञ्चित् सप्रयोजनं वस्तु कदाचित् स्यात्। ४.३८ पुटेऽन्तिमप्रघट्टके यदुक्तं मातृकाप्रान्तभागलिखितसप्रयोजनवस्तु-विषये तत् स्मरणीयम्। प्रतिलेखनमन्येन कारयितुः "संपादकस्य(?)"तन्न लभ्यते यत् प्रान्तभागस्थं सप्रयोजनं ग्रन्थसंबद्धं वस्तु। 'तदपि लेख्यम्' इति सूचने दत्ते कदाचिल्लभ्येतेत्यन्यदेतत्। ५. लेखकः पण्डितः सन् यदि "पाक(द्र.पु ६९)"दुरभ्यासवान् भवति, तेन कृता प्रतिकृतिः कूटैव।

मूलतालमातृकादिकमदृष्ट्वा केवलं नवीनप्रतिकृतीरवलम्ब्य क्रियमाणं ग्रन्थसंपादनाख्यं कार्यं न वास्तविकं ग्रन्थसंपादनम्[१]। मातृका-स्वनुपलब्धासु तु नवीनप्रतिकृतीनामवलम्बनं विना नान्य उपाय इति

१." The originals of all the copies available are to be collected. Only originals of their mechanical copies like microfilm, Xerox etc., are to be sought and not manual copies . For in the later case, there is possibility of further commission of errors which cannot easily be verified with reference to the originals which are known to exist. And certain relevant information like erasures, over-writing etc., may not come to the notice of the editor". *Introduction to Manuscriptology* by Dr. R.S.Shivaganeshamurthy.Sharada Publishing House, Delhi 1996 P.136

त्वपवादः। अथवा, कांश्चन नियमानाश्रित्य तदनुसारेण प्रतिकृतीः कारयित्वा कृतानां प्रतिकृतीनां मूलमातृकागतेन ग्रन्थपाठेन संवादार्थं साध्वीं व्यवस्थां कारयित्वा तदनु प्रतिकृतीनामुपयोगे कृते न कोऽपि दोषः।

केचन मातृकालयाः देवनागरीतरलिपिलिखिताः सर्वा अपि कृतीः देवनागर्यां मातृकालयोद्योगिभिः प्रतिलेखयितुं, ताः दत्तधनेभ्यो ग्रन्थसंपादकेभ्यो दातुं च (दुर्)व्यवस्थां कृतवन्त इति श्रूयते। **प्रकृतो ग्रन्थकर्ता स्वप्नेऽप्येतन्न सहते न चानुमन्यते।** मातृकालयाः कर्मेदं "लिप्यन्तरकरणसेवा" इति नाम्नाऽभिदधति। परन्तु तैः कार्यमाणमिदं कर्म "विद्वदवमानना" इति वा, "वञ्चनाप्रोत्साह" इति वा, "ग्रन्थसंपादनशास्त्रीयापराध" इति वा संज्ञामर्हति। मातृकाणां यथावदाधुनिकैर्यन्त्रप्रयोगाद्यभ्युपायैः संरक्षणं तेषां प्राथमिकं कर्तव्यम्। शीलनचित्रद्युतिचित्रादिकं परिकल्प्य तदेव ते दद्युर्ग्रन्थसंपादकेभ्यो, न पुनः कारितदेवनागरीपरिवर्तना नवीनाः प्रतिलिपीः।

अत्रैताः संग्रहकारिकाः :

संपिपादयिषुर्ग्रन्थं कुर्यात् प्रतिलिपिं स्वयम्[१]।
बुभुक्षुः सन् स्वयं भुञ्ज्यात् पिपासुश्च स्वयं पिबेत्॥
संपादकत्वजाता या कीर्तिर्लेखीलकस्य[२] ताम्।
मन्ये चोरत्वजाताया अकीर्तेरधमाधमाम् ॥
संपादकत्वमन्येन कारितैः प्रतिलेखनैः।
जीवनं परवित्तैश्च सोदरं द्वितयं मिथः ॥

१.देवनागरीतरलिपिज्ञा अपि कदाचिदन्येषु निर्बन्धं कुर्वन्तो वा तान् दाक्षिण्यगर्ते पातयन्तो वा देवनागरीतरलिपिकृतेः प्रतिलिपिं देवनागर्यां यत्तैः कारयन्ति तदसह्यम्। श्रूयते यत् कुङ्ग्फूज्ञः **जाकीछान्**, स्वस्य चलच्चित्रेषु सर्वा दैहिकीर्द्रुतगतीर्विविधाश्च भङ्गीः स्वयं कुरुते, न पुनरन्यैर्गौणनटैः प्राप्तधनैस्ताः कारयति। ग्रन्थानां संपादनं चलच्चित्रेष्वभिनयान्नावरम्।

२.परैर्यो लेखयति, स लेखीलक इत्युच्यते। द्र.पु. ४२

२३.संपादकेभ्यः सूचनाः

अत्र वर्तमानेषु विषयेषु केचन प्रोक्तपूर्वा एव। तथापि विषय-ज्ञापनार्थमेव प्रवृत्ते शास्त्रे पुनरुक्तिर्न दोषायेति, प्रतिपत्तिदार्ढ्यार्थं स्थूणानिखनन्यायेन पुनस्तेऽभिधीयन्ते।

१.मातृकासूचिषु गजनिमीलिकयाऽतिश्रद्धा न करणीया।

तत्रभवता परमेश्वर ऐताळ्केन रचते *Vedalakṣaṇa, Vedic Ancillary Literature : A Descriptive Bibliography*[१] इति नामके ग्रन्थे सविवरणमातृकासूचीषु कथं केचन दोषाः संभवन्तीति तत्र तत्र प्रदर्शितं यथा- चातुर्ज्ञानाख्यस्य ग्रन्थस्य विषये क्याटोलागोस् क्याटोलागोरम्-सूचीनिर्मात्रा थियोडर् आफ्रेट्केन" ऋग्वेदस्थानां सूक्तवर्गमण्डलाष्टकानां पट्टिकारूपोऽयं ग्रन्थ" इत्युक्तम्। श्रीपरमेश्वर ऐताळ एतत् सर्वथा असमीचीनमिति वदति " वस्तुतस्तु ग्रन्थोऽयं सविसर्गाणां संहितापाठेऽनुपलभ्यमानानां, नान्तानाम्, अयवायाव्-युक्तानाम्, असमस्तानां च पदानां विवरणरूपः" इति ज्ञापयन्।

कदाचित् सविवरणासु मातृकासूचीष्वपि मुद्रणदोषाः स्युः। सर्वेऽपि सविवरणमातृकासूचीगता विषया गम्भीरस्य संशोधनस्यैव फलानीति वक्तुं न शक्यते।

मैसूरुप्राच्यविद्यासंशोधनालयात् प्रकटितायाः Descriptive Catalogue VI (इतिहास)(1981) सूच्या अन्ते Appendices इति विभागे २२ शे पृष्ठे "महाभारतम्"इति शीर्षकस्याधो दत्तावुपक्रमोप-संहारौ तु, नीलकण्ठविरचिताया मन्त्ररहस्यप्रकाशिकाख्याया मन्त्र-रामायणव्याख्यायाः !

१.Franz Steiner Verlag, Stuttgart 1991

२.सरलीकरणप्रसंगे क्लिष्टाः पाठा ग्राह्या न सरलीकरणजन्याः पाठाः। अत्र कारणं तु क्लिष्टपाठानां स्थले सरलपाठा आदिश्यन्ते न पुनः सरलपाठानां स्थले क्लिष्टपाठाः। (विरलतमोऽपवादः द्र.७०पुटे)

३. ग्रन्थपाठे दृश्यमाना दोषा ग्रन्थकर्त्रैव कृता न पुनर्लिपिकरेणेति यदि ग्रन्थसंपादकस्य निःसंदेहा प्रतिपत्तिः, ते व्याकरणदुष्टाः पाठा अवशेषणीयाः, संपादकीयवक्तव्यार्थं स्वीकृते स्थले च तत्सूचना दातव्या च। आर्षप्रयोगा अप्यवशेषणीयाः।

४.मुख्यानि पाठान्तराणि सर्वाण्यपि पाठटिप्पण्यां सावधानं दातव्यानि।

५.सति द्वयोः पाठयोः द्व्यधिकानां वा पाठानां समाने स्वीकरणीयत्वधर्मे, ग्रन्थशरीरे समादत्तस्य पाठस्याधस्तात् तरङ्गरेखा लेखनीया।

६.परिवर्तनस्य करणीयत्वे आपतिते तत्र विकाङ्क्षा न साध्वीति प्रोक्तपूर्वमेव। सर्वासु मातृकासु समाने पाठे सत्यपि तस्य दुष्टत्वे व्याकरणानुगुण्येन प्रकरणानुगुण्येन च शोधनं बाढं करणीयम्। अन्यथा तु प्रतिलेखनकर्मेदं भवति न तु ग्रन्थसंपादनम्। एवमूहः क्रियताम्- कस्यापि ग्रन्थस्य दश मातृका अस्माभिरादीयन्ते ग्रन्थसंपादनाय। एकस्मिन् स्थले एवं वर्तते-'हनूमता वालिभृति व्यलीयत'। अत्रैवं स्यात्-'हनूमता वारिभृति (=मेघे)व्यलीयत'। सत्यपि सर्वासु मातृकासु 'वालिभृति' इति पाठे,'वारिभृति' इति शोधनं करणीयमेव'वालिभृति' इति पाठस्याशुद्धत्वात्। **परन्तु शोधनसमयेऽतिजागरूकताऽऽवश्यकी**। गत्यन्तराभावे आवश्यकतमं शोधनं,यावच्छक्यं ग्रन्थकर्तृकृतस्यैव पाठस्यावशेषणं चाभीष्टे।

७.यत्र संयोजनस्य करणीयत्वमापत्यते, 'संयोजितोऽयं भाग' इति स्पष्टं पाठकेषु प्रतिपत्तये संयोजितो भाग ऋज्वावरणचिह्नान्तर्गतो विधेयो यथा "का[का]नां क[ल]हे जाते [भे]काः कुर्वन्ति [रा]सकम्"। अकृते योजनस्य गदने, योजितस्य भागस्य च द्वित्रवर्णत्वे 'लुप्तपूरणं'

स्यात्तद्योजनम्। योजितस्य भागस्य पदत्वे वाक्यत्वे श्लोकपादत्वे वा, तादृशमगदितं योजनं 'नवीनकालिकं प्रक्षेपणं' भवति-न पुनः संपादनम्!

८.**आ.**'एवं भवेद् वा' इति ससंशयमभ्यूहितः पाठः सप्रश्न-चिह्नः स्थापनीयो यथा "बोधनस्य (क्रोधनस्य ?) कुतः शान्तिः ?"

९. भिन्नासु व्याख्यासु भिन्नानां पाठानामाश्रयणे कृते, तत्सूचना कथं करणीयेति प्रश्न उदेति। पाठटिप्पणीभागे तत्सूचना स्पष्टं दातव्या। पुणे प्रकटिते महाभारतशास्त्रीयसंस्करणे वटोदरप्रकटिते रामायणशास्त्रीय-संस्करणे च तत् कृतम्। परन्तु उभययोः संस्करणयोः कापि व्याख्या न प्रकटिता। गुजरातीप्रिण्टिङ्ग् प्रेस् इत्यत्र प्रकाशिते सव्याख्यात्रये रामायणे प्रतिपुटमपि भूयःसु श्लोकेषु व्याख्यातृणां विभिन्नपाठाश्रयणं स्पष्टमेव ज्ञायते। इत्थंभूतरीतिकः प्रसंगः कस्यापि संपादकस्य शिरोवेदनायेत्यत्र न संशयः। संपादकः श्रीनिवासकट्टी तु एकं पाठमुपरि दत्त्वा सर्वाणि पाठान्तराणि अधो दत्तवान्। पाठनिर्णयं तु न कृतवान्। प्रकृतग्रन्थकर्त्रीयं मतमिदम्:-पाठटिप्पणीभागः स्वीकृतपाठमुद्रणाधो मुद्रणीयः। तदधो-भागे मुद्रितासु सतीषु व्याख्यासु, 'अमुकः पाठोऽमुकया व्याख्यया स्वीकृत' इति स्पष्टायते। अर्थात्, स्वीकृतपाठस्तर उपरि भागे, व्याख्या-स्तरोऽधोभागे, पाठान्तरस्तरो मध्यभागे च स्यात्। केनाप्येवं कृतं न दृष्टं प्रकृतेन ग्रन्थकर्त्रा। नवः प्रयोगः(experiment)क्रियतां, को दोषः?

१०.व्याख्यात्रा/व्याख्यातृभ्यां/व्याख्यातृभिः पाठान्तरविषये यदुच्यते तस्य अपोह्यत्वं वा, प्रभुसंमितत्वं वेति सम्यग् विमृश्यैव निर्धारणा करणीया। त्वरया किमपि न निश्चेतव्यम्।

मृच्छकटिके कस्यचन भागस्य प्रक्षिप्तत्वं व्याख्यात्रा लल्लादीक्षितेन यदुक्तं, तस्य सविमर्शं खण्डनं तत्रभवता डा.विजय पण्ड्याकेन कृतं प्रोक्तपूर्वम्। (पु.१०१-१०२)

११.ग्रन्थकर्तुर्मतं, व्याख्याकाराणां तत्समर्थनाऽथवा खण्डनम् इत्यादिकं सर्वमपि संपादकीयटिप्पण्यां विम्रष्टव्यम्। यदि पीठिकायामेव करणीयमेतदिति मन्यते संपादकः, चिन्त्या भागाः सुस्फुटं शृङ्गग्राहिका-न्यायेन सूचनीयाः। मतीया संप्रदायानुगता च दृग् ग्रन्थस्य विमर्शे बाधिका न भवेत्। ('स्वमतीयाः ग्रन्थाः श्लाघ्याः, परमतीया ग्रन्था निन्द्या' इति)। अ-ग्रन्थस्तरमौल्यमापना स्तुतिः, अ-युक्तिमत्खण्डनं निन्दनं च ग्रन्थसंपादनकोटिबहिर्भूते।

१२.अतिक्षुद्राः प्रमादाः पाठटिप्पणीस्थले न मुद्रणीया यथा 'रामस्य' इत्यत्र 'रामस'[१]। क्षुल्लकानामेतादृशानां सर्वेषामपि लिपिकर-प्रमादानां प्रदर्शने पाठटिप्पणीभागः केवलम् अवकरपिटको भवति। तेषामपि दर्शनीयत्वे सप्रमादः पाठः, ततः शुद्धपाठः सावरणचिह्न एवं क्रमोऽस्तु। पदमध्ये वर्गीयपञ्चमाक्षराणाम् अनुनासिकानां लेखनस्थले, केवलमनुस्वारस्य नागर्यादिमातृकासु लेखनं प्रथितम्। अत्र परसवर्णसन्धि-प्रसंगेषु मातृकास्वनुस्वारलेखनस्य पीठिकायां सूचितत्वे तावताऽलम्।

१३.पाठान्तरविषये येषां विदुषां साहाय्यमासाद्यते तेषां नामो-ल्लेखोऽवश्यं करणीयः[२]। एतन्न हृदयगतकृतज्ञभावविषयकं परन्तु ग्रन्थ-संपादनशास्त्रीयविधिविषयकम्। लिपिकरनाम्न उल्लेखस्यापि करणीयत्वे किमुत, पाठान्तरविषयकसूचनाप्रदातॄणां नाम्न उल्लेखस्य ?

१.संस्कृतेतरग्रन्थमातृकासु दृश्यमानान्यशिक्षितोच्चारणप्रभावितानि 'सन्नेसि' इत्यादिपदरूपाणि संपादितग्रन्थशरीरेऽवशेषणीयानि। तेषां संस्कृतग्रन्थमातृकासु दृष्टत्वे तु , 'संन्यासी' इत्यादि शोधनं कार्यमेव, 'सन्नेसि' इत्यादिरूपाणामपभ्रष्टत्वात् संस्कृतेऽशिक्षितोच्चार्यरूपभेदाभावाच्च। पीठिकायां तादृशानां रूपाणां पट्टिका दातव्या या संस्कृतेतरोच्चारणसंशोधने प्रयोजनमावहति।

२. यथा-"अयं लेखः पुनरुक्त इव प्रतिभात्यसंबद्धश्च। अत्र कल्पेति लेखेन पुनरुक्तत्वं बोध्यम्। कथकः प्रमाणसत्ताभ्युपगन्ता प्रमाणसत्ताभ्युपगमसाध्यकथानुकूलप्रयत्नवत्त्वादिति त्रुटिः कथयितुमशक्या, लेखेन पुनरुक्तत्वात् इति टिप्पणीं कृष्णमाधवझामहोदया योजयन्ति"। "गोकुलनाथप्रणीतः खण्डनकुठारः" सं. डा.अच्युतानन्ददाशः(प्रख्याग्रन्थमाला-9 संस्कृतपरिषद् हरिसिंहगौरविश्वविद्यानिलयः, सागरः म.प्र. 470003 2006)["अत्र कल्पे कथापूर्वकालावच्छिन्नः कथकस्तावत् कारणत्वात् कारणतामूलकव्यापकताग्रहविषयः, विषयत्वादिति यावत् प्रमाणादिसत्त्वाभ्युपगमस्येति शेषः" इत्यत्र टिप्पणी (पृ.5)।]

१४.सति शक्यत्वे, ग्रन्थसंपादनार्थमुपयुक्तानां मातृकाणां द्युतिचित्रं संपादितायां कृतावश्यं मुद्रणीयम्। एतस्याशक्यत्वे तु , उपयुक्तानां सर्वासामपि मातृकाणां न्यूनतरमेकैकस्य पत्रस्य द्युतिचित्रं तत्र दर्शयितव्यम्। एतत् प्रामाणिकतासाक्ष्यस्य प्रदर्शनार्थम्।

१५.यथाशक्ति प्राग्रूपशोधनात् परिशिष्टसज्जीकरणपर्यन्तं सर्वमपि संपादकेन **स्वयं** करणीयम्। एतन्न **रासभकृत्यं** यथा केचन मन्यन्ते। वस्तुतस्त्वेतत् **पण्डितकृत्यम्**। एतस्य सर्वस्यापि करणसमये नवीना अवश्यकरणीया लोपागमादेशाः संपादकस्य भासन्ते। वाक्यैर्विषयाणां क्रमिकं प्रतिपादनं पण्डितकृत्यमित्यङ्गीकारे तद्गतशब्दानां पट्टिकाक्रमेण स्थापनमपि पण्डितकृत्यमेवेत्यकामैरप्यङ्गीकार्यम्। एतत् सर्वमन्यैरेव करणीयमिति दुष्टोपदेशो हेयः। प्राग्रूपशोधनादिकर्मसाहाय्यार्थमपरेषु विद्वत्सु संपादकस्य प्रार्थना नापराधाय। परन्तु तत्र कर्मणि संपादकस्य कोऽपि धर्मो नावशिष्यत इति तु सर्वथा नाङ्गीकार्यम्। अद्यत्वे संगणकयन्त्रेण सर्वं क्रियते तस्मात् संपादकेन नात्र श्रान्तव्यमिति केचन मन्यन्ते। संगणकस्य साहाय्यं वर्तमानं कोऽपि न निराचिकीर्षति। किन्त्वेतावता संपादकस्य कर्तव्यधर्मो लुप्यत इति तु नैव क्षोदक्षमं वचः।

१६.ग्रन्थकर्तृ-तद्भिन्न-रचिताः कृतयः परिशिष्टत्वेन दातव्या इति चिन्तने सति, बाढं दीयन्ताम्। परन्तु तथाप्रदाने कारणं वक्तव्यम्। केवलं कुतूहलं नात्र कारणं भवितुमर्हति। प्रधानग्रन्थस्य परिशिष्टत्वेनान्यस्य गौणग्रन्थस्य ग्रन्थान्ते किमर्थं योजनमिति प्रश्न उत्तिष्ठेत्। अत्र शुद्धपाठ-निर्धारणे, ग्रन्थकर्तुरभिप्रायाणां ग्रन्थरचनाशैलीनां संवादे वा-गौणकृते-र्योजनं संशोधनकर्मणि किंप्रयोजनकमिति हेतूपन्यास आवश्यकः। परिशिष्टत्वेन योजिता ग्रन्थाः किं प्रकटितपूर्वाः, प्रकटितपूर्वत्वे तेषां संपादकाः के, प्रकटनतिथिः का-इत्यादिवस्तु, यदि च ते न प्रकटिताः तदुपलब्धिस्थलं, मातृकापरिचयो ग्रन्थपरिचय इत्यादिकं सर्वमपि

ज्ञापयितव्यम्। अर्थाद् ग्रन्थान्ते परिशिष्टे ग्रन्थान्तरयोजनस्य ग्रन्थसंपादनशास्त्रीयो विधिरेव निमित्तं स्यान्न पुनरुत्साहावेशादिकम्।

१७.कदाचिदुपलब्धा अपि सर्वा मातृकाः संपादकेन नोपयुज्यन्ते यत्रेमे हेतवो भवितुमर्हन्ति-१. मातृकालयानां निर्देशकाः मातृकां संपादकाय दातुं निराकुर्वन्ति। २. मातृका अनुपयोक्तव्या भवन्ति, तासां जीर्णत्वात्, त्रुटितत्वात्, कृमिदष्टत्वाद्वा। संपादकेन उपलब्धानामपि कासाञ्चन मातृकाणां ग्रन्थसंपादनकालेऽनुपयुक्तत्वस्य कारणं स्पष्टं वक्तव्यम्। प्रथमं कारणं तु बाढं वक्तव्यं- इदं मातृकालयनिर्देशकस्य शिरस्यश्मप्रक्षेप इति नैव भावनीयम्। परन्तु 'अमुके मातृकालये अमुका मातृका वर्तत' इति ज्ञापनायैतदावश्यकम्। ज्ञापितैतद्विषया भाविसंपादकाः कथञ्चित् तामपि पूर्वसंपादकेनाप्रयुक्तां मातृकामुपयुज्यान्यत् संस्करणं निःसारयेयुः।

१८.यदि ग्रन्थसंपादको ग्रन्थं समग्रं संपादयितुं न शक्नोति, तत्रापि कारणं स्फुटं वक्तव्यम्। अप्रकटितपाठवतां मातृकापत्राणामतीव जीर्णत्वं, शुद्धपाठानामभ्यूहार्थमप्यवसरम् अददानो लिपिकरप्रमादातिरेक इत्यादीत्यादि। कदाचिदुपलब्धायामपि व्याख्यायां केवलं मूलमात्रस्य संपादने कृते किमर्थं व्याख्या न संपादितेत्यत्र कारणं दातव्यम्। व्याख्याया अतिविस्तरेण संपादनकार्ये विलम्बजननस्य निवाराणार्थं मूलमात्रस्य प्रकटनं प्रायिकं कारणं भवितुमर्हत्यत्र।

१९.पीठिका ग्रन्थशरीरवदेव मुख्यं वस्तु। तत्र यथा यथा ज्ञाप्यमानानां विषयाणामाधिक्यं,संशयानवकाशं स्पष्टत्वं च, तथा तथा ग्रन्थस्य संशोधनसहायकत्वं वर्धते। ग्रन्थकर्तृप्रणीतेष्वपरेषु ग्रन्थेषूपलब्धाः कत्यनुपलब्धा उद्धृतिमात्रज्ञाताः कतीति, उपलब्धानां मध्ये प्रकटिताः कत्यप्रकटिताः कतीति च स्फुटं ज्ञापयितव्यम्। अकृत्वैतत् "एतेन ग्रन्थकर्त्रा <u>अनेके</u> ग्रन्थाः प्रणीता", इति वा "एतेन ग्रन्थकर्त्रा...<u>इत्यादयो</u> ग्रन्थाः प्रणीता" इति वा लेखनं संशोधनस्तराननुगुणम्।

२०.यत्र संपादिते सव्याख्ये ग्रन्थे प्रतिपुटं व्याख्यापेक्षया न्यूनतराः पङ्क्तयः वर्तन्ते मूलग्रन्थस्य व्यख्याया अतिविस्तृतत्वात्, तत्रादौ **समग्रो** मूलग्रन्थः सपुटोल्लेखं (सत्यावश्यकत्वे सूक्ष्मतराक्षरैः)मुद्रितव्यो येन पाठकानां झटित्यभीष्टभागपरामर्शः सरलो भवति।

२१. विचित्रमपि सत्यमिदं यदेकस्मिन्नेव मातृकाकोशे **एकस्यैव** ग्रन्थस्य (ग्रन्थाध्यायस्य वा)द्विर्लेखनमपि कदाचिद् गोचरीभवति। यथा सोमनाथेन कन्नडभाषायां षट्पदीछन्दसि निबद्धस्य **अक्रूरचरिते** इति काव्यस्य कस्मिंश्चित् कोशे समग्रं लेखनानन्तरं तस्य काव्यस्य अष्टमोऽध्यायः पुनर्लिखित इति श्री टि.एन्.सुब्बरायशास्त्री ज्ञापयति[१]। अत्र को हेतुः स्यात् ? यामाधारमातृकां दृष्ट्वा लिपिकरेण यस्य ग्रन्थस्य प्रतिलेखनं कृतं तद्भिन्नायामपरस्यां मातृकायां स एव ग्रन्थस्तेन पाठभेदयुक्तो दृष्टः।स तमप्याश्रित्य पुनरलिखत् संपादनमकुर्वन्। पीठिकायां विषयोऽयं चर्चनीयः। तत्रत्याः पाठभेदा अवश्यमुल्लेखनीया इति तु सिद्धानुवादः।

२४.संस्कृतेतरभाषाणामपि अध्ययनस्यावश्यकता

यथा यथा ग्रन्थसंपादकः संस्कृतेतरभाषासु प्राज्ञत्वमासादयति तथा तथा स ग्रन्थसंपादनकर्मण्यधिकतरां पक्वतां जनयितुमीष्टे।

१.केचित् संस्कृतकवयः/संस्कृतपण्डिताश्च संस्कृतेतरास्वपि भाषासु रचितग्रन्थाः। वेदान्तदेशिकेन न केवलं संस्कृते परन्तु तमिळुकेपि परमत-भङ्गादयो ग्रन्था रचिताः। सः 'अच्चुअसअअम्(अच्युतशतकम्)' प्राकृत-भाषायां रचितवान्। प्रायः सर्वैरपि संस्कृतनाटककारैर्भरतनाट्य-शास्त्रीयविध्यनुसारेण तत्र तत्र प्राकृतं प्रायोजि। तत्रभवता वादिराजेन

१.अक्रूरचरिते सं.टि.एन्.सुब्बरायशास्त्री प्र.प्राच्यविद्यासंशोधनालयः, मैसूरु १९२३

न केवलं संस्कृते ग्रन्था रचिताः, परन्तु कन्नडभाषायामपि हृद्यानि गीतानि रचितानि। अलङ्कारमणिदर्पणादिसंस्कृतग्रन्थकर्त्रा वेङ्कामात्येन वार्धकषट्पदीछन्दसि कन्नडरामायणं विरचितम्।

२.ग्रन्थकर्ता कदाचित् संस्कृतेतरभाषागताभिः कृतिभिः प्रभावितः स्यादथवा तदनुवादरचयिता स्यात्। मग्गेमायिदेवेन स्वीये 'प्रभुगीता'ग्रन्थे अल्लमप्रभोः कन्नडवचनानि संस्कृतपद्यैरनूदितानि[1]। नागवर्मकृतस्य कन्नडछन्दोम्बुधेः प्रभावः केदारभट्टकृते वृत्तरत्नाकरे दृश्यते[2]। कदाचित् संस्कृतेतरग्रन्थानां संस्कृतभाषयाऽनुवादं सारं वा ग्रन्थकर्ता रचयेत्। द्रमिडोपनिषत्तात्पर्यरत्नावल्यां, द्रमिडोपनिषत्सारे च,तत्रभवता वेदान्तदेशिकेन शठारिप्रणीतस्य तिरुवाय्मोळिग्रन्थस्य (द्राविडवेदस्य) सारः समग्राहि।

३.केषांचित् संस्कृतग्रन्थाभिप्रायाणां संस्कृतेतरभाषाग्रन्थानां चातिगाढः संबन्धः स्यात्। जैनसंस्कृतग्रन्थानामर्धमागध्या, बौद्धसंस्कृतग्रन्थानां पाल्या, वीरशैवसंस्कृतग्रन्थानां कन्नडेन, दाक्षिणात्यशैवसंस्कृतग्रन्थानां च तमिळुभाषया यो द्रढिष्ठः संबन्धः सोऽत्र स्मरणीयः।

४.मणिप्रवाळसाहित्यं केरले तमिळुनाडुके च प्रचुरं यत्र संस्कृततमिळुभाषयोस्तथा संस्कृतमलयाळंभाषयोश्च शब्दानाम् एकस्मिन्नैव ग्रन्थे समावेशनं क्रियते।

५.भाषाश्लेषाख्यः कश्चन चित्रकवित्वान्तर्गतः प्रकारभेदोऽस्ति यत्रैकस्यैव मूलपदस्य समस्तपदस्य वा विविधासु भाषास्वर्थवैविध्यम्।

६.काश्चन विशिष्टाः साहित्यकृतयः संस्कृतेतरसंस्कृतोभयभाषारचिता यथा गुर्जरराज्यप्रसिद्धानि विज्ञप्तिपत्राणि।

७.यद्राज्यं (state) यस्य संस्कृतग्रन्थकर्तुर्जीवितस्थलं तद्राज्यभाषायां तस्य विषयेऽधिकतराः संशोधनलेखाः संशोधनग्रन्थाश्च रचिता

१.सं.प्रो.सि.महादेवप्प। बेङ्गलूरुसंशोधनकोटिः। १९७,वैयालिकावल्, बेङ्गलूरु- ५६०००३
२.ग्रन्थसंपादने केलवु अध्ययन-डा.वै.सि.भानुमती पु. ६९

भवन्तीत्यतिसहजमेतत्। यत्फलतया प्रक्रियासर्वस्व-धातुकाव्या-पाणिनीयप्रामाण्यसमर्थन-नारायणीयादिप्रणेतारं नारायणभट्टत्तिरि-मधिकृत्य मलयाळंभाषायां;प्रस्थानत्रयभाष्यकर्तारं मध्वाचार्यं पञ्च-दश्यादिकर्तारं विद्यारण्यं चाधिकृत्य कन्नडभाषायां ; तत्त्वमुक्ताकला-पादिरचयितारं वेदान्तदेशिकमधिकृत्य तमिळुभाषायां, सिद्धहेमशब्दानु-शासनादिप्रणेतारं हेमचन्द्रमधिकृत्य गुर्जरभाषायां, व्युत्पत्तिवादादिकर्तारं गदाधरम् अद्वैतसिद्ध्यादिप्रणेतारं मधुसूदनसरस्वतीं चाधिकृत्य वङ्ग-भाषायां,गीतगोविन्दकर्तारं जयदेवमधिकृत्य ओड्रभाषायां यल्लभ्यते संशो-धनवाङ्मयं;तदितरभाषासु तद्विषयकसंशोधनवाङ्मयापेक्षयाऽधिकतरम्।

८.संस्कृतभाषाकृतीनां कदाचित् संस्कृतेतरभाषायामतीवविस्तृता व्याख्योपलब्धा भवेत्। वासुपूज्यर्षिनामकेन जैनेन कृतस्य दानलक्षणा-ख्यायाः कृतेर्विस्तृता कन्नडव्याख्या वर्तते[1]। कदाचिदेकस्यैव संस्कृतग्रन्थस्य एकेनैव व्याख्यात्रा संस्कृत-संस्कृतेतरोभयभाषयोर्व्याख्या कृता स्यात्। हेद्दसे हरिहरेण नागानन्दमुनिप्रणीतायाः शिवाद्वैतसिद्धान्तप्रकाशिकायाः कन्नडे तथा संस्कृते विवरणाख्यं व्याख्यानं कृतम्। तेनैव विरूपाक्षपञ्चा-शिकागमस्य तात्पर्यान्वयप्रकाशिकानाम्नी व्याख्या कन्नडे रचिता, अथ च, तात्पर्यान्वयदीपिकानाम्नी व्याख्या संस्कृते रचिता।

९.उत्तरपुष्पिका कदाचित् संस्कृतेतरभाषायां स्यात्[2]।

१०.संस्कृतविषयकाः संशोधनलेखाः संशोधनग्रन्थाः संशोधन-पत्रिकाश्च संस्कृतेतरभाषासु विशिष्य इङ्ग्लीष्के शतशः समुपलभ्यन्ते। पाठका एतज्जानन्त्येव।

११.मातृकागतग्रन्थपाठं ग्रन्थसंपादनशास्त्रं चाधिकृत्य संस्कृतेतर-भाषासु संशोधनलेखा अधिकतराः।

१.द्र. पु.२५०-२५४

२.द्र. पु.१६७

१२.संस्कृतस्याध्ययनेन किं ज्ञायते ? संस्कृतं ज्ञायते ! संस्कृतेतरा भाषाः संस्कृतवदध्येतव्याः सश्रद्धम्। सर्वासु भाषासु तत्तद्भाषाविशिष्टः कोऽपि नाडीस्पन्दो वर्तते। "केवलं संस्कृतस्याध्ययनेन सर्वा अपि संस्कृतेतरा भारतीया भाषाः स्वयं हृद्गता भवन्ति" इति घोषणा तु पामरैकप्रिया।

१३.संस्कृतेतरभाषाग्रन्थपठनकाले तद्भाषाप्रविष्टानि संस्कृत पदानि संस्कृतज्ञैर्ज्ञायन्ते। संस्कृतेतरभाषासु (विशिष्य, दाक्षिणात्यासु भाषासु) प्रविष्टानि संस्कृतपदानि प्रायः सुबन्तानि न पुनस्तिङन्तानि।

१४.सर्वा अपि भाषाः स्वविशिष्टवाग्रूढिमत्यः। सति भाषयोर्द्वयोः स्थितानां वाग्रूढीनां वैसादृश्ये, एकभाषास्थवाग्रूढिज्ञानेनापरभाषागता वाग्रूढयो न ज्ञायन्ते निसर्गतः ।वाग्रूढयो मनुष्यप्रकृतिमभिव्यञ्जयन्ति, याः प्रयुञ्जाना जनता,करोतीव भाषागतानां नाडीनां स्पन्दनम्।

१५.केचन शब्दाः शुद्धसंस्कृतशब्दाः सन्तः संस्कृतेतरभाषासु प्रचुरं प्रयुज्यन्ते यथा रुन्द्रशब्दः। कदम्बवंश्यानां संस्कृतशासनेषु रुन्द्रशब्दो वर्तत इति ज्ञायते[1]। परन्त्वन्यत्र संस्कृतसाहित्ये विरलतममिदम्[2]। 'नागध्वजो' 'नागपताक' इत्यादिसंज्ञाः संस्कृतमहाभारते दुर्योधन इत्यर्थे गोचरी-भवन्ति। अत्र नागशब्दस्य गज इत्यर्थमौत्तराहाः,सर्प इत्यर्थं दाक्षिणात्या-श्चाददते। तस्माद् दुर्योधनार्थे 'गजध्वज'इत्यादिसंज्ञा औत्तराहभाषा-रचितेषु भारतेषु, 'उरगध्वज' 'उरगपताक' इत्यादिसंज्ञाश्च दाक्षिणात्य-भाषारचितेषु भारतेषु दृश्यन्ते[3]।

१६.यदि संस्कृतज्ञानमात्रेण विश्वस्मिन् यद् यद् ज्ञातव्यं तत् तत् सर्वमपि ज्ञायते, विश्वविद्यानिलयानां संस्कृतेतराध्ययनविभागाः सर्वेऽपि पिधातव्यद्वारा भवेयुः।

१.एतद् ज्ञापितवता श्रीमता स.कार्त्तिकेन धन्योऽस्ति प्रकृतो ग्रन्थकर्ता।

२.चन्द्रशेखरकविकृते गङ्गानवरत्नमालास्तोत्रेऽस्त्ययं शब्दः।द्र.पु.२४७

३.एतद्ज्ञापितवता तत्रभवता डा.टि.वि.वेङ्कटाचलशास्त्रिणा धन्योऽस्ति प्रकृतो ग्रन्थकर्ता।

२५.संस्कृतेतरग्रन्थसंपादकानां संस्कृताध्ययनस्यावश्यकता

यथा संस्कृतेतरभाषाणामध्ययनं संस्कृतग्रन्थसंपादकानामावश्यकं, तथैव संस्कृतेतरग्रन्थसंपादकानां संस्कृतज्ञानमप्यावश्यकम्।

१. केषाञ्चन संस्कृतेतरग्रन्थानां मूलस्य संस्कृतेतरत्वेऽपि तेषां संस्कृतसंबन्धो न हीयते। बौद्धानां धम्मपदस्य पालीभाषायां रचितत्वेऽपि संस्कृतभाषायां वर्तमानस्य सूत्रपिटकवर्ग्येण ''उदानवर्गेणा''स्य संबन्धोऽस्ति।

२.संस्कृतेतरग्रन्थस्य संस्कृतभाषायां व्याख्यानमतीव साधारण-मस्माकं देशे। कन्नडे जगन्नाथदासेन विरचितस्य 'हरिकथामृतसार'स्य व्याख्यानेषु कतिचन संस्कृतभाषायां रचितानि येषां जम्बुखण्डिवादिराजा-चार्यप्रणीता 'व्यासदासकौमुदी' प्रसिद्धतमा। कुन्दकुन्दाचार्यस्य 'नाटक-त्रय्याः'व्याख्यासु काश्चन संस्कृतभाषायां वर्तन्ते। कुतूहलवशात् केनापि रुद्रभट्ट(११८५)प्रणीतस्य 'जगन्नाथविजया'ख्यस्य कन्नडचम्पूकाव्यस्य प्राथमिके पद्यपञ्चके संस्कृतभाषायां 'पञ्चपाषाणव्याख्या'रचिता[१]।

३.संस्कृतेतरभाषाणां व्याकरणानि संस्कृतभाषायां विरचितानि। प्राकृतव्याकरणानि प्रायः संस्कृतेनैव रचितानि। नागवर्म(क्रि.श.१०४२)-प्रणीतं 'कर्णाटभाषाभूषणं' तथा भट्टाकलङ्क (क्रि.श.१६०४)प्रणीतं 'कर्णाटशब्दानुशासनं' -चैतौ द्वौ कन्नडव्याकरणग्रन्थौ संस्कृतभाषायामेव स्तः। प्राचीनमलयाळंव्याकरणं 'लीलातिलका'भिधं संस्कृतेन रचितम्।

१.गुम्मळापुरवेङ्कटकृष्णशर्मा व्याख्याया एतस्या प्रणेता स्यादित्यभ्यूहः डा.डि.वि. गुण्डप्पेन कृतमुल्लेखमवलम्ब्य श्रीमत्या डि.स्मितारेड्डिवर्यया प्रकटितः। ''कवि वेङ्कटेशन पूर्विकर अप्रकटितशासन, कवि वेङ्कटेशशर्मन काल'' कन्नड साहित्यपरिषत्पत्रिके,पम्पमहाकविरस्ते, बेङ्गळूरु। सं: ८८-८९ पु.८९

'आन्ध्रशब्दचिन्तामणि'रपि संस्कृते रचितः।

४.कदाचित् संस्कृतेतरासु भाषास्वेव ग्रन्थकर्तृत्वेन केषाञ्चित् प्रसिद्धिः। परन्तु ते संस्कृतभाषायामपि स्युर्ग्रन्थकर्तारः । मैथिलीकविर्विद्यापतिः संस्कृतभाषायां 'लिखनावलिं' कृतवान्। कन्नडस्य प्रसिद्धः षडक्षरिकविः संस्कृतभाषायां 'कविकर्णरसायनं' रचितवान्। तेलुगुभाषायाः प्रसिद्धो वाग्गेयकारस्त्यागराज उपचत्वारिंशद्गेयरचनाः संस्कृतभाषायां प्राणैष्ट।

२६.केचन सत्यप्रसंगाः

१.केनचन विदुषा कोऽपि ग्रन्थो द्वयोः संपुटयोः संपादितः। प्रथमे संपुटे तेन पीठिकायां "ग्रन्थं ग्रन्थकर्तारं चाधिकृत्य द्वितीये संपुटे ज्ञापयिष्यते " इत्युक्तम्। द्वितीये संपुटे च "प्रथमसंपुट एव ग्रन्थतत्कर्त्रोर्ज्ञापितत्वात् तज्जिज्ञासुभिस्तत् सर्वं तत एवावसेयम्" इत्यनुगृहीता वराका वाचकाः।

२.कोऽपि विद्वान् कमपि ग्रन्थं संपादयितुं निर्बद्धः। निर्बन्धं योऽकरोत् तस्यैव नाम रक्षापुटे संपादकत्वेन मुद्रणीयमिति पूर्वयोजितम् आसीत्। अनिच्छन् विद्वान् बलान्नियोजितो ग्रन्थसंपादनमारभत। संपादनं कुर्वन्नसौ बुद्धिपूर्वकमेव अविद्यमानानि (मिथ्या) पाठान्तराणि सृष्ट्वा पाठटिप्पण्यां दत्तवान् येन "परिश्रमपूर्वकमनेन संपादनकर्म निर्वर्तितम्" इति पाठका मन्येरन् !

३.केनचन संपादकेन संपाद्यग्रन्थवती एकला मातृका लब्धा। स स्वयमेव व्याकरणदोषदूषितान् 'लिपिकरप्रमादान्' कल्पितवान् तांश्च

पाठटिप्पणीभागे निवेशितवांश्च, येन पाठकानाम् 'अनेन संपादकेन ग्रन्थसंपादने भूयांसमेव क्लेशं सोढवता भाव्यम् ' इति प्रतिभायात्।

४.कश्चन ग्रन्थसंपादक आशीर्वचनद्वयं स्वयं विरचय्य ग्रन्थान्ते ग्रन्थशरीर एव योजयामास, यच्च नवीनप्रक्षेपस्योदाहरणम्।

५. कश्चन संपादकः शुद्धपाठान् अधस्तात् प्रणुद्य, अनङ्गीकार्यान् पाठान् संपादिते ग्रन्थे स्थापितवान्।

६.कश्चन संशोधनालये कस्मिंश्चिद् उद्योगित्वेन प्रवेशं प्राप्नोत्। तस्य परम्परीण-वस्त्र-धारित्वात् तं पण्डितोत्तमं केचनामन्यन्त। संपादितस्य कस्यचिद् ग्रन्थस्योपरि सः "संपादक "इति विशेषणपूर्वकं स्वस्य नाम मुद्रापयामास। वस्तुतस्तु प्रतिलिपिकरणं, संपादनं, पीठिका-रचनं, परिशिष्टाणामन्ते योजनं, प्राग्रूपशोधनम् एतत् सर्वमप्यन्यैः पञ्चपण्डितैस्तेन कारितमासीत्।

७.कोऽपि संपादकमहानुभावो संपाद्यस्य ग्रन्थस्य संपादकीय-टिप्पणीं रिरचयिषुर्ग्रन्थस्य क्लिष्टेषु स्थलेषु मौनव्रतमभजत। यत्र च ग्रन्थोऽतीव सरलः, तत्र स्वपाण्डित्यं प्रदिदर्शयिषुरतीव विस्तरशो लेखनीं चालयामास। तथाकरणसमये स प्रसिद्धात् कस्माचिद् ग्रन्थात् तद्ग्रन्थनामा-नुल्लेखनपूर्वकं कतिचन पद्यानि (अनावश्यकमेव)उद्धृतवान् येन तदनभि-ज्ञाः पाठकाः 'पद्यानि तानि संपादकेनैव रचितानि' इति भ्राम्येयुः।

८. कश्चित् संपादकः स्वेन संपादितस्य ग्रन्थस्यान्ते लघ्व्यौ द्वे कृती परिशिष्टत्वेन योजयामास। तथा योजने-

अ. तयोः कृत्योर्योजनेन संपादितस्य प्रधानग्रन्थस्य संपादनकर्मणि लब्धं साहाय्यं किमिति विषये एकमक्षरमपि नोदचारयत्।

आ. परिशिष्टे योजितं लघुकृतिद्वयं कुत्रासादितं, नवीनं संपादितं

वा, यदि तथा तदर्थमुपयुक्ताः मातृकाः कुत्र सन्ति, यदि च पूर्वं कुत्रापि मुद्रितं, कुत्र मुद्रितं, तत्संपादकः क इत्यादिविचारान् सर्वथाऽत्यजत्।

९.केनचित् संपादकेन यद्यपि ग्रन्थसंपादनार्थमुपयुक्तानां मातृकाणां पट्टिका ग्रन्थान्ते दत्ता किन्तु तत्र मातृकासंज्ञा वा, कया मातृकया ग्रन्थसंपादने कियत् साहाय्यं प्राप्तमिति वा विचारो नोत्थापितः, संपादिते ग्रन्थे किमाधारेण पाठाश्चिता इति विचारस्तु दूरे। अन्यः संपादकः 'प्रगततरः'-यः मातृकालयत आसादितानां मातृकाणां क्रमसंख्यां कुत्रापि नादर्शयत्।

१०.कश्चित् संपादकः संपादितस्य ग्रन्थस्य स्तुतिं तथाऽकरोद् यथा तेन कृतं कर्म किं ग्रन्थविमर्शो वा स्तुतिपाठो वेति पाठका न जानीयुः। संपादकत्वधर्मापेक्षया वन्दित्वरूपधर्मोऽधिकतर आसीत्तस्य।

११.केनचन कस्यापि संस्कृतनाटकस्य मातृकाऽऽसादिता। तस्य संस्कृतज्ञानं नासीन्मातृकापठनज्ञानं च दूरे। कथमपि ग्रन्थसंपादनज्ञानां समवाये कीर्तिं प्राप्तुमैच्छत् सः। स कमपि अतीवमृदुहृदयं संकोचदाक्षिण्यादियुक्तं विद्वांसमग्रहीत्। अग्रे किं संजातमिति गदनं किलानावश्यकम्।

१२.कश्चन विद्वान् अनुद्योगः सन् कमपि मातृकालयनिर्देशकं समीप्य मातृकालये उद्योगप्राप्तये प्रार्थितवान्। 'तेन विदुषा कस्यापि ग्रन्थस्य संपादनं करणीयं, निर्देशकस्य च नाम संपादकत्वेन रक्षापत्रे मुद्रापणीयं, ततो विद्वान् तस्मिन् मातृकालये भविष्यत्युद्योगी' इति संविदभूत्। स विद्वान् तस्मिन्निर्देशके कृतविश्वासः संपादनकर्म निरवर्तयत्। परन्तु हा बत,निर्देशको नैवाभवत् सत्यहरिश्चन्द्रस्यावतारः !

१३. कस्मिंश्चन मातृकालये मातृकास्थग्रन्थानां नामानि पार्थक्येन पत्रेषु (Cards) लिखितानि समातृकाङ्कानि, तानि च पेटिकाधान्यां दर्शनार्हाणि निहितानि, झटिति संशोधकानामभीष्टमातृकालाभे भवत्यानु-

कूल्यमिति हेतोः। 'एवं पेटिकाधान्यां पत्रेषु यद् ग्रन्थसूचनं तत् केवलं मुद्रितानामेव ग्रन्थानामुचितं न चामुद्रितानां मातृकालब्धग्रन्थानाम् 'इति मन्वानः कोऽपि निर्देशकः पत्र-पेटिका-धानीं ततो नीत्वा कुत्रापि क्षेपितवान्। परुषभाषिणस्तस्माद् भीता मातृकालयविद्वांसो मौनमाश्रयन्त।

१४.यदा कोऽपि यज्ञदत्तः " संपादितपूर्वः कोऽपि ग्रन्थः नवीनमातृकापरिशीलनपूर्वकं चैत्रदत्ताख्येन विदुषा संपिपादयिषितोऽस्ति"इति श्रुतवान्, तदा तत्रारुचिं प्रदर्शयन् इत्थमवोचत्- "स चैत्रदत्तो मूर्ख आहोस्विदुन्मत्तोऽथवा सप्रयोजनकर्महीनो वा स्यात्। तेन यो ग्रन्थः संपिपादयिषितः स पूर्वमेव षड्वारं प्रकटितः। मुद्रितेषु संस्करणेषु लब्धैः पाठैरपरिशीलितमातृकासु स्थितान् पाठान् संवाद्य किमर्थं तेन श्रान्तव्यम्"? एवं ग्रन्थसंपादनशास्त्रीयसंस्करणेऽरुचिप्रदर्शक एष यज्ञदत्तो मातृकासंशोधनालये कस्मिंश्चित् त्रिंशद्वर्षाणि यावदासीदुद्योगी !

१५.कश्चन 'ग्रन्थसंपादकः' प्रकृतं ग्रन्थकर्तारमित्थमतिस्फुटैः शब्दैरवोचत्-"अविभक्तकुटुम्बे निवसतो मम लिप्यादिज्ञानं प्राप्तुं समयावसरो नास्ति। देवनागरीतरलिप्यां लिखितस्य कस्यापि ग्रन्थस्य देवनागर्यां प्रतिलेखनमन्येन केनापि कारयित्वा तन्मुद्रणप्रसंगे संपादकत्वेन मम नाम्नो मुद्रापणे तु स समयाभावो न प्रतिबन्धकः"।

१६.**केचन** मातृकाज्ञानगन्धहीनाः , अप्राप्तमातृकापरिचयाणां, विद्यावारिधि/पिएच्.डि./ एम्.फिल्.पदवीप्राप्तये च ग्रन्थपाठपरिष्करणं चिकीर्षतां शिष्यजनानां मार्गदर्शका भवन्ति !

ग्रन्थसंपादनं बुबोधयिषया प्रणीते ग्रन्थेऽस्मिन् वैयक्तिकानां विषयाणां न्यासो नोचित इति प्रकृतो ग्रन्थकर्ता न हि न जानाति। परन्तु ग्रन्थसंपादनकर्मण्यकृताभिरुचयोऽपि क्षेत्रमेतत् कथञ्चिद् यत् प्रविविक्षन्ति सांप्रतं, तदागामिनि काले न भूयादित्याशासता तेनैतत् सर्वमत्र प्रकटितम्।

२७.ग्रन्थसंपादनानन्तरं किम् ?

मुद्रितं संस्करणं ग्रन्थपाठनिर्णये परमान्तिमः स्तर इति न कोऽपि सपरिकरबन्धं प्रतिज्ञातुमीष्टे। मुद्रिते संस्करणेऽनुपलभ्यमानाः पाठा अध्याया वा तत्संस्करणस्य संपादकजनेनानादत्तासु मातृकासु वर्तेरन्नेव।

ग्रन्थसंपादनानन्तरं ग्रन्थसंपादनकर्मण्युपयुक्तानां मातृकाणां प्रयोजनशून्यत्वात् ताः सुखेन प्रणाशनीयाः किम् ? नैव। ता अवशेषणीयाः। किमर्थम् ? भावोद्वेगो वा वैयक्तिकं कारणं वा नात्र हेतुः। मातृकाणामव-शेषणं ग्रन्थसंपादनशास्त्रसंबद्धम्।

ग्रन्थसंपादनशास्त्रीयविधिमननुसृत्य यद्वा तद्वा प्रकाशिता ग्रन्था नवीनसंस्करणसापेक्षा एव। कदाचित् पूर्वसंपादकेन मातृका केषुचन स्थलेष्वसमीचीनं पठिता भवेत्। तत्फलतया च तदङ्गीकृताः पाठा दुष्टाः स्युः। तादृशे प्रसंगे न केवलं नवीनस्य संस्करणस्यावश्यकता, अपि तु तेनोपयुक्तपूर्वाणामेव मातृकाणां पुनः पठनमनिवार्यं भवति।

शासनशास्त्रविभागे ह्येष साधारणो वृत्तान्तः। एकमेव शासनम् अनेकैर्विद्वद्भिः पठितं,पूर्वपठने कृता दोषा उत्तरपठने परिमार्जिताश्च। महेन्द्रपालस्य शासनं यज्जगज्जीवनपुरे समुपलब्धं तत् एस्.सि.मुखर्जीकिन प्रथमं पठितम्। तेन कृते पठने ये दोषाः संजातास्ते अशोकचटर्जीशास्त्रिणा विहितपुनःपठनेन परिमार्जिताः[१]। तद्वदेकवारं मातृकायां पठितायां तस्य पुनरुपयोगो नास्तीति वा, तन्मौल्यं विनष्टप्रायमिति वा कथमपि नैव प्रतिपादनीम्।

मुद्रिते संस्करणे समुपलब्धात् पाठाद् भिन्नः पाठो तत्संस्करणा-नुपयुक्तासु मातृकासूपलभ्येरन् योऽर्थप्रशस्तो भवेत्। कदाचिदेवमपि

१. ABORI LXXII-LXXIII 1993 Pp 205-214

संभवं यद् व्याख्यायां धृत एव पाठोऽनङ्गीकार्यः सन्, तस्याम् अनुल्लिखित-स्तिरस्कृतो वा पाठ एव श्रेयान् स्यात्[१]।

डा.जि.बि.पलसुले वोपदेवप्रणीतं कविकल्पद्रुमं-विना कस्यापि व्याख्यानस्य प्रकाशनं- संपादितवान्। ग्रन्थोऽयं पूर्वप्रकटित एव सग्रन्थ-कर्त्रीयव्याख्यः, सदुर्गादासप्रणीतव्याख्यश्च। (ग्रन्थकर्त्रीय-दुर्गादासीय-व्याख्ययोः सप्रयोजनानंशान् डा.जि.बि. पलसुले समुपयुक्तवानित्यन्य-देतत्।) महाभारतं पूर्वमुद्रितमपि, मुद्रितानां संस्करणानां केषाञ्चन व्याख्यावत्त्वेऽपि पुणेस्थे भण्डारकरप्राच्यविद्यासंशोधनालये पुनरपि तत्संपादनकार्यं निर्व्यूढम्।

'शास्त्रीयानि संस्करणानि' इति विशेषणविशिष्टेष्वपि संस्करणेषु स्वीकृताः केचन पाठाः कदाचिदनङ्गीकार्याः स्युर्विदुषां ये पाठटिप्पण्यां पातितेषु पाठेषु मूलाविभाज्यत्वं प्रतिपादयेयुः। अर्थात्, सविमर्शसंस्करणा-न्यपि ग्रन्थसंपादनशास्त्रीयं नवीनं परिशीलनमर्हन्त्येव।

केचन"महाभारतस्य पुनःसंस्करणमावश्यकं, पुणेमुद्रिते संस्करणे प्रक्षिप्तत्वेन निर्धारितानां केषाञ्चन श्लोकानां, स्वीकृतपाठानां च परस्परेणार्थसंबन्धवत्त्वात्, मध्वाचार्यप्रणीतमहाभारततात्पर्यनिर्णयस्य, वादिराजप्रणीतलक्षालङ्कारव्याख्यायाः, कन्नडभाषायां कुमारव्यास-प्रणीतस्य कर्णाटभारतकथामञ्जरीग्रन्थस्य च तत्संपादकैरनुपयुक्तत्वाच्च" इति,अपरे च"यद्यपि कुमारव्यासः कांश्चन भागान् परिवर्तितवानिति स्पष्टम्।तथापि तेन यो महाभारतपाठो दृष्टः स बाढमस्माभिरधुना दृश्यमानान्महाभारतपाठाद् भिन्न आसीत्" इति वदन्ति। एतेनेदं सिद्ध्यति यन्महाभारतस्य सर्वास्वपि संस्कृतेतरभाषासु रचितानां प्राचीनानामनुवादानां रचयितृभिर्दृष्टस्य महाभारतपाठस्य पुनर्नि-र्माणं, तेन च संस्कृतमहाभारतपाठस्य संवाद एतदुभयमवशिष्टं कार्यम्।

१. द्र.पु. ९१-९३ वेणीसंहारोपसंहारपद्यस्य जगद्धरकृताया व्याख्याया विषये।

मातृकाया द्युतिचित्राणामुपलभ्यत्वेऽपि मूलमातृका अवशेषणीया एव। श्रवणबेळुगुळे वर्तमानस्य बाहुबलिविग्रहस्य द्युतिचित्राण्युपलभ्यन्ते सहस्रशः। तथापि मूलबाहुबलिविग्रहः किलावशेष्यते। लियानार्डो डा विञ्चिकेन यच्चित्रं "मोनालीसा"काया रचितं, तस्य लक्षशः प्रतिकृतिषू-पलभ्यमानास्वपि तस्य मूलमवशेष्यते। शासनानि, गुहासु प्राचीनमानवै-र्लिखितानि चित्राणि चात्रार्थे व्याख्यातानि द्रष्टव्यानि। सत्स्वपि काननानां कोटिशो द्युतिचित्रेषु किमर्थं तान्यवशेषणीयानि, किमर्थं तान्यग्निसान्न करणीयानीति प्रश्नस्य यदुत्तरं तदेवोत्तरं मातृकावशेषणप्रश्नस्यापि।

शीलनचित्राणि स्पष्टतराणि तेषु यथेच्छं बृहत्तराकारं लम्भयितुं शक्यत्वादभीष्टवर्णसंयोजनस्यानभीष्टवर्णवियोजनस्यापि शक्यत्वात्। परन्तु मूलसामग्रीमेवाधिकृत्य संशोधनमागामिनि कालेऽत्यावश्यकं भवेत्।

ग्रन्थकर्ता कदाचित् स्वयं स्वग्रन्थस्य लोपागमादेशानां कारणी-भूतो भवतीति प्रोक्तपूर्वम्। तद्वत् संपादकः स्वयं स्वसंपादितस्य ग्रन्थस्य पुनः संस्करणे प्रवर्तमानः **संपादितस्य पाठस्य** लोपागमादेशानां कारणीभूतो भवत्येव। अर्थात् स्वेनैव संपादितस्य ग्रन्थस्य पुनः संपादनावसरे स्वेनैव त्यक्तं पाठं स मूलाविभाज्यं मन्येत, मूलत्वेन पूर्वं स्वयं स्वीकृतं पाठं द्वितीयसंपादनावसरे पाठान्तरत्वेन निश्चिनुयादित्यादीत्यादि।

एष समासः-मातृकासु लब्धानां ग्रन्थपाठानाम् अवलम्बनेन कृतेऽपि संपादने, ता मातृका रक्षणीयाः-मूलपाठस्य भूयो भूयः संशोध्यत्वात्, तालादिलेख्यसामग्रीरेवाधिकृत्य संशोधनस्यावश्यकत्वाच्च।

कदाचित् डि.एल्.नरसिंहाचार्यः पाठान्तरविषये इत्थमवोचतः- 'पाठान्तराणि तथा न क्षुद्राणि यथा केचन मन्येरन्। कदाचित् तेष्वपि सप्रयोजना अंशाः स्युः। ग्रन्थकर्त्रा यद् रचितं तद्विषये तानि प्रतिक्रिया-(व्याख्यान-खण्डन-मण्डन)रूपाण्यपि भवेयुः। ग्रन्थकर्त्रीयस्य मूलपाठस्य

पुनर्निर्माणानन्तरं पाठान्तरसृष्टौ हेतुमधिकृत्याप्यध्ययनं विधेयम्[1]।' अभिज्ञानशाकुन्तलादिनाटकेषूपलभ्यमानानां पाठान्तराणां विषये सत्यमेतदिति प्रतिभाति। अर्थात्, ग्रन्थसंपादनानन्तरम् अस्वीकृतानि यानि पाठान्तराणि तान्यधिकृत्यापि विमर्शः कुतूहलिभिः करणीयः।

रामायणस्य प्रसिद्धं पद्यं किञ्चित् परिवर्त्य अस्माभिरेवं वक्तुं शक्यते-

यावद् विज्ञा विशिंषन्ति पाठभेदाननेकशः।
तावत् सांपादनी विद्या विद्वत्सु प्रचरिष्यति॥

२८. वैदेशिकाः किं मातृकाचोराः ?

सुप्रथितः कश्चनाभिप्रायो यदा कदा भारतीयानां हृदयं तुदति। भारतस्य संपत्तीर्वैदेशिका अपाहरन्निति, यासामन्यतमा मातृकासंपत्तिरिति। दौर्भाग्यादेतत् कियताचिदंशेन सत्यमेव यद्यपहरतिरत्र नामकीर्त्यपहाररूपेऽर्थे प्रयुक्तः। पीटर्पीटर्सन् इत्थमवोचत:

"ममाग्रे किमपि प्रणिगदनं (Report) वर्तते मातृकासंचयसंबद्धं

---

१. "ಲಿಪಿಕಾರ ಬರೀ ಲಿಪಿಕಾರ ಆಗಿರಬೇಕಾಗಿಲ್ಲ.ಅವನು ಸಹೃದಯ ವಿಮರ್ಶಕ ಕೂಡಾ ಆಗಿರತಾನೆ.ಪಾಠಾಂತರಗಳು ಅಂದರೆ ಬರೀ ಎರರ್ಸ್ ಅಲ್ಲ ಕಣ್ರಯ್ಯ. ಅದು ಕಾವ್ಯಕ್ಕೆ ಸಹೃದಯ ಮಾಡಿದ ರಿಯಾಕ್ಷನ್ ಕೂಡಾ ಆಗಿರಬಹುದು.ಅವತ್ತು ನಮಗೆ ಇದು ಗೊತ್ತಿರಲಿಲ್ಲ ಅಂತಲ್ಲ.ಆದರೆ ಮೂಲ ಸಿದ್ಧ ಆದ ಮೇಲೆ ತಾನೆ ಯಾವುದು ಪ್ರತಿಕ್ರಿಯೆ ಅಂತ ಗೊತ್ತಾಗೋದು.ಈಗ ಇದು ನಿಮ್ಮ ಕೆಲಸ ಆಗಬೇಕು ತಿಳೀತಾ?......ಇನ್ನು ಮೇಲೆ ಪಾಠಾಂತರಗಳನ್ನು ಬೇರೆ ಥರಾ ಸ್ಟಡೀ ಮಾಡುವುದಕ್ಕೆ ತಯಾರಾಗಬೇಕು ನೀವು. ದೆ ಆರ್ ನಾಟ್ ಮಿಯರ್ ಎರರ್ಸ್". "कन्नडविद्वल्लोकद नाटिकोळि" ले.आर्.रमेश् तथा बि.तिप्पण्ण आन्दोळनदिनपत्रिके, 22.1.2006 हाडुपाडु पु.2

यत्र यूरोपीयविदुषो नाम रक्षाकवचे वर्तते। परन्तु रक्षाकवचे वाऽन्तःस्थेषु पुटेषु वा कुत्रापि तस्य नाम नास्ति येन सर्वकाराय मातृकाः संचिताः। तस्यापि नाम्नः परामर्शो नास्ति यस्यार्धमागधीजैनशास्त्रादिविषयेषु पण्डितस्य साहाय्यं विना प्रणिगदनस्यैतस्य रचनं नैव समभविष्यत्[१]"

अन्यदपि किञ्चिदेतद्भिन्नमत्र वक्तव्यम्। कस्यापि वस्तुनस्तत्स्वामिनो ज्ञानं विनाऽऽदानं किल चौर्यशब्दाभिप्रेतोऽर्थः। बहुषु प्रसंगेषु वैदेशिकेभ्योऽस्मज्जनैर्मातृका विक्रीताः। अन्यच्च। 'लोप्त्रममुकेन स्थानेन प्राप्तम्' इति चोरः किमभिदधात्यथवा लोप्त्रणां वस्तूनां पट्टिकां निर्माय सर्वेभ्यः प्रदर्शयति ? वैदेशिकैर्विद्वद्भिः मातृकाणां सूच्यो निर्मीयन्ते, मातृकाप्राप्तिस्थानं ज्ञाप्यते, मातृकासंशोधनं कर्तुं कृतप्रयत्नेभ्यो विद्वद्भ्यस्ता दर्श्यन्ते, साहाय्यकारिणां नामानि समुल्लिख्यन्ते च। आह च जि.बूह्लरः

"लक्षश उपलब्धानां श्लोकानां पठने तेषां च विविधसंस्करणैः संवदने च नासीन्मम समयावसरः। संचितानां सामग्रीणां समग्रमध्ययनम् अनेकवर्षसाध्यं भवेत्। एक एव मनुष्यः सर्वाणि विविधानि शास्त्राण्यधीत्य ग्रन्थानां मौल्यं सम्यङ्ज्ञापयेदित्यत्र मम संशयोऽस्ति। मया केवलं केचन ग्रन्थाः पठिताः। मार्तण्डशास्त्री, नारायणशास्त्री तथा वामनाचार्यझळकीकर एतैस्त्रिभिः पण्डितैरवशिष्टं कृतम्। उद्धृतभागेषु भूयानंश एतैः प्रतिकृतः। **एतैरेव** परिशिष्टानि रचयित्वाऽन्येषां ग्रन्थानां सारो रचितः।[२]" अत्र कृतज्ञताशब्दस्याभावेऽपि सा लक्ष्यत एव। एतत्पठनानन्तरं 'वैदेशिका मातृकाचोरा' इति कथमस्माभिस्तद्विषये अभियोगः

१.Detailed report of operations in search of Sanskrit Mss. in the Bombay Circle, August 1882-March 1883. *Origins of BORI Library*इति लेखे Donald Clay Johnsonवर्येण समुद्धृतम्। ABORI 1990. P.79

२.Detailed report of a tour in search of Sanskrit Mss.made in Kashmir, Rajputana and Central India (page 34)

करणीयः[1]? अन्यच्च-ते सश्रद्धं रक्षन्ति मातृकाः।

अस्माकं राष्ट्रस्य स्वातन्त्र्यप्राप्तेः पूर्वं **केषाञ्चन** वैदेशिकानां संस्कृतग्रन्थानुवादादि कृतवतां हृदि 'भारतीया अवरा' इति भावनाऽऽसीदिति सत्यम्। तथापि, मातृकाणां रक्षणे तैः कृतस्य कर्मणोऽवधीरणा कथञ्चिन्न करणीया[2]। ग्रन्थसंपादनशास्त्रस्य स्वस्तिलेखस्तैरेव कृतः। यद्यप्यस्मत्पूर्वजैर्विद्वद्भिः संपादनकार्ये काश्चन समस्या वर्तन्त इति ज्ञातमासीत्, उपलब्धेषु ग्रन्थपाठेष्वरुचिरपि दर्शिता[3]। तथापि ग्रन्थसंपादनकर्मणि मातृकावंशक्रमनिर्माणादिकाः सर्वेऽपि सोपानस्तरास्तैरारूढा इति प्रतिपादनं तु साहसमात्रम्। अन्यच्च। वैदेशिकानां संस्कृतज्ञानां ग्रन्थसंपादनकौतुकमस्माकं तत्कौतुकस्यापेक्षयाऽधुनाप्यधिकतरम् !

" वैदेशिकैर्भारतान्नीता मातृकाः सर्वा अपि निवर्तनीया इति भारतसर्वकारेण बलवानाग्रहः करणीय" इति केषाञ्चन दृष्टिः।

सत्यप्यस्या दृष्ट्याः साधुत्वे नैषा शक्यानुष्ठाना। मातृकालयेषु वर्तमानानां मातृकाणां मातृकाधानीषु स्थानमङ्कप्रदानेन सविवरणमातृकासूचिषूल्लेखेन च स्थिरीकृतम्। एवं सति, कथङ्कारं वैदेशिकैर्मातृकाप्रतिनिवर्तनं कार्यताम् ? अन्यदिहावधेयम्। मातृका मातृकालयानामेव स्वम्। अपि

१.प्रकृतस्य ग्रन्थकर्तुरनुभवः सर्वथैतद्विपरीतो यो **भारतीयानां** सम्बद्धः। केषांचन भारतीयानां कृते स काश्चन मातृकाः ग्रन्थ-मलयाळं-नन्दिनागरीषु वर्तमानाः देवनागर्यां प्रतिलिख्य समर्पितवान्। कृतज्ञताप्रकाशनं तु दूरे, ग्रन्थः प्रकटित इति ज्ञापनमपि एते **भारतीया** नैवाकुर्वन् ! तदास्तां तावत्। मातृकालये संशोधकः कोऽ'प्यास्माकः' (न वैदेशिकः)कदाचित् 'प्रतिलेखनकर्म कृतज्ञताप्रकटनयोग्यं महत्कर्म नास्ति'इत्यगर्जद् यो मातृकासु देवनागरीतरलिपिलिखितं ग्रन्थं देवनागर्या कदापि नैव प्रतिकृतवान्, किन्तु प्रतिकारितवान् देवनागरीतरलिपिज्ञानराहित्यात्तस्य!

२.आस्माकैरेव जनैर्नदीषु तटाकेषु अग्नौ वा मातृकाणां प्रक्षेपः कृतः। यद् बहून् ग्रन्थसंपादनज्ञान् स्रष्टुं काचन संस्थाः प्रयत्नपरास्तदाधुनिकः प्रक्रमः। पूर्वं हि नैवमासीत्।

३.द्र.पु.१४५-१४९, ३०१

चास्माकं राष्ट्रे वर्तमानेषु शताधिकेषु मातृकालयेषु कांश्चित् प्रति कारितेऽपि प्रतिनिवर्तनि ,काश्चनास्तव्यस्तता, विदुषां मातृकाप्राप्तौ विघ्नाश्च भवेयुः।

प्रकृतग्रन्थकर्त्रीयं मतमिदम्:-विदेशे वर्तमानानां मातृकाणां द्युति-चित्राणि प्राप्तुं संभवन्तो ग्रन्थसंपादनज्ञानां व्यावहारिकाः क्लेशा उन्नत-स्तरीयाभिश्चर्चाभिर्निवारणीयाः। द्युतिचित्रप्रदाने मितिमतिरिच्य शुल्कस्य याऽऽदित्सा विदेशीयमातृकालयाधिकारिणां, साऽनेन व्याख्याता।

२९.मातृकाणां नवीनं संग्रहणम्

संगृहीतपूर्वासु मातृकासु समुपलभ्यमानेषु ग्रन्थपाठेषु संशोधनवन्नवीनं मातृकासंग्रहणमपि ग्रन्थसंपादनशास्त्रसंबद्धमेव।

नाणकशास्त्रम्(Numismatics) अध्येतारो वस्तुसंग्रहालयेषु वर्तमानानां नाणकानामध्ययनमपि कुर्वन्ति, नवीनं नाणकसंग्रहमपि कुर्वन्ति। प्राच्यवस्तुसंशोधनमपि तथैव। नवीनशासनान्वेषणं किल कुर्वन्ति शासनज्ञाः। भाषाविज्ञानिनोऽपि क्षेत्रकार्यं (field work)कुर्वन्त्येव[१]।

ग्रन्थसंपादका बहवोऽस्माकं राष्ट्रे पीठकार्यं रोचयन्ते न पुनः क्षेत्रकार्यम्। तेषां मते क्षेत्रकार्यं निम्नस्तरीयम्। "मातृकालयेषु यल्लभ्यते तावता तोष्टव्यम्" इति ते प्रतिपादयन्ति। तैरेतद् ज्ञातव्यं यदधुना मातृकालयेषु मातृकासमृद्धिर्या दृश्यते सा बद्धश्रद्धानां विदुषां प्रयाणश्रमस्य फलम्। मातृकासंग्रहणैकप्रयोजनमासीत् तेषां प्रयाणम्। अधुनापि सहस्रशो मातृका गृहगर्तेषु वर्तमानाः सत्यः प्रकाशं कामयन्ते। राजेन्द्रलालमित्र-

१. अत्रैतदनुसन्धेयम्:-अष्टाध्यायी न केवलं प्राक्पाणिनीय- वैयाकरण-प्रथितानां सिद्धान्तानां संकलनं अपितु पाणिनिना स्वयं विविधेषु भूभागेषु संचर्य श्रुतानां पदविशेषाणामुच्चारणवैविध्यानामपि विश्लेषणम्।

भण्डारकर्-हरप्रसादशास्त्रि-बूह्लर्प्रभृतयो न केवलं ग्रन्थसंपादनमकुर्वन् परन्तु नवीनमातृकासंग्रहार्थं प्रयाणमप्यकुर्वन्।

मातृकासंग्रहणार्थे प्रयाणे किमप्यद्भुतं भवत्येवेति केनापि न प्रतीक्षितव्यम्। साधारणी जनता तूपलब्धासु मातृकासु किमपि नावीन्यमपश्यन्ती निराशा स्यात्। परन्तु पाठान्तरसत्त्वाद् वा, विस्तृतपाठसंक्षिप्तपाठादिकारणाद् वा विदुषां ताः कुतूहलप्रदाः स्युः। विरला अश्रुतपूर्वा वा रचना ग्रन्थसंपादनज्ञानाममूल्या भवन्ति। अतीवदीर्घा, ह्रस्वतमाः, सूक्ष्माक्षरयुक्ताः, वर्णचित्रयुक्ताः, सुवर्णद्रवलिखितग्रन्थयुक्ताः, सुन्दररेखाविन्यासयुक्ताः, विचित्राकृतिमत्यो वा मातृकाः कदाचिदुपलब्धाः सत्यः कुतूहलं सामान्यानामपि वर्धयन्ति।

काश्चन मातृका जीर्णशीर्णा भवन्ति। मातृकास्वामिभिर्यदा मातृकालयेषु मातृका दीयन्ते कदाचित् मातृकालयस्था विद्वांसस्ता दृष्ट्वा सातङ्का भवन्ति यासु धूलिधूसरितत्वमतीव साधारणी परिस्थितिः। पत्राणामस्तव्यस्तता नाविरला। येऽनुभवहीना विद्वांसः केवलं ग्रन्थसंपादनेच्छवो नवीनसंग्रहकाले समुपलभ्यमानानां मातृकाणां प्रतिकूलाकारयुक्तत्वं नाभ्यूहन्ते, ते बिभ्यति मातृकाभ्य इदंप्रथममन्विष्टाभ्यो वस्तुतः ! कदाचित् केवलं मातृकायां वर्तमानस्य ग्रन्थस्य संज्ञा केत्यन्वेषणमेव भगीरथप्रयत्नसोदराय श्रमाय कल्पते[१]।

प्राच्यभूमिष्ठलान्य[२]पि कदाचिदतीव जीर्णानि धूलिधूसराणि च वर्तन्ते। कदाचिदस्माभिः शोधिताः शिलाप्रतिमा अपीत्थंभूतलक्षणा एव। शासनानि त्वत्यन्तमेवास्फुटाक्षराणि प्रायः। क्षुण्णा लेखनपङ्क्तिः साधारणी कथा तत्र। शासनज्ञास्तानधिकृत्य किं न कुर्वन्ति संशोधनम् ? पाकिस्थाने लब्धानाम् अस्तव्यस्तानां जीर्णानां त्रुटितानां च मातृकापत्राणां

१.द्र.पु. ३९

२.Archaeological sites

संयोजनमद्भुतया तितिक्षया यदि नाकरिष्यत ल्यूडर्स्किन, शारिपुत्र-प्रकरणाख्यस्य अश्वघोषप्रणीतस्य विषयेऽस्माभिः किमपि नाज्ञास्यत।

३०.ग्रन्थसंपादनं नाम न केवलं प्रतिलिपिकरणम्

मातृकागतानां ग्रन्थानामध्ययनमस्माकं प्राच्याध्ययनतरोः प्रधाना शाखा। नैतत् केवलं वैरस्यजनकं प्रतिलिपिकर्म भवितुमर्हति, संपादनकार्ये संलग्नानां विदुषामतीवकुतूहलप्रदानामंशानां प्राप्त्या ज्ञानवर्धनहेतुत्वात्। ग्रन्थसंपादनवेलायां शुद्धपाठनिष्कर्षेण, लिपिवैविध्यज्ञानेन, अनेकप्रकार-लेखनशैल्यवबोधनेन, ग्रन्थकर्तृमतमौल्यमापनेन, विप्रकीर्णानां विचाराणां चैकत्र क्रमशः स्थापनेन य आनन्दो जायते स आनन्दः नृत्यगीतचित्रादि-कलाजन्येन आनन्देन सदृश इति प्रकृतग्रन्थकर्त्रीयं मतम्। शुद्धपाठनिर्णयः कदाचिद् युद्धरङ्गे आयोधनमिव,कदाचिच्चोपवने विहार इव। संपादित-ग्रन्थपाठगवाक्षाद् ग्रन्थसंपादकः पुरातनेतिहासप्रपञ्चं समवेक्षते।

ग्रन्थसंपादनं सश्रद्धं कृतवतां सहस्राधिकानां विदुषां श्रमस्य फलेनैव वयमिदानीं प्राचीनान् विविधभाषामयान् ग्रन्थान् मुद्रितान् पश्यामस्तान् निष्क्लेशलेशं पठितुं च शक्नुम इति स्वप्नेऽपि न प्रस्मर्तव्यम्।

सर्वासां भाषाणां एम्.ए., विद्वत्पदवी , शिरोमणिः, आचार्य-परीक्षा, इत्यादिष्वध्ययनस्तरेषु ग्रन्थसंपादनशास्त्रमनिवार्यं भवेद् येन ग्रन्थसंपादनं कथमुत्कृष्टो विषय इति विद्यार्थिनो जानन्ति।

अधीतग्रन्थसंपादनशास्त्राः सर्वेऽपि विद्यार्थिजनाः परमोत्कृष्टा ग्रन्थसंपादका बुभूषन्तीति भ्रान्तिर्नास्ति प्रकृतस्य ग्रन्थकर्तुः। परन्तु, यथा यथा संस्कृते ग्रन्थसंपादनज्ञानं वर्धते तथा तथा संपादितानां ग्रन्थानां मौल्यमापनं कर्तुं शक्तानां संस्कृतज्ञानां संख्या वर्धते। लिपिभाषयोः

संबन्धे, ग्रन्थपाठपरिष्कारसंबन्धे च यदिदानीम् अज्ञानविजृम्भितं दृश्यते संस्कृतविद्याक्षेत्रे तत् क्रमेण नङ्क्ष्यति। 'केवलं शिष्येभ्यः प्रवचनं प्रशस्तं न पुनर्ग्रन्थसंशोधनं, यत् केवलं प्रतिलेखनकर्मैकलक्षणम्' इति च या मौढ्यजन्या प्रायिकी च धारणा सापि क्रशिमानं गच्छति।

संगीतशिक्षणन्यायोऽत्र स्मरणीयः। गानं ये शिक्षन्ते ते सर्वेऽपि नोत्कृष्टा गायना भवन्ति। किन्तु संगीतं सविशेषज्ञानम् आस्वादयितुं समर्थास्तु भवन्ति। तद्वदिहापि द्रष्टव्यम्।

ग्रन्थसंपादनं नाम न केवलमास्माकस्येतिहासस्य विश्लेषणम् अपि तु नवीनस्य ज्ञानस्य सम्यगादानम्। संशोधनं सुप्रसिद्धानतिप्रसिद्धयोः कृत्योर्विषये प्रवर्तत इति तु सर्वविज्ञातम्। भिन्नभिन्नाभिर्दिशाभिर्विमर्शाः,अन्यविद्वन्मतानामङ्गीकारानङ्गीकारौ, प्रसिद्धेष्वपि ग्रन्थेष्वद्यावध्यचिन्तिता दृगित्यादिकं सर्वमत्रान्तर्भवति। तस्मात्, संशोधने कृताभिरुचीनां विदुषां ग्रन्थसंपादने, संपादितानां ग्रन्थानां च प्रकाशने यत्नो बाढं विधेयः। विशिष्य अश्रुतचराणां ग्रन्थानामन्वेषणं तेषां प्रकाशनं च त्वरिततरं करणीयम्। कदाचिन्मुद्रितग्रन्थावलम्बका अमातृकावलम्बकाश्च निर्णया मातृकागतग्रन्थपाठदर्शनेन त्यक्तव्या भवन्ति।

३१.मातृकालयेषु मातृकाणां पठनं, प्रतिलेखनं, भाचित्रप्राप्तिश्च

केचन विद्वज्जनाः मातृकालयान् प्रति स्वयमगत्वा अन्यान् मातृकाप्राप्त्यर्थं प्रेषयन्ति। कदाचित्(न तु सर्वदा) मातृकाविषये ज्ञानलेशशून्यानाम् एतेषां विनयगन्धहीनं वर्तनं मातृकाप्राप्तिविषये विघ्नो भवति। हस्तेन मातृकाग्रहणं कथं सावधानं करणीयमित्यजानतामेतेषां महानुभावानां कारणान्मातृकायाः पत्रे भङ्गो भवतीति प्रकृतेन ग्रन्थकर्त्रा साक्षाद्

दृष्टमसकृत्। सविवरणग्रन्थसूचीषु सर्वथाप्यज्ञानिन इमे मातृकालयस्य संशोधकानाममूल्यस्य समयस्याप्यपव्ययं कुर्वन्ति। तस्मादभीष्टा मातृका यस्मिन् मातृकालये वर्तते, तत्र ये नोद्योगिनो विद्वज्जनास्ते प्रकृतेन ग्रन्थकर्त्रा विनम्रं विज्ञाप्यन्ते यत् कृपया ते मातृकाप्राप्तयेऽन्यान् (विशिष्य, अनभिज्ञान्)असंप्रेषयन्तः **स्वयं** मातृकालयं प्रति गच्छन्तु।

यदि केषुचन प्रसंगेषु नैतच्छक्यं, मातृकालयनिर्देशकैः साकं स्वयं संभाष्य तद्विषयको व्यवहारो दृढीकरणीयः। कैश्चन यत् संशोधका विद्यार्थिनः प्रेष्यन्ते मातृकालयान् प्रति तदपि व्यावहारिकाणां विषयाणां दृढीकरणानन्तरमेव स्यात्। मातृकालयनिर्देशकैः कथं संभाषणीयमित्यप्यजानाना जनाः कदाचित् स्वयं क्लेशभाजनं भवन्ति।

स्वाभीष्टा मातृका मातृकालयेषु वर्तते वा न वा, वर्तमानाया अपि मातृकाया उपयोगार्थमनुमतिर्दीयते वा न वेति चाविचार्य केचन विद्यावारिधिपदव्यै पिएच्.डि.पदव्यै वा कमप्यप्रकाशितं ग्रन्थं मातृकास्थं चिन्वन्ति। सविवरणग्रन्थसूच्यां कस्यचिद् ग्रन्थस्य स्थित्यां 'साधारणी' इति, 'उत्तमा' इति वा निर्दिष्टायामतिश्रद्धा न कर्तव्या। यस्मिन् काले सविवरणग्रन्थसूची रचिता तस्मिन् काले मातृका सुस्थितिमत्यभूत् प्रायः। यदा संपादकैस्तन्मातृकादर्शनं चिकीर्ष्यते, तदा साऽतीव जीर्णा भवेत्।

सविवरणग्रन्थसूचीमवलोड्य तदनन्तरमेव ये मातृकालयाधिकारिभ्यो मातृकाङ्कादि दत्त्वा मातृकाप्रदानाय विज्ञापयन्ति ते वस्तुसन्तो ग्रन्थसंपादनज्ञाः। मातृकाङ्कमददानाः , केवलं ग्रन्थनामोच्चार्य मातृकाणां द्युतिचित्रं कामयमानास्तु, प्रायशो मातृकाविषये शृङ्गमपि न जानन्ति न वा लाङ्गूलम्। कदाचिच्च पूजार्थं मातृकाणां प्राप्तिं केचन वाञ्छन्ति। अन्ये बालिशास्तु 'पुस्तकापणेऽमुको मदभीष्टो ग्रन्थो मुद्रितो न लभ्यते क्रयाय, तस्मात्तस्य मातृकां पिपठिषुरस्मि' इति वदन्तो मातृकाः प्रार्थयन्ते ! एतादृशैरज्ञैर्व्यवहारे मातृकालयनिर्देशका अतीव जागरूका भवेयुः।

वाणिज्यव्यवहारादिषु विद्याक्षेत्रापेक्षयाऽधिकतरं मतिं बध्नन्तः केचन 'मातृकाः समग्रस्यापि विश्वस्य स्वम्' इति प्रतिपादयन्ति। 'मातृकाणामवलम्बनेन संपादितानां ग्रन्थानां सश्रद्धेऽध्ययने, तद्गतानां च विषयाणां प्राप्तौ सर्वेषां मानवानामधिकारो वर्तत' इति यदि तेषां प्रतिपादनस्य सारः, कोऽपि तं न निराचिकीर्षति। वस्तुतस्तु 'मातृकाणां विक्रयार्थं सर्वेषामनुमतिर्दातव्या'इति तेषां प्रतिपादनस्य गूढमाकूतम् ! (द्युतिचित्राणाम् अवैधो विक्रय आरब्धप्रायः।)'मातृकालयस्यैव स्वं भवन्ति मातृका' इत्येतज्ञ्जानाना अपि केचिन्मातृकाणां शताधिकानां युगपत् निश्शुल्कं प्राप्तये निर्बध्नन्तो राजकीयाधिकारिभिर्निर्देशकेभ्यः पत्राणि लेखयन्तश्च धर्मसंकटं जनयन्ति ! कदाचिदित्थंभूतलक्षणानां वाणिज्यध्येयवतां जनानां व्यापारप्रधानात् संभाषणान्मातृकालयेषु वस्तुसन्तो विद्वांसः सन्दिह्यन्ते, अविदुषां तु मातृकाप्राप्तिः सुलभायते। मातृकासंशोधकाः के, तद्भिन्नाश्च के इति स्पष्टं ज्ञातव्यमिति मातृकालयनिर्देशका निवेद्यन्ते। **मातृकालयाः सर्वत्र दर्शनसुलभेभ्यो जनताग्रन्थालयेभ्यो भिद्यन्ते।**

एकस्यैव ग्रन्थस्योपलब्धिर्यासु यासु मातृकासु वर्तते तास्ताः सर्वा अपि ग्रन्थसंपादकेनापेक्ष्यन्ते। एकस्य ग्रन्थस्य द्वयोर्मातृकयोर्द्व्यधिकानां वा मातृकाणामस्तित्वेऽपि "एकामेव मातृकां परिशीलयितुं दीयतेऽनुमतिः" इति यदि वदन्ति मातृकालयनिर्देशकाः, 'ग्रन्थसंपादन'मिति शब्द एव हास्यास्पदतां नीयते। एकयैव मातृकया किं कुर्यु-र्ग्रन्थसंपादकाः ? वस्तुतस्तु, 'एकं रथगतौ चक्रमेकं शोधे च पुस्तकम्।' "एकला मातृका" (पु.७८)इत्यस्मिन्नध्याये ज्ञापितचरोऽयं विषयः। सर्वेऽपि मातृकालयनिर्देशका ग्रन्थसंपादकेभ्यः सहकारं दातुं संप्रार्थ्यन्ते। 'यद्येवमस्माभिः सर्वासामपि मातृकाणां द्युतिचित्रमादातुं दीयतेऽनुमतिः, अस्मत्संस्थागतानां विदुषां का गतिः?' इति कदाचिदधिकारिणः पृच्छन्ति। इत्थं प्रष्टव्यास्ते :' मातृकासंग्रहः किमर्थं कर्तव्यः ? यदि मातृकाणामस्मदभीष्टानां दर्शने न दीयतेऽनुमतिः, सविवरणग्रन्थसूची किमर्था?'

'सर्वासु मातृकासु बाह्येभ्यो दत्तासु किं कुर्युरास्माकीना विद्वांस ' इति वादो निःसारः। सर्वेऽपि भाषाध्येतारो ग्रन्थसंपादका न बुभूषन्ति। यद्येवमभविष्यत्, संप्रति '**अप्रकटितसंस्कृतग्रन्थ**' इति विभाग एव नाभविष्यत्। अपि चैकस्यैव ग्रन्थस्य मातृकाः विविधेषु मातृकालयेषु (कदाचिद् विविधासु लिपिषु लिखिताश्च) वर्तन्त इति तु बालकस्यापि स्ववबोधो विषयः। एकस्मिन् मातृकालये क्रियमाणसंशोधनैर्विद्वद्भिः कदाचिदन्यो मातृकालयो मातृकार्थं प्रार्थनीयो भवति। एतत् सर्वं चिन्तयित्वा मातृकालयनिर्देशकैर्ग्रन्थसंपादकेभ्यः अनेकपुस्तकप्रतिलेखने सहकारो दातव्य एव।

३२.ग्रन्थसंपादनक्षेत्रम्

ग्रन्थसंपादनक्षेत्रं प्रविविक्षूणामपेक्षिता निमित्तरूपा अर्हताः

१.ग्रन्थान् संपादयितुम् उत्कटमभिलषितम्।

२.विविधलिपिमयीनां मातृकाणां पठने कुतूहलम्।

३. "ग्रन्थसंपादनं न केवलं प्रतिलिपिकर्म किन्तु पण्डितकृत्यम्" इति वास्तविकस्य विचारस्य हृदये गाढं स्थापना।

४.केवलं सर्वत्र प्रसिद्धेन पाठेन युक्तानि ग्रन्थसंस्करणान्यादृत्य ग्रन्थकर्तुरभिप्रायाणां स्तरो न मापनीय इति, ग्रन्थसंपादनशास्त्रविधीननुसृत्य संपादितानि संस्करणान्यवलम्ब्य ग्रन्थकर्तुर्मतं विश्लेषणीयं चेति ज्ञानम्।

५.एतदपवादत्वेन 'सर्वत्र प्रसिद्धः पाठ एकान्तेन दुष्ट एवेति रभसान्निर्णयोऽपि न साधुः' इत्यवबोधः।

६. मातृकागतपाठसंपादने अन्तःसाक्ष्यसामग्र्या इव बाह्यसाक्ष्यसामग्र्या अपि निरवधीरण उपयोगः करणीय इति प्रतिपत्तिः।

ग्रन्थसंपादनक्षेत्रे प्रविविक्षूणां सहकारिकारणभूता अर्हताः

१.यस्यां भाषायां ग्रन्थोऽस्ति तस्यां पूर्णोऽधिकारोऽथवा पूर्णमधिकारं प्राप्तुं प्रयत्नः।

२.यस्मिन् विषये ग्रन्थोऽस्ति तत्र पूर्णोऽधिकारोऽथवा पूर्णमधिकारं प्राप्तुं प्रयत्नः।

ग्रन्थसंपादनशास्त्रीयाः काश्चन नीतयः

उत्तमः संपादकः-

* ग्रन्थकर्त्रा रचितस्य मूलपाठस्य सुसदृशं पाठं ग्रन्थसंपादनशास्त्रीयाणां साक्ष्याणामवलम्बनेन स्रष्टुमदम्यम् अभिलषितं वहति।

* स्वयं विविधा लिपीरभ्यस्यति।

* देवनागरीतरलिपीनां विषये कामपि निम्नस्तरीयां भावनां नैव धरति।

* प्रतिलिपिं स्वयं कुरुते , न तु कमपि विद्वांसं प्रतिलिपिकरणार्थं निर्बध्नाति।

* यदि च कदाचिद् गत्यन्तराभावात् प्रतिलिपिमन्येन कारयति, प्रतिलिपिं कृतवतो नाम कृतज्ञताविष्करणप्रसंगेऽविस्मृत्य उल्लिखति।

* विद्वद्भिः प्राप्तं साहाय्यमवश्यं स्मरति पीठिकायाम्।

मुख्यतमो विषयः :

ग्रन्थसंपादनकीर्तिः वास्तविकस्य ग्रन्थसंपादकस्यैव यथा भवेत् तथा करणीयं न पुनर्ग्रन्थसंपादने किमप्यकर्तुः।

संस्कृतग्रन्थसंपादकेभ्य इदं विशेषतो वक्तव्यं यत्-

संस्कृतग्रन्थसंपादकः-

* इङ्ग्लीष्भिन्नाभिर्भारतीयाभिर्भाषाभिर्विशिष्य **संस्कृतेन रचितान्** संशोधनग्रन्थान् संशोधनप्रबन्धांश्च सबहुमानं पश्यति, न पुनस्सतिरस्कारम्।

* संस्कृतग्रन्थेषु वर्तमानाः संस्कृतपीठिका नावगणयति, 'इङ्ग्लीष्-भाषायां वर्तत' इत्येकस्मादेव हेतोः इङ्ग्लीष्पीठिका नाधिगणयति।

३३. ग्रन्थसंपादनशिक्षणम्

निमित्तकारणत्वेन संशोधनकौतुकं हृदि बिभ्राणेषु विद्यार्थिषु ग्रन्थसंपादनाभिरुच्याः उत्पादने सहकारिकारणत्वेन उपाया एते सम्यगनुष्ठेयाः:-

१.वास्तविक्यो मातृकाः प्रथमं दर्शनीयाः।

२.कासाञ्चन लिपीनां शिक्षणपूर्वकं मातृकापठनं शिक्षणीयम्।

३.ग्रन्थसंपादनशास्त्रीयं क्रमिकं शिक्षणं दातव्यम्।

४.मुद्रितेषु ग्रन्थेषु पीठिकानां, पाठान्तराणां परिशिष्टानां च सावधानं प्रदर्शनं तेषामध्यापनं च विधेयम्।

पादटिप्पणीषु वर्तमानानां पाठान्तरविषयकाणां परामर्शानां विषये प्रायिकमौदासीन्यं दृश्यते वाचकानाम्। वस्तुतः संपादितेषु ग्रन्थेषु अधष्टिप्पणीरूपाणां पाठान्तरविषयकाणां सूचनानामध्ययनेन प्राप्य-माणस्य ज्ञानस्यापेक्षया, केवलं ग्रन्थसंपादनविषयकाणां ग्रन्थानामध्ययनेन जायमानं ग्रन्थसंपादनशास्त्रीयं ज्ञानं न्यूनतरमिव। कदाचित्तु ग्रन्थसं-पादनशास्त्रविषयकाणां ग्रन्थानामध्ययनं विनैव, केवलं पाठान्तरपरा-

मर्शानामध्ययनं ग्रन्थसंपादनविषयकमुत्कृष्टं पाण्डित्यम् उत्पादयति !

५.सविवरणमातृकासूचीनां पठनार्थं विद्यार्थिनो निर्बद्धव्याः। कामपि मातृकासूचीमदृष्टवद्भिः कैश्चित् "मयाऽमुके शास्त्रे ग्रन्थः कोऽपि संपिपादयिषितः, परन्तु कोऽयमिति न निर्धृतम्। किं भवता कोऽप्यमुद्रितो ग्रन्थो दृष्टो यो मातृकायामेवाधुनापि स्थितः संपाद्यः" इति विद्वज्जनो यत् पृच्छ्यते तद् बालिश्यात्। वस्तुतस्तु ग्रन्थसंपादनशास्त्रपाण्डित्याख्यस्य वास्तुनः, ग्रन्थसंपादनशास्त्रविध्यनुगुणं संपादितानां ग्रन्थानामामूलचूल-मध्ययनं तथा सविवरणमातृकासूचीनां च सावधानमध्ययनम्-एतद् द्वयं **मूलस्तम्भायते**। भण्डार्कर्, पीटर् पीटर्सन्, जी.बूह्लर्, हरप्रसाद-शास्त्री इत्यादिभी रचितानां मातृकाविषयकाणां विस्तृतानां कुतूहल-प्रदानां प्रणिगदनानां (Reports) सश्रद्धम् अध्ययनं विद्यार्थिनो यथा कुर्वीरंस्तथा तेषां मनसि श्रद्धोत्पादनं गुरुजनानाम् अनिवार्यं कर्तव्यम्।

६.इङ्ग्लीष्भाषायां इङ्ग्लीष्भिन्नासु च भाषासु ग्रन्थसंपादन-विषयकस्य वाङ्मयस्य अध्ययनार्थं कुतूहलोत्पादनं करणीयम्।

७.ग्रामेषु, नगरेषु, परिचितानां बन्धूनां च गृहेषु वर्तमानानां मातृकाणाम् अन्वेषणार्थं विद्यार्थिषु प्रचोदनाऽपि विधेया।

८.संशोधनपत्रिकासु विरलाप्रकटितग्रन्थवतीनां मातृकाणां विषये प्रकाशनं प्राप्नुवानेषु लेखेषु सकुतूहलः सश्रद्धः साध्ययनश्च दृष्टिपातः करणीय इति पौनःपुन्येन विद्यार्थिजनः प्रवक्तव्यः।

९.ग्रन्थसंरक्षणाय विद्वद्भिः सोढानां कष्टानां विषये घटितानां वृत्तानां श्रावणं महते प्रयोजनाय कल्पते[१]।

१.यथा सुदर्शनाचार्यविरचितायाः श्रीभाष्यव्याख्यायाः श्रुतप्रकशिकाया रक्षणार्थं तत्रभवता वेदान्तदेशिकेन कृतं साहसम्।

१०.द्वयोः लघुकायकयोः(प्रकटितयोरेव) ग्रन्थयोः मातृका-साहाय्येन संपादनार्थं प्रचोदनमभीष्टः प्रयोगः। प्रथमा कृतिः साहित्यस्य, द्वितीया च शास्त्रस्य स्यात्। सर्वेभ्यो विद्यार्थिजनेभ्य एकैव कृतिर्दातव्या। यथा परीक्षासु सर्वेभ्यो विद्यार्थिजनेभ्य एकैव हि प्रश्नपत्रिका दीयते । एवं कृते विविधरीतिकं संपादनक्रमं तेभ्यः शिक्षयितुं साहाय्यं भवति। अपि च संपादनक्रमे के दोषाः के च गुणास्तैः कृता इति तेभ्योऽवगम-यितुमपि सूपायोऽयम्। अन्येभ्यो विद्यार्थिजनेभ्यो दत्तास्वन्यास्वन्यासु कृतिषु नैतत् सुलभम्। शुद्धपाठस्य शोधः, अनङ्गीकार्याणां पाठानां पाठ-टिप्पण्यां सक्रमं स्थापनं, पीठिकालेखनं, परिशिष्टादियोजनं, ग्रन्थार्थादि-विषयकस्य टिप्पण्यादिकस्यापि लेखनमित्यादिकंसर्वं संपादनकर्मान्तर्गतम्। समाप्ते तेषां संपादनकार्ये मुद्रितेन संपादितेन च संस्करणेन तेषां संपादनस्य संवादः कारणीयः। एतेन अभ्यासदार्ढ्यं संजायते।

अत्रेदं विशेषतोऽवधातव्यम्। केषुचन ग्रन्थसंपादनविषयकेषु कार्यागारेषु संपादनाभ्यासार्थं विद्यार्थिभ्यो विभिन्नाः कृतयो दीयन्ते। अस्यां पद्धतौ-'मातृकासंपादनेऽनुभूयमानं कष्टं समानेन प्रकारेण सर्वैर्विद्यार्थि-जनैर्न ज्ञायत इति प्रधानो दोष ' इत्युक्तप्रायम्। कदाचित् एकस्या एव मातृकाया भिन्नभिन्नानि पत्राणि भिन्नेभ्यो विद्यार्थिजनेभ्यः संपादना-भ्यासार्थं दीयन्ते यत्त्वतितमां हास्यास्पदम्। सर्वेषां सुविज्ञातमेव यन्मातृकासु कदाचिदेकस्य पत्रस्यान्ते कस्यापि पदस्यादिममक्षरं लिखितं सत् तस्यान्ये त्रयो वर्णाः अपरस्मिन् पत्रे लिखितानि भवन्तीति। आदिमवर्णमात्र-वत्पत्रयुक्तां मातृकां गृहीतवता विद्यार्थिजनेन किं करणीयम् ? 'परस्परेण विद्यार्थिभिः सहकारो विधेय' इत्युत्तरं न सम्यक्। एकेनैव विद्यार्थिजनेन समग्रा कृतिः संपादनीयेत्येव सुष्ठुतरम्। एकस्यां मातृकायामेकस्मै दत्तायां स सर्वेषां ग्रन्थवाक्यानां संबन्धं सम्यग् जानाति। भवति ह्येकस्मिन्नेव ग्रन्थे सर्वेषामपि वाक्यानां परस्परेण (साक्षात् परम्परया वा)अर्थसंबन्धः।

केवलं ग्रन्थसंपादनविषयकस्य प्रवचनस्य प्रतिदिनं श्रावणं विद्यार्थिजनेषु वैरस्यैकफलम्। प्रयोगप्रधानं हीदं ग्रन्थसंपादनशास्त्रं न तु प्रवचनप्रधानम्।

एतैर्विचारैः सम्यग् ज्ञातैर्ग्रन्थसंपादनविषयकं शिक्षणं (विश्वविद्यानिलयेषु बिरुदार्थं क्रियमाणं, कार्यागारेषु दीयमानं च)सफलं भवति। सफलत्वं च ग्रन्थसंपादनार्थस्योत्साहस्य विद्यार्थिजनेषूत्पादनम्।

३४.काचिद् विज्ञप्तिः- आर्येषु ब्रह्मणि च !

१.**आर्येषु विज्ञप्तिः**-अयि भो आर्याः ! यदि ग्रन्थसंपादने(= मातृकासूपलब्धानां ग्रन्थपाठानां शुद्ध्यशुद्ध्यादिनिर्णयपूर्वकं ग्रन्थकर्त्रा रचितेन पाठेन सौसादृश्यं वहमानस्य पाठस्य सृष्टौ) तदुचितायां विविधलिपिज्ञानप्राप्तौ च युष्माकं नाभिरुचिः - अथ च, यदि केवलं शिष्यजनानां पुरस्तात् साहित्यकृतीनां शास्त्रकृतीनां वा प्रवचने कृताभिरुचयो यूयं, **कृपया ग्रन्थसंपादनक्षेत्रं मा प्रविशत।**

२. **ब्रह्मणि विज्ञप्तिः**-ब्रह्मन्! भवता श्रूयतामिदं कृपया-

सृज परत्र नटान् अयि विश्वसृट् !
तदिदमङ्ग ! मुदैव सहामहे।
अभिनये कुशलान् इह मातृका-
जगति मा सृज मा सृज मा सृज॥

३५.ग्रन्थसंपादनदर्शनम्

[ग्रन्थकर्त्रा रचितस्य मूलस्य सुसदृशं रचनम्।]

अधिकरणेष्वभियुक्ताः प्रायः स्वेषामभियोगवस्तु नाङ्गीकुर्वन्ति। अभियुक्तानां वचनं श्रुत्वा, साक्ष्याणि च परिशील्य प्राड्विवाकानां वादानप्याकर्ण्य,अभियुक्तोऽपराद्धो वाऽनपराद्धो वेति अधिकरणाध्यक्षो निश्चिनोति। तद्वत्, सर्वास्वपि ग्रन्थस्य पुत्रिकासु स्वासां परिवर्तनलेशशून्यां मूलमातृकानिष्ठां घोषयन्तीष्वपि, संपादकेन जनेन उपलब्धाया मातृकायाः/ उपलब्धयोर्मातृकयोः/उपलब्धानां मातृकाणां साक्ष्यं(अन्तःसाक्ष्यम् इति ग्रन्थसंपादनशास्त्रीयाऽत्र परिभाषा) परिशील्य, तथा व्याख्यानानाम्, अन्यग्रन्थेषु (मुद्रितेष्वथवा अमुद्रितेषु) प्रकृतस्य ग्रन्थस्य विषयवाक्योद्धरणानां, संग्रहकृतीनां, भाषान्तरेषु कृतानामनुवादानां साक्ष्यं (बाह्यसाक्ष्यम् इति ग्रन्थसंपादनशास्त्रीयाऽत्र परिभाषा) च परिशील्य कः पाठो मूलानुगामी, कतरश्च पाठो मूलाननुगामीत्यादिकं निश्चिनोति।

तदेवं मान्यं ग्रन्थसंपादनदर्शनम्-

प्रमाणम्-मातृकासूपलभ्यमानाः ग्रन्थपाठाः, मातृकागतेषु मुद्रितेषु च प्रकृतग्रन्थभिन्नग्रन्थेषु समुद्धृता प्रकृतग्रन्थभागाः, लोपागमादेशजन्या वर्णदोषाः, लोपागमादेशजन्यानि वर्णान्तराणि, लोपागमादेशजन्याः पाठदोषाः, लोपागमादेशजन्यानि पाठान्तराणि च।

साधनम्-मातृकास्थितग्रन्थपाठेषु दोषपरिमार्जनं, अक्षुद्राणां दोषाणां पाठान्तराणां च विद्वत्परिशीलनार्थं पादटिप्पण्यामवशेषणं, प्रकृतग्रन्थभिन्नग्रन्थेषु प्रकृतग्रन्थभागोद्धृतिभिः संवादश्च।

साध्यम्- ग्रन्थकर्तृरचितस्य पाठस्य सुसदृशो यः पाठस्तस्य सृष्टिः।

३६.अध्येतव्याः केचन ग्रन्थाः

नवीना विद्वांसो ग्रन्थसंपादनशास्त्रे किमपि रचयितुमुत्कटाभिलाषिणः।तस्मान्नेदमाश्चर्याय यद् ग्रन्थसंपादनशास्त्रीयान् विविधान् प्रतिपाद्यांशानधिकृत्य बहवः संशोधनलेखास्तथा बहवः संशोधनप्रबन्धाः प्रत्यहं विरच्यन्ते संशोधनपत्रिकासु प्रकाश्यन्ते च।ग्रन्थसंपादनविद्यार्थिभिरिदं ज्ञातव्यं यत् सदाप्यतिरिक्तमधिकं च पठनीयं वस्तु प्रतीक्षते तान्। ग्रन्थसंपादनशास्त्रस्य सागरवद् गभीरत्वं विशालत्वं चात्र कारणम्।

वि.एस्.सुक्थङ्करस्य *Prolegomena* (=आमुखीया टिप्पणी) ग्रन्थसंपादनज्ञानां वेद इव।विशिष्य मातृकाणां वंशनिर्धारणा कथं करणीयेति जिज्ञासुभिरवश्यं पठनीयोऽयं लेखः।अयं च विश्वप्रसिद्धे महाभारतसंस्करणे आदिपर्वात्मकस्य प्रथमसंपुटस्य पीठिकात्वेन दत्ता (१९४१).।महाभारतसंस्करणार्थं यासां मातृकाणामुपयोगः कृतस्तासां सर्वासामपि विस्तृतं विश्लेषणम् अत्रत्यं ग्रन्थसंपादज्ञैरवश्यं ज्ञातव्या सामग्री।

ग्रन्थसंपादनशास्त्रे कृताभिरुचिभिः सर्वैर्भारतीयविद्वद्भिः प्रायोऽनिवार्यपाठ्यत्वेन परिगणिता प्रसिद्धा कृतिर्नाम एम्.आर्.कत्रे प्रणीता *Introduction to Indian Textual Critisism* नाम्नी (पुणे १९५४) अधुनापि बहुलप्रचारा ग्रन्थसंपादनपठनपाठनादिषु। वि.एस्.सुक्थङ्करस्यैष साक्षाच्छिष्यः सन् ग्रन्थसंपादनशास्त्रस्य विधीन् अन्यूनानतिरिक्तं यथा स्यात् तथा सोदाहरणं विवृणोति।

अद्यत्वे डा.आर्.एस्.शिवगणेशमूर्तिः नाम ग्रन्थसंपादनज्ञानां जिह्वाग्रे वर्तते ।तद्विरचिता कृतिः *Introduction to Manuscriptology* (शारदा पब्लिकेषन् हौस् नवदिल्ली १९९६)

प्रतिपाद्यवस्तुपूर्णः। अत्र विशेषस्तु मातृकाणां, लेखन-लेख्यसामग्रीणां, लेखनसंबद्धशिल्पानां च चित्राणि। अन्यच्च। संस्कृतलेखनार्थमुपयुक्तानां बह्वीनां लिपीनां वर्णमालात्र दर्शिता येन ग्रन्थस्योपयोज्यत्वमधिकतरं संजातम्। ग्रन्थान्ते दत्ता सहायकलेखग्रन्थानां सूची च संशोधकानां महत उपकाराय कल्पते।

कन्नडे डा.डि.एल्.नरसिंहाचार्यकृता "कन्नडग्रन्थसंपादने" इति कृतिः (शारदामन्दिरम्, मैसूरु १९७०)ग्रन्थसंपादनसिंहासनमारोढुं प्रभवतीत्यत्र न संशयः। यूरोप्देशे ग्रन्थसंपादनशास्त्रं कथं प्रावर्ततेति विषयविचारस्त्वत्रत्योऽन्यत्र दुर्लभः। षेक्स्पीयर्कवेः नाटकानां संपादने यूरोपीयैः कृतस्य संशोधनस्य परिचयोऽत्रत्य उत्तमः। विषयनिधिरयं ग्रन्थः संपादनविधिज्ञापनार्थमतिविपुलसंख्यया ददात्युदाहरणानि।

३७.किमपि पुच्छम्

ये मातृकालयेषूद्योगिनस्तैर्मातृकासंशोधनकर्मणि लभ्यमाना अवसरास्तत्रानुद्योगिभिस्तत्कर्मणि लभ्यमानानामवसराणामपेक्षया अधिकतरा इति यत्, तत् केवलं सहकारि कारणं न पुनर्निमित्तकारणमिति द्रष्टव्यम्। अत्र निमित्तकारणं तु ग्रन्थसंपादने परमोत्कटाभिलषितमित्याम्रेडितपूर्वम्। त एव सहकारिकारणस्योपयोगं कर्तुं सोत्साहा भवन्ति य एव निमित्तकारणवन्तो भवन्ति। मातृकालयेष्वनुद्योगिनोऽपि मातृकासु कृताभिरुचयो जना मातृकालयगतासु मातृकासु कुतुकवन्तः संपादनकर्म निर्वोढुं शक्नुवन्त्येव।

ग्रन्थसंपादनशास्त्रग्रन्थेषु पठितेषु, तद्विषयकेषु प्रवचनेषु च श्रुतेषु ग्रन्थसंपादनपाण्डित्यं त्वरिततरं जायत इति कोऽपि नैव भ्राम्येत्।

मातृकागतानां पाठानां प्रथमवारं संपादनकाले दुष्टाः पाठाः कियत्याचिन्मात्रया संपादकजनं भाययन्त्येव। ग्रन्थसंपादनक्षेत्रं नाम युद्धभूमिः। कस्यामपि ग्रन्थसंपादनशास्त्रकृतावनुपन्यस्ताः समस्याशत्रवः संपादकयोधम् आक्रामन्ति। ग्रन्थसंपादनविषयं प्रवचनमनेन व्याख्यातम्। प्रत्युत्पन्नमतिखड्गं धृत्वा समस्याछेदोपायास्तेन संपादकजनेन स्वयमन्वेष्याः।

मातृकासु उपलभ्यमानानां लघ्वीनां कृतीनां प्रतिलेखनं कृत्वा संशोधनपत्रिकाः प्रति प्रकाशनार्थं तासां प्रेषणं संपादनज्ञानां साधुर्धर्मः। एतादृशीनां कृतीनां तु विस्तृता पीठिका नावश्यकी। मातृकाणां विषये संशोधनप्रणिगदनानां लेखनं,तथा तेषां संशोधनपत्रिकासु प्रकटनम्[१] अपरेभ्यः संशोधकेभ्यः सम्यञ्चं मार्गं दर्शयति।

मल्लशास्त्रं जगत्यस्मिन् दोर्हीनानां करोतु किम् ?
ग्रन्थसंपादनं शास्त्रं धीशून्यानां करोतु किम् ?

संपादितासु रचनास्वपरैर्निमग्नाः
संपादने स्वयमपि प्रसिताः कृतीनाम्।
संपादनस्य विबुधा ; न तु शास्त्रमात्रे
संपादनाख्यविषये निपतत्कटाक्षाः।।

यदेव-

संपादकस्य जनस्यानुभवे पक्वे मातृकास्थग्रन्थपाठशोधने परमोत्कटं कुतूहलं शनैः शनैर्जातं सद् दृढभूमिकं भवति,

तदेव-

ग्रन्थसंपादनक्षेत्रे प्रवेशेन साधनीया परमोत्तुङ्गा सिद्धिः।

१.द्र.पुटानि २४७-२५४

उपसंहारः

१.विसर्गानुस्वारौ स्वपदगलितौ क्वापि पतितौ
विलुप्तं संयुक्ताक्षरमथ महामोहवशतः।
झटित्यन्यत्रान्यल्लिखितमपि यत् तत् पुरुतर-
क्षमाशीलाः क्षाम्यन्त्वकलुषधियः शीलितगुणाः॥

२.लोपागमादेशयुताश्च वर्णा लोपागमादेशयुताश्च पाठाः।
बोधादबोधादुत मातृकास्थग्रन्थेषु जाताः प्रतिलेखकानाम्॥

३. बतास्मिन् विश्वस्मिन् लिपिलपितविज्ञानविकला
अपि क्षोण्यामस्यां विविधकृतिसंपादनपराः।
लिपिज्ञानां कीर्तिप्रकरकबलीकारकुशलाः
कदाचिद् राजन्ते कुसृतिजटिलाः किं न कुटिलाः ?॥

४.धन्यः संपादकोऽसौ यो दृष्ट्वा हर्षाश्रु मुञ्चति ।
विशीर्णास्त्रुटिता भग्नाः कीटदष्टाश्च मातृकाः॥

५. गीर्लिपिविषयान् सोपानान्यारोहन् प्रबोधकुञ्चिकया।
कर्तृकृतपाठसौधद्वारोद्घाटनपटुर्बुधो जयति॥

६.ग्रन्थग्रन्थ्यपवारणं गुरुगुणं नैकप्रमाणस्थिरं
विद्वत्त्वेन विधीयते पटुतरं पाठप्रतिष्ठापनम्।
यत् तत् साधु सुधीजनेन परमप्रज्ञाञ्जनेनेक्ष्यते
नानालेखनिगूहितोऽपि कृतिकृन्मर्माभिधानो निधिः ॥

उद्टङ्कनेन दुष्टेन भारत्या विहिते व्रणे।
भिषग्भिः पाठकाकारैर्लिप्यतां करुणौषधम् ॥

परिशिष्टम् १.-गङ्गानवरत्नमालास्तोत्रम्

चन्द्रशेखरविरचितम्।

इदं गङ्गानवरत्नमालास्तोत्रमतीवसरलया शैल्या रचितं, द्वितीयान्तिमाक्षरयोः प्रासयुक्तं, 'सान्द्रगुणवृत्त**नवरत्न**परिणद्धम्' इति, दशमपद्यद्वितीयपादस्थेन समस्तपदेन **माल्यम्** इति तृतीयपादस्थपदेन चाभिहितनामधेयम्।

अस्य रचयिता कोऽपि चन्द्रशेखर इति त्वन्तिमेन पद्येन ज्ञायते। कोऽयं चन्द्रशेखर इति निश्चित्य वक्तुं न शक्नुमः। प्रायेण कन्नडभाषी स्यादयमित्यभ्यूह्यते, दशमपद्यस्य तृतीये पादे 'रुन्द्र' इति शब्दस्य कविना प्रयुक्तत्वात्। संस्कृतवाङ्मये विरलतमोऽस्य प्रयोगः, सांस्कृतत्वेऽप्यस्य। कर्णाटकराजानां कदम्बवंश्यानां शासनेषु रुन्द्रशब्दो गोचरीभवति[1]। कन्नडभाषया विरचिते पम्पमहाकविप्रणीते विक्रमार्जुनविजये (पम्पभारतेति नाम्ना प्रसिद्धे) "व्यासमुनीन्द्ररुन्द्रवचनवार्धियनीसुवें कविव्यासनेनेम्ब गर्वमेनगिल्ल" (१.१३) इत्यस्मिन् भागे 'रुन्द्र'शब्दः प्रयुक्तः। रुन्द्रशब्दस्य विस्तृत इत्यर्थः।

एष स्तवो दशपद्यसमन्वितश्चतुर्दशाक्षरयुक्तायां शक्वर्याम् "इन्दुवदना भजसनैः सगुरुयुग्मैः" इति वृत्तरत्नाकरे लक्षितेनेन्दुवदनावृत्तेन रचितः।

मातृकापरिचयः

मातृकाङ्कः- पि.३५८४
लिपिः-तेलुगु
समग्रा वा असमग्रा वा -समग्रा
लेख्यसामग्री-तालपत्रम्।
मापनम्-38.8 X 3 से.मी
कस्मिन् पत्रे लिखितं -सप्तमे पत्रे।
मातृकोपलब्धिस्थानं-मैसूरुप्राच्यविद्यासंशोधनालयः।
पुष्पिकोत्तरपुष्पिके-न स्तः।

१.विषयमेतं मह्यं ज्ञापितवतः श्रीमतः स.कार्त्तिक्-वर्यस्य कृतज्ञोऽस्मि।

मातृकाकोशेऽस्मिन् लिखिताः अपराः कृतय इमाः:-
समानसन्धिव्याख्या,नपरव्याख्यानं,तपरव्याख्यानं,अवर्णिव्याख्यानं, आवर्णिव्याख्यानं, अनिङ्ग्यव्याख्यानं,सप्तलक्षणीव्याख्यानं च।

संपादनविषये किञ्चित्-दृष्टाः पञ्च प्रमादाः पादटिप्पण्यां सूचिताः। चत्वारो लोपा अभ्यूहबलेन पूरिताः। द्वयोस्तु लोपयोः कथं पूर्तिः करणीयेति न ज्ञातम्। अर्थस्याज्ञातत्वात् ' नूनयति ' (३.२) इत्यत्र प्रश्नचिह्नं निवेशितम्। 'तीते' इत्यत्र 'भीते' इत्यूहः कृतः।

१.मात[१]रवतंसितमहेश्वरवराङ्गे
धूतनिजसेवकदुरन्तरुगपाङ्गे[२]।
पातककदम्बकपरीतमयि गङ्गे
पूतमिदमातनु जनं शुभतरङ्गे।।

२.कुन्दशरदिन्दुरुचिसुन्दरतरौघे
नन्दितपुरन्दरपुरःसरसुरौघे।
नन्दलितवन्दनपराशुभनिदाघे
कन्दलय जाह्नवि दयां मयि महौघे।।

३.पावनि तवाम्बुकणसिक्तमघशून्यं
देवनिकुरम्ब[३]मपि नूनयति (?) मान्यम्।
नैव शिवरूपिणि भजामि भवदन्यं
देवि कलयाशु जनमेनमपि धन्यम्।।

४.उष्णकररोचिरसहिष्णुतटवन्ये
विष्णुशिवभेदनिरसिष्णुबुधमान्ये।
कृष्णपदपद्मरतिमुष्ण-नतान्ये
विष्णुपदि देहि मयि भूष्णु[४]मतिशून्ये।।

५.ख्यातसुरवारपरिवीतशुभकूले

१.धूत-इति मातृकापाठः।
२.साङ्गे-इति मातृकापाठः।
३.रुम्ब-इति मातृकापाठः।
४.भूष्ण-इति मातृकापाठः।

पूतनिजकूलनत[1]जातसुरसाले।
वीतरिपुजातमुनिजातनुतशाले
मातरयि देहि मयि [मान]मतिलोले॥

६.नीलगलमौलिधुनि वारिनिधिजाये
कालभयनो--निजाश्रितनिकाये।
फालनयनादिमनुसर्वततिगेये
पालय कुमारमिममातुरममेये॥

७.नाकधुनि जह्नुमुनिकर्णबिलजाते
कोकधवलाङ्गरुडनीकपरिवीते।
भीकरजरामृतिपरीतभवतीते (!भीते ?)
शोकमपसारय मयीद्धमविनीते॥

८.निह्नुतकलङ्कमिति तेऽम्बु नि[गमो]क्तं
जह्नुमुनिनन्दिनि तवाम्बुगणसिक्तम्।
वह्निमयफालनयनेन निजभक्तं
चिह्नय सितेऽम्ब कथमेतदयि युक्तम्॥

९.पावितनिजस्तुतिपरायणसुरूपे
कोवि[दक]द[म्बक]कृतस्तुतिकलापे।
भाविशुभसंचयविहीनदुरवापे
देवि जय जाह्नवि विमर्शसुखरूपे॥

१०.चन्द्रपदचारुतरशेखरनिबद्धं
सान्द्रगुणवृत्त**नवरत्न**परिणद्धम्।
रुन्द्रविभवेन तव **माल्य**मतिशुद्धं
सान्द्रयति भक्तमिति देवधुनि ! सिद्धम्॥ ----

१.नन-इति मातृकापाठः।

परिशिष्टम् २.-दानलक्षणम् श्रीवासुपूज्यर्षिविरचितम् अज्ञातकर्तृकया कन्नडव्याख्यया समेतम् : कश्चन परिचयः।

कदाचिन्मैसूरवीये प्राच्यविद्यासंशोधनालये मातृकाधानीषु मातृकायाः कस्याश्चिन्मदभीष्टाया अन्वेषणे प्रवृत्तस्य प्रकृतस्य ग्रन्थकर्तुः कटाक्षस्तावदवधि केनाप्यदृष्टे मातृकाकोशे पतितः। सकौतुकं तत् परिशीलयता तेन कन्नडलिप्या लिखितः कोऽपि ग्रन्थोऽयमिति, दानविषयकाः संस्कृतश्लोकाः सकन्नडटीकास्तत्र लिखिता इति च ज्ञातम्। सुभृशं परिशीलयतस्तस्यैते विषयाः क्रमेण बुद्ध्यारूढा अभवन् : ग्रन्थोऽयं जैनमतीयो दानविषयको व्याख्यासमेतः। मूलं संस्कृतेन रचितो व्याख्या तु कन्नडेन। कन्नडव्याख्या विस्तृताऽस्ति यत्र महास्रग्धरादिच्छन्दोभी रचितानि पद्यानि तत्र तत्र गोचरीभवन्ति। एतानि किं व्याख्यात्रा स्वयं निर्मितान्याहोस्वित् तेन केवलमुद्धृतानीति तु ग्रन्थस्यास्य ग्रन्थसंपादनशास्त्रीयसंस्करणे निर्मिते निश्चेतव्यम्। संस्कृतपद्यान्यपि तत्र तत्र गोचरीभवन्ति यानि प्राय उद्धृतानि, न पुनर्व्याख्यातृरचितानि।

द्वितीये पद्ये दानलक्षणमिति शब्दो वर्तते। अन्तिमे पद्ये दानशासनमिति संज्ञा दृश्यते। अत्र कतरद् वास्तविकं नामेति प्रश्नः शास्त्रीयसंस्करणनिर्माणकाले समाधेयः। केषुचन पद्येषु व्याख्यानं नास्ति। तेषु व्याख्यातव्यस्य कस्यापि विचारस्याभावात्तान्यव्याख्यातानि वा, व्याख्यातानि सन्त्यप्यस्यां मातृकायामलिखितानि वेति न स्फुटम्[१]।

१.षोलापुरे प्रकटितस्य उग्रादित्यविरचितकल्याणकारकग्रन्थस्य रक्षापुटे कस्यचिद्दानलक्षणस्य प्रकटितस्योल्लेखो वर्तते। किं तदिदमेव दानलक्षणमुतान्यदिति न जानाति प्रकृतो ग्रन्थकर्ता। कुवेम्पुकन्नडाध्ययनसंस्थायां कस्यचन 'दानशासनलक्षण'स्य मैक्रोफिल्म्-मातृका वर्तते तस्या अङ्कः-N.1770. एतत्समानप्रतिपाद्यवस्तुकस्य दानसाराख्यस्यापि मातृकास्तत्रैव वर्तन्ते। तासामङ्काः N.507, N.1810, N.2110. आद्यास्तिस्रो मूडबिद्रेतः, अन्तिमा च श्रवणबेळगोळतः प्राप्ताः। एतद् ज्ञापयित्र्याः डा.वै.सि. भानुमत्याः कृतज्ञोऽस्ति प्रकृतो ग्रन्थकर्ता।

मातृकापरिचयः

मातृकाङ्कः- P.14235
ग्रन्थनाम-दानलक्षणं दानशासनं वा।
कर्ता-श्रीवासुपूज्यर्षिः।
व्याख्यायाः नामधेयम्-न लिखितम्।
व्याख्यातुर्नाम-न लिखितम्।
कस्मै प्रतिलेखनं कृतम्-आदिवर्णिने
मूलस्य भाषा-संस्कृतम्।
मूलं समग्रं वा असमग्रं वा -समग्रम्।
व्याख्यानस्य भाषा-कन्नडम्।
व्याख्यानं समग्रं वा असमग्रं वा -समग्रम्।
लिपिः-कन्नडम्।
मापनम्-५३.५ X ५ से.मी
पत्रसंख्या-१-१७२-
प्रतिपत्रं पङ्क्तिसंख्या-८
प्रतिपङ्क्ति अक्षरसंख्या-८८
स्थितिः-साधारणी।
लेखनतिथिः -विजयाभ्युदयसंवत् शालीवाहनशकवर्ष[-]नेय दुर्मुखिनाम संवत्सर आषाढ शुद्धपञ्चमी कुजवार।
लिपिकरः-पातः।
लेखनविन्यासः-स्पष्टः।
मातृकोपलब्धिस्थानम्-मैसूरुप्राच्यविद्यासंशोधनालयः।
शुद्ध्यशुद्धिविचारः-तत्र तत्र लेखनाशुद्धयो गोचरीभवन्ति। उपक्रमे १३, १४ पद्ययोर्द्वितीयपादे यतिभङ्गोऽस्ति।
[कन्नडव्याख्याया अतिविस्तृतत्वादत्र सा न दत्ता।]
उपक्रमः-श्रीब्रह्मणे नमः । निर्विघ्नमस्तु।

१.यस्य पादाब्जसद्गन्धाघ्राणनिर्मुक्तकल्मषाः।
ये भव्याः सन्ति तं देवं जिनेन्द्रं प्रणमाम्यहम्॥

२.दानं वक्ष्ये द (ऽथ?) वारीव सस्यसंपत्तिकारणम्।
क्षेत्रोप्तं फलति (ती?)व स्यात् सर्वस्त्रिषु समं सुखम्॥
३.शुद्धसद्दृष्टिभिः शुद्धपुण्य(ण्यो?)पार्जनलम्पटैः।
सार्धं ब्रूयादिमं ग्रन्थं नै(ने?)तरैस्तु कदाचन॥

क्रमकृताकृतदानकृषिदानयुगफलमाह-

४.दत्त्वा द्वित्रिगुणाकरं च सकलां विष्टिं च कृत्वा प्रजाः
सद्द्रव्यव्ययमात्तवप्रनिचये सम्यक्फले निष्फले।
प्रत्यब्दं बहुसुक्रियाः क्रमकृतास्ताभिश्च ताः कुर्वते
मुक्त्वा सत्क्रममुत्तमं सुखभुजो वाञ्छन्ति जैनास्तथा॥
[अत्र कन्नडव्याख्यायामुद्धृतं पद्यम्-
स्वात्तक्षेत्रसुसंस्कारकरणां(कारिणां?)साधुचेतसाम्।
अर्थव्ययं प्रजा नृ(नॄ?)णां कुर्वते नेतरस्य च॥]
५.धर्मकारणपात्राय धर्मार्थिं येन दीयते।
यद् द्रव्यं दानमित्युक्तं तद् धर्मार्जिनपण्डितैः॥
६.-----------सामान्यं दोषदं दानमुत्तमं मध्यमं तथा।
जघन्यं सर्वसंकीर्णं कारुण्यौचित्यमष्टधा।
७.राजा निजाति(रि?)कृतसंगरवारणार्थं
प्रस्थापितं बलमिवावति सर्वमन्त्रैः।
जैनोत्सवेऽरिकृतविघ्नविनाशकेभ्यः
सामान्यमुक्तमखिलं सुजनैः प्रदत्तम्॥
८.पात्रभेदाननालोच्य जैनान् धर्मेक्षकानपि।
सत्कृत्यान्नादिकं त्यक्तं दानं सामान्यमुच्यते॥
उक्तं च- अर्थाद्यवञ्चको भूत्वाऽप्यवितुं स्वबलं तथा।
दत्ते यथोचितं द्रव्यं दानं सामान्यमीरितम्॥
९.निजपापार्जितं द्रव्यं द्विजेभ्यो ददde (ते) नृपाः।
तैर्नष्टा राजभिर्विप्राः दानं दोषदमुच्यते॥
१०.श्रीमज्जिनेन्द्रसाकल्यरूपधारिमुनीश्वरान्।

सत्कृत्य दत्तमन्नादिदानमुत्तममीरितम्॥
११.दत्तं मध्यमपात्राय दानं मध्यममुच्यते।
द्रव्यं जघन्यपात्राय जघन्यं दानमुच्यते॥
१२.जिनोत्सवसमाहूतपात्रापात्राधिकानपि।
सत्कृत्य दानमन्नादिदानं संकीर्णमीरितम्॥
१३.रोगिणं निगलितं च बाधितं
दण्डितं क्षुधितमम्बु पातितम्।
वह्निपीडितमवत्यवेक्ष्य का-
रुण्यदानमिदमीरितं बुधैः॥
१४.जैनबन्धुयुगसेवनातुरान्
बन्धवाहकजनानपि जिनान्।(अत्र च्छन्दोभङ्गः।)
तर्पयन्त्यशनवीटिकाभिरौ-
चित्यदानमिदमुक्तमार्हतैः॥
[अत्र कन्नडव्याख्यायामुद्धृतं पद्यम्-
यो दत्ते गायकादिभ्यः काले काले यथोचितम्।
ज्ञात्वाऽपवादभित्त्य (भीत्या ?)ना दानमौचित्यमीरितम्॥]
१५.यो राजा वधकोऽस्त्रतो (?)धनहरोऽन्यस्त्रीहरः सस्पृहः
सन्तस्तद्विषयं श्रयन्ति न सदा नो विश्वसन्तीह तम्।
तस्मै नो ददते धनादिचयदं तद्वद्गुणी धार्मिको
दाता दानफलान्वयाः खलु तदा रत्नानि भाग्यानि च॥
उपसंहारः-वञ्चना (नां?)स्वामिदेवार्थे पित्राद्यर्थे करोति यः।
सोऽसाध्यक्षयरोदी(गी?)व क्रमान्मुञ्चति जीवनम्॥
परद्रव्यम[प]ाहृत्य पत्र(पर ?)व्याजाच्च जीवति।
यि(इ)हामुत्र निजीवः(?) स्याद् विष्टिकारो यथा जनः॥
शुचित्वतः सर्वशुभोदयः स्यादनिष्टकर्माणि न चाश्रयन्ति।
सुगन्धिगेहं न विशन्ति नि(नी)लास्ततः कृतज्ञाः शुचितां लभेरन्॥
अशुचित्वं करोत्येवाशुभकर्मास्त्र(?)संस्त्रवम् ।

दुर्गन्धिमन्दिरं नीलाः प्रविशन्ति यथा तथा॥
जिनमुनिसमाधिसमये चित्तनिरोधं करोति यस्तस्य।
गेहपुरनाशः स्वस्थानोच्चाटनं भवेन्नियमात्॥
आसन्ने यत्र तिष्ठन्ति राजानो गुरवो बुधाः।
तत्र तत्रासने जैनाः [न] वसन्त्यघभीरवः॥
विदुषा गुरुणा राज्ञा साकमेकासने बुधाः।
तत्तुल्यधर्मरहिता न स्थातव्याः कदाचना(न)॥
-----(अत्र कतिचनाक्षराण्यतीवास्फुटास्तस्मात्तेषां प्रतिलेखनं न कृतम्।)
संपूजकानां प्रतिपालकानां यतीन्द्रसामान्यतपोधनानाम्।
देशस्य राष्ट्रस्य पुरस्य राज्ञः करोतु शान्तिं भगवान् जिनेन्द्रः॥

पुष्पिका-

शाकेऽब्दे त्रियुगान्नशीतगु[१] (१५४३ =1621)युतेऽतीते विषौ वत्सरे
माघे मासि च शुक्लपक्षदशमे श्रीवासुपूज्यर्षिणा।
प्रोक्तं पावनदानशासनमिदं ज्ञात्वा हितां (हितं) कुर्वतां
ध्यानं स्वर्णपरीक्षका इव सदा पात्रत्रये धार्मिकाः॥

उत्तरपुष्पिका-

श्रीमद्बेळगुळविन्ध्य(न्ध्य)शैलमहितश्रीगोमटेशार्हतः
श्रीपादाम्बुजसन्निधावनुचरः श्रीचारुकीर्तेर्गुरोः।
पाताख्योऽलिखदादिवर्णिमुनये ग्रन्थं मुदेमं जडः
सन्तः सन्तु करापराधशमने कारुण्यजातोद्यमाः॥
स्वस्ति श्रीविजयाभ्युदयशालिवाहनशकवर्ष-------नेय श्रीम-
----नामसंवत्सरद आषाढशुद्धपञ्चमीकुजवारदल्लि बरदु
संपूर्णिसि-----

१.शीतगुश्चन्द्रः। संख्यार्थवतां पदानां ज्ञानार्थं द्र.पु.२५९-२७२

परिशिष्टम् ३. संख्यासूचनार्थाः पद्धतयः

(१) कटपयादिसूत्रम्[1]

कस्मिन्नपि पदे वर्तमानानाम् अक्षराणां दत्तपूर्वैरङ्कैः संख्याज्ञानक्रमः कटपयादिसूत्रम्। एतत् सूत्रं केरलेऽतिप्रसिद्धमासीद् यस्य जन्मस्थानं प्रायः केरलं नासीत्। शङ्करवर्मणा सद्रत्नमालायां क्रमोऽयमेवं विवृतः :

१.न-ञावचश्च शून्यानि
२.संख्याः कटपयादयः।
३.मिश्रे तूपान्त्यहल् संख्या
४.न च चिन्त्यो हलस्वरः(=हल् अ-स्वरः)।। (३.३)

१.न-ञौ तथा स्वराः शून्यं सूचयन्ति। २.कादीनि टादीनि पादीनि, यादीनि चाक्षराणि संख्याबोधकानि। ३.संयुक्ताक्षरे अन्तिम-स्वराव्यवहितपूर्वव्यञ्जनस्य संख्यार्थं परिगणना। ४.स्वररहितं व्यञ्जनं न परिगणनीयम्। (डा.के.वि.शर्मणा विवृतमेतत्।)[2].

तृतीयो नियमश्चिन्त्यः-संयुक्ताक्षरेष्वन्तिमस्यैव व्यञ्जनस्य ग्रहणीयत्वं न पुनरुपान्त्यस्येति संप्रदायप्रसिद्धत्वात्। यथा 'प्र' इत्यत्र रेफस्य,'श्व' इत्यत्र वकारस्य, 'क्ल' इत्यत्र लकारस्य, 'त्स्र्य' इत्यत्र यकारस्य च गहणम्। अत्रापवादौ कर्णाटकसंगीतीययोर्द्वयो रागयोर्गोचरीभवतः। (द्र.पु.२५७-२५८ पादटिप्पणी।)

अत्र चत्वारो वर्गाः:१.कादि-नव २.टादि-नव ३.पादि-नव तथा ४.याद्यष्ट

१. पु. ३०८ अपि द्रष्टव्यम् ।

२.*Word and Alphabetical Numerical system in India.* by K.V.Sharma in *The Concept of Śūnya* (Page 42) edited by A.K.Bag and S.R.Sharma ,IGNCA New Delhi 2003.

	१	२	३	४	५	६	७	८	९
१.कादिनव	क	ख	ग	घ	ङ	च	छ	ज	झ
२.टादिनव	ट	ठ	ड	ढ	ण	त	थ	द	ध
३.पादिपञ्च	प	फ	ब	भ	म				
४.याद्यष्ट	य	र	ल	व	श	ष	स	ह	

अर्थात्,

अङ्कः १ क-ट-प-यैः सूच्यते।
अङ्कः २ ख-ठ-फ-रैः सूच्यते।
अङ्कः ३ ग-ड-ब-लैः सूच्यते।
अङ्कः ४ घ-ढ-भ-वैः सूच्यते।
अङ्कः ५ ङ-ण-म-शैः सूच्यते।
अङ्कः ६ च-त-षैः सूच्यते।
अङ्कः ७ छ-थ-सैः सूच्यते।
अङ्कः ८ ज-द-हैः सूच्यते।
अङ्कः ९ झ-धाभ्यां सूच्यते।

शून्यं ० व्यञ्जनहीनेन स्वरेण, ञेन तथा नेन सूच्यते।
व्यञ्जनोत्तरः स्वरो न परिगणनीयः।
संयुक्ताक्षरेष्वन्तिममक्षरं परिगणनीयम्[१]।

अत्र "अङ्कानां वामतो गतिः" इति प्रसिद्धो विधिः प्रवर्तते। अङ्कानां वामत एव लिख्यमानत्वात् किमर्थकोऽयं विधिरिति प्रश्न उद्भवति। अपि चाङ्कानां वामतः क्रियमाणत्वेऽपि गणना तु दक्षिणतः करणीयेत्यन्यो नियमोऽस्ति। किमर्थमित्थंभूता वैचित्री प्रवर्तते ? अपि च गणना यथाऽस्ति तथैव लेखनमपि प्रवर्तताम्। "अङ्कानां वामतो

१.'उपान्त्यहल्'इति यदुक्तं तच्चिन्त्यमित्युक्तपूर्वम्।

गति''रिति विधिमुक्त्वा ततो दक्षिणतो गणनाया अपेक्षया गणनानुसारेणैव वामतोऽङ्कानां लेखनं किमर्थं न करणीयमित्यपि पर्यनुयोगस्यात्र सावकाशत्वम्।

अत्रेत्थं द्वेधा समाधातुं शक्यते।

१.''वामाः कुलस्याधयः''(अभिज्ञानशाकुन्तलं ४.१७) इत्यादिषु प्रयोगेषु वामशब्दस्य विरुद्धार्थकत्वं दृष्टम्। तद्वदत्रापि वामत इत्यत्र विरुद्धत इत्यर्थो ग्राह्यो येन गणनाया गतिर्विरुद्धतः अर्थाद् दक्षिणत इत्यर्थः सिद्ध्यति[१]।

२.'गति'रिति शब्दस्यात्र लेखनगतिरित्यर्थः। लेखनगत्यां वामतः संभवन्त्यां, अर्थगतिस्तु दक्षिणतः संभवतीत्यभिप्रायः स्वयं सिद्ध्यति।

आदि-लेखनक्रमेण- आ=०, दि=८. विरुद्धतो(दक्षिणतो)ऽर्थगतिः=८०

करुणा-लेखनक्रमेण क=१,रु=२,णा=५ विरुद्धतो(दक्षिणतो)ऽर्थगतिः=५२१

कृष्णः-लेखनक्रमेण कृ=१,ष्ण=Ø५=५ विरुद्धतो(दक्षिणतो)ऽर्थगतिः=५१

शर्मन्-लेखनक्रमेण श=५,र्म=Ø५,न्=Øविरुद्धतो(दक्षिणतो)ऽर्थगतिः=५५

अङ्कानाम् अर्थक्रमेण दक्षिणतो गतिः संस्कृतभाषायां साधारणी। २३ इति संख्यायाः त्रयोविंशतिरिति पदेन सूचनं, १०८ इति संख्याया अष्टोत्तरशतमिति पदेन सूचनमित्यादीन्युदाहरणानि[२]।

कर्णाटकसंगीते द्वासप्ततिमेलकर्तृरागनाम्नामादिमं वर्णद्वयं कटपयादिसूत्रानुसारेण रागानुक्रमसंख्याबोधकम्।तत्रादिमे वर्णद्वये यत्र संयुक्ताक्षरं, तत्र नियमानुसारेणान्तिमो वर्णो ग्राह्यः[३]।

१.प्रकृतं ग्रन्थकर्तारमेतदुक्तवान् तत्रभवान् विद्वान् एच्.वि.नागराजराव्वर्यः।

२.पद्यसंख्यानां पद्यलेखनानन्तरमेव (न तु पद्यलेखनात् पूर्वं) लेखनमत्र स्मर्तव्यम्।

३.परन्त्वत्रापवादौ चक्रवाक-सिंहेन्द्रमध्यमेति द्वे नामनी ।चक्रवाक इत्यत्र ..

डा.माधवन्कस्यानुसारेण[1], पद्धतेरस्याः परामर्शो जैमिनिकृतत्वेन प्रसिद्धे ''जैमिनिसूत्रा''ख्ये ज्यौतिषग्रन्थ (क्रि.पू ५००-२००) एव सुप्रापः। यथा-'पञ्च' (१.२.२) पदं ६१ संख्यार्थे,'तत्र' (१.२.३) पदं २६ संख्यार्थे,'दिन' (२.१.१) पदं ८ संख्यार्थे च प्रयुक्तं तत्र।

अन्यच्च। महाभारतस्य प्राचीनं नाम 'जय' इति प्रसिद्धम्। 'जय' इत्ययं शब्दः कटपयादिसूत्रानुसारेण १८ इति संख्यां ददाति, या महाभारते सूच्यमानासु संख्यासु हि प्रधाना-महाभारतगतानि पर्वाण्यष्टादश, महाभारतान्तर्गताया गीताया अध्याया अष्टादश, महाभारतयुद्धमष्टादशदिनावधिकमित्यादिरीत्या। 'कटपयादिसूत्रसत्तायाः महाभारतकाल एव स्वनुमेयत्वात् सूत्रमिदं क्रि.पू.पञ्चमशतक एव लब्धप्रचारमिति सुस्थितम्'इति डा.एस्.माधवन्कस्य मतम्[2]। तन्मतस्य ग्राह्याग्राह्यत्वनिश्चयो महाभारतीयजयसंज्ञा-जनन/प्रचार-समयनिश्चयावलम्बी।

आदिमं वर्णद्वयम्-**चक्र**।'क्र' इत्यस्य संयुक्ताक्षरस्य द्वितीयवर्ण-ग्रहणेन **चक्र**-वामतो लेखनगतिः: च=६,क्र=Ø२=२ दक्षिणतोऽर्थगतिः= २६-एवं गणनेन चक्रवाकरागसंख्या २६ भवति,या न शुद्धा। यतश्चक्रवाकस्य द्वासप्ततिमेलकर्तृरागेषु अनुक्रमसंख्या १६।'क्र' इत्यस्य संयुक्ताक्षरस्य प्रथमवर्णग्रहणे तु-**चक्र**-वामतो लेखनगतिः: च =६,क्र =१Ø=१ दक्षिणतोऽर्थगतिः=१६।एषैव शुद्धा गणना।(यदि रागस्यास्य 'तापहारिणी' इति वा, 'चापधारिणी' इति वा 'तोयवाहिनी' इति वा संज्ञाऽभविष्यत्, काऽपि समस्या नोदभविष्यत्)

सिंहेन्द्रमध्यमा इत्यत्र **सिं**=७,**हे**=८,अर्थात्= ७८, दक्षिणतोऽर्थगतिः =८७,एवं गणना क्रियते चेत् सिंहेन्द्रमध्यमसंख्या=८७भवति, या न शुद्धा। तस्मात् सिह्मेन्द्रमध्यम इति पठित्वा (सि=७,ह्मे=५)७५ संख्यां लब्ध्वा दक्षिणतोऽर्थगत्या ५७ संख्या लब्धव्या।इयमेव सिंहेन्द्रमध्यमस्यानुक्रमसंख्या।(यदि रागस्यास्य 'सोमिका'इति वा, 'सीमा'इति वा संज्ञाऽभविष्यत्, कापि समस्या नोदभविष्यत्)

१.*Origin of Kaṭapayādi system of numerals.* ***Pūrṇatrayī***, XVIII.2., Government Sanskrit College Committee Tripunithura, Kerala Pp.35-48.

२.तत्रैव

(२) संख्यासूचकानि पदानि

संस्कृतवाङ्मयं किल च्छन्दःप्रधानम्। छन्दसि नामग्राहं संख्यानाम् उल्लेखे वर्णाधिक्येन वर्णनैयून्येन गुरुलघ्वोर्व्यत्ययेन वा छन्दोदोषप्रसंगस्य परिहाराय गणितज्ञैरुपज्ञातेषूपायेषु, संख्यापर्यायत्वेन तत्सूचकानां पदानां प्रयोगोऽन्यतमः। पद्यस्थैरेतादृग्भिः प्रयोगैः प्रचोदिताः केचन गद्येऽपि संख्यासूचकानि पदानि कदाचित् प्रायुञ्जत[1]।

एतानि पदानि कदाचिद् वास्तविकार्थसूचकानि, यथा- विंशत्यर्थेऽङ्गुलिशब्दं प्रयोक्तुं शक्यते मनुष्याणां विंशत्यङ्गुलिमत्त्वात्। कदाचित् काल्पनिकानि, यथा-द्वादशार्थे आदित्यशब्दस्योपयोगः क्रियते पुराणेषु द्वादशादित्यानां प्रसिद्धेः। कदाचिच्च शास्त्रीयाणि, यथा- पञ्चदशार्थे सामिधेनीशब्दस्योपयोगः कर्तुं शक्यते समिदाधानकाले पञ्चदशमन्त्रैस्तस्योपयोक्तव्यत्वात्।

संख्यासूचकपदानां कासाञ्चन प्रयोगेऽपि वर्णाधिक्यनैयून्याभ्यां वा गुरुलघुव्यत्ययेन वा छन्दोदोषसंभवादनिस्तारप्रसंगे तु, तत्पर्यायपद-प्रयोगेण निर्वाहः करणीयः। यथा-एक इत्यर्थे न केवलं 'मृगाङ्कः'इति, अपि तु 'ओषधीषः' 'ग्लौः' 'कलाधरः', 'कुमुदबान्धव' इत्यादयोऽपि शब्दाः प्रयुज्यन्तां ; द्वादशेत्यर्थे न केवलं 'सूर्य' इति, परन्तु 'दिवाकरः' 'उष्णरश्मिः' 'भानुः' 'रविः' इत्यादयोऽपि शब्दाः प्रयुज्यन्ताम्।

एकेनैव संख्यासूचकपदेन वास्तविकीनां काल्पनिकीनां चेत्युभ-यीषां संख्यानां स्मरणप्रसंगे तु, वास्तविकीनां संख्यानां संप्रत्यय इति तु स्पष्टं परन्तु केषाञ्चन पदानामुपयोगेऽतिजागरूकैर्भवितव्यम्। नयन-शब्द उभे द्वित्रिसंख्ये बोधयति,मनुष्याणां द्विनयनवत्त्वात् शिवस्य च त्रिनयनवत्त्वात्। वङ्गलिप्यां लिखितासु मातृकासु कदाचिन्नयनशब्दस्त्रि-

१.यथा- लः समुद्रा गणः- पिङ्गलच्छन्दःसूत्रम्।

संख्यां सूचयतीति ज्ञायते[1]। रसशब्दस्य षट्संख्यार्थे सङ्केतः, षड्रसानाम् आयुर्वेदे स्थिरीकृतत्वात्। अलङ्कारशास्त्रे वर्ण्यमानानां रसानां संख्या नवदशादिप्रकारैर्बाढं भिद्यते। एवं 'दर्शन'शब्दं षट्सूचकत्वेन वक्तुं न वयं प्रभवामो दर्शनानां षडधिकत्वात् (प्रायो न प्रयुज्यत एष शब्दः)। समुद्रशब्दश्चतुःसंख्यार्थे प्रायिकः, सप्तसंख्यार्थे तु क्वाचित्कः।

नामग्राहं संख्यानामुल्लेखः सर्वथा नैव निषिद्धो यत्र च्छन्दोभङ्ग-भीतेर्नावसरो यथा १४३-१४४ पुटयोः कासुचनोत्तरपुष्पिकासु दृष्टः। महाभारतस्थावान्तरपर्वनाम्नां सूचकेष्वपि पद्येष्वेष द्रष्टव्यः[2]।

द्व्यधिकाङ्कानां संख्यानां सूचनेषु प्रत्येकश एकैकस्याः संख्याया अभिधायकानां पदानां लेखनं शक्यक्रियम्। यथा ३३ संख्याभिधायकं देवशब्दमनादाय वह्निगुणशब्दयोर्लेखने कोऽपि दोषो नास्ति। अतिप्र-सिद्धेषु संख्यासूचकपदेषु नायं क्रमः। १८ संख्याभिधायकं पुराणशब्दम् अनादाय तत्सूचकयोः सिद्धिक्षितिशब्दयोर्लेखने शक्यक्रियेऽपि, पुराण-शब्द आदीयते प्रायः। २७ संख्याभिधायकं नक्षत्रशब्दमगृहीत्वा तत्सूच-कयोर्मुनिनेत्रशब्दयोर्लेखनस्य शक्यत्वेऽपि, नक्षत्रशब्दो गृह्यते प्रायः।

अक्षरसंख्याबोधकेन कटपयादिसूत्रेण पदसंख्याबोधिकाया अस्याः पद्धतेर्नास्ति संबन्धः। अत्र ९ संख्याबोधकेन नन्दशब्देन ८० संख्या नाभि-धातव्या;२० संख्याबोधकेन अङ्गुलीशब्देन ३३० संख्या च नाभिधातव्या।

यद्यपि संख्यासूचकपदानां कोशाः केचन रचिताः संस्कृतभाषायां संस्कृतेतरभाषासु च। तेषूल्लिखितानि कतिचन पदानि नैव प्रयोगक्षमाणि, तेषु दत्तानां सर्वेषां पदानां तत्तत्सूचितसंख्यानां च मध्ये संकेतरूपस्य संबन्धस्य सर्वथाभावात्। कुतूहलाधिक्यमात्रप्रेरितैर्विद्वज्जनैः कृतेष्वित्थं-भूतलक्षणेषु कोषेषु केषाञ्चन भागानाम् अध्यायानां वा संख्यासूचक-पदसूचिमत्त्वं नास्ति, पदसूचकसंख्यासूचिमत्त्वात्तेषाम् !

येषां पदानां संख्याबोधनरूपः संकेतः प्रयोगैः स्वनुमेयः, तानि पदानि, त्रिचतुराण्यतादृशि च पदानि संगृह्य काचित्सूची दत्ताऽस्त्यत्र:

१.एतद् ज्ञापितवत्याः डा.रत्नावसुवर्याया अधमर्णोऽस्ति प्रकृतो ग्रन्थकर्ता। २.द्र.पु.३०७

०.शून्याभिधायकानि पदानि

आकाशः, शून्यं, बिन्दुः, खं, पूर्णम्॥

१.एकसंख्याभिधायकानि पदानि

परब्रह्म, विराट्, रूपम्, मूलप्रकृतिः,भूमिः,ऐरावतः, शुक्रनेत्रं, विघ्नेश रदनः, ध्रुवः,उच्चैश्रवाः,आत्मा, प्रपञ्चः,चन्द्रः॥

२.द्विसंख्याभिधायकानि पदानि

(मनुष्यस्य)नेत्रे[१],भ्रुवौ,कपोलौ,ओष्ठौ, कर्णौ,बाहू, करौ जानू, गुल्फौ, जङ्घे,पादौ, ग्रहणे,अश्विनौ, नदीकूले, असिधारे, विषुवत्, अग्निशीर्षम्, पक्षौ, अयने , यमौ॥

३.त्रिसंख्याभिधायकानि पदानि

अग्नयः(गार्हपत्यो दक्षिणाग्निराहवनीयश्च);रामाः(रामपरशु-रामबलरामाः) (शिवस्य)नेत्राणि[२], गुणाः(सत्त्वं,रजः,तमः), संध्याः, ऋणानि (देवऋणम्, ऋषिऋणं, पितृणं च),शक्तयः (मन्त्रशक्तिः, प्रभु-शक्तिः,उत्साहशक्तिश्च।), लोकाः (स्वर्गमर्त्यपातालाः), ग्रीवारेखाः॥

४.चतुःसंख्याभिधायकानि पदानि

खट्वापादाः, ब्रह्मवक्त्राणि, दशरथपुत्राः, ऐरावतदन्ताः, युगानि, वेदाः, सेनाङ्गानि(हस्त्यश्वरथपादातम्), पुरुषार्थाः,आश्रमाः, हरिबाहवः, समुद्राः[३] (पूर्वपश्चिमदक्षिणोत्तरसमुद्राः) गतयः[४] (दैवी मानुषी तैरञ्ची नारकी च)॥

१-२.नेत्रशब्देन प्रायो द्विसंख्याबोधो मनुष्याणां द्विनेत्रवत्त्वात्। वङ्गदेशे नेत्रशब्देन कदाचित्त्रिसंख्याबोधः शिवस्य त्रिनेत्रवत्त्वात्।(विषयममुं ज्ञापितवत्यै डा.रत्ना-बसुवर्यायै प्रकृतो ग्रन्थकर्ता कृतज्ञतां समर्पयति।) अत्रार्थे रुद्राक्षशब्दः स्पष्टतरः। ३.समुद्रशब्दस्य चतुःसंख्यासप्तसंख्योभयवाचित्वम्। अधिकं विवरणं जिज्ञासुभि-रग्रिमे पुटे द्वितीया टिप्पणी दृश्यताम्।४.प्रायेणेदं पदं जैनग्रन्थेषु दृश्यते।

५.पञ्चसंख्याभिधायकानि पदानि

भूतानि, इन्द्रियाणि, शराः (अरविन्दमशोकं च चूतं च नवमल्लिका। नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः), पल्लवाः (आश्वत्थजाम्बवाम्रनैयग्रोधप्लाक्षाः), शिवास्यानि (सद्योजातवामदेवाघोरतत्पुरुषेशानाः), गव्यानि(गोमूत्रगोमयक्षीरदधिघृतानि), तन्मात्राः (रूपशब्दरसगन्धस्पर्शाः), पाण्डवाः, कोशाः (अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाः),देवपादपाः (हरिचन्दनसन्तानमन्दारपारिजातकल्पतरवः),अन्नानि[१](अमृतान्नं,भोज्यान्नं,देवान्नं,दिव्यान्नं,अमृतरसायनम्), पुराणलक्षणं(सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च। वंशानुचरितं चैव पुराणं पञ्चलक्षणम्।),पक्षिणः(शुभाशुभशकुनज्ञापकाः काककुक्कुटघूकमयूरश्येनाः)॥

६.षट्संख्याभिधायकानि पदानि

रसाः(आम्लतिक्तमधुरकषायलवणकटवः)[२], चक्राणि (मूलाधारविशुद्धिस्वाधिष्ठानानाहतमणिपूराज्ञाख्यानि), कुमारास्यानि (= षण्मुखस्य वदनानि), ऋतवः, कर्माणि (यजनयाजनदानप्रतिग्रहाध्ययनाध्यापनानि), भृङ्गाङ्घ्रयः॥

७.सप्तसंख्याभिधायकानि पदानि

मातृका(ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।वाराही चैव चेन्द्राणी चामुण्डा सप्त मातरः।।), वारः, (संगीत)स्वराः, द्वीपाः(जम्बूकुशशाकशाल्मलिपुष्करक्रौञ्चप्लक्षाः), (कुल)पर्वताः(महेन्द्र-मलय-सह्य-

१.अन्नशब्दस्य द्विसंख्यातः नवसंख्यापर्यन्तं संकेतं कल्पयितुं शक्यत्वेऽपि शब्दस्यास्य पञ्चसंख्यासंकेतो जैनानाम्।[रत्नाकरवर्णिप्रणीते भरतेशवैभवाख्ये कन्नडकाव्ये १.४.७३.] द्र.श्रीवत्सनिघण्टुः-डा.टि.वि. वेङ्कटाचलशास्त्री। कन्नडपुस्तकप्राधिकारः, बेङ्गलूरु।तृतीयसंस्करणम्।2009 पु.20

२.अलङ्कारशास्त्रे नवरसानां या प्रायिकी प्रसिद्धिस्तामादाय रसशब्दस्य नवसंख्याभिधायकत्वं न वाच्यं नवाधिकानां रसानां कैश्चनालङ्कारिकैः प्रतिपादितत्वात्।

शुक्तिमत्पारियात्रिकऋक्षवद्विन्ध्याः),ऋषयः(भरद्वाजगौतमविश्वामित्रकश्यपात्रिगौतमवसिष्ठाः), नद्यः(गङ्गायमुनागोदावरीसरस्वतीनर्मदासिन्धुकावेर्यः), विभक्तयः, अग्निजिह्वाः,पाण्डुसेना(सप्ताक्षौहिण्यः) समुद्रः[1], (लवणसमुद्रः, इक्षुसमुद्रः, सुरासमुद्रः, घृतसमुद्रः, दधिसमुद्रः, क्षीरसमुद्रः, जलसमुद्रः) अश्वाः (सूर्यस्य सप्ताश्वाः) भुवनानि[2](भूः, भुवः, स्वः, महः, जनः,तपः, सत्यम्)॥

८.अष्टसंख्याभिधायकानि पदानि

सिद्धयः(अणिमा महिमा चैव लघिमा गरिमा तथा। प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः।), दिक्पालाः(इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत्। कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात्। ना.लि.अ.१.दिग्वर्गः २-३),वसवः(धरः, ध्रुवः, सोमः, अहः, अनलः, अनिलः, प्रत्यूषः, प्रभासः/ अग्नि-पृथ्वी-वायुः, अन्तरिक्षम्, आदित्यः, द्युलोकः,चन्द्रो, नक्षत्रमण्डलम्), कुञ्जराः(ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः। पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः। ना.लिं.अ.१.३.८८), ईशमूर्तयः(पञ्चभूतानि,सूर्यः, चन्द्रः, यागकर्ता च), सर्पाः(कार्कोटकः,वासुकिः,तक्षकः,अनन्तः, पद्मकः, महाशङ्खः,पद्मः, कुलिकः),शरभाङ्घ्रयः, ब्रह्मकर्णाः ॥

९.नवसंख्याभिधायकानि पदानि

रत्नानि(माणिक्यं, मौक्तिकं,वैडूर्यं, हीरं,विद्रुमः, हरिन्मणिः, पुष्यरागः,गोमेधिकः , नीलम्), निधयः(महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ। मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव।। ना.लि.

१.समुद्रशब्दः चतुःसंख्यावाची सप्तसंख्यावाच्यपि। छन्दःशास्त्रे यतिस्थाननिर्देशे समुद्रपर्यायस्य चतुःसंख्याबोधकत्वम्। यथा "मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गूरू चेत्"इत्यत्र जलधिशब्देन चतुःसंख्या ग्राह्या न पुनः सप्तसंख्या।
२.भुवनशब्दस्य चतुर्दशसप्तोभयसूचकत्वेऽपि सप्तसंख्याभिधायकत्वमस्य प्रायिकम्।

अनु.१.३.८१), नन्दाः(नन्दः, सुनन्दः, प्रनन्दः,उपनन्दः,कुरुनन्दः,लोकनन्दः, मित्रनन्दः, विनन्दः, प्रियनन्दः),धान्यानि(गोधूमः,तण्डुलः,माषः,कुलित्थः, चणकः, तिलः, निष्पावः, आढकः, मुद्गः), अङ्काः (एकादि-नवान्ताः), रन्ध्राणि(नासारन्ध्रद्वयश्रोत्ररन्ध्रद्वयनेत्ररन्ध्रद्वयवक्त्रपायुगुह्यकानि), ग्रहाः(सूर्य-चन्द्र-कुज-बुध-गुरु-शुक्र-शनि-राहु-केतवः)॥

१०.दशसंख्याभिधायकानि पदानि[१]

रावणास्यानि, दिशः, अवस्थाः(चक्षुःप्रीति-मनःसङ्ग-कृशता-जागरा-रति-अन्त-त्याग-संकल्प-मूर्छा-उन्मादाः इमाः कामदशाः)॥

११.एकादशसंख्याभिधायकानि पदानि

रुद्राः(अजैकपात्, अहिर्बुध्न्यः,पिनाकी,अपराजितः,ऋतः, पितृरूपः, त्र्यम्बकः,वृषाकपिः,शम्भुः, हवनः, ईश्वरः,), कुरुसेना (दुर्योधनस्य एकादशाक्षौहिणी सेना)॥

१२.द्वादशसंख्याभिधायकानि पदानि

मासाः(चैत्र-वैशाख-ज्येष्ठ-आषाढ-श्रावण-भाद्रपद-आश्वयुज-कार्तीक-माघ-फाल्गुण-मार्गशीर्ष-पुष्याः), षण्मुखबाहवः, राशयः(मेष-वृषभ-मिथन-कर्कटक-सिंह-कन्या-तुला-वृश्चिक-धनुर्-मकर-कुम्भ-मीनाः), आदित्याः(धाता, अर्यमा, मित्रः, भगः, इन्द्रः, अंशुमान्, त्वष्टा, विवस्वान्, पर्जन्यः, पूषा, विष्णुः, अरुणः)॥

१३.त्रयोदशसंख्याभिधायकं पदम्

विश्वेदेवाः(क्रतुः, दक्षः, वसुः, सत्यः, कालः, कामः, धनुः,

१.रावणास्यादिमुखशब्दसूचितायाः दशसंख्याया १० इति द्वावप्यङ्कौ परस्परेण समुच्चित्य एकस्या एव दशसंख्याया अर्थमभिधत्तः। तस्मादस्या लेखनं १० इत्येव करणीयं न तु पुनः ०१ इति। एवं सर्वत्र द्व्यङ्कत्र्यङ्कयुक्तानामपि संख्यानाम्। यथा आयुरादि-

पुरूरवाः, रुद्रः, रुचिकः, आर्द्रवः, धुरिः, विलोचनः)॥

१४.चतुर्दशसंख्याभिधायकानि पदानि

मनवः(स्वायम्भुवः, स्वारोचिषः, उत्तमः,तामसः, रैवतः, चाक्षुषः, वैवस्वतः, सूर्यसावर्णिः, दक्षसावर्णिः,ब्रह्मसावर्णिः, धर्मसावर्णिः, रुद्रसावर्णिः, देवसावर्णिः,इन्द्रसावर्णिः),विद्याः(ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः,शिक्षा,छन्दः,व्याकरणं, निरुक्तं, ज्यौतिषं,कल्पः, न्यायः, मीमांसा, धर्मशास्त्रं, पुराणम्)॥

१५.पञ्चदशसंख्याभिधायकानि पदानि

दिनानि, तिथयः,सामिधेन्यः ('प्रवो वाजा अभिद्यवः' (ऋ. ३.२७.१-१५)इत्याद्याः अग्न्याधानसमय उच्चार्यमाणा पञ्चदश ऋचः)॥

१६.षोडशसंख्याभिधायकानि पदानि

संस्काराः(गर्भाधानं, पुंसवनं,सीमन्तोन्नयनम्,जातकर्म, नाम-करणं, निष्क्रमणम्,अन्नप्राशनं, चूडाकर्म, कर्णविधः, विद्यारम्भः, उपनयनं, वेदारम्भः, केशान्तोऽथवा गोदानं, समावर्तनम्, विवाहः, अन्त्येष्टिः।), कलाः(चन्द्रस्य कलाः-प्रतिपदादिपूर्णिमान्ता पञ्चदश, अमावास्या च)॥

१७.सप्तदशसंख्याभिधायकं पदम्

अत्यष्टिः(सप्तदशवर्णं वृत्तम्)॥

१८.अष्टादशसंख्याभिधायकानि पदानि

अक्षौहिणी(महाभारतयुद्धेऽष्टादशाक्षौहिणीपरिमाणा सेना-ऽयुध्यत),गीताध्यायाः, स्मृतयः(मनुस्मृतिः, दक्षस्मृतिः,यमस्मृतिः, बृह-स्पतिस्मृतिः, शङ्खस्मृतिः, पाराशरस्मृतिः,याज्ञवल्क्यस्मृतिः, विष्णुस्मृतिः, अत्रिस्मृतिः, अङ्गिरःस्मृतिः, संवर्तस्मृतिः, शातातपस्मृतिः, प्राचेतसस्मृतिः, हारीतस्मृतिः, लिखितस्मृतिः, आपस्तम्बस्मृतिः, गौतमस्मृतिः, उशनः-

---

शब्दसूचितायाः शतसंख्याया लेखनं १०० इत्येव, न पुनः ००१ इति; सामशाखादि-शब्दसूचितायाः सहस्रसंख्याया लेखनं १००० इत्येव, न पुनः ०००१ इति।

स्मृतिः),पुराणानि(“मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्। अनापलिङ्ग-कूस्कानि पुरणानि प्रचक्षते॥ ”इति प्रसिद्धः श्लोकः। मद्वयं= मत्स्य-पुराणम्, मार्कण्डेयपुराणम् ; भद्वयं= भागवतपुराणम्, भविष्यत्पुराणम्; ब्रत्रयं=ब्रह्माण्डपुराणम्, ब्रह्मवैवर्तपुराणम्, ब्राह्मपुराणम्; वचतुष्ट-यम्=वामनपुराणम्, वराहपुराणम्, विष्णुपुराणम्, वायुपुराणम् ; अ=अग्निपुराणम्,ना=नारदीयपुराणम्,प=पद्मपुराणम्, लिङ्= लिङ्ग-पुराणम्, ग=गरुडपुराणम्, कू=कूर्मपुराणम्, स्क=स्कान्दपुराणम्)॥

२०.विंशतिसंख्याभिधायकानि पदानि

नखाः,रावणबाहवः, अङ्गुलयः॥

२२.द्वाविंशतिसंख्याभिधायकं पदम्

उपसर्गाः(अति-अधि-अनु-अप-अपि-अभि-अव-आङ्-उत्-उप-नि-निर्-निस्-दुर्-दुस्-परा-परि-प्र-प्रति-वि-सं-सु।)॥

२५.पञ्चविंशतिसंख्याभिधायकं पदम्

तत्त्वानि(मूलप्रकृतिः, महान्, अहङ्कारः, पञ्च तन्मात्राः, पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्च भूतानि, मनः, पुरुषः)॥

२७.सप्तविंशतिसंख्याभिधायकं पदम्

नक्षत्राणि(अश्विनी,भरणी, कृत्तिका,रोहिणी,मृगशिराः, आर्द्रा, पुनर्वसुः,पुष्यः, आश्लेषा, मघा,पूर्वफल्गुनी, उत्तरफल्गुनी, हस्ता, चित्ता, स्वातिः, विशाखा,अनुराधा,ज्येष्ठा, मूला,पूर्वाषाढा, उत्तराषाढा,श्रवणा धनिष्ठा, शतभिषक्, पूर्वभाद्रपदा, उत्तरभाद्रपदा,रेवती।)॥

३३.त्रयस्त्रिंशत्संख्याभिधायके पदे

हल्वर्णाः, देवताः :(८ वसवः=अग्नि-पृथ्वी-वायुः, अन्तरिक्षम्, आदित्यः, द्युलोकः,चन्द्रो, नक्षत्रमण्डलम्+ ११ रुद्राः=अजैकपात्, अहिर्बुध्न्यः, पिनाकी,अपराजितः, ऋतः, पितृरूपः, त्र्यम्बकः, वृषाकपिः,

शम्भुः, हवनः, ईश्वरः+ १२ आदित्याः=धाता, अर्यमा, मित्रः, भगः, इन्द्रः, अंशुमान्, त्वष्टा, विवस्वान्, पर्जन्यः, पूषा, विष्णुः, अरुणः+ १ इन्द्रः +१ प्रजापतिः; - आहत्य= ३३)॥

१००.शतसंख्याभिधायकानि पदानि

आयुः, कौरवाः॥

१०००.सहस्रसंख्याभिधायकपदानि

सामशाखाः, कमलपत्राणि, कार्तवीर्यभुजाः, इन्द्रनेत्राणि, सुदर्शनाराणि, सूर्यांशवः॥

साहित्यशासनेभ्यः समुद्धृतः संख्याभिधायकपदानां क्रमः[१]

१.ग्रन्थोऽयं विदुषा सृष्टः पण्डितानन्तशर्मणा।
खद्वयाख्यसमुद्राख्य(४७००)संख्यको व्यङ्ग्यदीपकः॥

–गोवर्धनरचितार्यासप्तशत्याः अनन्तपण्डितविरचितायाम् व्याख्यायां व्यङ्ग्यदीपनाख्यायाम् ।

२.वस्वक्षिसप्ताब्जमिते(१७२८) वर्षे विक्रमभूभृतः।
कृतैषा रत्नकण्ठेन टीका शिष्यहिताभिधा॥

–वासुदेवविरचितयुधिष्ठिरविजयकाव्यस्य रत्नकण्ठविरचितायां टीकायां शिष्यहिताभिधायाम्।

३.वेदाकाशमुनीन्दु(१७०४)सम्मितशके मासे तथा श्रावणे
पक्षे वै धवले तिथौ दशमिते वारे गुरौ शोभने।
कृष्णानन्दकवीन्द्रनिर्मितमहाचम्पूरियं पूर्यतां
कामं वीरसुदर्शनस्य नृपतेर्विश्वस्य विद्याजुषः॥

–कृष्णानन्दकवीन्द्रविरचितायां सुदर्शनचम्वाम्।

१.“अङ्कानाम् वामतो गतिः” इति विधिरत्रापि प्रवर्तते।तेन वामतो गतिर्लेखन-मात्रविश्रान्ता, दक्षिणतो गतिस्त्वर्थसंबद्धा इत्यायाति।

४.काश्यां रसाश्वनन्देन्दु(१९७६) विक्रमाङ्कसुवत्सरे।
श्रीप्रसन्नपदाव्याख्या रचिता मूलभाष्ययोः।।

–गौतमप्रणीतन्यायसूत्र-वात्स्यायनरचितभाष्ययोः पण्डितसुदर्शनाचार्यशास्त्रिप्रणीतव्याख्यायां प्रसन्नपदाख्यायाम्।

५.रसवक्त्रग्रहाधीश(१२४६)वत्सरे मासि माधवे।
काव्ये काव्यप्रकाशस्य संकेतोऽयं समर्थितः।।

–मम्मटरचितकाव्यप्रकाशस्य माणिक्यचन्द्रविरचितव्याख्यायां संकेताभिधायाम्।

६.काव्यप्रकाशसंकेतो ग्रन्थकारकृतो मया।
अलेखि रत्नकण्ठेन वर्षे खागाह(१५७०)[1]रुम्भिते।।

–मम्मटरचितकाव्यप्रकाशस्य राजनकरत्नकण्ठरचितायां टीकायां संकेताभिधायाम्।

७.रसमुन्यङ्कभूमाने(१९७६) वैक्रमे शुभवत्सरे ।
मास्याश्विने सिते पक्षे पौर्णमास्यां सिते(स्थिरे ?)दिने।
देवद्विजप्रसादेन व्याख्येयं पूर्णतां गता।
एनया प्रीयतां भूमा पार्वतीवल्लभः प्रियः।।

–ईश्वरकृष्णप्रणीतायाः सांख्यकारिकायाः पण्डितशिवनारायणशास्त्रिप्रणीते व्याख्याने सारबोधिनीनामके निर्णयसागरमुद्रिते(१९४०)

८.नन्देषु[2]व्योमेन्दु(१०५९)समे शकाब्दे रुद्रात्मजश्चोद्धरणस्य नप्ता।
इमां शिलाशिल्पिवरः प्रशस्तिं स शूलपाणिः स्वयमुच्चखान।।

–(गङ्गाधरकारितकासारप्रशस्त्यन्ते।)निर्णयसागरप्रकटित-प्राचीनलेखमाला संपुटः २ पु.२३४

१.ख(०)+अग(७)+अहर्(१५)-उम्भिते(=पूर्णे)

२.अत्र छन्दो भग्नं तगणस्थले मगणस्य सत्त्वात्।यदि 'व्योमेन्दु' इत्यत्र 'शून्येन्दु', 'बिन्द्विन्दु' अथवा 'पूर्णेन्दु' इति पाठोऽभविष्यद्, दोषो नाभविष्यत्।

९.अब्दे सुभानौ वेदाब्धिव्योमबाणमिते (५०७४)कलौ।
आत्रेयान्वयजातश्रीसेतुमाधवधीमता॥
निर्मितो व्यासपाणिन्योर्भावनिर्णयनामकः।
ग्रन्थोऽयं पूर्णतां प्राप कृपया श्रीहरेर्गुरोः॥

—(विदुषा एस्.सेतुमाधवाचार्येण विरचिते श्रीव्यासपाणिनि-भावनिर्णये।) प्र.तिरुपतिदेवस्थानमुद्राक्षरशाला १९४४ पु.२०४

१०.गुणशशिनन्दधरित्री(१९१३)मितवर्षे वैक्रमे तु वै क्रमतः।
मास्याश्विने हि घस्रे प्रथमे पक्षे शुभे च भौमयुते॥
पद्मावतीगर्भभुवा मयाद्य पद्मापतेर्भूरिकृपाबलेन।
श्रीबालकृष्णादिमशब्दचम्पूः संपूरितेयं ननु जीवनेन॥

—(विदुषा जीवनजीमहाराजेन प्रणीतायां बालकृष्णचम्वाम्।)
प्र.गोवर्धनेशप्रकाशमण्डलम्, मुम्बापुरी।पुनर्मुद्रणं २०१० पु.५३०

संख्याभिधायकपदानां कल्पितः क्रमः
(विद्यार्थिजनानामभ्यासार्थम्)

१.वह्निब्रह्मश्रुतिग्लौपदयुतरचनं पठ्यतां मत्कमुत्कैः।

३८१=१८३

२.दिक्पालर्षिपुराणाख्यसंख्या गण्या सुधीजनैः।

८७१८=१८७८

३.उडुबाणशुक्रदृगनेहसीरितम्

२७५१=१५२७

४.ध्रुववेदभूमिहरिबाहुसंख्यके

१४१४=४१४१

५.ध्रुवव्याकरणेन्द्वग्निसंख्यश्लोकात्मिका कृतिः।

१८१३=३१८१

६.सर्पेन्दुघोटकसुधांशुमिते हि शाके

८१७१=१७१८

७.शाके खसायकतुरङ्गमचन्द्रमाने

०५७१=१७५०

८.शकाब्दे बाणेन्दुक्षितिसुरपदन्तिक्रमयुजि

५१११=१११५

९.खावनिरत्नमहीगुणितेऽब्दे

०१९१=१९१०

१०.अङ्गुली[1]धरात्मसंख्यके शके कृतिः कृता

१०११=१११०

११. सुयोधनानीकशिवाख्यसंख्या

११११=११११

१२.त्रिष्टुप्दिवाकरमिते समकारि शाके

१३१२=१२१३

१३.राशिस्वर्द्रुमविघ्ननाशरदनानेहस्य[2]यं निर्मितः ।

१२५१=१५१२

१४.मनुरुद्राभिधे वर्षे

१४११=१११४

१५.शाके रसखतिथ्याख्ये

६०१५=१५०६

१६.शाके वेदाम्बुनिधिज[3]कलासंयुतेऽपूरि टीका

४११६=१६१४

१.अङ्गुली इत्यत्र १० इत्येव लेखनं न पुनः ०१ इति। द्र. पादटिप्पणी पु.२६३
२.अनेहसि=काले, शाके इति यावत्। यद्यपि शब्दोऽयं ग्रन्थेषु प्रायो न गोचरः तिथिप्रस्तावे, तथाप्यस्यात्र विद्यार्थिजनानामभ्यासाय योजितत्वान्न दोषः। एतेन 'समये' इति, 'काले' इति च प्रयोगौ व्याख्यातौ। ३.अम्बुनिधिजः=चन्द्रः।

१७.मुनिभूतात्यष्ट्याख्ये समये निर्मितमिदं निलिम्पगृहम्।

७५१७=१७५७

वास्तविक्याः संख्याया संख्याभिधायकपदैः योगः

२२.वेदसप्तदृगवन्यनेहसि

४७२१=१२७४

२३.धराधरचतुर्नगात्ममितशाककाले कृता

७४७१=१७४७

संख्याद्वयस्य योगेनाभीष्टसंख्यानिर्देशः

२४.शाके त्रिंशत्परविबुधराट्सप्तिचन्द्रध्रुवाख्ये

त्रिंशत्परविबुधराट्सप्ति=३०+१=३१

३१११=११३१

२५.द्वात्रिंशत्परदिक्खचन्द्रसमये निर्माणमस्याभवत्।

द्वात्रिंशत्परदिक्=३२+१०=४२

४२०१=१०४२

२६.देवेन्द्राश्वपरार्यमांशुसमये

देवेन्द्राश्व-पर-अर्यमांशु=१+१०००=१००१

१००१=१००१

"अङ्कानां वामतो गतिः" इति विधिश्छन्दोलक्षणेषु यतिस्थल-निर्देशार्थेष्वङ्कसूचनेषु **नैव** प्राप्नोति, पार्थक्येन मौल्यवतां तत्रत्यानाम् अङ्कानां समुच्चयगणनाविरहात्। यथा-

१."जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः" इति पृथ्वी-छन्दोलक्षणे **वसुग्रह** इत्यनेन ८, ९ इत्येवमेव क्रमिको विन्यासो न पुनः ९, ८ इति।(९८ इति संख्या नास्त्यत्र)

२."**सूर्याश्वै**र्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् "इति

शार्दूलविक्रीडितच्छन्दोलक्षणे **सूर्याश्वैः** इत्यनेन १२, ७ इत्येवमेव क्रमिको विन्यासो न तु पुनः ७, १२ इति।(७१२ इति संख्या नास्त्यत्र)

विविधैर्वर्षैः संवदमानः क्रिस्तशकः

१.कलिवर्षम्-अनेन ३१०१ संख्यायाः व्यवकलने कृते क्रिस्तशकवर्षं प्राप्यते। यथा-

कलिवर्षम्-४२०७=क्रिस्तशकः- ११०६

कलिवर्षम्-४४०५=क्रिस्तशकः- १३०४

कलिवर्षम्-३७९५=क्रिस्तशकः- ६९४

२.विक्रमसंवत्सरः/संवत्/सं/कृतसंवत्सरः-अनेन ५७ संख्यायाः व्यवकलने कृते क्रिस्तशकवर्षं प्राप्यते। यथा-

विक्रमसंवत्सरः-१०९६=क्रिस्तशकः- १०३९

विक्रमसंवत्सरः-१३२१=क्रिस्तशकः- १२६४

विक्रमसंवत्सरः-१५४९=क्रिस्तशकः- १४९२

३.शकवर्षम्-अनेन ७८/७९ संख्यायाः योगे कृते क्रिस्तशकवर्षं प्राप्यते। यथा-

शकवर्षम्-१४५९=क्रिस्तशकः- १५३७/१५३८

शकवर्षम्-१६७३=क्रिस्तशकः- १७५१/१७५२

शकवर्षम्-१५२१=क्रिस्तशकः- १५९९/१६००

४.कोल्लम्[1]-अनेन ८२४/८२५ संख्यायाः योगे कृते क्रिस्तशकवर्षं प्राप्यते। यथा-

कोल्लम्-९१४=क्रिस्तशकः- १७३८/१७३९

कोल्लम्-१०८९=क्रिस्तशकः- १९१३/१९१४

कोल्लम्-८६७=क्रिस्तशकः- १६९१/१६९२

१.इदं केरले।

संख्याभिधायकानां पदानाम् अकारादिसूचनी

अक्षौहिणी १८
अग्नयः ३
अग्निजिह्वाः ७
अग्निशीर्षम् २
अङ्काः ९
अङ्गुलयः २०
अत्यष्टिः १७
अन्नानि ५
अयने २
अवस्थाः १०
अश्विनौ २
अश्वाः ७
असिधारे २
आकाशः ०
आत्मा १
आदित्याः १२
आयुः १००
आश्रमाः ४
इन्द्रनेत्राणि १०००
इन्द्रियाणि ५
ईशमूर्तयः ८
उच्चैश्रवाः १
उपसर्गाः २२
ऋणानि ३
ऋतवः ६
ऋषयः ७
ऐरावतः १
ऐरावतदन्ताः ४
ओष्ठौ २
कपोलौ २
कमलपत्राणि १०००
करौ २
कर्माणि ६
कर्णौ २
कार्तवीर्यभुजाः१०००
कलाः १५
कुञ्जराः ८
कुमारास्यानि ६
कुरुसेना ११
कोशाः ५
कौरवाः १००
खं ०
खट्वापादाः ४
गतयः ४
गव्यानि ५
गीताध्यायाः १८
गुणाः ३
गुल्फौ २
गोस्तनाः ४
ग्रहणे २
ग्रहाः ९
ग्रीवारेखाः ३
चक्राणि ६
चन्द्रः १
जङ्घे २
जानू २
तत्त्वानि २५
तन्मात्राः ५
तिथयः १५
दशरथपुत्राः ४
दिनानि १५
दिक्पालाः ८
दिशः १०
देवताः ३३
देवपादपाः ५
द्वीपाः ७
धान्यानि ९
ध्रुवः १
नक्षत्राणि २७

नखाः २०	भूमिः १	विराट् १
नदीकूले २	भृङ्गाङ्घ्रयः ६	विश्वेदेवाः १३
नद्यः ७	भ्रुवौ २	विषुवत् २
नन्दाः ९	मनवः १४	वेदाः ४
निधयः ९	मातृका ७	शक्तयः ३
नेत्रे २, ३	मासाः १२	शरभाङ्घ्रयः ८
पक्षिणः ५	मूलप्रकृतिः १	शराः ५
पक्षौ २	यमौ २	शिवास्यानि ५
परब्रह्म १	युगानि ४	शुक्रनेत्रं १
पर्वताः ७	रत्नानि ९	शून्यं ०
पल्लवाः ५	रन्ध्राणि ९	षण्मुखबाहवः १२
पाण्डवाः ५	रसाः ६	संध्याः ३
पाण्डुसेना ७	रामाः ३	संस्काराः १५
पादौ २	राशयः १२	समुद्राः ४, ७
पुराणलक्षणं ५	रावणबाहवः २०	सर्पाः ८
पुराणानि १८	रावणास्यानि १०	सामशाखाः १०००
पुरुषार्थाः ४	रुद्राः ११	सामिधेन्यः १५
पूर्णम् ०	रूपम् १	सिद्धयः ८
प्रपञ्चः १	लोकाः ३	सुदर्शनाराणि १०००
बाहू २	वसवः ८	सूर्यांशवः १०००
ब्रह्मकर्णाः ८	वारः ७	सेनाङ्गानि ४
ब्रह्मवक्त्राणि ४	विभक्तयः ७	स्मृतयः १८
भुवनानि ७	विघ्नेशरदनः १	स्वराः ७
भूतानि ५	विद्याः १४	हरिबाहवः ४
		हल्वर्णाः ३३

(३) पत्राङ्कलेखनस्थाने न-न्न-न्या-दिसूत्रम्

कासुचन मलयाळंलिपिमतीषु मातृकासु परमविचित्रा काचन पत्रसंख्यासूचिका पद्धतिर्गोचरीभवति यस्याः ‘‘नन्नन्यादिसूत्रम्’’ इति संज्ञा। प्रथमे पत्रे पत्रसंख्यालेखनस्थाने ‘श्री’ इति लिख्यते। ततो द्वितीयं पत्रमारभ्याधोनिर्दिष्टेन क्रमेण संख्यालेखनस्थले अक्षराणि लिख्यन्ते।

१=न	८=प्र	६०=त्र
२=न्न	९=द्रे	७०=त्रु
३=न्य	१०=म	८०=छ
४=ष्क	२०=थ	९०=ण
५=झ्र	३०=ल	१००=ञ
६=हा	४०=प्त	
७=ग्र	५०=ब	२००=ञञ

अनेन क्रमेण लेखनावसरे ‘मन’ इति ११ संख्यायाः सूचकम्; ‘मन्न’ इति १२ संख्यायाः सूचकम्; ‘थन’ इति २१ संख्यायाः सूचकम्; ‘लन’ इति ३१ संख्यायाः सूचकम्। २०० संख्यायाः कृते ‘ञञ’ इति लेखनं क्रियते।

क्रि.श.१५१२ ईसव्यां मलयाळंलिपिलिखितायां रामायण-मातृकायां पत्रसंख्या अनेनैव क्रमेण लिखिता[१]। इयं मातृका प्राचीन-तराया आदर्शमातृकायाः प्रतिलेखनवती भवितुमर्हति। अर्थात् क्रमोऽयं केरले क्रि.श. पञ्चदश एव शतके रूढप्रयोग आसीत्।

१.*Numbering in Malabar manuscripts.* M.R. Nambiyar Journal of the Oriental Research Institute, Baroda. VI.2-3.(December 1956-March1957)Pp.84-88.

किमर्थमेतान्यक्षराणि संख्यार्थं कल्प्यन्ते, तानि यदृच्छया सृष्टानि वाऽऽहोस्विदक्षराणामथ तासां संख्यानां च मध्ये कोऽपि संबन्धः समस्ति वेत्यादि विषयान् न वयं विद्मः। एतस्मिन् 'नन्नन्यष्क्रादि'सूत्रे काचिन्निगूढताऽस्ति। एम्.आर्.नम्बियार्मतेन पद्धतिरियं न केरलीयोपज्ञम्। पद्धतिरियं बाह्यप्रदेशादागता। नम्बूतिरिब्राह्मणैः पद्धतिरियं सृष्टा स्वेषां केरलीयेभ्यो भिन्नताम् अवगमयितुम्[१]।

"केरलोत्पत्ति"नामकं नाटकं सवैभवेषु विवाहेषु पूर्वमभिनीयते स्म यत्र वस्त्वेवं वर्तते-अधिकृतामनुमतिमसंपाद्यैव स्वाधिपत्यवति ग्रामे निवसतो नम्बूदरीब्राह्मणान् प्रति तद्विषये पृच्छति ग्रामणीः। वादा विवादाश्चैधन्ते कलहश्चारभते। हास्यमयाः केचन प्रसंगा अपि जायन्ते। अन्ते नम्बूतिरिब्राह्मणानां केरले वासाय ग्रामण्या ससन्तोषं दीयतेऽनुमतिः[२]।

अत्याश्चर्यकरमिदमेव यदनेकासु मलयाळंलिपिलिखितासु मातृकासु वर्तमानो ग्रन्थपाठः शारदालिपिलिखितासु मातृकासु वर्तमानैर्ग्रन्थपाठैः संवदन्ति[३]।

नेवारीलिपिलिखितास्वपि मातृकासु अक्षरैर्लिख्यन्तेऽङ्काः। तत्र ७,८,२० तथा ३० एतेषामङ्कानां यद् रूपं, तन्मलयाळंलिपिस्थेन रूपेण सादृश्यं वहते। ७ संख्याया लेखनमुभयत्र समानम्[४]। अस्मिन् विषयेऽधिकतरस्य संशोधनस्यावश्यकता वर्तते।

(४) न-न्न-न्या-दिसूत्रस्य प्रकारभेदः (सदोषं लेखनम् ?)

मैसूरुप्राच्यविद्यासंशोधनालये पि.४७१९ इत्यङ्किते मातृकाकोशे तिगळारिलिप्या विद्यामाधवविरचिता शिशुपालवधव्याख्या लिखिता। तत्र तिगळारिलिप्या पत्राङ्कसूचकानि नन्नन्यादिसूत्राक्षराणि कन्नडाङ्कैः

१.तत्रैव। २.तत्रैव। ३.तत्रैव। ४.तत्रैव।

सह लिखितानि। परन्त्वङ्कसूचकाक्षरेषु एकाधिकत्वरूपो विसंवादोऽस्ति। यथा, मलयाळीयस्य नन्नन्यादिसूत्रस्यानुसारेण यत् 'प्त' इति संयुक्ताक्षरं ४० संख्यासूचनार्थं लिख्यते, तदेवात्र ४१ संख्यासूचनार्थं लिखितम्। १६२ संख्या द्विर्लिखिता। तस्मात्तदग्रे नन्नन्यादिसूत्रानुसारि लेखनं शुद्धमस्ति। मलयाळंलिप्या लिखितेषु मातृकाकोशेषु लिखितैरङ्कसूचनैः प्रेरितस्तिगळारिलिपिक्षेत्रीयः कोऽपि लिपिकरः सम्यक् मलयाळंमातृकालेखनसंप्रदायमजानान इत्थं लिखितवानिति प्रतिभाति। अत्रत्यैरक्षरैः सह कन्नडेनापि पत्राङ्का यद्दत्तास्तेन ज्ञायते, नैषा पद्धतिर्लिपिकरस्य सम्यक् परिचितपूर्वाऽऽसीदिति। संशोधनकुतुकवतां कृते तस्मिन् मातृकाकोशे तिगळारिलिप्या लिखितान्यक्षराण्यत्र दर्श्यन्ते।

अत्रोपलभ्यमानानि पत्राणि ३९ तः १९२ पर्यन्तानि। ३९ संख्यायाः सूचकाक्षरयोः प्रथमाक्षरं कृमिदष्टम्। केवलं 'प्र' इति दृश्यते।

३९.[ल]प्र	५५.बष्क	७१.त्रु	८७.छहा	१०३.ञन्न
४०.लद्रे	५६.बप्र	७२.त्रुन	८८.छग्र	१०४.ञन्य
४१.प्त	५७.बहा	७३.त्रुन्न	८९.छप्र	१०५.ञष्क
४२.प्तन	५८.बग्र	७४.त्रुन्य	९०.छद्रे	१०६.ञप्र
४३.प्तन्न	५९.बप्र	७५.त्रुष्क	९१.ण	१०७.ञहा
४४.प्तन्य	६०.बद्रे	७६.त्रुप्र	९२.णन	१०८.ञग्र
४५.प्तष्क	६१.त्र	७७.त्रुहा	९३.णन्न	१०९.ञप्र
४६.प्तप्र	६२.त्रन	७८.त्रुग्र	९४.णन्य	११०.ञद्रे
४७.प्तहा	६३.त्रन्न	७९.त्रुप्र	९५.णष्क	१११.ञम
४८.प्तग्र	६४.त्रन्य	८०.त्रुद्रे	९६.णप्र	११२.ञनन
४९.प्तप्र	६५.त्रष्क	८१.छ	९७.णहा	११३.ञमन्न
५०.प्तद्रे	६६.त्रप्र	८२.छन	९८.णग्र	११४.ञमन्य
५१.ब	६७.त्रहा	८३.छन्न	९९.णप्र	११५.ञमष्क
५२.बन	६८.त्रग्र	८४.छन्य	१००.णद्रे	११६.ञमप्र
५३.बन्न	६९.त्रप्र	८५.छष्क	१०१.ञ	११७.ञमहा
५४.बन्य	७०.त्रद्रे	८६.छप्र	१०२.ञन	११८.ञमग्र

११९.जमप्र	१३०.जथद्रे	१४१.जप्त	१५२.जबन	१६२[१].जत्रन्न
१२०.जमद्रे	१३१.जल	१४२.जप्तन	१५३.जबन्न	१६३.जत्रन्य
१२१.जथ	१३२.जलन	१४३.जप्तन्न	१५४.जबन्य	१६४.जत्रष्क
१२२.जथन	१३३.जलन्न	१४४.जप्तन्य	१५५.जबष्क	१६५.जत्रप्र
१२३.जथन्न	१३४.जलन्य	१४५.जप्तष्क	१५६.जबप्र	१६६.जत्रहा
१२४.जथन्य	१३५.जलष्क	१४६.जप्तप्र	१५७.जबहा	१६७.जत्रग्र
१२५.जथष्क	१३६.जलप्र	१४७.जप्तहा	१५८.जबग्र	१६८.जत्रप्र
१२६.जथप्र	१३७.जलहा	१४८.जप्तग्र	१५९.जबप्र	१६९.जत्रद्रे
१२७.जथहा	१३८.जलग्र	१४९.जप्तप्र	१६०.जबत्र	[इत ऊर्ध्वम्
१२८.जथग्र	१३९.जलप्र	१५०.जप्तद्रे	१६१.जत्र	अङ्का अतीव
१२९.जथप्र	१४०.जलद्रे	१५१.जब	१६२.जत्रन	अस्फुटाः।]

(५) पत्राङ्कलेखनार्थम् अक्षरपल्ली अङ्कपल्ली च।

गुर्जरप्रदेशे क्रि.श. षोडशशतके अङ्कलेखनार्थमन्या विचित्रा पद्धती रूढमूलाऽऽसीदिति ज्ञायते यस्या नामधेयम् अक्षरपल्ली। अस्याः पद्धतेरनुसारेण ए, स्व, रुम् एतानि त्रीण्यक्षराणि एकमिति संख्यार्थम्, त्रि श्री मः एतान्यक्षराणि त्रि इति संख्यार्थं स, इ, नुम् इत्यक्षराणि २०० इति संख्यार्थं च लिख्यन्ते स्म।

अङ्कपल्ली पुनर्दशमांशलेखनार्थमुपयुज्यते स्म[२]।

१.अत्र १६२ संख्या द्विर्लिखिता। तस्मादग्रे नन्नन्यादिसूत्रानुसारि लेखनं शुद्धमस्ति।

२.The Fundamentals of Manuscriptology. Dr. P.Visalakshy Dravidian Linguistic Association, Saint Xavier's college, Tiruanantpuram 2003.

परिशिष्टम् ४.लिपीनां कलहः(लघु नाटकम्)

(ततः प्रविशति रङ्गं ग्रन्थलिपिर्वामपार्श्वतः,
नन्दिनागरी च दक्षिणपार्श्वतः)

ग्रन्थलिपिः—नमस्ते।

नन्दिनागरी- तव वाक्ये दोषोऽस्ति।

ग्रन्थलिपिः- को दोषः ?

नन्दिनागरी—'नमस्ते' इति न वक्तव्यम्। यतः सर्वेषां विवेकिनां ज्ञातमेव मम श्रेष्ठता ज्ञानेन वयसा च। तस्माद् 'अत्रभवत्यै नन्दिनागरीलिप्यै साष्टाङ्गः प्रणामः' इति सविनयं वक्तव्यम्। ततश्च मम पादाब्जयोर्दण्डवत् प्रणिपत्य, आशीर्वादो याचनीयः। इत्थंभूतलक्षणसमुदाचारसूचनाशून्यं 'नमस्ते' इति वाक्यं हि सदोषम्।

ग्रन्थलिपिः- परन्त्वास्माकीने प्राच्यविद्यासंशोधनालये ग्रन्थलिपिधर्मशास्त्राभिधो ग्रन्थो विद्यते। तत्र त्वेवं धर्मसूक्ष्ममभिहितम्—

'दृष्टायां ग्रन्थलिप्यां द्रागाराल्लिपिभिरादरात्।
प्रणामः करणीयोऽयं पुण्यो धर्मः सनातनः॥ '

नन्दिनागरी- धिग् धिक् तव धर्मशास्त्रम्। कीदृशी ज्येष्ठताऽस्ति तव? येन 'प्रणामः करणीय' इत्यादि किमप्यसंबद्धं जल्पसि?

ग्रन्थलिपिः-श्रूयतां मम परिचयगरिमा। तमिळुनाडु यद्यपि मम जन्मभूमिः। परन्तु त्वमिव नाहं सङ्कुचितस्वान्ता। कर्णाटकमाक्रम्य अन्यत्रापि भारतस्य सर्वेषु भागेषु संचरामि। यदि सत्यमुच्यते, भारते ममैव साम्राज्यम्। (इति गर्जति।)

(ततः प्रविशति शारदालिपिः)

शारदालिपिः-ओं शान्तिः शान्तिः शान्तिः। युवां किमर्थं कलहायेथे ?

नन्दिनागरीलिपिः-(आत्मगतम्)प्रायेण वनितेयमधिकरणेऽध्यक्षा स्यात्। तस्मादस्यै एव वृत्तान्तं निवेद्य ग्रन्थलिप्या मौढ्यम् अपनयामि। (प्रकाशं) स्वागतमत्रभवत्यै। अहं नन्दिनागरीलिपिः, एषा च ग्रन्थ-लिपिः। विश्वस्मिन् सर्वेषामपि विवेकिनां ज्ञातं यदहं गुणश्रेष्ठेति। तथाप्येषा माम् अपमानयति।

शारदालिपिः-किम् ? किमुक्तम् ? पुनरुच्यतां तावत्।

नन्दिनागरीलिपिः- अहं श्रेष्ठा लिपिः।

शारदालिपिः- पुनस्तदेवोच्चैर्घुष्यताम्।

नन्दिनागरीलिपिः- (सहर्षमात्मगतम्) हन्त, दैवात् कलियुगेऽपि धर्मो जीवति ।(प्रकाशम् उच्चैः)अहं श्रेष्ठा लिपिः।

शारदालिपिः-(सावज्ञं) तव श्रेष्ठत्वे किं मानम्?

नन्दिनागरीलिपिः- अत्र प्रमाणान्तरस्यापेक्षा नास्त्येव। अहमेव स्वयं प्रमाणमत्र।

शारदालिपिः- किं त्वया प्रत्यभिज्ञानस्य मातृका लिखिताः ? क्षेमेन्द्रस्य रचना वा किं त्वया परिशीलिताः ?

नन्दिनागरी-तवाभिप्रायो मम मस्तिष्के कमपि प्रकाशं न वितरति। स्पष्टं ब्रूहि हृदि स्थितम्।

शारदालिपिः-वस्तुतस्तु उभे युवां न प्रशस्ते।

ग्रन्थलिपिः नन्दिनागरी च- (युगपत् सक्रोधं)किं किम् ?

शारदालिपिः-युवयोरुपरि मम करुणा जायते। परन्तु सत्यं त्विदम्- अहं प्रशस्ततमा सर्वासामपि लिपीनाम्। मया भारतीयायाः संस्कृतेः रक्षणाय यावान् प्रयत्नः कृतस्तावान् प्रयत्नः कयाप्यपरया लिप्या न कृतः।

ग्रन्थलिपिः नन्दिनागरी च- किं किं ब्रूषे?(ततः दण्डादण्डि मुष्टीमुष्टि

कलहानन्तरम्) अरे धूर्ते ! त्वं तु आवयोः कलहप्रशमनव्याजेन अत्रागत्य स्वकीययोरेव भुजयोरास्फालनं समारब्धवती।

शारदालिपिः- सत्ये पथि विततो देवयानः।सत्यं ज्ञात्वा यदि मूर्खाः गुर्गुरायन्ते, तत्र मम को नाम दोषः ?

(नेपथ्ये ध्वनिः श्रूयते।)

आः ! किमात्थ ? 'शारदालिपिरेव प्रशस्ता' इति ?

नन्दिनागरीलिपिः-कैषा महिला-या क्रुद्धा महिषासुरमर्दिनी चण्डिका-देवतेव इत एवाभिवर्तते !

(ततः प्रविशति नेवारीलिपिः)

नेवारीलिपिः-(सक्रोधं)प्रज्ञापारमिताग्रन्थो मयैव लिख्यते,नान्यया लिप्या। परन्तु, दुष्टानामेतासामारभटी'अहं श्रेष्ठा अहं श्रेष्ठा' इति।हे कलियुग ! तवैवैष महिमा।

ग्रन्थलिपिः- (विहस्य सोत्प्रासं) एह्येहि! स्वागतं ते । नूनं त्वमेव प्रशस्ततमा लिपिः। उच्चैराक्रोशेन तव कण्ठे शोषणं स्यात् । किं शारिबापानकम् आददासि ?

नेवारीलिपिः-(सक्रोधं) तवोत्प्रासः सम्यगेव ज्ञायते मया।परन्तु भारतस्य याः भव्याः परम्पराः वर्तन्ते, ताः अज्ञात्वा त्वं विकत्थसे। संस्कृतस्य सर्वेष्वपि शास्त्रजगत्सु त्रिविक्रमावतारं प्राप्तवत्या मम त्वादृशीनाम् अज्ञानां वचनेन कोपो न जायते।यतः 'अहिंसा परमो धर्मः'इति भगवता बुद्धेन कृतपूर्वमेवास्ति धर्मानुशासनम्।

(नेपथ्ये महान् कलकलः)

अहं-सिद्धमातृकालिपिः याऽस्मि परमोत्कृष्टा लिपीनाम् !

अहं-भोटलिपिः, याऽस्मि वरतमा लिपीनाम् !

अहं-कन्नडलिपिः, याऽस्मि प्रशस्ततमा लिपीनाम् !

अहं-मलयाळं लिपिः, याऽस्मि श्लाघ्यतमा लिपीनाम् !

अहं-तिगळारीलिपिः, याऽस्मि स्तुत्यतमा लिपीनाम् !

अहं-सिंहळीलिपिः, याऽस्मि गुणगरीयसी लिपीनाम् !

(ततः प्रविशति कश्चिद् धौतीधारी पण्डितः)

धौतीधारी पण्डितः- (हस्ते मातृकां काञ्चन गृहीत्वा स्वगतं) अत्र किं लिखितमिति नैव ज्ञायते।यद्यप्यहं प्रभवामि देवनागरीलिपि-लिखितानां ग्रन्थानां पठिने।परन्त्वत्र मातृकायां विचित्रा काऽपि लिपिरस्ति-कथमिमां पठेयम् ? (परितो विलोक्य सहर्ष)अत्र काश्चन लिपयस्तिष्ठन्ति।ताः पृच्छामि।(लिपीरुपसृत्य प्रकाशं)अयि भोः ! कृपया दृश्यतामियं मातृका। ज्ञाप्यतामत्र लिखितो ग्रन्थः किमभिधानकः ?

(सर्वा लिपयः मातृकालिखितस्य ग्रन्थस्य पठने प्रयत्नं कुर्वन्ति, परन्तु विफलाः सत्यो म्लानवदना भवन्ति)

(नेपथ्ये ध्वनिः श्रूयते।)

अयि भोः पण्डित! इत आगम्यताम्।अहं जानामि तां लिपिम्।

धौतीधारी पण्डितः- (नेपथ्यं गत्वा पुनः प्रविश्य सहर्षं)आः ज्ञातम्-एतत्तु भरतनाट्यशास्त्रं कन्नडलिप्या लिखितम्।

(सर्वाः लिपयः अधोवदनाः भवन्ति)

(ततः प्रविशति काचिद् विदुषी)

विदुषी- मया कश्चन ग्रन्थः प्राप्तः। परन्तु कोऽयं ग्रन्थः ? कश्च ग्रन्थकर्तेति न ज्ञायते। (निर्वर्ण्य) अत्र काश्चन लिपयः सन्ति, ताः पृच्छामि।भोः लिपयः, ज्ञायतां तावत् किमेतत्।

(सर्वाः लिपयः प्रयत्नं कुर्वन्ति,ततः)

शारदालिपिः-(सहर्षं) ज्ञातम्। एषा ईश्वरप्रत्यभिज्ञाविमर्शिनी ।

ग्रन्थकर्ता चाभिनवगुप्तः।

नन्दिनागरीलिपिः-हे विदुषि, तव सविधेऽपरा अपि मातृका विद्यन्ते किम् ?

विदुषी-विद्यन्ते। अत्र दृश्यताम्।

नन्दिनागरीलिपिः- एषा तु मौनिश्रीकृष्णभट्टप्रणीता तर्कचन्द्रिका।

ग्रन्थलिपिः-(स्वगतं)अये! किमिदम् ? सर्वा अपि लिपयः स्वीयाम् उत्कृष्टतां प्रति पटहं वादयन्ति। मया किमिदानीं करणीयम् ? भवतु, दृष्टम्। (पण्डितमुद्दिश्य) अयि भो विद्वन्,तव सविधेऽपराश्च मातृकाः सन्ति किम् ?

धौतीधारी पण्डितः-आम्। (इति दर्शयति।)

ग्रन्थलिपिः–(सहर्षम्।) एष तु वेदान्तदेशिकप्रणीतः तत्त्वमुक्ताकलापः।

नेवारीलिपिः-(स्वगतं)हा, हताऽस्मि मन्दभागा। अहमेवाधुना निकृष्टा संजाता।(प्रकाशं) हे ! सारस्वतार्णव-तिमिङ्गिलायमाने! सहृदये! किं त्वयि मातृका अन्याः सन्ति ?

विदुषी-सन्ति(इति दर्शयति।)

नेवारीलिपिः–(सहर्षम्)अये, आर्यशूरप्रणीताया जातकमालाया उपरि विरचिता व्याख्येयम्।

(लिपयः परस्परेण अवलोकयन्ते)

ग्रन्थलिपिः-अयि भो नन्दिनागरि, हे सखि, नेवारि, अहं क्षन्तव्या।

नन्दिनागरीलिपिः- वस्तुतस्तु मयैव भवत्योः क्षमा प्रार्थनीया, या भवत्योः मनसि क्रोधमुत्पादितवती।

पण्डितः-एतेन इदं स्पष्टभूयिष्ठं यन्महामहिमशालिन्याः संस्कृतमातुः सर्वाः अपि लिपयः पुत्र्यः। तासां मध्ये विवादो न युज्यते।

विदुषी- सत्यमाह भवान्।भोटलिप्यां नागार्जुनादिप्रणीताः योगशतकादि-

ग्रन्थाः ,मलयाळं लिप्यां नारायणभट्टादिविरचितप्रक्रियासर्वस्वादि-ग्रन्थाः,तिगळारीलिप्यां भारुचिविरचितमनुस्मृतिव्याख्याादि-ग्रन्थाः, वङ्गलिप्यां गदाधरभट्टादिविरचितव्युत्पत्तिवादादयो ग्रन्थाः, ओड्रलिप्यां जयदेवादिप्रणीतगीतगोविन्दादिग्रन्थाः, तेलुगुलिप्यां सायणाचार्यादिविरचितवेदभाष्यादिग्रन्थाः,गुर्जरीलिप्यां हेमचन्द्रा-दिविरचितसिद्धहेमशब्दानुशासनादिग्रन्थाः, सिंहळीलिप्यां च वृत्तरत्नाकरव्याख्यादिग्रन्था उपलभ्यन्ते।

(नेपथ्ये श्रूयते डिण्डिमनादः)

लिपयः-(सविस्मयम्) अरे, कोऽप्युत्सवो नास्ति, किमपि पर्व नास्ति। किमर्थक एष वाद्यघोषः?

पण्डितः-(आकाशे लक्ष्यं बद्ध्वा) अरे, कस्या अपि देवताया यात्रा-महोत्सव इव दृश्यते।केयं स्याद् देवता ? गजारूढां देवतां परितो विद्वांसो नृत्यन्ति।कोऽपि विद्वान् ‘नृत्यत, नृत्यत’ इति सर्वानपि भक्तान् मण्डलरासकाय आह्वयते।

विदुषी-(आकर्ण्य) अये, किमिदम् ? कर्णकुहरयुगलविदारणविचक्षणाः श्रूयन्ते जयकाहल्यः ।देवतां परितो मिलिता विद्वांसः ‘जयतु जयतु ब्राह्मी’ इति घोषणानिरताः सर्वत्रापि अवलोक्यन्ते।

पण्डितः-आश्चर्यम्, आश्चर्यम्। विद्वद्भिः पद्यान्यपि क्रियन्ते।यथा-

पादैर्हस्तैर्बाहुभिरास्यैर्बहुरूपैर्
लेख्याकारे नृत्यति रङ्गे बहुधा या।
सेयं दिश्यात् सर्वलिपीनां परिशुद्धं
बोधं ब्राह्मी शोधनकौतूहलिनां नः॥

विदुषी-साध्वनुष्ठीयते लिपीनां हृदयं वेत्तृभिर्विद्वद्भिः। यतोऽस्माकं या भारतीया लिपयस्तत्र द्वे प्रधाने सृती। प्रथमा सृतिर्दाक्षिणात्या।

द्वितीया चौत्तराहा। द्वयोरपि सृत्योर्ब्राह्मी लिपिरेव मूलम्। तस्मात् स्थाने एव विदुषां ब्राह्मीस्तुतये कवितानिर्माणायासः। अनेन संपादितप्रेरणाहमपीदानीं कविताप्रसंगेन हृदये नृत्यन्त्या ब्राह्म्याः प्रभावं पनायामि।

पाठोऽकुण्ठो लेखनं भूरिलीलं
बोधोऽबाधो वैदुषी दोषदूरा।
स्फीता सीमा हन्त सारस्वती च
ब्राह्मीदेव्याः सुग्रहानुग्रहेण ॥

पण्डितः-अहो हन्त! भगवत्या ब्राह्म्यास्तेजोधारा सर्वत्र व्याप्नुवाना अस्मानपि स्वान्तर्भावयन्ती प्रमोदभूमानमेव सृजन्ती विराजते। कञ्चित् कालं यावद् हर्षोद्रिक्तरङ्गिण्या प्लाव्यमानाः सुखमनुभवामः।

सर्वे-तथास्तु तथास्तु।

(कञ्चित् कालं यावत् सर्वेऽपि आनन्दतुन्दिलाः सन्तो रङ्गं परितो मन्दमन्दं चलन्ति। ततः-)

विदुषी-एतेन किं सिद्धम् ?

पण्डितः- एतेन किं सिद्धम् ? (सर्वे गायन्ति।)

चारवो विलसन्ति लिपयो
भूरिसंख्याका ; जड-ज्ञा
धारयन्ति शिलादिलेख्यैर्वस्तुभिः किल याः।
भारते ब्राह्मीसरोवर-
वारिजश्रेणीरुदात्ताः
सूरिमधुपास्वाद्यवाङ्मयरूपमकरन्दाः॥

परिशिष्टम् ५.

अस्मत्पूर्वजानां मुद्रणकलाज्ञानं किमासीत् ?

इदं स्पष्टभूयिष्ठं यदाबहोः कालादस्माकं देशे व्यावहारिक-प्रयोजनार्थं मुद्राणामुपयोगः परिचिततम एव। तस्मादिदं स्वभ्यूह्यं यत्प्रायो मुद्राणामुपयोक्तृभिः समग्रस्यापि पुटस्य मुद्रणार्थं कस्या अपि साम्ग्र्या उपयोगविषये प्रयोगान् कुर्वद्भिरेव भाव्यम्। अध्येतद्विषयं संस्कृतचन्द्रिकापत्रिकायां "अपि विदितमार्याणां मुद्रणशिल्पम् ?" (संस्कृतचन्द्रिका १९०२, जून् ७) इति कोऽपि प्रबन्धः प्रकाशितः। प्रबन्द्धु-रभिधानं न मुद्रितमत्र। चन्द्रिकापत्रिकासंपादकेन तत्रभवता अप्पा-शास्त्रिराशिवडेकरेणैव प्रबन्धमेतं रचितवता भाव्यम्।

प्रबन्धोऽयमत्रार्थेऽनुकूलं पद्यद्वयमुद्धरति-१. "लेखन्या लिखितं यत्तु मुद्राभिरङ्कितं च यत्। शिल्पादिनिर्मितं यच्च पाठ्यं धार्यं च सर्वदा। (मुण्डमालातन्त्रम्।)" २. "मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनसंभवा। गुण्डिकाघुणसंभूता लिपिः स्यात् पञ्चधा ततः। (वाराहीतन्त्रम्।)"

प्रबन्धे मुद्रालिपिविषये इत्थमुक्तम्-"मुद्रा नामोत्कीर्ण-विलोमवर्णो रूप्यताम्रसीसकाष्ठादिखण्डविशेषः। येन किल प्रदत्तमषीकेण पत्रादिषु विनिहितेनाविर्भवन्ति पठनार्हाणि तत्तान्यक्षराणि वचनानि वा। तथाविधमुद्राभिर्जायमाना च लिपिर्मुद्रालिपिरित्युच्यते।"

उद्धृतयोः पद्ययोः किञ्चिदिवास्फुटता यद्यपि वर्तते तथापि समग्राणां ग्रन्थपुटानां मुद्रणाय कैश्चन प्राचीनभारतीयैः प्रयत्नास्तु विहिता एवेत्यत्र सूचना पद्याभ्यामेताभ्यां प्राप्यत इत्यत्र न संशयः। तेषां प्रयत्नाः कियता मात्रेण फलेग्रहयोऽभूवन्निति निश्चप्रचं वक्तुं न शक्यते।

परिशिष्टम् ६.लिपकराणां वेदना निवेदना च

लिपिकरप्रमाददोषाङ्गीकारपूर्वकं लिपिकरकृतानां क्षमाप्रार्थनानां दर्शनं मातृकाणामन्ते साधारणं याः प्रायो पद्येषु वर्तन्ते। एतदपवादत्वेन गद्येऽपि तकदाचिद्गोचरीभवन्ति। अतिविचित्रं ह्येतदेव यदेतेष्वपि प्रार्थनापद्येषु लिपिकरप्रमादा गोचरीभवन्ति !केषुचन पद्येषु पाठान्तरा-ण्यपि वर्तन्ते। प्रकृतेन ग्रन्थकर्त्रा मातृकाणां पठनसमये दृष्टानां केषाञ्चनै-तादृशानां पद्यगद्यानां संकलनं सपाठान्तरं, सप्रमाददर्शनमत्र कृतम्। विविधासु मातृकास्वस्तव्यस्ततया विप्रकीर्णानां तेषां ग्रन्थसंपादनशास्त्रीय-विध्यनुसारेण संपादनम् असाध्यमेव।

तद्गतानामभिप्रायाणामयं सारः-

"लिपिकरैः आदर्शमातृकावलम्बनेन 'यथावत्' प्रतिलेखनं विहितम्। प्रतिलेखनकर्म न त्वक्लिष्टम्। लेखनसमये पृष्ठकटिग्रीवाणां वक्रीभवनमनिवार्यम्। दृष्टिः सदा पार्श्ववर्तिनी स्यात्। इदं च स्वाभाविकं यत् प्रतिकृतिषु बहवो दोषाः संभवेयुः। लिखितकं(=कुत्सितं लेखनं), विसर्गानुस्वारयोरस्तव्यस्तता, वर्णलोपाः,अक्षरप्रमादाः, पाठप्रक्षेपाः, सन्धिविषयकाः प्रमादाः,एते दोषा बुद्धिपूर्वकं न कृता लिपिकरेण। मातृकागते ग्रन्थपाठे दृष्टेषु प्रमादेषु लिपिकरो न दूष्यः मनुष्याणां स्खालित्यकरणस्य सहजत्वाद्। पाठको न क्रुध्येल्लिपिकराय। देवी सरस्वती लिपिकराणां हस्ते निवस्यात्।

"पुस्तकं पुत्रवद् द्रष्टव्यम्। पाठकैः पुस्तकानि सावधानं रक्षणीयानि यानि लिपिकरैरतीवक्लेशेन निर्मितानि। सुक्षेत्रमन्यजना-क्रमणरहितं यथा तथा रक्ष्यते किल। तद्वत् पुस्तकमपि सावधानं पालनीयं, सूत्रेणातीवदृढं बद्धव्यं,सत्पुत्रवच्च तद् रक्षितव्यम्।

"अतिश्रमेण निर्मितं पुस्तकं तैलजलाग्निचोरमूषिकेभ्यो रक्ष-णीयम्। पुस्तकं कदापि मूर्खेभ्यो न दातव्यम्।"

एतदर्थानि यानि पद्यगद्यान्यत्र दत्तानि, तानि पञ्चधा वर्गीकरणीयानि:-१.पाठकानां क्षमां याचमानानि पद्यानि।(अ. "करकृतमपराधं क्षन्तुमर्हन्ति सन्त" इति चतुर्थपादं पूरयितुं प्रवृत्तानि पद्यानि आ.पादपूरणरहितानि स्वतन्त्राणि पद्यानि।इ.'मातृकासु वर्तमानानां दोषाणां लिपिकरा न प्रतिभुवः, मूलादर्शं यथावत् प्रतिकृतवतां तेषामनपराद्धत्वा'दिति निर्णयस्य घोषयितॄणि पद्यानि)२.मातृकाणां रक्षणम् उपदिशन्ति पद्यानि।३.मातृकाचोरेभ्यः क्रुध्यन्ति पद्यानि। ४.अपरिस्फुटार्थं पद्यद्वयम्।५.मातृकाप्रदानार्थं प्रचोदनां कुर्वत् किमपि पद्यम्।६.पाठस्य समीचीने शोधने विदुषोऽसमर्थतां व्यञ्जयद् किमपि गद्यम्।७. एतदर्थकानि कतिचन कन्नड-तेलुगु-मलयाळं-गद्यपद्यानि।

१.पाठकेषु क्षमां याचमानानि पद्यानि।

अ. "करकृतमपराधं क्षन्तुमर्हन्ति सन्त" इति चतुर्थपादं पूरयितुं प्रवृत्तानि पद्यानि

'करकृतमपराधं क्षन्तुमर्हन्ति सन्त इति' मालिनीछन्दसा रचित एकः पादः।अत्रापराधशब्दस्य विवरणरूपाणि वचनानि अन्येषु पादेषु पूरयित्वा ददानानि पद्यानि कविभी रचितानि लिपिकरेभ्यो लेखितानि च । प्रकृतेन ग्रन्थकर्त्रा तादृशानि अष्टौ पूरणानि मातृकासु दृष्टानि[1]। एतेषु पूरणेष्वपि पाठान्तराणि दृग्गोचरीभवन्ति ! अष्टमे पूरणे तु 'करकृत' इत्यत्रापि पाठभेदो यत्र 'करशत' इति पठितम् !

१*Introduction to Manuscriptology* इति ग्रन्थस्य रचनया प्रख्यातकीर्तिर्दिवङ्गतस्तत्रभवान् डा.आर्.एस्.शिवगणेशमूर्तिः,कदाचित् प्रकृतेन ग्रन्थकर्त्रा "करकृतमपराधं क्षन्तुमर्हन्ति सन्त इति तु एकः पादः।अपरे पादाः के" इति पृष्टः सन् "करकृत इत्यादिकं समग्रमेव वचनं, तत्र पूर्वपूरणीयं किमपि नास्ति"इत्याह स्म।प्रकृतेन ग्रन्थकर्त्रा तु मातृकाणां परिशीलनावसरे 'करकृतम्'इत्यादिचतुर्थपादस्य अष्टौ विविधानि पादपूरणान्युपलब्धानि !

१.सरभसकरवेगाद्[१] वर्णमात्रादिदोषो[२]
यदि भवति न वाच्यं[३] पुस्तके हस्तदोषात्[४]।
न खलु मतिकृतं तत्[५] सद्गुणग्राहका नः[६]
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः॥

२.अविरलकृतवर्णभ्रेषणं[७] पुस्तके[८]ऽस्मिन्
रचितमनवसारे[1][९]लेखनीदूषणं[१०] वा।
अनुचितमथवा यद्[११] वक्रता[१२] वर्णराजे[ः][१३]
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः॥

३.अविदितपरदोषा ज्ञानपीयूषपूर्णा
निज[१४]गुणकलिकाभिर्लोक[१५]मामोदयन्तः।
परधनपरदारप्रोज्झिताशेषकृत्याः[१६]
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः॥

१.वेग, वेगैः
२.भ्रष्टवर्णानुलोपो,भ्रष्टवर्णादिदोषो, भ्रष्टवर्णादिदोषैः
३.यदि भवति हि वाच्यं, भवति हि यदि वाक्ये, यदि भवदिह शास्त्रे
४.दोषम्।
५.स खलु मतिकृतो,न खलु कृतमतीयं (?),सकलमुनिजनानां,सकलमपि कृतान्तं,सकलगुणयुतानां, सकलगुणग्र(गृ?)हाणां
६.सद्गुणग्राहकाणां, सद्गुणग्राहिकामाः, सद्गुणग्राहिकामः, षड्गुणग्राहिपुंसां, सर्वमेतत् पठित्वा
७.भ्रेषणां,भैषण,भ्रेषज
८.पोस्तके
९.त्रिशिरमरवसानां, रचितमनवशाने
१०.दोषणं
११.अनुचितमवधार्य,अनुचितमथवाथ
१२.वक्रतो, यत् कृतं, प्राकृतो, वत्कृतौ
१३.वर्णराजौ, वर्णराशेः,यन्त्ररांश,
१४.जित
१५.स्वेद(?)
१६.परधनपरदारप्रोज्झिताः शेषकृत्याः,परगुणपरिदानप्रस्तुताशेषकृत्यं

---

1. अनवसारे=अनवसरे । अनुचिते स्थले इति यावत्।

४.प्रतिसदृशमशेषं प्रोज्ज्वलत्पत्रिकासु
प्रतिलिखितमिहैतद् यन्मया मन्दबुद्ध्या।
तदखिलमपि दृष्ट्वा साधु वाऽसाधु वाऽस्मत्-
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः॥

५.युवति(?)हृदयवेगाल्लेखने भ्रान्तिभावा-
न्नयनचल[न]संगाच्छ्रेत(गात् प्रीत ?)शब्दावलम्बात्।
विहितमहितबुद्ध्या यन्मया पुस्तकेऽस्मिन्
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः॥

६.गुरुनिकरकटाक्षापेक्षया स्वेच्छया वा
करणकलितकामादाधिना व्याधिना वा।
कमलनयनकान्ताचिन्तयाऽनन्तया वा
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः॥

७.विगलति यदि वर्णः कर्णदोषेण यद्वा
प्रपतति पदमेकं पाणिनैकेन यद्वा।
विषमविषयदोषो विस्मृताः पङ्क्तयो वा
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः॥

८.अनिलसलिलतैलाश्लिष्टबन्धान्यहस्ता
न्नववसननिवासादन्तरायाददोव्यम्(?)।
इह लिखितमशुद्धं शुद्धमेवं न दूष्यं
करशतमपराधं क्षन्तुमर्हन्ति सन्तः[1]॥

1. एतदन्तिमं पद्यं प्रकटितस्य भागवतपुराणगतस्यैकस्य पत्रस्य द्युतिचित्र-मवलम्ब्य दत्तम्।(*NMM Annual Report* 7.2.2005 to 7.2.2006, page 68). अत्र 'करकृत' इत्यत्र 'करशत' इति पाठान्तरमवधेयम्। 'करेण शतशः कृता लेखनापराधा ' इति तदर्थोऽवगन्तव्य इति प्रतिभाति। प्रकृतेनापि ग्रन्थकर्त्रा कृतं किमपि पूरणं , यत् १३२ पृष्ठे द्रष्टव्यम्।

आ.तादृशपादपूरणानुद्देश्यकानि स्वतन्त्राणि पद्यानि।

९.अबद्धं वा सुबद्धं वा शिरसाऽवाच्यमेव[1] वा।
यन्न्यूनमतिरिक्तं च तत् सर्वं [क्षाम्य] पार्वति! ॥
१०.अक्षरं यत् परिभ्रष्टं[१] मात्राहीनं तु यद् भवेत्।
क्षन्तुमर्हन्ति विद्वांसः[२] क्षमा हि महतां धनम्[३]॥
११.इहाज्ञतो वा स्खलनं लेखकाद् वाऽपि संभवम्।
सर्वं संमृग्य दयया शुद्धं कुर्वन्तु सूरयः॥
१२.हस्तवेगेन संभ्रान्त्या स्खालित्यं यदि वर्तते।
दोषज्ञास्ते शोधयन्तु सर्वं सर्वार्थकोविदाः॥
१३.वर्णविस्मरणात् सद्भिर्वर्णदीर्घादि(ह्रस्वदीर्घादि/वर्णदैर्घ्यादि ?) दोषतः।
संपादितापराधो हि क्षम्यतां क्षमकारिभिः॥
१४.अङ्कितं शङ्कितं पदं बुद्धिभातं धृतं हृतम्।
प्रतिपुस्तकगं चैव खण्डितं शोधने स्थितम्॥
१५. द्राविडीं लिपिमालोक्य द्रागियं लिखिता मया ।
लिपिदोषाः किन्तु सन्तु तथापि क्षम्यतां बुधैः॥
१६.विसर्गबिन्दुमात्राणि पदपादाक्षराणि च।
न्यूनानि चातिरिक्तानि [५]-- क्षमस्व [४]पुरुषोत्तम[४] --[५]॥

१.यदक्षरपरिभ्रष्टं, यदक्षरं परिभ्रष्टं
२.क्षन्तुमर्हथ विद्वांसः,क्षन्तव्यं तद् बुधैः सर्वं, तत् सर्वं क्षम्यतां देव[१]
[१.देवो]
३.नारायण नमोऽस्तु ते॥, सुन्दरेश नमोऽस्तु ते॥,कस्य न स्खलते मनः॥,
पिता पुत्रापराधवत्॥
४.परमेश्वर।
५.मे रक्षन्तु महाजनाः(समग्रे चतुर्थे पादे)।

1.शिरसा(=शिरोलेखेन)शिरोलेखस्य अस्पष्टत्वहेतोरित्यभिप्रायः।अवाच्यम्=न स्फुटं पठनीयं, न सुप्रत्यभिज्ञेयमिति यावत्।

१७.गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः[१] ॥

१८.लिखितं पुस्तकमिदं वामनाख्येन मौनिना।
यदि शुद्धमशुद्धं वा शोधयन्तु विपश्चितः॥

१९.प्रमादादत्र दुष्टं चेत् किञ्चिल्लिखितवानहम्।
सशोध्य स्थापनीयं तत् (द्) धर्मार्थं साधुभिर्बुधैः।

२०.बुद्धिमान्द्यवशात् किञ्चित् (द्)यदशुद्धमलेखि तत्।
द्वेषभावं समुत्सृज्य सो(शो)धनीया(यं) मनीषिभिः।

२१.बिन्दुदुर्लिपि[२]विसर्ग[३]वीथिका[४]-शृङ्गपङ्क्ति[५]पदभेद[६]दूषणम्[७]।
हस्तवेगजर्मबुद्धिपूर्वकं क्षन्तुमर्हथ समीक्ष्य सज्जनाः[९]॥

२२.आदर्शदोषा[१०]न्मति[११]विभ्रमाद् वा
यत् किञ्चिदूनं[१२] लिखितं[१३] मयाऽत्र[१४] ।

१.साधवः, सूरयः	८.हस्तवेगजड/जन[1], हस्तलाघव
२.सल्लिपि (!?)	९.सूरयः, साधवः।
३.विशेष, विचित्र	१०.अज्ञातदोषात् अदृश्यभावात्
४.दीर्घका, दीर्घिका	अदृष्यभावात्
५.पङ्क्तिशृङ्ग,शृङ्गभङ्ग, वृत्तवर्ण	११.त्मनि (!?)
६.पाद, हीन, पदहीन	१२.श्रुत्यर्थहीनं, पदादिहीनं
७.दूषणैः, दूषितं	१३.लिषितं।
	१४.यत्।

1.इदं स्पष्टं यदत्र समीचीनं पदच्छेदं "वेगजम् +अबुद्धि"इति करणीयं लिपिकरो न जानाति स्म। स तु "वेग-जम-बुद्धि" इति च्छित्वा 'जम' इत्यस्य अर्थम् अजानानस्तं दुष्टं पाठं मत्वा 'जड/जन ' इति तं सरलीकृतवान्। एवमेव, 'लाघवम्' इति शब्दोऽपि सरलीकरणेनैव जातं पाठान्तरम्।

तत् सर्वमार्यैः परिशोधनीयं
कोपो न कार्यः खलु लेखकेस्य(लेखकस्य ?)[१] ॥
२३.अपि रचिते चालोच्ये चपलधियो यद्यस्ति(यद् यदस्ति) दुर्लिखितम्।
तत् तत् करुणाम्बुनिधे मातः क्षन्तव्यमखिलवागधिपे।[1]
२४.अक्षरमात्र(! मन्त्र ?) पदस्वरहीनं
व्यञ्जनसन्धिविवर्जितरेफम्[2]।
साधुभिरेव मम क्षन्तव्यं (क्षमितव्यं ?)[3]
कोऽपि (हि ?) न मुह्यति शास्त्रसमुद्रे॥
२५.भो भो पुस्तकवाचका बुधवरा युष्मानहं प्रार्थये
यद् यद् तत् त्वरितं प्रमादजनितं बिन्द्वक्षरभ्रंशनम्।
तद् दृष्ट्वा न शपेत मन्युवशगा वः पादपङ्केरुह-
द्वन्द्वे मे प्रणतस्य मस्तकमिदं भृङ्गायते क्षम्यताम्॥

इ.मातृकासु वर्तमानानां दोषाणां लिपिकरा न प्रतिभुवः, मूलादर्शं यथावत् प्रतिकृतवतां तेषामनपराद्धत्वादिति निर्णयस्य घोषयितृणि पद्यानि।

२६.यथा दृष्टं तथा लिखितं लेखको (लेखके)नास्ति दोषकः(दूषणम्)[4]
२७.[२]-- यादृशं[३] पुस्तकं[४] दृष्टं[५] --[२] तादृशं[६] लिखितं मया।

१.प्रायेण मुह्यन्ति हि ये लिखन्ति
२.पुस्तके लिखितं यावत् (यादृक्)
३.यद्राजं(!?)
४.पुस्तके, वस्तुकं
५.दृष्ट्वा, वीक्ष्य
६.तद्राजं (!?)

1.प्रश्नमार्गः, तिगळारीलिपिः।प्राच्यविद्यासंशोधनालयः, मैसूरु मातृकाङ्कः पि.१३७२९
2.व्यञ्जनसन्धिरेफैर्हीनमित्यर्थेऽज्ञेन कृतश्च्युतसंस्कारः समासः।‘ (अक्षरं)हीनव्यञ्जनसन्धि’ इति वियोजने ‘मात्र(मत्र ? मन्त्र ?)पदस्वर’ इत्यस्य कोऽर्थः ?।किमेतत्पदपाठस्वरविषयकम्?
3.सत्यपि ‘क्षन्तव्यं’, ‘क्षमितव्यम्’ इत्युभयोरपि रूपयोः शब्दागमपूतत्वे , क्षमितव्यमिति पाठः परिकल्पनीयो यश्छन्दःशासनशुद्धः ; अक्षरगणवृत्तेन मात्रागणस्य योगो वानुमन्तव्यः।
4.प्रथमे पादे छन्दो भग्नं नववर्णानां विद्यमानत्वात्।अपि च,पद्यस्यास्यान्यदर्धं न दृष्टम्।

(समग्रस्य पूर्वार्धस्य-)मातृकासु यथा दृष्टं तथा तल्लिखितं मया।
[अबद्धं[१] वा सुबद्धं[२] वा][३] [मम दोषो न दीयते[४]][५]।।[६]

२८.भीमस्यापि भवेद् भङ्गो मुनेरपि मतिभ्रमः[1]।

२.मातृकाणां रक्षणम् उपदिशन्ति पद्यानि।

२९.भुग्न[2] [७]पृष्ठ[८]कटिग्रीव[९] (वं ?) स्तब्ध[१०]दृष्टि[११] अधोमुखम्[3][१२]।
कष्टेन[१३] लिखितं ग्रन्थं[१४] यत्नेन[१५] परिपालयेत्[१६]।।

१.अबद्धो

२.सुबद्धो

३.तृतीयेपादेचत्वारोभिन्नाः पाठाः-

1.यदि शुद्धमशुद्धं वा

2.शुद्धं वा यदि वाऽशुद्धं

3.तथाऽपि यो मे व्यत्यासो

4.तयाऽप्यर्धं मयाऽप्यर्धं (?)

४.न विद्यते, न जायते, विनश्यति

५.चतुर्थे पादेऽपि पञ्च भिन्नाः पाठाः सन्तिः-

1.लेखने क्रियतां क्षमा।।

2.विद्वद्भिः परिशोधयेत्।।

3.क्षन्तुमर्हति(न्ति) साधवः।।

4.शोधयन्ति विपश्चितः।।

5.शोधनीयं सदा बुधैः।।

६. उत्तरार्धे सर्वथा भिन्नतरास्त्रयः पाठाः 'अन्यथा लेखनायोगेनेति कार्या क्षमा बुधैः।।', 'हीनाधिक्यैः (! कैः) स्वरैर्वर्णै-रस्माकं दूषणं न हि।।', 'गुणदोषौ न जानामि अतः संशोध्यतां बुधैः।।'

७.भग्न ,बद्ध,भिन्न

८.जानु

९.ग्रीवा, ग्रीव, ग्रीवः

१०.बद्ध, तप्त,वक्र

११.दृष्टिर्, मुष्टि

१२.मुखः

१३.यत्नेन, दुःखेन

१४.पुस्तं, पुस्तीं, चेदं, शास्त्रं

१५.पुत्रवत्

१६.प्रतिपालयेत्

1.द्वितीयार्धमस्य न दृष्टम्।

2.भग्न इति प्रायिकः पाठो यः सुतरामसंगतः। भुग्नम्=वक्रम्।

3."भुग्नपृष्ठकटिग्रीवं यस्मिन् कर्मणि तत्, स्तब्धदृष्टि यथा स्यात्तथा अधोमुखं च यथा स्यात्तथा लिखितं" इति प्रायोऽभिप्रायः। स्तब्धदृष्टि अधोमुखमित्यत्र यद् विसन्धिस्तत् पद्यकर्तुरशक्त्या।

३०.उदकानलचोरेभ्यो मूषिकेभ्यस्तथैव च ।
रक्षणीयं प्रयत्नेन यस्मात् कष्टेन लिख्यते॥

३१-१.[तैलाद् रक्षेज्जलाद् रक्षेद्[१] रक्षेच्छिथिलबन्धनात्।][२]
मूर्खहस्ते न दातव्यम्[३] एवं वदति पुस्तकम्[४]।।[1]

३१-२.तैलाद्[५] रक्ष जलाद् रक्ष [रक्ष मां[६] श्लथबन्धनात्][७]।
[अग्नि[८]मूषिकचोरेभ्यः शिवो रक्षतु पुस्तकम्][९] [2]॥

३१-३.आखुतैलजलाग्निभ्यः कृमेश्चोरात् किशोरकात्।
मूढासूयकनारीभ्यः शिवो रक्षतु पुस्तकम्[3]।

३२.पठतां वाक्प्रवाहोऽस्तु भवानीशप्रसादतः[4]॥

३३.जीर्णं जिनगृहं बिम्बं पुस्तकं श्राद्ध (?)मेव च।
उद्धार्य स्थापनं पूर्वपुण्यतोऽधिकमुच्यते ॥

१.जलाद् रक्षेत् स्थलाद् (खलाद् ?) रक्षेद्
२.अग्ने रक्षेद् जलाद् रक्षेद् मूषिकेभ्यो विशेषतः।
३.परहस्तगतं रक्षेत्
४.पुस्तिका, पुस्तकः
५.अग्ने[ः]
६.च
७.रक्ष्यमश्लाघ्यबन्धनात्
८.वह्नि
९.अवश्यं याचकाद् रक्ष्यं मम रक्षं (रक्ष्यं ?) तु पुस्तकम्।

1,2,3.वस्तुतस्तु ३२-१, ३२-१, ३२-३ एतानि पद्यानि एकस्यैव पद्यस्य पाठान्तररूपाणि। तस्मादेतेषां संख्या पार्थक्येन न दत्ता। ३१-३ पद्ये नारीशब्द-योजनम् अज्ञानजन्यं, लिपिकरीणामथ च विदुषीणामपि स्त्रीणां सत्त्वात्।
2. एतत्पूर्वार्धत्वेन कस्याञ्चिन्मातृकायां 'अग्निमूषिकचोरेभ्यः शिवो रक्षतु पुस्तकम्' इति पाठः। अपरस्यां मातृकायां तु पूर्वार्धोत्तरार्धौ परस्परेण विपर्यस्तौ, यत्र त्वग्निशब्दस्थाने वह्निरिति पाठः।
4.अन्योऽर्धोऽस्य श्लोकस्य नोपलब्धः।

३४.संपाल्यं[१] सदपत्यवत् परकराद् रक्ष्यं च सुक्षेत्रवत्
संशोध्यं व्रणिनोऽङ्गवत् प्रतिदिनं वीक्ष्यं च सन्मित्रवत् ।
बध्यं बध्य[२]वदश्लथं दृढगुणैः[३] स्मर्यं हरेर्नामवन्
नैवं सीदति पुस्तकं किल कदाऽप्येतद्गुरूणां वचः॥

३.मातृकाचोरेभ्यः क्रुध्यन्ति पद्यानि।

३५.संपाद्य भूरिकष्टेन पुस्तकं लिखितं मया।
हर्तुमिच्छति यः पापस्तस्य वंशक्षयो भवेत्॥
३७.यत्नेन लिखितं ग्रन्थं यश्चोरयति मानवः।
सूकरी तस्य माता च पिता तस्य च गर्दभः॥

४.अपरिस्फुटार्थं पद्यद्वयम्।

३६.अयि मयि नहि रक्तोऽचुम्बितोल्लेखनैर्यः
स तु विभुरनुरज्जन् पुस्तकोल्लेखनेन[1]।
पतिरतनुविलासैः स्वैरसाध्योऽपि साध्य-
श्चतुरतरतरुण्याः पादसंवाहनेन॥

३७.निरस्तरन्ध्रा अपि सूत्रहीना जिह्वाङ्गचेष्टाकृतियोजिताश्च[2]॥

५.मातृकाप्रदानार्थं प्रचोदनां कुर्वत् किमपि पद्यम्।

३८.आर्षं यो विलिखित्वा[3] तु ब्राह्मणेभ्यः प्रयच्छति।
पितरस्तस्य वैकुण्ठे वसन्त्यक्षरसंख्यया॥

१.संभूष्यं
२.बन्ध
३. च हि न वि

1. "अयि मयि नहि रक्तश्चुम्बितोल्लेखनैर्यः स तु विभुरनुरज्ज्यः पुस्तकोल्लेखनेन" इति कृते पाठे कथञ्चित् कोऽप्यर्थो निःसरेत्।
2.अन्योऽर्धोऽस्य पद्यस्य नोपलब्धः। प्रतिपाद्यं वस्तु किमिति न ज्ञायते।
3.अशुद्धमिदं, ल्यपोऽवश्यं भाव्यत्वात्। किमत्र आर्षं इति शब्द आर्षप्रयोगार्थकः?

६.पाठस्य समीचीने शोधने विदुषोऽसमर्थतां व्यञ्जयत् किमपि गद्यम्।

मातृकान्तरालाभात् ग्रन्थोऽयं न सम्यक् शोधित इति मन्तव्यं सहृदयेन।

७.एतदर्थकानि कतिचन कन्नड-तेलुगु-मलयाळं-गद्यपद्यानि।

अ.कन्नडपद्यानि

[अत्र दत्तानि कन्नडपद्यानि डा.डि.एल्.नरसिंहाचार्यविरचिते **कन्नडग्रन्थसंपादने** इति ग्रन्थे समुद्धृतानि। एतेषां पद्यानां संस्कृततात्पर्यं तत्रभवता प्राचार्येण.जि.ए.शिवलिङ्गय्यवर्येण प्रकृताय ग्रन्थकर्त्रे दत्तं कन्नडविवरणमनुसृत्य कृतम्। अधोरेखायुक्ता वर्णा ह्रस्वा इति ज्ञेयम्।]

१.तप्पं बरदं कडुजड
नप्पातं बरॆदनॆन्दु बैयल्बेडा।
तप्पक्कु[1] शुद्धमक्कुं
तप्पुळ्ळॊडॆ[2] तिद्दिकॊम्बुदुत्तम पुरुषर्[3]॥

[हे विज्ञ पाठक ! कृपया मा निन्द मां महाजडं मन्यमानः। दोषाः समीक्रियन्ते उत्तमैः पुरुषैः।]

२.लवलेश तप्प काणुतॆ
कविबरहक्कूणॆयॆन्दु बैयल्बेडा।

१.तप्पिल्ल

२.तप्पिल्लदॆ

३.प्रतिसमनागियॆ बरॆदे

एवे हळचलोडने मुरहं
नवरसिकरु ओदि तिद्दि निम्मय गुणदिं॥

[लेशतोऽपि दृष्टे दोषे 'कविलेखनस्य लोपोऽभूत् ' इति माऽधिक्षिप। तन्द्राजन्या विस्मृतिरेवात्र दोषस्य कारणम्। हे गुणाढ्या नवरसिकाः ! पठत, दोषांश्च परिमार्जयत।]

३.तुप्पं तुम्बिर्दगलोळु
कप्पिर्दुद तेगेदु भुञ्जिप तेरदिम्।
तप्पेन्नदे कृतियोळगण
तप्पं तिद्दुवुदु पण्डितर् भावज्ञर्॥

[यद्वत् घृतापूपपूर्णे शरावे पतित इङ्गालकणोऽपवार्यते, अपूपश्च भक्ष्यते तद्वत् पण्डितैर्भावज्ञैः कृतिगतो दोषः परिमार्जनीयः , 'दोषोऽयम्' इत्यनिन्दद्भिः ।]

४.ओप्पुवुदु बल्ल रसिकर्
तप्पुळ्ळरे तिद्दि बालकिंकर्बरहव।
तप्पं तप्पेने साधिप
रोप्पागि ताविरलि शिवसुखसन्तर् ॥

[सत्यामशुद्धौ शुद्धिं जानन्तो रसिकाः बालकिङ्करलेखनं शोधयन्तु। 'दोषास्तु दोषा एव' इति सिषाधयिषन्तस्तु जीव्यासुः स-शिवसुखाः। (सोत्प्रासं वचनम्)]

५.छन्दवनरियद बरहं
गोन्देयोळोन्दागि भृत्य भोगिप तेरदिं।
छन्दज्ञर बरहवेन्तेने
कुन्ददे श्रीराजलक्ष्मियाळिद तेरनुं॥

[छन्दोज्ञानं विना लेखनं, भक्ष्यपूर्णं शरावं गृहीत्वा भक्ष्यस्य

कबलीकरणमिव (?) ।छन्दोज्ञानिनां लेखनकृत्यं निष्कण्टकं राज्यलक्ष्मी-
शासनमिव।]

६.विलसत्कृतियं लिखिपा
गलसिके यिन्दुदितमाद दोषमनीग-
ळसले सत्प्रौढरु तिर्दियॆ
नलविं बुधकर्णकतुळ कौतुक माळपदु॥

[कदाचिदालस्यमपि दोषस्य हेतुर्भवति।परन्तु सत्प्रौढैर्विद्वज्जनैः प्रीत्या तस्मिन् शोधिते बुधकर्णेषु अतुलं कौतुकं जायते।]

आ.अन्यत् कन्नडपद्यम्

यॆप्पत्तुनाल्कु वरुषद
मुप्पिनवं बरद बरहविदरॊळगॊन्दरॆ
तप्पु तडॆयिद्दरॆल्लव
नॊप्पदि तिद्दुवदु नोडि विद्यावन्तरु[१]

[चतुरशीतितमे वयसि वर्तमानेन वृद्धेन कृतमिदं लेखनम्। सति दोषेऽत्र, विद्यावद्भिः सम्यक् शोध्यताम्।]

इ.एकं कन्नडगद्यम्

मूलप्रतियिद्द मेरॆगॆ बरदु यिदॆनॆ।यिदरल्लि तप्पु इद्दरॆ महा-बुद्धिवन्तराद भक्तमाहेश्वररु तंम मॊगुवॆन्दु भाविशि तिद्दिकॊम्बुवदु। उत्तमरादवरु बैयलागदू[२]।

१.तॊरवॆ रामायण- एतत् पद्यं डा.वै.सि.भानुमतीप्रणीतात् ''ग्रन्थसंपादनॆ विवक्षॆ ''ग्रन्थादुद्धृतम्।पु.२६

२.शरणलीलामृत-प्राच्यविद्यासंशोधनालयस्था मातृका-पि.१३७६३ पत्रं-१८९

[मूलप्रत्यनुसारमहं लिखितवान्। सत्यत्र दोषे, महाबुद्धिमन्तो भक्तमाहेश्वराः (मां)स्ववत्सं भावयित्वा शोधयेयुः। उत्तमैर्जनैर्न निन्दितव्यम्।]

ई.एतदर्थकं किमपि तेलुगुपद्यम्[१]

व्रालाशभ्रालुतघुलु
बालंगागलवुशब्दसंगतुवेरुगन्
गेलिचेट्टकनव्वक
पोलंगादिद्दरय्य बुधजनुलारा।

उ.एतदर्थकं किमपि मलयाळंपद्यम्

वीळक्षरं वरिविणङ्ङकवळ्ळिळपुळ्ळिळ-
दीर्घादिवीळ्ळचचिलविन्दुविसर्गवीळ्ळच।
इत्यादिपुस्तकमिळुत्तिल् वरुन्न दोषं
बुद्धिभ्रमाद् बुधजनङ्ङल् सहिच्चुकोळ्ळक।

८.कृतिचौर्ये खण्डनोक्तिः

ग्रन्थसंपादनशास्त्रेण कृतिचौर्यस्य नास्ति संबन्ध इत्यापाततः प्रतिभानेऽपि, ग्रन्थचौर्यस्य संपादितग्रन्थपीठिकायां स्पष्टैर्वाक्यैः खण्डनस्यावश्यकता समस्तीत्यतो ग्रन्थसंपादनशास्त्रसंबद्धमेवैतद् वस्तु। यथा-

"सूर्यदासेनार्जुनवर्मप्रणीतटीकायाः सर्वस्वमपहृतं, शेषरामकृष्णेन वेमभूपालटीका लुण्ठितेत्युभावपि परार्थहरणावतिसाहसिकौ पाटच्चराविति न संदेहः[२]।"

१.एतादृशानां सर्वेषां भारतीयभाषापद्यानामेकत्र संकलनमध्ययनं चाभीष्टतरम्।
२.अमरुशतकम्। सं। काशीनाथशर्मपरब्, वासुदेवशर्मा पणशीकरः निर्णयसागरमुद्रणालयः १९२९, पीठिका।

९.ग्रन्थकर्त्रा निःसृष्टः शापः

कृतिचौर्यं कुर्वाणाः केषुचन ग्रन्थेषु शप्ताः। अत्र शापस्य कर्ता ग्रन्थकर्तैव।

१.ग्रन्थादस्मादाहरन्ति प्रयोगान् स्वीयं वाऽस्मिन् नामधेयं क्षिपन्ति।
गोत्राण्येषामस्मदीयश्रमोष्मा भस्मीकुर्वन्नायुगं बोभवीतु [1]॥

२.यो नाम कश्चिदिह संकलितं (संवदितं)प्रमेयं
ग्रन्थान्तरे लिखति वा वदति स्वयं वा।
मत्कर्तृतामननुकीर्त्य न(स ?) कीर्तिलोपात्
निःसन्ततिर्जगति जन्मशतानि भूयात् [2]॥

परिशिष्टम् ७.१४९ पुटे दत्तेन विषयेण योजनीयं किञ्चित्

पुस्तकलेखकदोषादसंस्कृतानां मुखे च पतितत्वात्।
प्रभ्रष्टा ये पाठा ये चान्यैरन्यथा रचिताः ॥
तानाप्तेभ्यो नानापुस्तकसंदर्शनात् समाहृत्य।
अन्येभ्यः शास्त्रेभ्यः स्वधिया च विचार्य रचितमेतत्[3]॥

अस्मिन् पद्ये ग्रन्थसंपादनशास्त्रस्य मुख्याः प्रतिपाद्या विषया (लिपिकरप्रमादकारणानि, पाठान्तराणि, संपादनविधयश्च)नाम्ना कीर्तिताः। तस्मादतीव स्वारसिकमेतत्।

१.माधवप्रणीते माधवनिदाने (१.५)
२.भवदेवकृते तौतातितमततिलके(अनेकशः)।
३.विरहाङ्कृतस्य वृत्तजातिसमुच्चयस्य टीकायां गोपालकृतायाम् उपक्रमपद्ये ३,४. सं.प्रो.एच्.डी.वेलणकरः। राजस्थानप्राच्यविद्याप्रतिष्ठानम्, जोधपुरम्। १९६२ पु.१ (श्रीमता स.कार्त्तिकेन ग्रन्थोऽयं दत्तः प्रकृताय ग्रन्थकर्त्रे।)

परिशिष्टम् ८.

New Catalogus Catalogorum(N C C)

(मातृकासूचीनां नवीना सूची)

इदं सर्वेभ्यो ज्ञातं यत् सर्वेषां ग्रन्थानां सर्वा मातृकाः सर्वेषु मातृकालयेषु **नैव** सन्ति। संपाद्यग्रन्थस्य केवलमेका मातृका एकस्मिन् मातृकालये भवेत्। तस्यैव तिस्रो मातृकाश्चापरस्मिन् मातृकालये। कस्य ग्रन्थस्य कति मातृकाः कस्मिन्मातृकालये वर्तन्त इति कथं ज्ञेयमस्माभिः ?

मातृकासूचीरूपाणां हिमालयशृङ्गाणां मध्ये अभीष्टग्रन्थसंज्ञा-रूपाणां मूलिकानां प्राप्तौ क्लिश्नन्ति किंकर्तव्यमूढाः संपादकजन-हनुमन्तः। को भवत्वत्र इदमा ग्रन्थसंज्ञासु निर्देशं कुर्वन् ?

अत्रेदमुत्तरम्-**मातृकासूचीनां नवीना सूची** (New Catalogus Catalogorum) इतिनामको ग्रन्थः इदमा ग्रन्थसंज्ञासु निर्देशं कुर्वन् संपादकजनानां दृष्टिं तत्र निपातयति।

इदमभ्यूह्यताम्-**अकर्मकादिप्रयोग** इत्याख्या कृतिः संपादनीया। कस्मिन् मातृकालये तस्य मातृका लभ्यन्ते ?

परिशील्यतां <u>**मातृकासूचीनां नवीना सूची**</u>।(New Catalogus Catalogorum)तत्र <u>अकर्मकादिप्रयोग</u> इति प्रविष्टौ (Vol.1. Revised edition, University of Madras 1968 Ed.by V.Raghavan) क्रियतां दृष्टिनिक्षेपः। तत्रैवं दृश्यते - gr.Tract on voices of verbal foms for beginners. Adyar II.p.88a.

अत्र gr. इत्येतत् grammar (व्याकरणम्)इत्यस्य ग्राहकम्। प्रथमो वाक्यभागो ग्रन्थप्रतिपाद्यं वस्तु बोधयति।Adyar इत्येतत्

१. ७७ पुटस्थे 'ग्रन्थवरणम्' इति विभागे प्रथमप्रघट्टकानन्तरं योजनीयमिदम्।

किं बोधयतीत्यवगन्तुम् एतत्सूचीगतः Catalogues, lists etc. used in the New Catalogus Catalogorum , with the abbreviations used for themइति भागो द्रष्टव्यः। तत्र Adyar इत्यस्य विवरणमेवमस्ति- A catalogue of the Sanskrit manuscripts in the Adyar Library in two parts by the Pandits of the Library. Part.I,1926, Part II 1928. Quoted by Parts and pages. तस्मात् 'Adyar II.p.88a' इत्येतत् " Adyar Library द्वारा प्रकाशितायां सूच्यां द्वितीये संपुटे ८८ तमे पुटे प्रथमे स्तम्भे, अकर्मकादिप्रयोग-नामक-ग्रन्थस्य पाठेन समुपेतायाः/तयोः/तानां मातृकायाः/कयोः/काणां विवरणम् अस्ति" इति ज्ञापयति।

एषा सूची वस्तुतो **मातृकासूचीनां सूची** (Catalogus Cata-logorum) इति नाम बिभ्रती Theodor Aufrecht नाम्ना विदुषा प्रथमं त्रिषु खण्डेषु रचिता, १८९१-१८९६-१९०३ वर्षेषु प्रकटिता च। **मा.सू.न.सू.**तु तस्या एव विस्तृतरूपा पञ्चविंशत्यधिकखण्डयुता।

मा.सू.न.सू. मुद्रितानामपि ग्रन्थानां विवरणं ददाति यत् **मा.सू.सू.**ग्रन्थे नैवास्ति। परन्त्वत्र **मा.सू.न.सू.**परिशीलकैः सावधान-मनस्कैर्भाव्यम्। **मा.सू.न.सू.**ग्रन्थस्य यः खण्डो यस्मिन् वर्षे पूर्णतां गच्छति, तद्वर्षपर्यन्तं प्रकटितानां ग्रन्थानां विवरणं तस्मिन् खण्डे प्रविष्टं स्यान्न तु तदनन्तरं प्रकटितानां ग्रन्थानाम्। **मा.सू.न.सूच्या** अतीव स्थवीयसीत्वात् तत्सूचीसंपादकानां भ्रमप्रमादादिदोषैः कदाचित् प्रकटितानामपि ग्रन्थानां प्रकटनसूचना न भवेत्।

यद्वदस्माभिः प्रतिदिनं नूतनवार्ताज्ञानाय वार्तापत्रिकाः पठ्यन्ते तद्वत्,नवीनं ये ग्रन्थाः प्रकाश्यन्ते तन्नाम्नां बोधाय,ग्रन्थप्रकाशनसंस्थाभिः प्रकाश्यमानानां ग्रन्थानां सूच्यः शीलनीया याः प्रतिमासं/वर्षं निःसरन्ति।

परिशिष्टम् ९.ग्रन्थसंपादनाभ्यासार्थं प्रकृतेन ग्रन्थकर्त्रा रचितं पद्यषट्कम्

अधोनिर्दिष्टं पद्यषट्कं यथाग्रन्थसंपादनशास्त्रविधि संपाद्यताम्:-

प्रथमं पद्यम्

कन्नडलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

आकारयत्यन्यतीरे शाद्वलो नेत्रतर्पणः।
नद्यां नक्राश्च वीक्ष्यन्ते संप्रत्येणः करोतु किम् ॥

नन्दिनागरीलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

आकारयत्यन्यतीरे सद्वलो नेत्रतर्पणः।
नद्यां वक्राश्च वीक्ष्यन्ते संपत्येणः करोतु किम् ॥

तिगळारीलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

अकारयत्यन्नतीरे सद्वालो नेत्रतर्पणः।
नद्यां शक्राश्च बीक्षन्ते संप्रत्येणः करोतु किम् ॥

ग्रन्थलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

अकालयत्यन्यधीरे सद्वलो नेत्रदर्पणः।
नद्यां शक्ताश्च भिक्षन्ते शंप्रतेणः करोतु किम् ॥

द्वितीयं पद्यम्

कन्नडलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

दष्ट्वा चमरपुच्छेन स्फुरद्दंष्ट्रं सरीसृपम्।
तदशोर्लघुकाष्ठानि क्षिप्तानि गतभीतिना॥

नन्दिनागरीलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

दृष्ट्वा चमरपुच्चे स्फुरद्दतं सरिस्त्रपम्।
तद्रशोलगुकाष्ठानि क्षितानि गतभीतिना॥

तिगळारीलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

दष्ट्वा चमरपुच्छेन स्फुरद्दंतं भुजगमम्।
क्षिप्तानि लघुकाष्ठानि नेत्रे तस्य विना भयम्॥

ग्रन्थलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

दष्ट्वा चमरपुचेन फुरद्दंतं पुचङ्गमम्।
क्षिप्तानि लगुकाष्ठानि नेत्रे तस विना पयम्॥

तृतीयं पद्यम्

कन्नडलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

चित्रकेण गृहीताऽपि हरिणी निबिडे वने।
कथञ्चित् तरसाऽऽत्मानं माचयित्वा पलायिता॥

नन्दिनागरीलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

चित्तकेण ग्रहीताऽपि हारिणी निबिडे वने।
कथञ्चित् सहसाऽऽत्मानं मोचइत्वा पलाइता॥

तिगळारीलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

चित्रकेण ग्रहीताऽपि रिहणी निबिडे वने।
कथाञ्चित् तरसाऽऽत्मानं मोचयित्वा प्रधाविता॥

ग्रन्थलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

चित्रकेणाग्रहीनाऽपि रोहिणी निबिडे वने।
शीघ्रं कथञ्चिदात्मानं मोचयित्वा पधाविता॥

चतुर्थं पद्यम्

कन्नडलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

नमस्ते प्रथमचार्य यस शिक्षणकारणा।
कीर कटुरवोवोयि पाक कुशलोभून्नरोतिसु॥

नन्दिनागरीलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

नमस्त प्रथमचार्य यस्य शिक्षणकारणात्।
कीरः कटुरवोपि प्राक् कुशलोभून्नरोक्तिषु॥

तिगळारीलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

नमस्ते प्रमाचार्य यस्य शिक्षणकारणात्।
शुकः कटसरोवि दृकू कुशालो मानुसोक्तिषु॥

ग्रन्थलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

नमस्ते भ्रमाचार्य यस्य शिक्षणकारणात्।
शुक कटुस्वरोपि द्राक् कुलालो मानुडोक्तिषु॥

पञ्चमं पद्यम्

कन्नडलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

धेयं नानाय पानाय पङ्क्लेपाय चोदकम् ।
लघुस्तटाको ग्रीस्मेस्मि कास्तर्पयतु द्वीपान्॥

नन्दिनागरीलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

देयं नाताय पानाय पङ्क्लेपाय चोदकम् ।
लघुस्तटाको गीष्मेस्मिन् कान् कांस्तर्पयतु धूपान्॥

तिगळारीलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

देयं स्नानाय पानाय पङ्क्लेयाय चोदकम् ।
लघुस्तडागो ग्रीष्मेन् कां कां तर्पयतु द्विपान्॥

ग्रन्थलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

देयं स्नानाय पानाय बङ्क्लेह्याय चोदकम् ।
लघुस्तडागो ग्रामेस्मिन् कां कां तर्पयतु धूपान्॥

षष्ठं पद्यम्

कन्नडलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

मधु गृहीतुं मधुमक्षिकागृहे
द्रुमस्थिते मोक्ष करं प्रचारयन्।
स्मितेन भल्लूक मुदं प्रदर्शयन्
जयस्यमी धूमघनेन वर्ष्मणा॥

नन्दिनागरीलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

मधु ग्रहीनुं मधुमक्षिकागृहे
द्रुमस्थिते मोक्ष करं प्रसारयन्।
मितेन भल्लूक मुदं प्रदर्शयन्
जयस्यभी व्योमघनेन वर्षणम्॥

तिगळारीलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

द्रुमस्तिते मक्ष खरं प्रहारयन्
मधु ग्रहीतं मृदुमक्षिकाग्रहे।
स्मितेन भल्लूक मुधा प्रदर्शयन्
जयस्यबी रोमगनेन वर्मणा॥

ग्रन्थलिप्या युक्तायां मातृकायां लब्धः पाठ एष इत्यभ्यूह्यताम्-

द्रुमस्थिते मंक्षु करं प्रसारयन्
मधु ग्रहीतुं मुधुमक्षिकागृहे।
स्मितेन भल्लूक मुधं प्रदर्शयन्
जयस्यभी रोमघनेन वर्ष्मणा॥

परिशिष्टम् १०.कटपयादिसूत्रेऽवशिष्टं किञ्चित्[1]

सोमयाजिश्रीरामचन्द्रेण विरचिते समरसारे[2] कटपयादिसूत्र-बोधकः कश्चन श्लोकोऽस्ति। स श्लोकोऽयम्:

"कादयोऽङ्काष्टादयोऽङ्काः पादयः पञ्च कीर्तिताः।
यादयोऽष्टौ तथा प्राज्ञैर्गणकैर्बुद्धिमत्तरैः।"

नवसंख्यानामोल्लेखनस्थले तत्सूचकम् 'अङ्क'पदमत्र प्रयुक्तमिति विशेषः। अत्र संयुक्ताक्षराणां न-ञयोश्चोल्लेखो नास्ति।

व्याख्याकृता हनूमच्छर्मणाऽन्ये श्लोकभागा उद्धृताः :-

१.'कटपयवर्गैर्नवनवपञ्चाष्ट न-ञ-ज्ञाः शून्यबोधकाः।'

२.'कादिर्नवाङ्का नव टादिरङ्काः पादिश्शरा यादि भवन्ति चाष्टौ'।

३.'ने(!न?)ञे शून्ये स्वराश्च शून्याः।'

१.कटपयेत्यादिकमार्याछन्दसा निबद्धम्। नेत्यादिकमानुष्टुभेन छन्दसा। द्वयोः संमिश्रणमत्र स्फुटम्। स्वरसंयुक्ताक्षरयोः प्रस्तावोऽत्र नास्ति। ञकारेण शून्यं बोध्यमिति प्रसिद्धत्वेऽपि, जकाराव्यवहित-ञकारवत् 'ज्ञ' इतीदं संयुक्ताक्षरमपि शून्यं बोधयतीत्यत्रोक्तमिति विशेषः। तच्चानावश्यकं संयुक्ताक्षरेष्वन्तिमस्यैवाक्षरस्य गणनीयत्वात्।

२-३.कादिरित्यादिकमिन्द्रवज्रायां निबद्धम्। नेञेत्यादिकं कस्मिन् छन्दसीति न स्पष्टम्। पञ्चसंख्यानामोल्लेखनस्थले तत्सूचकं 'शर'पदमत्र प्रयुक्तमिति विशेषः। संयुक्ताक्षराणां प्रस्तावोऽत्रापि नास्ति।

प्रकृतेन ग्रन्थकर्त्रा कटपयादिसूत्रलक्षणमित्थं कृतं समरसारोद्धृत-पद्यस्य पूर्वार्धं यथावत् स्थापितवता, उत्तरार्धं नवं रचितवता च :-

'१.कादयोऽङ्काष् २.टादयोऽङ्काः, ३.पादयः पञ्च कीर्तिताः।
४.यादयोऽष्टा ५.ञ्नञाः खं[3] ६.हलु, मिश्रेऽन्त्यो[4] ७.न हलस्वरः॥[5]'

१. पु. २५५ अपि द्रष्टव्यम् ।

२.समरसारः। रचयिता- सोमयाजिश्रीरामचन्द्रः। व्याख्याता हनूमच्छर्मा। प्र. खेमराज श्रीकृष्णदासः, वेङ्कटेश्वर स्टीम् प्रेस्, मुम्बयी। (मुद्रणतिथिः ?) पु.५

३.अचः, नकारः, ञकारश्च खं शून्यं बोधयन्ति।

४.मिश्रे=संयुक्ताक्षरे अन्त्यो हल् (व्यञ्जनम्)। गणनीय इति शेषः।

५.अस्वरः=स्वररहितः हल् (व्यञ्जनम्) त् म् इत्यादिः। न= न गणनीयः।

नीलकण्ठचतुर्धरकृतायां भावदीपाख्यायां महाभारतव्याख्यायां कटपयादिसूत्रानुसारेण पर्वगतानामवान्तरपर्वणां संख्या शार्दूलविक्रीडितछन्दसा संदृब्धे पद्ये इत्थं निरदेशि (आदिपर्वणि द्वितीयाध्याये पद्यसंख्या ३९६) -

आदि-ध्या[१९]न सभा-ध[९]नं वन-चयं[१६] वैराटभू[४]द्योगयुक्[११]
भीष्मद्रोण-म[५]-जं[८] च कर्ण-कु[१] तथा शल्ये-भ[४] सौषुप्त-गम्[३]।
स्त्री-शं[५] शान्ति-भ[४] दानधर्म-कु[१] हयेज्या-रा[२]ऽऽश्रमावास-गं[३]
कं[१] कं[१] मौसलयानयोर्द्युगति-कं[१] वंशे ख[२]मेतच्छतम्॥

(हयेज्या=आश्वमेधिकपर्व, यानं=महाप्रास्थानिकं, द्युगतिः=स्वर्गरोहणं, वंशे=हरिवंशे)

अत्र कतिचन वैलक्षण्यानि वर्तन्ते यथा-

१.प्रथमपादे 'ध्यान'इत्यत्र धकारयकारयोः संयुक्ताक्षरकृत्त्वमवगणय्य तयोः पार्थक्येन ग्रहणम्।

२.प्रथमपादे 'चयं' इत्यत्र 'अङ्कानां वामतो गतिः'इति न्याय-स्याश्रयणेन १६ अङ्कस्य निःसारणम् ।(तदनाश्रयणे तु ६१ अङ्को निःसरेत्।)

३.प्रथमपादे 'युक्' इत्यत्र ककारस्यापि ग्रहणं, तेन 'न हलस्वरः' इति विधेस्त्यागः। अग्रे 'भी' इत्यस्य वर्णस्य सत्त्वेऽपि १ संख्यानिःसारणाय 'क्' इत्यस्य अवशेषणपूर्वकं जश्सन्ध्यकरणम्।

४.द्वितीयपादे 'च' इत्यस्य 'तथा' इत्यस्य च पादपूरणमात्रप्रयोजनवत्त्वम्।

